॥ श्रीः ॥

श्रीकवितार्किकसिंहेन सर्वतन्त्रस्वतन्त्रेण

श्रीमद्वेङ्कटनाथेन वेदान्तचार्येण

विरचिता

शतदूषणी

नृसिंहराजेन विरचितया

नृसिंहराजीयटीकया सहिता

प्रथमो भागः

[illegible]दादारभ्य त्रिंशद्वादपर्यन्ता)

[illegible] चैत्रशुद्ध आर्द्रायां प्रकाशिता

शकाब्दः १९२४ क्रैस्ताब्दः २००१

NEW DELHI

॥ श्रीः ॥

श्रीकवितार्किकसिंहेन सर्वतन्त्रस्वतन्त्रेण

श्रीमद्वेङ्कटनाथेन वेदान्तचार्येण

विरचिता

शतदूषणी

नृसिंहराजेन विरचितया

नृसिंहराजीयटीकया सहिता

प्रथमो भागः

(प्रथमवादादारभ्य त्रिंशद्वादपर्यन्ता)

वृषसंवत्सर चैत्रशुद्ध आर्द्रायां प्रकाशिता

शकाब्दः १९२४ क्रैस्ताब्दः २००१

First Edition : April 2001
No. of Copies : 1000 copies

DTP : **KRS GRAPHICS**
5/1, Krishnapuram Road,
Choolaimedu, Chennai - 600 094

Printed at : **SRI ANDAL PRINTERS**
4, Rosary Church Road 1st Lane,
Santhome, Chennai - 600 004
Ph. : 495 6982 P.P.

~~NEW DELHI.~~

Published with financial Assistance from T.T. Devasthanams, Tirupati "UNDER AID TO AUTHORS' SCHEME" AID Rs. 20,000

The publisher expresses his profound gratitude for those who contributed in bringing out this nobel work of

Sri Vedanta Desika

1.	**T.T. Devastanams, Tirupati**	**Rs. 20,000/-**
2.	**Madurantakam U.Ve. Sri Veeraraghavacharya Swamy Trust**	**Rs. 5,000/-**
3.	**Sri S.V.S. Raghavan** **Flat No. 2, Door No. 1, Prithivi Avenue,** **Abiramapuram, Chennai - 600 018**	**Rs. 10,000/-**
4.	**Sri T.K. Seshadri & T.K. Bhaskar** **Advocates** **194, Lloyds Road, Chennai**	**Rs. 5,000/-**
5.	**Shree Synthetic Limited** **713, Ist Floor, N.R. Road, Moti Nagar,** **Opp. Corporation Quarters, Bangalore**	**Rs. 5,000/-**

"अत्रेदं प्रस्तूयते"

"कलयतां कवितार्किककेसरि प्रकटितां शतदूषणिकां हृदि"॥

(प्रतिवादिभयंकरं अण्णा)

वृत्तिकारबोधायनमतानुसारि श्री रामानुजैः परिष्कृतविशिष्टाद्वैतमते असारनिरसनात्मिका इयं शतदूषणी। केनचिद्वादिना साकं वेदान्तदेशिकगुरोः वादे संप्रवृत्ते गुरोच्छिष्यैः श्रीब्रह्मतन्त्रस्वामिभिः विलिखिताः श्रीमद्वेदान्तदेशिकैः परिशीलिताः शतदूषणीस्थवादाः । प्रतिवादिकृतैकोक्तिः सान्वर्थनाम्न्या अनया शतदूषण्या दूषणशतेन निराक्रियते।

अत्रैको वृत्तान्तः। नैषधमहाकाव्यकर्तुः श्रीहर्षस्य पिता श्री हीरः प्रसिद्धनैयायिकेन उदयनाचार्येण वादे पराजितोऽभूत् । परिभवमसहमानः श्री हीरः स्वपुत्रं श्रीहर्षं चिन्तामणिनामकमंत्रोपासनेन विपश्चितं लब्धसिद्धिं च कारयित्वा उदयनाचार्यं वादे पुत्रमुखेनाजयत्। पितुः परिभवेन अशान्तकोपः श्री हर्षः उदयनकृतन्यायकुसुमाञ्जलिं खण्डयितुं उद्युक्तः खण्डनखण्डखाद्यमिति अनिर्वचनीयवादप्रतिपादकं प्रसिद्धग्रथं रचितवान् । ग्रंथोऽयं अन्ततः रामानुजमतखण्डने एव पर्यवस्यति। श्रीहयग्रीवमन्त्रोपासनेन तद्देवताप्रसादजनितेन धिषणया श्रीवेदान्ताचार्याः विशिष्टाद्वैतमते खण्डनखण्डखाद्ये आपादितान् दोषान्ः निराकृत्य रामानुजमतं समर्थयामासुः।

श्रीमद्वेदान्तदेशिकावतारकालः

गुरुपरंपराप्रभवे,

श्रीधीयोग्ये शकेवषे उदभूद्वेङ्कटेश्वरः।
लब्धप्राये शके सौम्ये प्रयातः परमं पदं॥

तीर्थदिनं तवत्

अब्दे सौम्ये च वारे गतवति तरणौ वृश्चिकं कृत्तिकर्षे
राकायां वेङ्कटेशो यतिनृपतिमनं सर्वतः स्थापयित्वा।
वेदान्ताचार्यनामाविरचितविवधानेकप्रबन्धः
श्रीशैलाधीशघण्टाकृतिवपुरभवद्देशिकेन्द्रोदयाळुः। इति

गुरुपरंपराप्रभावे शके वर्षे जन्म इत्युक्तं। महाचार्यकृतवैभवप्रकाशिका विभवसंवत्सरे आचार्याणामवतारोऽभूत् इति वदति । आचार्यदशकादिषु एवमेवास्ति । अष्टोत्तरशतनाम्नि विभवाब्दसमुत्पन्नेत्युक्तं । विभवर्षे कन्या (भाद्रपद) शुद्धदशमीबुधवासरे श्रवणनक्षत्रे आचार्याणामवतारः इति साम्प्रदायिकाः।

परन्तु डा.स्वामिकण्णुपश्चाङ्गरीत्या तिथिवारनाक्षत्रमासयोगः प्रमोदूतवत्सरे भवति । अतः प्रमोदूतवत्सरे आचार्याणामवतारः इति विमर्शकाः वदन्ति ।

वेदान्ताचार्याः-काव्यस्तोत्रधर्मशास्त्रशिल्पवैद्यभूगोलमीमांसावेदान्तादिशास्त्रेषु एवं द्रामिडभाषायामपि परश्शतान् ग्रन्थान् आरचयन् । ब्रह्मसूत्रप्रस्थानपरिष्कारग्रंथाः अधिकरणसारावळी शतदूषणी तत्वटीका अधिकरणदर्पणः चकारसमर्थनं चेति पञ्चग्रंथाः ।

शतदूषणी व्याख्यात्रयेण विराजते । प्रथमा चोळसिंहपुरमहाचार्यैः कृता चण्डमारुताख्या । द्वितीया तच्छिष्यैः नृसिंहराजैः विरचिता नृसिंहराजीयाख्या । तृतीया करूरू श्रीनिवासाचार्यैः विरचिता सहस्रकिरणी नामिका पंचदशवादपर्यन्ता ।

व्याख्याकर्तृषु एषु महाचार्याणां (शुद्धसत्वं दोड्डय्याचार्याः) अथवा रामानुजदासानां कालः क्रैस्ताब्दः षोडशशतकः । समकालिकैः सर्वशास्त्रपारंगतैः अप्पय्यदीक्षितैः साकं दोड्डय्याचार्याणां वादः समजनि । तदा एकस्मिन् रात्रौ दोड्डय्याचार्याणां स्वप्ने वेदान्तदेशिकाः आगत्य अप्पय्यदीक्षितकृताक्षेपाणां समाधिः शतदूषण्यामस्तीति सूचितवन्तः । महाचार्याः तत्क्षणे स्वापादुत्थाया शतदूषणीमवलोक्य परेद्युः दीक्षितान् वादे अजयन् । तदारभ्य एते वेदान्ताचार्येषु नितरां भक्तिमन्तश्चाभवन् । एतैः विरचिता चण्डमारुताख्या व्याख्या नृसिंहाश्रमैः अद्वैतदीपिकायाः खण्डनात्मिका । वेदान्तविजयनामकपञ्चग्रन्थी रचयितारश्च । पाराशर्यविजयाख्यस्य ब्रह्मसूत्रव्याख्यायाः कर्तारः ।

महाचार्याणां शिष्येषु प्रधानतमाः चत्वारः । तत्र प्राथमिकाः श्रीनृसिंहराजाः । नृसिंहदेवः सिंहदेवः इति नामान्तरे विद्येते । द्वैतीयकाः भावनाचार्यपौत्रः आत्रेय भावनाचार्यः । तार्तियकाः स्वामिपुष्करिणी गोविन्दाचार्य सूनवः गोविंदाचार्याः । तुर्याः चंपकेशविजयकर्तारः चंपकेशाचार्याः ।

एते नृसिंहराजाचार्याः श्रीमनवाळमामुनिशिष्यशरण्याचार्याणां पुत्रस्य देवराजस्य तिरुवल्लूरू क्षेत्र समीपवर्ति एरुम्बिग्रामवास्तव्यस्य एरुम्बियप्पा अथवा देवराजस्य वंशीयाः हयग्रीवोपासकाश्चेति ज्ञायते । कालः क्रैस्ताब्दः सप्तदशकशतकः । क्रैस्ताब्दे षोडशेशतके वैदुष्येण सुप्रथितानां न्यायामृतकाराणां व्यासतीर्थानां वचनानामनुवादः नृसिंहराजस्य पितामहेन बिंबप्रकाशिकाकर्त्रा देवराजेनानुवादात् सिंहदेवस्य कालः प्रायः सप्तदशशतकः इत्युन्नीयते । श्रीवत्सगोत्रोयं माता तोतारम्बा । कुशिककुलतिलकः श्रीभाष्यं श्रीनिवासाचार्यः अस्य मातामहः । कौशिक श्रीनिवासाचार्यान्तिके वेदान्ताशास्त्र ग्रहणं । "सुराचार्यसमप्रज्ञंमप्पलाचार्यमाश्रये" इत्यानन्ददायित्यारम्भे उपलंभात् ꣳप्पलाचार्योप्यस्य गुरुः ।

अस्य प्रबंन्धाः परतत्वदीपिका । भेदधिक्कारन्यक्कारः । मणिसारधिक्कारः । सिद्धान्तनिर्णयः । सर्वार्थसिद्धिव्याख्या आनन्ददायिनी । निक्षेपरक्षाव्याख्या नृसिंहराजीया । शतदूषणी व्याख्या नृसिंहराजीया । इत्यादयः । अनेन वेदान्ताचार्याणां सर्वेषाग्रंथानां व्याख्यनं कृतमित्यपिवदन्ति ।

अस्य व्याख्याशैली अनितरसाधारणी। स्वयमेव जोघुष्यति आनन्ददायिन्यारम्भे ''अप्रसिद्धस्य पक्षस्य विसत्रेणप्रकाशिकां। सर्वार्थसिद्धि सट्टीकां करोम्यानन्ददायिनीं इति।

विद्वद्भिः कातररेण प्रतीक्षमाणोऽयं ग्रंथमिदनी हस्तापचेयफलमिवाभूत्। अवशिष्टाः वादाः यथावकाशं प्रकाशी क्रियन्ते। यथाहस्तप्रति तथैव मुद्रितो यंग्रंथः। मुद्रणे संभाविताः दोषाः स्वयं परिशोधनीयाः बोधनीयश्चायं जनः।

सम्प्रदायस्य बहूपकाराय अयं ग्रंथः नूनं भविष्यतीत्याशासनेन मां प्रोत्साहितवद्भ्यः मयि अत्यंत कृपाविष्टचेतसेभ्यः श्रीमद्वेदमार्गेत्यादिबिरुदविभूषितेभ्यः श्रीअहोबिलमठ श्रीलक्ष्मिनृसिंहा स्थानाधिपतिभ्यः श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्रमहादेशिकेभ्यः मदीयान् प्रणति कुसुमांजलीन्.भक्त्या रामर्पर्यामि

एवं मयि अत्यन्तदयापूरितचेतसेभ्यः अस्मिन्नुद्योगे अत्यन्तमादरं आनन्दं च प्रकटितवद्भ्यः श्रीमद्वेद मार्गेत्यादि बिरुदविभूषितेभ्यः श्रीरंगं श्रीमदाण्डवन् श्रीरङ्गरामानुजमहादेशिकेभ्यः मदीयान् प्रणतिकुसुमांञलीन् भक्त्या समर्पयामि।

अन्यश्च, ''सिद्धंचन्ति कर्मसु यन्नियोज्याः संभावनागुणमवेहि तमीश्वराणां'' इतिं रीत्या अस्मिन्नुद्योगो मम आदिमप्रवर्तयितृभ्यः श्रीत्रिदण्डी रमानुजजीयर्यतिवर्येभ्यः मादीयान् नमो वाकान् मुहूः मुहूः समर्पयामि।

मेलुकोटे क्षेत्रस्थ सर्वकारीय संस्कृतकलाशालासंबन्धि सरस्वतीभंडारीय नृसिंहराजीय व्याख्यायाः (१-५८ वादाः) जेराक्स प्रतिकृतीः प्रदत्तवद्भ्यः प्रांशुपालेभ्यः श्री अरैयर श्रीरामशर्मभ्यः मदीयान् कृतज्ञतापूर्वकधन्यवादान् समर्पयामि।

श्रीनिगमान्तमहादेशिकानां चित्रान् अयाचितं दत्तवद्भ्यः उ.वे श्री माधवाचार्यमहोदयेभ्यः मदीयाः साधुवादाः।

मुद्रणे परिशोधने बहूपकृतवते मधुरान्तकं श्रीअहोबिलमठीयसंस्कृतकलाशाला न्यायशास्त्राध्यापकाय आर नीडामंगलं श्रीलक्ष्मीनृसिंह शर्मणे मम अशिषः।

इदं पुस्तकं रमणीयतया मुद्रितवद्भ्यः श्री एस् रविमहोदयेभ्यः (आण्डाळ प्रिन्टर्स) एवं आर.गीता, सुधाभ्यां (के.आर एस.ग्राफिक्स्) मदीयाः धन्यवादाः।

इत्थं सम्पादकः

विद्वज्जनविधेयः

मैसूर टि.के.श्रीनिवासताताचार्या

विषयानुक्रमणिका

	विषयः	पत्रसङ्ख्या
१.	ब्रह्मशब्दवृत्त्यनुपपत्तिवादः	१-९
२.	जिज्ञासानुपपत्तिवादः	९-१७
३.	ऐकशास्त्र्यसमर्थानवादः	१८-३०
४.	अविधेयज्ञानभङ्गवादः	३१-४३
५.	बाधितानुवृत्तिभङ्गवादः	४३-४५
६.	विविदिषासाधनत्वभङ्गवादः	४६-५१
७.	शब्दजन्यप्रत्यक्षभङ्गवादः	५२-६९
८.	साधनचतुष्टयपूर्ववृत्तत्वभङ्गवादः	७०-८१
९.	कथानधिकारवादः	८२-८६
१०.	निर्विशेषस्वप्रकाशभङ्गवादः	८७-९४
११.	निर्विशेषविषयनिर्विकल्पकभङ्गवादः	९५-१०६
१२.	सन्मात्रग्राहिप्रत्यक्षभङ्गवादः	१०६-१११
१३.	भेददूषणनिरासवादः	११२-१२२
१४.	वेदप्रामाण्यपरिग्रहानुपपत्तिवादः	१२२-१२९
१५.	दृश्यत्वानुमाननिरासवादः	१२९-१३८
१६.	व्यावर्तमानत्वानुमानभङ्गवादः	१३९-१४२

१७.	दृग्दृश्यसम्बन्धानुपत्तिपरिहारवादः	१४३-१५६
१८.	बाह्यप्रकाशानुपपत्तिवादः	१५७-१६०
१९.	ब्रह्मश्रयाज्ञाननिरासवादः	१६१-१६६
२०.	अवेद्यत्वभङ्गवादः	१६७-१७५
२१.	संविदनुत्पत्तिदूषणवादः	१७६-१८२
२२.	संविन्निर्विकल्पत्वानुमानभङ्गवादः	१८३-१८७
२३.	संविन्नानात्वनिषेधकानुमानभङ्गवादः	१८८-१९२
१४.	निर्विशेषत्वानुमानभङ्गवादः	१९३-१९७
२५.	संविदात्मत्वंभङ्गवादः	१९७-२०२
२६.	अहमर्थात्मत्वसमर्थनवादः	२०३-२१०
२७.	ज्ञातृत्वाध्यासभङ्गवादः	२११-२२०
२८.	साक्षित्वभङ्गवादः	२२१-२२४
२९.	प्रत्यक्षशास्त्र विरोधपरिहारवादः	२२५-२३३
३०.	असत्यात्सत्यसिद्धिभङ्गवादः	२३४-२४५



ஸ்ரீமந் நிகமாந்த மஹாதேஶிகன்

श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

॥श्रीरस्तु॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः।

श्रीमते हयग्रीवाय नमः। श्रीमते रामानुजाय नमः।

श्रीमते निगमान्तमहादेशिकाय नमः।

श्रीमद्वेदान्तदेशिकविरचिता

॥ शतदूषणी ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि॥

॥ अथ ब्रह्मशब्दवृत्त्यनुपपत्तिवादः प्रथमः ॥१॥

समाहारस्साम्नां प्रतिपदमृचां धाम यजुषां लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः।

श्रीः

नृसिंहराजीयटीका

श्रीहयवदनपरब्रह्मणे नमः। "श्रियै" नमः।

॥ शुभमस्तु ॥

श्रियै सततमस्तु मे भुजगराजशैलाधिपः
श्रियं वहति वक्षसा श्रितजनैकरक्षाकरः।
दयासहचरस्सदा विहितवाजिवक्त्राकृतिः
जगज्जननरक्षणक्षपणकेलिदीक्षागुरुः ॥

ऋषीणां सप्तानां सुकृतपरिपाकेन महता
समाविर्भूतो यो महति घटिकाशैलशिखरे।
महाचार्याद्यार्यैरमरगुरुकल्पैरधिगतः
स नः श्रेयो देयादमृतफलवल्लीसहचरः ॥

प्रारिप्सितस्य ग्रंथस्याविघ्नपरिसमाप्तिप्रचयगमनाय शिष्टाचार प्राप्तमिष्टदेवताप्रार्थनात्मकं मंगळं शिष्यशिक्षायै निबध्नाति समाहार इति। हयवदनहेषाहलहलोन्तर्ध्वांतं हरत्विति संबंधः। अज्ञानरूपस्वांतध्वांतस्य हरणं प्रमाकरणत्वे सत्येव भवतीति प्रमाकरणत्वमाह साम्नां समाहार इत्यादिना। ऋचां प्रतिपदं प्रतिनिधिरित्यर्थः। यजुषां धाम स्थानं। ननु प्रमाणस्याप्यज्ञाननिवर्तकत्वं ज्ञानद्वारेति वक्तव्यं। ज्ञानं च प्रतिबंधान्नसंभवतीत्यत्राह लयः प्रत्यूहानामिति। नन्वेवमप्यज्ञानस्य निवृत्तिस्संभवति चेत् विस्मरणे सति पुनः प्रसंग इत्यत्राह लहरिविततिर्बोधजलधेरिति। उत्तरोत्तरज्ञानसन्तानकर इत्यर्थः।

कथादर्पक्षुभ्यत्कलिकथककोलाहलभवं हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः ॥१॥

इदंप्रथमसम्भवत्कुमतिजालकूलङ्कषा मृषामतविषानलज्वलितजीवजीवातवः।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तयश्चिरन्तनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः ॥२॥

प्राचीमुपेत्यपदवीं यतिराजदृष्टां तत्सन्निकृष्टमपि वा मतमाश्रयन्तः।
प्राज्ञा यथोदितमिदं शुकवत्पठन्तः प्रच्छन्नबौद्धविजये परितो यतध्वम् ॥३॥

वादाहवेषु निर्भेत्तुं वेदमार्गविदूषकान्। प्रयुज्यतां शरश्रेणी निशिता शतदूषणी ॥४॥

तत्र तावच्छास्त्रारम्भे-

विचारविषयत्वेन सूत्रकृद्यदसूत्रयत्। परोक्ता ब्रह्मशब्दस्य वृत्तिरत्र निरस्यते ॥

निर्विशेषब्रह्मवादे ब्रह्मशब्दस्य कचिन्मुख्यवृत्तत्वमस्ति न वा न चेत् असाधुत्वापत्तिः। साधुत्वस्य मिथ्यात्वमभ्युपगच्छतामसाधुत्वमिष्टमिति चेत् हन्त तर्हि सर्वशब्दासाधुत्वम्। साध्वसाधुविवेकाभावे

अज्ञानकारणमाह कथेति। वादेषु क्षुभ्यन्तः उध्दताः। कलिकथकाः कलिकालविद्वांसः। केवलं नास्तिका इति यावत् ॥

ननु पूर्वतनकलिकथककोलाहलस्य निरासेपि भाविकलिकथककोलाहलादन्तर्ध्वातसंभवे स्वकृतिवैयर्थ्यमित्याशंक्याह इदं प्रथमेति। यतिपुरंदरोक्तीनामेवात्र ग्रंथे सन्निवेशात्ताभिः प्रसाधित-वेदान्तैरेव तन्निरास इति भावः।

चिकीर्षितस्य ग्रंथस्य प्रयोजनं दर्शयति प्राचीमिति। एतद्ग्रंथाध्येतृणां परमतनिरसनं सुकरमित्याह वादाहवेष्विति। तत्र शतदूषण्याख्ये ग्रंथे, तावत्प्रथमवादे निरस्यत इति संबध्यते। शास्त्रारंभ इत्येतदसूत्रयदित्यनेन।

शास्त्रारंभः "अथातो ब्रह्मजिज्ञासे" (ब्र.सू १-१-१)ति सूत्रं। विचारविषयत्वेन विचारस्य विषयतया यत् वेदान्तवाक्यं असूत्रयत् सूत्रेण व्याख्यात् दात्रेण लुनाति दात्रयतीतिवत् "प्रातिपदिकात् धात्वर्थे बहुलमिष्टवच" (अष्टा-वर्तिकं) ति णिच्, "सूत्र विमोचन" इतिवा। विमोचनं प्रतिपादनं। अत्र सूत्रविषयभूते "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयंत्यभिसंविशंन्ति। तद्विजिज्ञासस्वे" (तै-आ-आनन्दवल्ली) ति वाक्ये ब्रह्मशब्दस्य, परोक्ता लक्षणावृत्तिरित्यर्थः। असाधुत्वापत्तिरिति। साधुत्वं हि शक्तिमूलकप्रयोगविषयत्वं। शक्त्यभावे न सम्भवतीत्यर्थः। असाधुत्वं साधुत्वाभावः। हन्तेति। पारमार्थिकसाधुत्वाभावेपि व्यावहारिक साधुत्वस्य त्वदिष्टत्वात्तन्नस्यादिति भावः। साध्वसाध्विति। "एकश्शब्दः सष्ठुप्रयुक्तः स्वर्गेलोके कामधुग्भवति" (खिलश्रुतिः) "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वयेत्" (याज्ञिकाः) "ते सुरा हेलयो हेलय इति कुर्वन्तः परावभुवुः"। "तस्माद्ब्राह्मणेन न म्लेच्छित वै नापभाषीत वै म्लेच्छो हवा एष यद पशब्दः" इति साधुशब्दविधिः, प्रायश्चित्तविधिरपशब्दप्रयोगनिषेधो निन्दार्थवादश्च प्रमाणमिति तदंशे नित्यत्वादेः प्रामाण्यानुपपादकतया अन्यत्रापि प्रामाण्यानुपपादकत्वात् कृत्स्नवेदाप्रमाण्ये वेदस्य व्यर्थत्वात्। तद्वैयर्थ्यादिव तदङ्गानां वैयर्थ्यं। व्याकरणस्य अन्यत्रापि प्रामाण्यानुपपादकत्वात् कृत्स्न वेदाप्रमाण्ये वेदस्य व्यर्थत्वात् तद्वैयथ्यादेव तदंगानां वैयर्थ्यं। व्याकरणस्य च सुतरां वैयर्थ्यं चेत्याह साध्व साध्विति। ननु वृत्तिमत्वं बोधकत्वं वा साद्युत्वमस्तु लक्षणया तत्संभवादित्यत आह

च कृतं साङ्गोपाङ्गैर्वेदैः। मुख्यार्थशून्यस्य तन्मूलवृत्त्यन्तरे लिङ्गत्वे चासम्भवति कथं क्वचिद्बोधकत्वमपि। नच साङ्केतिकोऽयमपभ्रंशो वा येन वाचकत्वाभिमानाद्बोधकत्वं स्यात्। यस्यायमपभ्रंशश्शङ्क्येत सोऽपि तथा वृत्तिविकल्पेन निर्धूयेत।

ननु ब्रह्मशब्दस्यायं महिमा-यन्मुख्यार्थविरहेऽपि नित्यं लक्षणया ब्रह्म बोधयतीति, तदिदं बन्ध्यायाः पौत्रदर्शनम्। मुख्यार्थसम्बन्धिन्यमुख्ये वृत्तिर्हि लक्षणा, तदभावेऽपि तद्वृत्तिं भवानेव भाषेत। किंचैवं मुख्यार्थशून्यास्सर्वे शब्दास्तंतमर्थं लक्षयन्तीति स्वीक्रियेत महामीमांसकेन। को हि त्वदुक्तन्यायवित्कुत्रापि शक्तिक्लृप्तिगौरवं मृष्येत्, मुख्यार्थशून्येन ब्रह्म लक्ष्यमिति वदता तदपि मुखान्तरेण संवृतिमुखे निक्षिप्तम्। अवाच्यवादाश्च वाच्यवादेन निरसिष्यन्ते। अस्ति चेत्किमन्यस्मिन् विचारविषये वा, नाद्यः। निर्निमित्तत्वे पुनरसाधुत्वापातात्। यदृच्छाशब्दोऽपि हि स्वरूपनिमित्तकश्शास्त्रज्ञैश्शिक्षितः। नचायं सः; मानाभावात्, निरुक्तिविरोधाच्च। सनिमित्तत्वे च

मुख्यार्थ शून्यस्येति। मुख्यार्थाभावे तत्संबंधादिरूपवृत्त्यंतरस्याप्यभावात् वृत्तिसामान्याभावे वृत्तचास्मारितार्थसंसर्गज्ञानपूर्वकत्वरूपसाध्यस्य बाधादाकांक्षादीनां वृत्तिमत्वाधीनतया तदभावे आकांक्षादिमत्कदंबकत्वादिरूपलिंगासिद्ध्या स्वरूपासिद्धेः व्याप्तिग्रहायोगाच्च। व्याप्यत्वासिद्धेश्च लिंगविधयापि बोधकत्वायोगादुक्तं साधुत्वं नसम्भवतीति भावः। ननु ब्रह्मशब्दस्सांकेतिकोऽपभ्रंशो वास्तु। तस्यासाधुत्वमिष्टमेव। नच तर्हि लक्षणाङ्गीकारो न स्यादिति वाच्यं। शक्तिभ्रमाद्वृत्तिभ्रमसंभवाद् भ्रांति सिद्धा च वृत्तिरेव लक्षणेति विवक्षितमित्यत्राह नच सांकेतिक इति। अपौरुषेयत्वान्नसांकेतिकत्वं अशक्त्यादिप्रयुक्तापभ्रांशत्वं वेत्यर्थः। अपभ्रंशत्वे दूषणांतरमाह यस्येति। सोप्यपभ्रंश इति वक्तुं शक्यत इत्यर्थः। वृत्तिविकल्पेनेति। किमपभ्रंशस्य मूलभूतश्शब्दो मुख्यः उत सोप्यपभ्रंशः। आद्ये ब्रह्मशब्देन किमपराद्धं। अवाच्यत्ववचनविरोधश्चोभयत्र तुल्यः। मूलमूलित्वयोर्वैपरीत्यापत्तिश्च द्वितीये तस्यापि मूलभूतश्शब्दः तस्यापिशब्दान्तरमित्यनवस्थेत्यर्थः।

न्विति। वृत्तिमत्वात्साधुत्वं युज्यत इति भावः। बंध्यायाः पौत्रदर्शनमिति। यथा पुत्राभावे पौत्राभावः तथा मुख्यवृत्त्यभावे मुख्यार्थसंबंधरूपलक्षणा न संभवतीति भावः। भवानेवेति। स्फुटविरोधमप्यजानन्नत्यन्ताज्ञ इत्यर्थः। ननु मुख्यर्थसंबंधो लक्षणेति मास्तु किन्त्वपरैव लक्षणा वृत्तिरस्त्वित्यत्राह किंचैवमिति। तथा सति शक्तिमात्रोच्छेदस्यादिति भावः। किञ्च मुख्यार्थो यदि ब्रह्मशब्दस्य स्यात् तदा तत्सम्बध्यपि नास्त्येवेति ब्रह्मतत्सम्बधि लक्ष्यमिति वदता ब्रह्म नास्तीत्युक्तं स्यादित्याह मुख्यार्थेति। संवृतिः- शून्यवादः। ननु ब्रह्मशब्दश्चान्यत्राशक्तः ब्रह्म चा वाच्यमित्युक्तं। तथा च विरोधं कथंचित्परिहृत्य लक्ष्यत्वमुच्यतामित्यत्राह अवाच्यवादाश्चेति। ''तस्मादुच्यते परं ब्रह्मे'' त्यादयो वादाः। अस्तिचेदिति। क्वचिन्मुख्यत्वमस्तीतिपक्ष इत्यर्थः। आद्येपि प्रवृत्तिनिमित्तमस्ति न वेति विकल्प्य द्वितीयपक्षे दूषणमाह निर्निमित्तत्व इति। प्रवृत्ति निमित्ताभावे शक्त्यभावादिति भावः। ननु डित्थडिबित्थादियदृच्छाशब्देव्यभिचार इत्यत्राह। यदृच्छेति। प्रमेयत्वविशेष्यकप्रमेयशब्दवत्तत्स्वरूप प्रकारकतत्तद्ज्ञानजनकत्वं यदृच्छाशब्दानामिति भावः। अस्तु वा यदृच्छाशब्दे निर्निमित्तत्वं तदन्यत्र तन्नियम इत्याह नचायं स इति। मानाभावादिति। यदृच्छाशब्दत्वेन व्यवहाराभावादित्यर्थः। ''बृहति बृंहयति तस्मादुच्यते परं ब्रह्म'' (अ.शिर-३.खं) ''बृहत्वद्बृंहणत्वाच्च

यः प्रकृत्यादिष्वस्य प्रयोगः, स ब्रह्मगुणलेशयोगादौपचारिक इत्यभाषि, अनुवृत्तस्याकृतिरूपस्य निमित्तस्यासिद्धेः, बृहत्त्वबृंहणत्वमात्रस्य बृहदादिशब्दवदतिप्रसञ्जित्वात्, अनेकशक्तिकल्पने गौरवात्, लोकोत्तरबृहत्त्वादिमात्रस्य तु भगवच्छब्दनयादुपचारद्वारत्वात्। अन्यथा गौणवृत्तिर्लुप्येत। ''यत्साक्षादपरोक्षाद्ब्रह्मेति'' (बृह-३) विशेषणं चान्यत्रामुख्यतां व्यनक्ति, ''तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने'' (गारूडे) इति च स्मर्यते। ''द्वे ब्रह्मणी वेदितव्ये'' (बृ.उ.४-५-१) इत्यादिकमपि, ''त्रीणि तेजांसि न स्पृशेत्'' इत्यादिवन्मुख्यामुख्यसमुच्चयाभिप्रायम्। न द्वितीयः; शुद्धोपहितविकल्पासहत्वात्, न हि निर्विशेषतयाऽभिमते शुद्धे ''बृहति बृंहयतीति'' श्रुत्युक्त निमित्तमस्ति। अधिष्ठानत्वेन सर्वविवर्तमूलतया च तत्स्यादिति चेन्न; तत्र तदुभयानभ्युपगमात्, अन्यथा

तद्ब्रह्मेत्यभिधीयते'' (वि. पु.२०-२०) इति निरुक्तिविरोधोपीत्याह निरुक्तीति। अपौरुषेयत्वविरोधं समुच्चिनोति चेति। प्रवृत्तिनिमित्तपक्षं दूषयति सनिमित्तत्वे चेति। तथा च ब्रह्मणोन्यत्र मुख्यवृत्त्यभाव इति सिद्धांतविरोधः। अन्यत्र मुख्यवृत्त्यभावं समर्थयति य इति। आदिशब्देन वेदतपः प्रभृतयो गृह्यन्ते। तत्र युक्तिमाह अनुवृत्तस्येति। प्रकृतिवेदादिसाधारणानुवृत्तनिमित्तमेकं नास्तीत्यर्थः। ननु बृहत्वमनुवृत्तं प्रवृत्तिनिमित्तमस्त्वित्यत्राह बृहत्वेति। बृहत्वं यथा बृहदादिशब्दे निमित्तं तथा ब्रह्मशब्दे निमित्तं न भवति। तथा सति बृहच्छब्दवद्ब्रह्मशब्दस्यापि घटादौ प्रयोगसाधकतयातिप्रसञ्जकमित्यर्थः। ननु बृहत्वं प्रवृत्तिनिमित्तं मास्तु किं तु प्रकृतित्वादिकमेव नानाप्रवृत्तिनिमित्तमस्तु। तेन नातिप्रसंग इत्यत्राह अनेकशक्तीति। नानार्थादौ गत्यन्तराभावादनेकशक्तिकल्पनमितिभावः। ननु घटादिव्यावृत्तं लोकात्तरबृहत्वं प्रवृत्तिनिमित्तमित्यत्राह लोकोत्तरेति। सर्वतो व्यावृत्तं ब्रह्ममात्रगतं प्रकृत्यादौ नास्त्येव। घटादिव्यावृत्तं तु ब्रह्मशब्दप्रयोगाविषयगगनादावपि गतत्वान्न प्रवृत्तिनिमित्तमिति भावः। भगवच्छब्दनयादिति। ''उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवा'' (वि.पु.६-७-७८) नितीत्याद्यलौकिकार्थसाक्षात्कर्तृत्वं प्रयोगाविषयेषु समाधिनिष्ठकेशिध्वजादिषु गतत्वादुपचारद्वारमेव नतु प्रवृत्तिनिमित्तमिति निर्णीतमिति भावः। ननु प्रयोगबलात्प्रकृत्यादौ नानाशक्तिकल्पनमभ्युपगम्यतां गौरवं चाकिंचित्करमित्यत्राह अन्यथेति। अन्यथासिद्धप्रयोगबलादपि शक्तिकल्पन इत्यर्थः। श्रुतिरपि ब्रह्मशब्दस्यान्यत्र मुख्यतामाह यत्साक्षादिति। अपरोक्षं वस्तु यत् तत्साक्षात् मुख्यतया ब्रह्मशब्द वाच्यमित्यर्थः। साक्षादपत्यमित्यादौ साक्षाच्छब्दस्य मुख्यार्थत्वदर्शनादिति भावः। ''यत्साक्षातु परं ब्रह्म विशन्ति ब्रह्मवादिनः'' इति स्मृतिरप्यन्यत्र मुख्यतां व्यनक्तीत्याह तस्मिन्नेवेति। नन्वत्र मुख्यवृत्तिर्नास्तीत्यनुपपन्नं ''द्वेब्रह्मणी वेदितव्ये'' इत्यत्र परापरात्मनोः प्रयुक्तस्य ब्रह्मशब्दस्य एकत्र मुख्यत्वमपरत्रामुख्यत्वमित्यस्य वृत्तिद्वयविरोधेनासम्भवादुभयत्र मुख्यवृत्त्यवश्यम्भावादित्यत्राह द्वेब्रह्मणी इति। ''गामग्निं ब्राह्मणं चैव त्रीणि तेजांसि न स्पृशेत्।'' इत्यत्र त्रिष्वपि तेजश्शब्दस्य पवित्रत्वसामान्याल्लक्षणा। तथा ज्ञानानन्दाद्यात्मकतया लक्षणावृत्तिरेकैवेति नान्यत्रमुख्यतेत्यर्थः। विचारविषय इति पक्षं दूषयति नद्वितीय इति। शुद्धं-स्वरूपातिरिक्तप्रवृत्तिनिमित्ताविशिष्टं। उपहितं=स्वरूपातिरिक्तप्रवृत्तिनिमित्त विशिष्टं। शुद्ध इत्येतद्विवरणं निर्विशेषतयेति। प्रवृतिनिमित्ताभावे वाच्यत्वायोगादिति भावः। नन्वधिष्ठानत्वसर्वविवर्तमूलत्व रूपस्वरूपात्मकप्रवृत्तिनिमित्तवत्वाद्वाच्यत्वमिति शङ्कते अधिष्ठानत्वेनेति। अधिष्ठानत्वं हि भ्रमधर्मितया

मुक्तावपि तद्योगात् मुक्तेरेव मुक्तेः । उपलक्षणार्थं निर्वचनमिति चेन्न, विशेषणार्थत्वे बाधाभावात्, "तस्मादुच्यते परं ब्रह्मेति" प्रवृत्तिनिमित्ततयैव बृहत्त्वादिश्रुतेः, "बृहत्त्वाद्बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीयत" (वि.पु.३-३-२२) इति स्मृतेश्च; "गोत्वाभिसम्बन्धाद्गौ" (शाबर भाष्यं) रितिवत् ।

अस्तु व्यावहारिकं तद्वैशिष्ट्यम्, कथं तर्हि शुद्धे वृत्तिः, तदपि तद्द्वारा गम्यत इति चेत्; तर्हि तन्न मुख्यम् । उपहितं मुख्यमिति पक्षस्तु श्रुतिसिद्धस्वाभाविकसार्वज्ञ्याद्युपहितत्वविवक्षायां स्वमतविरोधादपास्तः । स्वाभिमताज्ञानादिदोषोपहितत्वं त्वनाक्षमलैङ्गमश्रौतमस्मार्तमसौत्रं चेति स्थापयिष्यते। तत्र च शुद्धे परे ब्रह्मणि निर्दोषभव्यगुणविशिष्टविषयभगवच्छब्द्मुख्यवृत्ति निरुक्तिविरोध;, "परं ब्रह्म परं धाम पवित्रं परमं भवानिति" (श्री.भग.गी.२०-२२) स्तुत्यनुपपत्तिः, पवित्रं परममित्यादिसमभिव्याहारवैघट्यं च । निर्विशेषलक्षणायां तु स्तुतिर्न कथंचिदपि सम्भवति; गुण्यवच्छिन्नगुणाभिधानरूपत्वात्तस्या इति । पूर्वापरादिविसंवादाच्च न कुत्रापि निर्गुणसिद्धिः ।

सर्वतादात्म्यं । विवर्तमूलत्वं हि विवर्तोपादानत्वं । तदेव बृंह्मणत्वमित्यर्थः । तत्रेति । स्वरूपस्य बृहत्वबृंहणत्वात्मकत्वानभ्युपगमादित्यर्थः । अन्यथेति । तयोः स्वरूपात्मकत्वात्स्वरूपस्य मुक्तावनपायात्तयोश्च सर्वं विनानुपपत्तेः सर्वं स्यादिति सर्वनिवृत्तिरूपा मुक्तिर्नस्यादित्यर्थः । ननु गवयत्वप्रवृत्तिनिमित्तकगवयशब्दवाच्योपलक्षकसादृश्यप्रतिपादक गोसदृशो गवय इति वाक्यवत् ब्रह्मशब्दवाच्योपलक्षक धर्मप्रदर्शनार्थमिदं नतु प्रवृत्तिनिमित्तप्रतिपादनार्थमिति शङ्कते उपलक्षणार्थमिति । प्रवृत्तिनिमित्ततयैव श्रुतत्वमुपपादयति गोत्वाभिसम्बधादिति । गोत्वसम्बन्धस्य निमित्तत्वप्रतीतेरिति भावः।

अस्तु व्यावहारिकमिति । तथाचाविद्यानिवृत्या निवृत्तेर्न मोक्षानुपपत्तिरिति भावः । कथं तर्हीति । व्यावहारिकतद्विषस्योपहितत्वादिति भावः । ननु विशिष्टोपस्थितिद्वारा शुद्धोपस्थितेर्भावाच्छुद्धस्यापि शक्तिविषयत्वमिति शङ्कते तदपीति । तर्हि मुख्योपस्थितिद्वारा तीरोपस्थापकगङ्गापदस्येव लक्षणैव न मुख्यत्वमित्याह तर्हीति। द्वितीयं पक्षं दूषयति उपहितमिति। किं तत्रोपाधिः सत्यं उत मिथ्यावेति विकल्प्य आद्ये दोषमाह। श्रुतीति। अद्वैतहानेरिति भावः। द्वितीयं दूषयति स्वाभिमतेति। उपहिते तादृश प्रमाणा भावादिति भावः। दोषांतरमाह तत्र चेति। ब्रह्मशब्दमुख्यार्थो न दोषोपहितः "शुद्धेमहाविभूत्याख्ये परे ब्रह्मणि शब्दयत" (वि.पु.६-७-७२) इति ब्रह्मशब्दवाच्यं शुद्धमनूद्य "मैत्रेय भगवच्छब्दः सर्वकारणकारणे। संभर्तेति तथा भर्ता भकारोर्थ द्वयान्वितः। नेता गमयिता स्रष्टा गकारोर्थत्रयान्वितः" (वि.पु.६-७-७२-१४ खं) इत्यादिना तत्र निर्दोषत्वपुरस्कारेण भगवच्छब्दनिर्वचनविरोधात् । नच ब्रह्मपदलक्ष्ये तन्निर्वचनं गुणविशिष्टविषयनिर्वचनस्य भगवच्छब्दस्य निर्विशेषे मुख्यत्वायोगाच्चेति भावः। परंब्रह्मेति। "परं ब्रह्म परं धाम पवित्रं परमं भवान्" (श्री.भग.गी.२.२२) इत्यत्र ब्रह्मशब्दस्याज्ञानादिदोष विशिष्टाभिधायकत्वात्तद्विशिष्टतयाभिधानस्य निन्दारूपतया न स्तुतित्वमित्यर्थः । पवित्रमिति । दोषोपहितस्यापवित्रत्वादिति भावः। ननु परं ब्रह्मेत्यत्र ब्रह्मपदेन शुद्धं लक्ष्यते। तत्र स्तुतिरस्त्वित्यत्राह निर्विशेषेति । तत्र हेतुमाह गुण्यवच्छिन्नेति । निर्विशेषे गुणविशिष्टता बोधासम्भवादिति भावः । ननु निर्दोषत्वेन स्तुतिरस्तु सा निर्विशेषेपि सम्भवतीत्यत्राह पूर्वापरेति । प्रकरणस्य गीतागतस्य सविशेषविषयतया निर्विशेषसिद्धिविरहात् ब्रह्मशब्देन तल्लक्षयित्वा तत्स्तुतिरित्यनुपपन्नमिति भावः।

अपिच अविद्यानिवृत्त्यर्थमिह ज्ञातव्यमुपहितं निरुपाधिकं वा, आद्ये तत्त्वावेदकतटस्थस्वरूप लक्षणादिभिरपि तदुग्रहादविशिष्टब्रह्मणि वृत्त्यसिद्ध्याऽस्मदिष्टसिद्धिस्स्यात् । स्याच्चातत्त्वज्ञानादेव मोक्षसिद्धिः, तस्य मिथ्यात्वेनैव युष्माभिरङ्गीकारात् । द्वितीये तु अतद्व्युत्पन्नेन तदुक्त्ययोग एव । तल्लक्षितं तज्जिज्ञास्यते लक्ष्यते शोध्यते चेति चेत्; तत एव निर्विशेषलक्षकब्रह्मशब्दात् ज्ञातत्वलक्षिततत्वशोधिततत्वसिद्ध्या जिज्ञासाद्यनपेक्षा स्यात् नच जिज्ञासादौ विधिः, अदृष्टार्थत्वाभावात्, येन पिष्टपेषणं सहेम । निरुपाधिके ब्रह्मशब्दवृत्तिमविदुषः प्रतिबोधनेन सर्वं सार्थमिति चेत्, किं मुख्यामुख्यां वा, पूर्वत्र प्रस्तुतव्याघातः, सर्वस्योपहितमुख्यवृत्तिविषयबोधनोपक्षीणत्वात्, अनुपहिते हि लक्षणामेव वदसि, अभिधानाङ्गीकारे वा किं सार्वज्ञादिविशिष्टपरब्रह्माभिधान प्रद्वेषेण? उत्तरत्र अधीहीत्यादिवैघटचम्, ब्रह्मशब्दस्य मुख्यार्थमधीहीत्युक्ते लक्ष्यार्थलक्षणोपदेशस्यासंगतेः ।

इयता ग्रंथेन लक्षकत्वाभिमतशब्दस्वभावपर्यालोचनया निर्विशेषलक्षणा निरस्ता । इदानीं लक्ष्यत्वाभिमतजिज्ञास्यस्वरूपपर्यालोचनयापि लक्षणां निराकरोति अपि चेति । तत्वावेदकेति । तत्वावेदकतया त्वदभिमतैः "सत्यं ज्ञानमनन्तं ब्रह्म" (तै आ ७) "यतो वा इमानि भूतानि जायन्ते" (तै आ १ ७) इत्यादितटस्थलक्षणादिवाक्यैरप्युपहितप्रतीतेरेवापेक्षितत्वेन निर्विशेषस्याजिज्ञास्यतया तत्प्रतिपत्त्यर्थं ब्रह्मशब्दस्य तल्लक्षणा न वाच्येति भावः । स्याच्चेति । तत्वज्ञानस्यानपेक्षितत्वाद्वेदान्तजन्यज्ञानादपि न मुक्तिस्स्यादिति शास्त्रवैयर्थ्यमिति भावः । तस्य उपहितगतविशेषणस्य । द्वितीयेत्विति । निरूपाधिक इत्यर्थः । अतद्व्युत्पन्नेति । अनुपहिते व्युत्पत्यभावादव्युत्पन्नेन ब्रह्मशब्देन तद्बोधो नसंभवतीति भावः । ननु शुद्धे व्युत्पत्तयभावेपि विशिष्टे व्युत्पन्नेन ब्रह्मशब्देन शुद्धं लक्ष्यत इति तत्र सर्वमुपपद्यत इति शङ्कते तल्लक्षितमिति । "अथातो ब्रह्म जिज्ञासे" (ब्र सू १-१-१) ति ज्ञातव्यत्वेन प्रतिज्ञायते । "जन्माद्यस्य यतः" (ब्र.सू १-१-२) इत्यादिलक्षणवाक्येन लक्ष्यते । उत्तरसूत्रगणैश्च शोध्यत इत्यर्थः । तत एवेति । पदार्थप्रतिपत्तिसमये ब्रह्मपदेनैव निर्णेतव्यस्य निर्विशेषस्य प्रतिज्ञालक्षणपरीक्षाफलस्य सिद्धत्वात्तेषां वैयर्थ्यमित्यर्थः । ननु विलीनस्यापि घृतस्याज्यं विलाप्येति/विधिबलाद्विलापने प्रवृत्तिर्दृश्यत इति सिद्धेपि फले प्रतिज्ञादौ प्रवृत्तिस्सम्भवतीत्याशङ्क्य निराकरोति नचेति । त्वयापि श्रवणादेर्दृष्टद्वारत्वमुच्यते न तु केवलादृष्टार्थत्वमिति भावः। ये नेति। अदृष्टार्थत्वेनेत्यर्थः। सहेमेति। चक्षिङ्गो ङित्करणात् ज्ञापितं परस्मै पदं ।'आधृषाद्वेति' विकल्पितणिचः परस्मैपदिनः सहेर्वा रूपं । निरूपाधिक इति । प्रतिज्ञालक्षण विचारास्सर्वेपि निर्विशेषे वृत्तिज्ञानार्थमिति न वैयर्थ्यमिति भावः । पूर्वत्रेति । मुख्यवृत्तेर्निविशेषे सम्भवाभावादुपहितविषयं सर्वशास्त्रं स्यादिति निरूपाधिके वृत्तिबोधनेन शास्त्रं सार्थकमित्येतद्व्याहतमित्यर्थः। ननूपहितमुख्यवृत्तिरस्त्वित्याशङ्क्यापसिद्धान्तदोषमाह अनुपहितेति । अभिधानाङ्गीकारेवेति । निर्विशेषस्य प्रवृत्तिनिमित्ताभावाच्छक्यत्वायोगात् विशिष्टस्य शक्यत्वे वाच्ये सार्वज्ञादिविशिष्टमेव शक्यं स्यादिति भावः । उत्तरत्रेति । अन्यां वेति । विकल्पकोटावित्यर्थः । वैघटचमुपपादयति ब्रह्मशब्दस्येति । घटं वदेत्यादौ सर्वत्र बाधकाभावे मुख्यार्थं वदेति प्रतीतेः "अधीहि भगवो ब्रह्मे"(तै -भृः१) त्यत्रापि ब्रह्मशब्दमुख्यर्थमधीहीत्यौत्सर्गिकप्रतीतिरित्यपृष्टप्रत्युक्त्ययोग

लक्ष्यार्थमधीहीति तु निरुत्थानम्, कारणाभावात्, मुख्यार्थबाधादिनिश्चयपूर्वकत्वादमुख्यवृत्तिविज्ञप्तेः तन्निश्चयस्य चात्र ततः प्रागसिद्धेः, तत्सिद्धौ वा निर्विशेषावगमे किं प्रश्नेन प्रत्युक्त्या वा।

मुख्यार्थबाधो निश्चितः,लक्ष्यार्थविशेषश्च न विदितः। अस्मिन्नवसरे प्रश्नाद्यस्तु माभूत्। किं प्रत्यक्षेण बाधः किं वाऽनुमानेन अथ तर्केण अथवा तादृशेनागमेन? । नाद्यः, अतीन्द्रिये प्रत्यक्षबाधायोगात्। न द्वितीयतृतीयौ। अनुमानस्य तर्कमात्रस्य च नित्यागमैः स्पर्धितुमशक्तेः। न चतुर्थः, न बृहति न बृंहयतीति च वाक्यान्तराभावात्। निर्गुणादिवाक्यैस्तत्सिद्धिरिति चेत् तथाऽपि निर्मूलः प्रश्नः, तैरेव बुभुत्सितबोधात्। नच तैरपि तत्सिद्धिर्न्याय्या, अविरुद्धविषयसिद्ध्या तेषामप्यान्यपर्यस्य वक्ष्यमाणत्वात् (वा-९२)। आपातविदितार्थश्रुतिविप्रतिपत्त्या सन्दिहानः कीदृग्भूतं ब्रह्मशब्दविवक्षितमिति पृच्छतीतिचेत्, नैवम्, तटस्थस्वरूपलक्षणाभ्यामपि कारणत्ववैलण्यविषयाभ्यां सन्देहस्यैव स्थापनप्रसङ्गात्। नच निर्विशेषं सविशेषं वेति विमृशतो जगत्कारणत्वोक्त्या निर्विशेषत्वनिश्चयस्सिध्येत्। अपि तु सर्वकारणत्वाक्षिप्तं सर्वज्ञसर्वविदादिशब्दकण्ठोक्तं च सर्वज्ञत्वादिकं बृहत्त्वमेव निर्धार्येत।

नन्वविदितमुख्यलक्षकविभागः शिष्यो मुमुक्षुभिर्जिज्ञास्यं ब्रह्मेति सामान्यत उपश्रुत्य तल्लक्षणं

इत्यर्थः। ननु तत्र लक्ष्यार्थ प्रश्नं एवेति चेत् तत्राह लक्ष्यार्थमधीहीति। कारणा भावमुपपादयति मुख्यार्थेति। इदं पदमत्र मुख्यवृत्तमिति निश्चयो लक्षणावृत्तिः कुत्रेति विशेषप्रश्नस्य कारणं तत्र मुख्यार्थबाधादिनिश्चयो हेतुः । तदभावात्तदभाव इत्यर्थः। तत इति। उपदेशादित्यर्थः। तत्सिद्धाविति। उपदेशात्प्रागिति शेषः । निर्विशेषावगम इति। जात इति शेषः।

मुख्यार्थबाध इति। मुख्यार्थस्य बृहत्व (ब्रह्मत्व) विशिष्टस्य मिथ्यात्वेन मुमुक्षुवेद्यत्वस्याभावो निश्चत इति लक्ष्यार्थपरत्वस्य सामान्यतोवगमात्तद्विशेष प्रश्न उपपन्न इति भावः। परिहरति माभूदिति। मिथ्यात्वे प्रमाणाभावेन मुख्यार्थस्य मुमुक्षुवेद्यत्वं न बाधितमिति भावः। तथापीति। निर्गुणादिवाक्यैरेव निर्विशेषस्यैव सिद्धेः प्रश्नानुपपत्तिरिति भावः। ननु यथाकथंचिन्निर्विशेषसिद्धिरस्त्वित्यत्राह नच तैरपीति । छागपशुन्यायपवदाहवनीयन्यायादिभिर्हेय गुणाभावरूपविषयसिद्धेरिति भावः। ननु निर्विशेषनिश्चयो नास्त्येव। सविशेषनिर्विशेषश्रुतिद्वयश्रवणेन सविशेषं निर्विशेषं वेति सन्दिहानस्य प्रश्न इति शङ्कते आपातेति। ''यतो वे'' (तै-भृ.१) त्यादि तटस्थ ''सत्यं ज्ञान'' (तै आनं २) मित्यादि स्वरूपलक्षणवाक्याभ्यां कारणत्वरूपसविशेषवै लक्षण्यात्मकानृतादिव्यावृत्तिरूपनिर्विशेषविषयाभ्यां पूर्ववदेव सन्देहस्यादित्याह नैवमिति। वस्तुतः सत्यादि वाक्यस्यापि विशिष्टपरत्वमेवेति निर्विशेषसन्देह एव दुर्लभ इति बोध्यं । किञ्च यदि निर्विशेषं ब्रह्म मुमुक्षुवेद्यमुपदेश्यं स्यात् तदा जगत्कारणत्वरूपलक्षणोपदेशमाचार्योऽनुन्मतः किमर्थमुपदिशेदित्याह नचेति। सर्वकारणत्वाक्षिप्तं कर्तृत्वाक्षिप्तमित्यर्थः। सर्वज्ञस्सर्वविदादीति। ''यस्सर्वज्ञस्सर्ववित्'' (मुं २-२-१)'' यस्य ज्ञानमयं तपः'' (मु.२-२-९) इत्याद्युक्तमित्यर्थः। ज्ञानादीनामपि गुणतोपि बृहत्वेन्तर्भावाद्बृहत्वमेवेत्याद्युक्तिः।

नन्विति। पूर्वं वाक्यद्वयश्रवणजनितसन्देहमूलकप्रश्नः आशङ्क्य परिहृतः। इदानीं सामान्यत एव प्रश्न इति भेदः। यद्यप्यनुपहितस्य मुमुक्षुजिज्ञास्यत्वे पूर्वदूषणमस्त्येव तथाप्यनुपहितस्य जिज्ञास्यत्वं दूर

पृच्छति। आचार्यस्तु कृत्स्नविद्ब्रह्मशब्दलक्ष्यनिर्विशेषवस्तुलक्षणमुपदिशतु। तदपि न, मुमुक्षुभिर्जिज्ञास्यं निर्विशेषमित्यस्यैव निर्मूल्तावत्, प्रत्युत "तमेवं विद्वानि"(तै.आ.३.पुरुष सूक्तं)यादिभिर्विभूतिगुणविग्रहव्यापारविशिष्टमहापुरुषवेदनस्यैवामृतत्वप्राप्त्युपायत्वश्रवणादबाधाच। अतो यथाश्रुत एव ब्रह्म शब्दार्थः। निर्वक्ति च यास्कः- "ब्रह्म परिबृढं सर्वत" (यास्कनिरुक्तिः) इति

इति न तत्र लक्षणावृत्तिरित्याह तदपिनेति। आदि शब्देन "तमेव विदित्वे" (श्वे ३-८) त्यादि विवक्षितं "तमसस्तु पारे" "सर्वाणिरूपाणि" (पु.सू.तै आ.३) इत्यादिभिर्विभूतिः "महान्तं" (क.२.२२) इत्यादिभिर्गुणः "आदित्य वर्णं" (पु.सू.तै आ.३) इति विग्रहः "विचित्यकृत्वा" इति व्यापारः प्रतिपाद्यते। इह च तमेवमिति तच्छब्दैवंशब्दाभ्यां प्रस्तुतविभूत्यादिगुणविशिष्टस्य परामर्शादिति भावः। महापुरुषेति। "पुरुषं महान्तं" (पु.सू.तै आ) इति वाक्यार्थः उक्तः। एवं जिज्ञास्यपर्यालोचनयापि न निर्विशेषे ब्रह्मशब्दलक्षणेति भावः। यतो उपलक्षकत्वाभिमतब्रह्मशब्द लक्ष्यत्वाभिमतजिज्ञास्यब्रह्मस्वरूपपर्यालोचनया निर्विशेषे वृत्तिनिरासः। अतः श्रौतबृहत्वादिविशिष्ट एव विचार्यब्रह्मशब्दस्य वृत्तिरित्याह अत इति। सर्वतः सर्वस्मात् निरवधिकबृहदित्यर्थः। ननु यास्कनिरुक्तौ बृहत्वमेव ब्रह्मशब्दप्रवृत्तिनिमित्तमिति गम्यते। श्रौतनिरुक्तौ तु बृहत्वमिव बृंह्मणत्वमपीति कथमिदमुपपद्यत इति चेत् बृंह्मणत्वस्यापि गुणतो बृहत्वान्तर्भावान्नविरोधः। श्रुतौ पृथगुक्तिः बृंहणत्वमपि बृहत्वेन्तर्भूतमिति ज्ञापयितुमिति द्रष्टव्यं। एतद्वादमूलभूत भाष्यमाह इदं सर्वमभिप्रेत्येति। नन्वन्यत्रापि प्रयोगदर्शनात्कथं पुरुषोत्तम एवेत्यवधारणमित्यत्राह मुख्ययेति। "यस्मिन् प्रयुज्यमाने तु गुणयोगस्सुपुष्कलः तत्रैव मुख्य वृत्तोयमन्यत्र ह्युपचारतः" (गारुडे) इति न्यायेन निरतिशयबृहत्वादेः पुरुषोत्तमादन्यत्राभावेन गुणपौष्कल्यविरहान्नमुख्यत्वमिति भावः। अनेवं नामकं पुरुषोत्तमादिनामरहितं अनेवं विधं बृहत्वबृम्हणत्ववत् स्वभावतो निरस्तनिखिलदोष इत्याद्युक्तविधं च। शिवविरिश्चादिनिरासस्तु ब्रह्शब्दप्रवृत्तिनिमित्ततया निरस्तनिर्दोषनिखिलकल्याणगुणाकरत्व रूपबृहत्वबृंहणत्वाभावात्। तदभावश्च यौगिकपुरुषोत्तमनामकत्वाभावेनावरतया सदोषपरिमित गुणवत्त्वादित्याह विशेषणद्वये न चेति। निरस्तनिखिलदोषत्वं निरतिशयासङ्ख्येयकल्याणगुणवत्वं च विशेषणद्वयं। निरुक्तिः तत्प्रवृत्तिनिमित्तकत्वोक्तिः। ननु पुरुषोत्तमशब्दो न यौगिकः समासानुपपत्तेः। तथाहि न तावत्कर्मधारयः सन्महवित्यादिना (अष्टा-२-२-३) उत्तमशब्दस्य पूर्वनिपातापत्तेः। नापि षष्ठी समासः। पुरुषाणामुत्तम इति न निर्धारण (अष्टा-२-२-३) इति निषेधात्। नापि सप्तमीसमासः षष्ठीसमासनिषेधसामर्थ्यादिव। अन्यथा अर्थरूपयोरविशेषेण द्वेधाशब्दस्यावश्यकत्वेन निषेधवैयर्थ्यात्। तत्फलंहि समस्तरूपाभावः नापि पञ्चमीसमासः "पञ्चमी भयेन" (अष्टा-२-१-३७) "भयभीत भीभिरिति" (अष्टा-२-१-३) नियतविषयत्वात्। अत एव "रुढयातु कामं पुरुषोत्तमोस्त्वित्युक्त"मिति चेदुच्यते। कर्मधारय एवास्तु। नचैवं पूर्वनिपातप्रसङ्गः प्रशंसार्थविवक्षायां परत्वेन 'प्रशंसावचनैश्चेति' (अष्टा-२-१-६६) समाससम्भवात्। वृत्तौ मतल्लिकाद्युपादानस्य रुढिपरिग्रहार्थत्वात्। 'प्रवेकानुत्तमोत्तमा' (अष्टा-२-२-३) इति प्रशंसायां रुढत्वात्। अस्तुवा निर्धारणार्थे सप्तमीसमासः। नच सामर्थ्यात्तस्यापि निषेधः अर्थरूपभेदाभावेपि तत्पुरुषे "तुल्यार्थ तृतीयासप्तम्युपमानाव्यय द्वितीयाकृत्या" इति पूर्वपदप्रकृति स्वरभेदस्य सत्वात्। षष्ठीसमासेतु

इदं सर्वमभिप्रेत्याभाष्यत- "ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येय कल्याण गुणगणः पुरुषोत्तमोऽभिधीयत" (श्री.भा.जि)इति। अभिधीयते-मुख्यया वृत्त्या बोध्यते। अनेवंनामकमनेवंविधं च किमपि ब्रह्मेति वदतां सर्वेषामप्यत्र निरासो भाव्यः। विशेषणद्वयेन च ब्रह्मपुरुषोत्तमशब्दयोः निरुक्तिरपि व्यज्यते।

इति श्री कवितार्किकसिंहस्य सर्वतंत्रस्वतंत्रस्य श्रीमद्वेंकटनाथस्य वेदान्ताचार्यस्य कृतिषु-
शतदूषण्यां ब्रह्मशब्दवृत्त्यनुपपत्तिवादःप्रथमः ॥१॥

॥ अथ जिज्ञासानुपपत्तिवादो द्वितीयः ॥२॥

अथ स्वात्मैकभासस्य निर्विशेषस्य दुष्यतः।
विशुद्धस्यापि जिज्ञासा परेष्टा प्रतिषिध्यते॥

यदाहुः-ब्रह्मशब्दनिर्दिष्टं विचार्यम्, अनुदितानस्तमितस्वरूपैकप्रकाशमशेषविशेषशून्यमनाद्य विद्यान्धकारितं नित्यशुद्धं चेति। तत्र विचित्रो व्याघातः।

यद्धि न वित्तिकर्म, कथं तत्र जिज्ञासा सामान्यतो विदिते विशेषतश्च वेदितव्ये तत्प्रवृत्तेः। अन्यथा

समासा इत्यन्तोदात्तत्वं। अत एव नगोत्तमो नागोत्तमः, अथ मुक्तिं पुरुषोत्तमादित्यादीनामुपपत्तिः। अस्तु वा "यस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः" (श्री भ.गी २४-२७) इति निरुक्त्यनुसारात्पञ्चमी समासः। नच "पञ्चमीभयेन" (अष्टाध्यायी २-१-३) ति परिगणनविरोधः "तपरस्तत्कालस्य" (अष्टाध्यायी १-१-७०) इत्यत्रः तादपि परः तपरः पञ्चमी इति योगविभागात्समास इति शाब्दवचनैस्समाससिद्धेः।

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां प्रथमो वादस्समाप्तः।

पदार्थदूषणानन्तरं वाक्यार्थदूषणमिति क्रमं सूचयन् वादार्थं सङ्गृह्णाति अथेति। विचारानुपपत्तिर्वा जिज्ञासानुपपत्तिर्वा वादार्थः। अन्यतरस्य वादार्थत्वेऽन्यतरस्य गुणभावो द्रष्टव्यः। विषयाधीना जिज्ञासाधीना कारणाधीना चानुपपत्तिः। प्रथमं विषयाधीनानुपपत्तिमाह स्वात्मेति। सामान्य विशेषधीकर्मत्वाभावाज्जिज्ञासा नोपपद्यत इत्यर्थः। जिज्ञासास्वरूपप्रयुक्तानुपपत्तिमाह निर्विशेषस्येति। विशेषविषयिणी हि सर्वत्र जिज्ञासेति भावः। उभाभ्यां विशेषणाभ्यामेव कारणाधीनानुपपत्तिश्चाभिप्रेता। समानाधिकरणसामान्यज्ञानस्य विशेषनिश्चयफलकस्याभावात्। अत्र ब्रह्मण इत्यध्याहार्यं। दुष्यतो वा विशुद्धस्य वा ब्रह्मणो जिज्ञासा प्रतिषिध्यत इत्यन्वयः। पक्षान्तरे जिज्ञासापदं विचारपरं।

अनुक्तो पालम्भपरिहारार्थं परकीयं वचनमाह यदाहुरिति। अनुदितेत्यादिपदचतुष्टयेन स्वात्मैकभासस्येत्यादि श्लोकगतपदचतुष्टयं क्रमाद्विवृतं।

स्वरूपैकप्रकाशत्वोक्त्या प्रकाशांतराकर्मत्वसिद्धेः तत्प्रयुक्तव्याघातं दर्शयति यद्धीति। अन्यथा सामान्यतो विदितत्वस्य विशेषतो वेदितव्यस्यचाभावे, सामान्यवेदनस्य जिज्ञासाहेतुत्वात् विशेषतो ज्ञानस्य च तत्फलत्वादिति भावः। स्वप्रकाशतया वित्तिकर्मत्वाभावपुरस्सरं

हेतुप्रयोजनविरहे तदयोगात्। नच ब्रह्मणि तथाविधवेदनद्वयविषयत्वं परिशिष्यते। जिज्ञासापूर्वकं परीक्षणमत्र प्रक्रम्यते । तच्च तत्र प्रमाणोपक्षेपेण । प्रमाणं च निर्विषयं न निरूप्यम् । सविषयत्वे तु तद्विषयत्वाद्दृश्यत्वमिथ्यात्वजडत्वादिस्वोक्तानिष्टापत्तिः। स्वरूपप्रकाश एव हेतुः फलं च जिज्ञासाया इति चेन्न, तस्यास्तदुभयसामानाधिकरण्यनियमदृष्टेः । स्वरूपप्रकाशस्य च तदेकाधारताभावात् । अनादेः प्रकाशस्य च निरपेक्षहेतुत्वे जिज्ञासानादित्वप्रसक्तेः । सापेक्षत्वे यथादर्शनं स्वविषयवेदनापेक्षणात्। प्रागसिद्धस्य तुच्छत्वकार्यत्वयोरन्यतरप्रसङ्गात् प्राक्सिद्धस्य फलत्वायोगात्। फलत्वे चानादित्वभङ्गात् । उपहितरूपेण वेदनद्वयविषयत्वाज्जिज्ञासा स्यादिति चेन्न; हेतोरुपहितविषयत्वाभ्युपगमेऽपि फलस्य तथात्वे भ्रान्तित्वापातात् । भ्रान्तेश्चासंपाद्यत्वान्न तदर्थं

दूषणमुक्तं। मिथ्यात्वादिप्रसंगेन वित्तिकर्मत्वाभावपुरस्सरं दूषणमाह जिज्ञासा पूर्वकमिति। जिज्ञासायाः कारणत्वं विचारस्य कार्यत्वं विचारानुपपत्तिपक्षे कारणाभावाद्विचारानुपपत्तिः। जिज्ञासानुपपत्तिपक्षे फलरूपविचाराभावाज्जिज्ञानानुपपत्तिरित्यर्थः। विचारानुपपत्तौ हेतुमाह तच्चेति। ननु मा भूद्वित्तिकर्मत्वं स्वरूपप्रकाश एव स्वसामान्यप्रकाशः। सविशेषप्रकाशश्चेति। हेतुफलभावाज्जिज्ञासा संभवतीति शंकते स्वरूपेति। नेति। अन्यथा यज्ञदत्तीयज्ञानाद्देवदत्तीयजिज्ञासा स्यादिति भावः। यद्यप्यहमिति स्वप्रकाशादेव नित्यत्वादिजिज्ञासा दृश्यत इति जिज्ञासानधिकरणवृत्तिज्ञानान्यज्ञानत्वेन हेतुत्वान्नाति प्रसंगः। तथापि फलभूत ज्ञानसमानाधिकरणजिज्ञासापूर्वकत्वेन कार्यत्वान्नैतादृशज्ञानासंभवः इति भावः। केचित्तु अहमिति जिज्ञासाजनकं ज्ञानं न स्वप्रकाशं। अपितु मानसिकमित्याहुः। हेतुफलत्वयोस्सामान्यतो दूषणमुक्तवा प्रातिस्विकं दूषणमाह अनादेरिति। अनादेः प्रकाशस्येति। स्वरूपप्रकाशो निरपेक्ष एव हेतुः उतागन्तुकसहकारिसापेक्ष इति विकल्पमभिप्रेत्याह अनादेरिति । अत्र जिज्ञासा यदि निरपेक्षानादिप्रकाशजन्या स्यात् अनादिस्स्यादित्यर्थः। यस्मिन्काले कार्योत्पत्तिरभिमता ततः प्रागपि कार्यं स्यादिति क्रमेण पूर्वकालेप्यापादित कारणाभावेन कार्याभावस्य वक्तुमशक्यतयानादित्वे सिद्धे जन्यत्वमेव न संभवतीत्यर्थः। द्वितीये दूषणमाह सापेक्षत्व इति। जिज्ञासायास्समानाधिकरण धर्मिज्ञान जन्यत्वस्य साधित्वाल्लोके दर्शनादिति भावः । फलत्वे दूषणमाह प्राक्सिद्धस्येति । प्राक्सिद्धस्योत्तरकालमप्यसत्वे तुच्छत्वं सत्वे तु कार्यत्वमिति भावः।

प्राक्सिद्धत्वे फलत्वव्याघात इत्याह प्राक्सिद्धस्येत्यादिना। फलस्य सादित्वादनादित्वं न स्यादित्याह फलत्वे चेति । एतेनानुदितपदसूचितव्याघातो दर्शितः । नन्वनुपहित स्वरूपमात्रगोचरयोर्जिज्ञासाहेतुफलभूतयोरसम्भवेप्युपहितगोचरयोस्तथात्वमस्त्वित्याशङ्कते उपहितेति। अविद्योपहितरूपे ब्रह्मणि मुमुक्षूपास्यत्वरूपेण सामान्यवेदनस्य जगत्कारणत्वादिना विशेषवेदनस्य सम्भवादिति भावः। एवमपि निर्विशेषस्य जिज्ञास्यत्वं न सिद्धमित्याह नेति। हेतोरूपहितविषयत्वेपि फलस्योपहितविषयत्वमयुक्तमिति भावः। फलस्याप्युपहितविषयत्वे दोषमाह फलस्येति । आरोपितविषयत्वादिति भावः। इष्टापत्तिं परिहरति भ्रान्तिश्चेति। तत्वज्ञानसाध्यत्वान्मोक्षस्य मुमुक्षूणां भ्रमार्थं शास्त्रारम्भो न स्यादित्यर्थः। ननु तत्वज्ञानत्वभ्रमात्प्रवृत्तिरस्त्विति शङ्कते भ्रान्तिमिति। एवं तर्हि शास्त्रस्य न केवलं वैयर्थ्यमिव प्रत्युतानर्थहेतुत्वमपीति परिहरति नेति। परीक्षकाः विचारशास्त्राधिकृताः।

प्रेक्षावतां प्रारम्भः। भ्रान्तिमेव प्रमितिं मन्यमानैस्सा संपाद्येति चेन्न; परीक्षकेभ्योऽपि प्राथमिकभ्रान्ति प्रमात्वव्यवसायिनामेव प्रागल्भ्यप्रसङ्गात् ।स्वरूपव्यतिरिक्तं कृत्स्नं मिथ्येति प्रयोजकशिक्षणविरोधाच्च। नित्यभूतेऽपि समाधिवत् स्वमात्रसाक्षित्वं वैशद्यमात्रं वा साध्यमिति चेन्न, तयोरपि तत्स्वरूपत्वे सिद्धत्वात् । धर्मत्वे सत्यत्वमिथ्यात्वविकल्पक्षोभात् । अतिरिक्ताकारप्रकाश एव चेद्वैशद्यम्, तस्मिन्नप्याकारे स एव विकल्पः। नित्यस्वसाक्षिणि निरंशे निर्विशेषे च क इदानीं प्रकाश्य आकारः।

कथं च जिज्ञासा इदं किमिति वा कथमिति वा सा स्यात्, सर्वत्र यथायथं विदिताविदिताकारभेदो दुस्त्यजः, कृत्स्नावगत्यनवगत्योर्नैष्फल्यनिर्हेतुकत्वाभ्यां तदयोगात्, किं कथमित्यत्र का गतिरितिचेत्, न, तत्रापि सामान्यतः प्रतीतसमुदायान्तर्गतविशेषनिर्धारणार्थत्वात्किमादेः। एतेषु किं कथमित्येव हि तत्राकाङ्क्षा।

प्राथमिकभ्रान्तिः-प्रपञ्च भ्रमः। तथा च शास्त्रधिकारिणां प्रपञ्चभ्रमस्य पूर्वमेव सत्वात् शास्त्रजन्याधिकभ्रमवत्वाच्च पामराणां च शास्त्रजन्यभ्रमाभावात् परीक्षकेभ्यः पामराः श्रेष्ठा इत्यर्थः। किंच भ्रान्तिमेव प्रमितिमंन्यमानैरित्ययुक्तं श्रवणात्प्रानित्यानित्यविवेकादिसमये स्वरूपव्यतिरिक्तं मिथ्येति निश्चितत्या प्रमात्वभ्रमायोगात्। यदि प्रयोजकशिक्षणं श्रवणमेवेति मतं तथापि मननिदिध्यासनादौ प्रवृत्तिर्नस्यादित्याह स्वरूपेति । स्वरूपस्यैव फलत्वे प्राक्सिद्धस्य फलत्वायोगादिति यद्दूषणमुक्तं तत्र परिहारमाशङ्कते नित्येति। ज्ञानस्य सिद्धत्वेपि स्वमात्रसाक्षित्वाच्छिन्नस्यासिद्धत्वाज्जिज्ञासायाः फलत्वं सम्भवतीति भावः। एवं तर्हि प्राप्ताप्राप्तविवेकेन धर्मस्यैवेच्छा। सा च न जिज्ञासा ज्ञानगतधर्मविषयिण्याः ज्ञानेच्छाभावात्। समाधातुः तादृशज्ञानस्यैवासिद्धतया तज्जिज्ञासेति विषमो दृष्टान्त इत्याह नेति। ननु प्राप्ताप्राप्तविवेकेन धर्मगोचरत्वेपि धर्मिगोचरत्वाज्जिज्ञासात्वं युक्तमित्यत्राह तयोरपीति। सिद्धत्वादिति। इच्छाविषयत्वायोगात्फलत्वं न स्यादिति भावः। विकल्पक्षोभादिति। सत्यत्वेऽद्वैत हानिः। मिथ्यात्वे प्रेक्षावतां तदर्थं प्रवृत्यनुपपत्तिरित्यर्थः। वैशद्यपक्षे दूषणांतरमाह अतिरिक्ताकारेति। ज्ञनगतं धर्ममादाय पूर्वदूषणं इह विषयमादायेति न पौनरुक्त्यं। स्वरूपपक्षेपि कालभेदमादायाज्ञातता उतांशभेदमुतधर्म भेदमिति विकल्पमभिप्रेत्य प्रथमे दोषमाह नित्येति। कालविशेषेणाज्ञातत्वं न सम्भवतीति भावः। द्वितीये दूषणमाह निरंश इति। धर्मपक्षे दोषमाह निर्विशेष इति। मिथ्याभूतविशेषस्तु भ्रान्तित्वापातेन निरस्त इति भावः।

जिज्ञासास्वरूपप्रयुक्तानुपपत्तिमाह कथं च जिज्ञासेति। इदं किमिति प्रश्नप्रयोजिका इदं कथमिति प्रश्नप्रयोजिका वा स्यादित्यर्थः। ननु विदिताविदिताकारभेदाभावेपि इदं किमित्यादि जिज्ञासास्यादित्यत्राह कृत्स्नेति। कृत्स्नावगतौ ज्ञातव्यांशाभावेन सिद्धे इच्छाविरहादनवगतौ कारणाभावाज्जिज्ञासा नोपपद्यत इत्यर्थः। ननु कृत्स्नाज्ञानेपि जिज्ञासा सम्भवत्येव अन्यथा किं कथमिति जिज्ञासानुपपत्तेः। किंचिदाकार ज्ञाने धर्मिणोपि ज्ञाततया धर्मिप्रश्नानुपपत्तेः। धर्मिणं विना धर्मज्ञानाभावादिति शङ्कते किं कथमिति। पदार्थत्वादिना सामान्येन ज्ञातेषु किं कथमिति जिज्ञासाविशेषविषयिण्येव भवति। नतु सर्वात्मना ज्ञानाभावादिति परिहरति न तत्रापीति। ननु ज्ञाताज्ञातधर्मवति जिज्ञासेत्ययुक्तं किं ज्ञानांश एव जिज्ञासा उताज्ञातांशे। नाद्यः वैयर्थ्यात् । नद्वितीयः कारणाभावात्। इच्छायास्समानविषयकज्ञान साध्यत्वादित्याशङ्क्य सर्वथा च ज्ञाते जिज्ञासायामतिप्रसङ्गात् व्यावहारिकमर्यादया

यः पुनर्ज्ञाताज्ञातांशविकल्पेन जिज्ञासास्वरूपमेव खण्डयेत् स ब्रह्मजिज्ञासामपि जिघांसतीति कःप्रकृतोपयोगः। इष्टा च सा यथालोकमिहापि, अन्यथाऽनारम्भेण शास्त्रोच्छित्तेः। अस्त्विहापि सामान्यतः स्वरूपज्ञप्तिः; अध्यासविरोधिरूपेण विशेषतश्च जिज्ञासा। मैवम्, निर्विशेषे सामान्यासिद्धेः निस्सामान्ये च विशेषायोगात्। कल्पनया तदुपपत्तिरिति चेन्न, सामान्यरूपस्य कल्पितत्वे स्वरूपोच्छित्तेः विशेषासम्भवाच्च। न ह्यकिंचिद्भूतो विशेषतः कश्चित् स्यात्; न खलु खरशृङ्गे कुण्ठत्वादिः। नच ''अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति'' (तै.आ.६-३) श्रावयन्ती श्रुतिः ब्रह्मणस्सामान्यधीबाधं सहेत। अत एव कल्पितास्तित्वरूपसामान्याकारभ्रमाद्विशेषबुभुत्सेति प्रत्युक्तम्, अपसिद्धान्ताच्च। विशेषस्य तु कल्पितत्वे तज्जिज्ञासावैफल्यम्। न हि ब्रह्मण्यसदपूर्वाकारकल्पनार्थं पूर्वकल्पितमिथ्याकारप्रतीत्यर्थं वा शारीरकमित्यवेदबाह्यः कश्चिदपि क्षमते। कल्पिताकारमिथ्यात्वबोधनार्थमिति तु स्यात्, न तर्हि ब्रह्म जिज्ञास्यम्, अपि त्वयमाकारस्सत्यो मिथ्या वेति। ततः किमिति चेत्, श्रुतिसूत्रस्वरसार्थभङ्गस्तावत्। ''ब्रह्मात्मैक्यं शास्त्रवेद्य'' मिति स्वमतव्याहतिश्च। कल्पितभेदमिथ्यात्वधीरेव तद्धीरिति चेत्, न; माध्यमिकमतेऽपि तद्भावेन

जिज्ञासायास्त्वयापि व्यवस्थाप्यत्वात्। तत्र सामान्याकारज्ञानातिरिक्तकारणस्य दुर्वचतया सामान्याकारज्ञानमेव तद्वता विदितविशेषाकारजिज्ञासाया हेतुरिति कल्पनीयमिति।

इदं जिज्ञासामात्रखण्डनं न ब्रह्मजिज्ञासा समर्थनमित्याह यः पुनरित्यादिना। इष्टापत्तौ दोषमाह अन्यथेति। जिज्ञासानङ्गीकारे आरम्भहेत्वभावाच्छास्त्रमुच्छिद्येतेति भावः। निर्विशेष इति - सामान्यविशेषयोः परस्पर सापेक्षत्वादिति भावः। ननु कल्पितधर्ममादाय सामान्यविशेषोपपत्तिरिति शङ्कते कल्पनयेति। किं सामान्येन शब्देन सत्स्वरूपं विवक्षितं उत सत्वसामान्यं। नाद्य इत्याह सामान्य रूपस्येति। तदेवोपपादयति न ह्यकिञ्चिद्भूत इति। अकिञ्चिद्भूतःस्वरूपशून्यः। खरशृङ्गं यथा कुण्ठत्वधर्मवत्तीक्षणत्वधर्मवद्वा न भवति तथा विशेषरूपोपि न भवतीत्यर्थः। शून्यवादाभ्युपगमं परिहरति न चेति। सामान्यधीबाधः स्वरूपाधीनः। द्वितीयं पक्षं दूषयति अत एवेति। श्रुतिविरोधादित्यर्थः। अपसिद्धान्तादिति। सत्वस्य ब्रह्मस्वरूपानन्योक्तेरिति भावः। विशेषस्य त्विति। कल्पितगोचरज्ञानस्य भ्रमत्वेन प्रपञ्चभ्रमानिवर्तकतया इष्यमाणत्वायोगादिति भावः। ननु कथं वैफल्यं कल्पितविषयकज्ञानस्यैव फलत्वादित्याशङ्क्य एवं सति वैदिकत्वभूमिकाकञ्चुकप्रच्छादितं बौद्धत्वमेवाविष्कृतं स्यात्। वेदान्तानां मिथ्यार्थबोधकत्वेनातत्वावेदकत्वाङ्गीकारादित्याह नहीति। ननु कल्पितप्रपञ्चरूपकार्यस्य मिथ्यात्वबोधनाच्छास्त्रस्य प्रामाण्यमिति न वेदबाह्यत्वमिति शङ्कते कल्पिताकारेति। प्रपञ्चमिथ्यात्वस्यैव जिज्ञास्यतया ब्रह्मणो जिज्ञास्यत्वं न स्यादित्याह न तर्हीति। ननु रजतमिथ्यात्वज्ञानस्य रजतनिवर्तकत्ववत् प्रपञ्चमिथ्यात्वज्ञानमपि प्रपञ्चनिवर्तकमेवेति मिथ्यात्वजिज्ञासैवास्त्विति शङ्कते ततः किमिति। ''तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्,'' ''प्रोवाच तां तत्वतो ब्रह्मविद्यां'' (मुं-१-२-१२) ''तद्विजिज्ञासस्व तद्ब्रह्मेति'' (तै-भृ १) ''अथातो ब्रह्मजिज्ञासा'' (ब्र.सू.१-१-१) इत्यादिश्रुति सूत्रविरोधः। नच तेषां प्रपञ्चमिथ्यात्वजिज्ञासापरत्वं। तथा सति लक्षणादोषइत्याह श्रुतीति। किञ्च ''अत्मैकत्वप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्तत'' (शं.भा) इति स्वोक्तिविरोधश्चेत्याह ब्रह्मेति। ननु कल्पिताकाराः कल्पितभेदाः तन्मिथ्यात्वंहि तदभावः तदेव ब्रह्मात्म्यैक्यमिति न विरोध इति शङ्कते कल्पितभेदेति। तर्हि माध्यमिकेनापि सकलप्रपञ्चमिथ्यात्वस्याभ्युपगमात् तन्मतेपि त्वदुक्तब्रह्मात्मैक्य धीरस्तीति तस्मात्तव भेदो न

त्वदिष्टैक्यलाभे तद्विवादविलयापातात्।

यच्च मन्यसे कल्पिताकारमिथ्यात्वबुद्ध्याऽपि ब्रह्मणस्तच्छून्यत्वमवसेयमिति तज्जिज्ञासाद्युपपत्तिरिति, तदपि यदि सामान्यबुद्धिक्रोडीकृतं तदा न जिज्ञास्यम्; बहिष्ठस्य तु सत्यत्वे सद्वितीयता। मिथ्यात्वे प्रतियोगिसाहित्यसत्यता। साहित्यराहित्ययोस्सहजसङ्घर्षात्। परस्परविरोधे च प्रकारान्तरस्थित्ययोगात्। यदि राहित्यमपि कल्पितं कथं तदा कल्पिताकारराहित्यनिवृत्तिः? यत्किञ्चिन्निवृत्तिमात्रं तु प्रागपि सुलभमिति कृतं तदर्थविचारव्यसनेन। अतस्स्वीकुरु वा सतस्सत्याकारद्वयवैशिष्ट्यम्, परिहर वा तज्जिज्ञासामिति।

किंच यद्यशुद्धं ब्रह्म जिज्ञासोर्वेदितव्यं तर्हि दुस्त्यजं नैष्फल्यम्, तथा प्रकाशस्य संसारभेषजत्वानभ्युपगमात्। अन्यथा प्रागेव मुक्तिसिद्धौ किमर्था जिज्ञासा? कथंच अशुद्धतत्त्वोपदेशिनश्शास्त्रस्य तत्त्वावेदकत्वम्? कथंतरामतत्त्वज्ञानेन भ्रान्तिविलयः? ननु भूरन्ध्रभ्रमेण

स्यादित्याह न माध्यमिकमतेपीति। ननु प्रपञ्च मिथ्यात्वमेव यदि ब्रह्मात्मैक्यं स्यात् तदा तेन विवादविलयस्यात्। किन्तु तद्बुध्यवसेयं ततोन्यदेव ब्रह्मात्मैक्यमिति तेन विवादो युज्यत इति शङ्कामनुवदति यच्च मन्यस इति। ब्रह्मणस्तच्छूत्यत्वं कल्पिताकारशून्यत्वमेवे(मपी)त्यर्थः। सामान्यबुध्या क्रोडीकृतं धर्मिज्ञानेन विषयीकृतमित्यर्थः। बहीष्ठस्य -धर्मिज्ञानाविषयीकृतस्य। मिथ्यत्व इति। आकारशून्यत्वस्य मिथ्यात्वमाकाराभावाभावः। एवं चाकारस्य सत्यतास्यादित्यर्थः। प्रतियोगिसाहित्यसत्यता प्रतियोगिसाहित्यसहिता सत्यतेति मध्यमपदलोपी समासः। प्रतियोगिसत्वं तत्सत्यत्वं चेत्यर्थः। सहजसङ्घर्षः स्वतो विरोधः भावाभावरूपेति यावत्। नन्वेवमप्यन्यतर सत्वे अन्यतराभावोस्तु अन्यतराभावे इतरसत्वनियमः कुत इत्यत्राह परस्परविरोध इति। भावाभावयोस्तथानियमात्। अन्यथा "द्वौ नञौ प्रकृतमर्थ सूचयत" इत्यादि तान्त्रिकव्यवाहारोच्छेद श्चेति भावः। दूषणान्तरमाह यदीति। कल्पिताकारराहित्यस्यापि कल्पिताकारतया तत्सत्वे कल्पिताकारत्वावच्छिन्ननिवृत्तिरूपामुक्तिः कथं स्यादित्यर्थः। ननु तद्व्यतिरिक्तनिवृत्तिरेव मुक्तिरस्त्वित्यत्राह यत्किञ्चिन्निवृत्तिमात्रमिति। कल्पिताकारनिवृत्तिरूपकल्पिताकारसत्वेपि इतरनिवृत्तिमात्रा मुक्तिश्चेत् अविशेषाद्घटादिकल्पिताकारसत्वे यत्किञ्चिन्निवृत्तिमात्रा मुक्तिः स्यादित्यर्थः। अशेषविशेषशून्यमिति सूचितं व्याघातमुपसंहरति अत इति। उक्तविधया जिज्ञासानुपत्तेरित्यर्थः।

अनाद्यविद्यान्धकारितमित्यनेन सूचितं व्याघातं दर्शयितुमुपक्रमते किञ्चेति। किमविद्याश्रयो ब्रह्मजिज्ञास्यमुत शुद्धमितिविकल्पमभिप्रेत्याद्ये दोषमाह यद्यशुद्धमिति। यद्यपि प्रागुपहितस्य जिज्ञास्यत्माशङ्क्य निरस्तमेव। तथापि पूर्वत्र यत्किञ्चित्कल्पितधर्मोपधानं विवक्षितं। इहतु अशुद्धिरूपाविद्योपधानमिति भेदः। अविद्याविशिष्टप्रकाशस्य संसारनिवर्तकत्वे अनादि संसारनिवृत्तिस्स्यादित्याह अन्यथेति। अशुद्धेर्मिथ्यात्वात्तद्विशिष्टोपदेशिशास्त्रं चाप्रमाणं स्यादित्याह कथंतरामिति। नन्वतत्वज्ञानादपि संसारनिवृत्तिस्यादेव। रज्जौ सर्पभ्रमस्य तस्यामेव भूरंध्रभ्रमेण निवृत्ति दर्शनादित्याशङ्कते नन्विति। सत्यं भ्रान्तेरपि भ्रान्तिनिवर्तकत्वमस्त्येवेति। तथापि निवर्तकभ्रान्तेर्निवृत्यभावात् सर्वभ्रमनिवृत्तिलक्षणामुक्तिर्न स्यादित्याह नस्यादिति। ननु तत्वज्ञानादेव

दामदर्वीकरभ्रमनिवृत्तिवत्स्यात्, न स्यात् तद्वदेव भ्रान्त्यन्तरस्थितावात्यन्तिकत्वासिद्धेः। तद्विलापकतत्त्वज्ञानदेरुक्तक्रमेणात्रासंभवात्। अहेतुकविनाशादेश्च निरसिप्यमाणत्वात्।

शुद्धं तर्हि जिज्ञास्यमपि न ते स्यात् ज्ञप्त्या तत्स्वरूपस्पर्शानभ्युपगमात्। शाखाचन्द्रन्यायेन स्वरूपस्पर्श इवेति मतमिति चेत्, कथं तदधीनबोधविषयतामन्तरेण दृष्टान्तदार्ष्टान्तिकयोयस्त दुपलक्ष्यत्वम् तद्विषयत्वे च कथं तत्प्रयुक्तदोषातिक्रमः सोऽपि बोधः स्ववेद्यताया भ्रान्तिर सत्यश्चेत्यदोष इति चेत्, विलीनं तत्त्वावेदकवाक्यैः। वेद्यमिथ्यात्वमन्तरेण भ्रान्तित्वायोगात्। उपलक्षणपर्वावलम्बननैष्फल्याच्च।

शुद्धिश्चास्य नित्याऽनित्या वा आद्ये किमर्था जिज्ञासा, अन्ततस्तस्यास्तादर्थ्यात्। शुद्धताध्यवसायार्थं सा स्यात्, न तु शुद्ध्यर्थमिति चेन्न, तदध्यवसायेनापि तत्सिद्ध्यर्थेन भवितव्यम्, अन्यथा नैष्फल्यात्। आरोपितशुद्धिनिरसनात्साफल्यमिति चेन्न,

---

निवर्तक भ्रान्तिरपि निवर्ततामित्यत्राह तद्विलापकेति। तद्विलापकं भ्रान्त्यन्तरनिवर्तकमित्यर्थः। उक्तक्रमेणेति। सत्यमिथ्यात्वविकल्पक्षोभादिरूपोक्तक्रमेणेत्यर्थः। चरमभ्रान्तिरहेतुकमेव नश्यत्वित्यत्राह अहेतुकेति। ननूपादाननिवृत्त्या तन्निवृत्तिरस्त्विति चेन्न। तथा सति ज्ञाननिवर्त्यत्वाभावान्मिथ्यात्वं न स्यादिति भावः।

नित्यशुद्धमित्यनेन दर्शितं व्याघातं दर्शयितुं द्वितीयं विकल्पमाशङ्कते शुद्धं तर्हीति। शुद्धस्य ज्ञानविषयत्वायोगाज्जिज्ञास्यत्वं नोपपद्यते कुतस्तु तद्ज्ञानान्मुक्तिरित्याह जिज्ञास्यमपीति। ननु यथा शाखायाश्चन्द्रसम्बन्धाभावेपि तद्भ्रमाच्छाखायां चन्द्रमा इति चन्द्र उपलक्ष्यते तथा इष्यमाणेन ज्ञानेन तद्विषयत्वरूपसम्बन्धाभावेपि तदुपलक्ष्यतया जिज्ञास्यत्वमस्त्विति शङ्कते शाखाचन्द्रेति। यथा चन्द्रस्योपलक्षणीभूतशाखाधीनज्ञानविषयत्वं तथोपलक्षणीभूतेष्यमाणज्ञानाधीनज्ञानविषयत्वं ब्रह्मणो नास्तीति कथमुपलक्ष्यत्वमित्याह कथं तदधीनेति। नन्वस्तु तदधीनज्ञानविषयत्वमित्याशङ्क्य तथात्वे जडत्वमिथ्यात्वादिदोषप्रसङ्ग इत्याह तद्विषयत्वे चेति। ननूपलक्षणाधीनज्ञानविषयत्वमभ्युपगम्यत एव। नच तत्प्रयुक्तदोषापत्तिः मिथ्याभूतज्ञानविषयत्वस्याप्यसत्यत्वत्वात्। नचासत्यत्वं भ्रान्तिसिद्धत्वमिति तदर्थं भ्रान्त्यन्तराङ्गीकारे तद्विषयताप्रयुक्तदोषापत्त्या तस्यापि भ्रान्त्यन्तरसिद्धत्वं वाच्यमित्यनवस्थेति वाच्यं। उपलक्षणाधीनज्ञानस्यैव स्वविषयताभ्रान्तित्वेनानवस्थाविरहादिति शङ्कते सोपि बोध इति। तत्र किं ज्ञानस्यत्सत्वाद्दोषाभावः उत भ्रान्तित्वादिति विकल्प्य पक्षद्वयेपि प्रमाजनकत्वा भावात्प्रमाजनकत्वरूपं प्रमाण्यं नस्यादित्याह विलीनमिति। किञ्च ज्ञानविषयत्वस्योक्तविधया दोषत्वाभावे प्राथमिकज्ञानविषयत्वमेवाभ्युपगम्यतामित्याह उपलक्षणेति।

फलाभावाज्जिज्ञासानोपपद्यत इत्याह शुद्धिश्चास्येति। किमर्थेति। शुद्ध्यतिरेकेणाविद्यानिवृत्तेरभावादिति भावः। नन्वस्तु ब्रह्माभेदार्थजिज्ञासा "ब्रह्मवेद ब्रह्मैव भवती" (मु-३-२-९) ति ब्रह्माभेदस्यापि फलतया श्रवणादिति तत्राह अन्तत इति। अभेदस्य नित्यसिद्धतया साध्यत्वायोगात्तत्साध्यतोक्तिरपि शुद्धावेव पर्यवस्यतीति भावः। ननु शुद्धताध्यवसायस्य साध्यत्वात्तदर्थं जिज्ञासेति शङ्कते शुद्धतेति। शुद्धताध्यवसायस्य स्वतः पुरुषार्थत्वा योगाच्छुद्ध्यर्थतया पुरुषार्थत्वं वाच्यं। तच्च न सम्भवति शुद्धेरसाध्यत्वादित्याह न तदध्यवसायेनापि। ननु पुरुषार्थान्तरार्थतया सार्थत्वमस्त्वित्याशङ्क्य तदेव नास्तीत्याह अन्यथेति। ननु नित्यशुद्ध्यवसाये सति प्रतीयमानकर्तृकत्वादिरूपाशुद्धेर्मिथ्यात्वज्ञानेन तन्निवृत्तेस्साफल्यमिति शङ्कते आरोपितेति। तथा

आरोपसंभवे नित्यशुद्धयोगात्। उपरक्तेऽपि स्फटिके शुभ्रत्ववत्तत्सम्भव इति चेन्न, भावानभिज्ञानात्। नहि वयमारोप्यदोषत्वेनाशुद्धिं प्रसञ्जयामः, ब्रह्मण्येव कुदृष्टिकल्पितविविधदोषदृष्टेरभ्युपगमात्, किंतु भ्रमाद्याधारतया। न तथा स्फटिकस्स्वयं स्वात्मनि रागमध्यस्यति। नच तत्कर्तृकोऽन्यकर्तृको वा रक्तताध्यासस्तच्छ्वेतिमाख्यशुद्धिविरोधी। इह तु स्वदोषेण ब्रह्मणि स्वयमेव बंभ्रम्यमाणे कथं भ्रान्त्यादिप्रत्यनीकतामयी शुद्धिः। नित्या भ्रान्तिरपि स्फटिकरागादिवत्तत्त्वतो नास्तीति निस्तार इति चेत्, स्थितं तर्हि विचारनैष्फल्यम्।असत्येव भ्रान्तिस्सतीव भातीति तन्निवर्तनं फलमिति चेत् न, तत्सत्त्वभ्रमसत्यत्वमिथ्यात्वविकल्पे सद्वितीयत्वानवस्थयोरन्यतरापातात्। स्वरूपेण ब्रह्म न भ्राम्यति, किन्तु जीवेश्वररूपाभ्यामिति चेत्, हन्त एकां व्याहतिं परिहर्तुमनेकामुपादत्से, कथमभ्रान्तस्य तस्य तद्भावः कथं सर्वज्ञोऽपि भ्राम्यतीति विवक्षाऽप्युत्तिष्ठेत? कथं चैक आत्मा युगपत्सर्वज्ञमज्ञं चात्मानमनुसंदधीत प्रपश्चयिप्यते (३६ वादे) चैतत्।

उत्तरत्र तु नित्यशुद्धत्वश्रुत्यादिविरोधः। किंचोभयावधिमत्तया तदनित्यत्वम् उत्तरैकावधिमत्तया वा पूर्वैकावधिमत्तया वा नाद्यः, त्रिवर्गापवर्गयोरैकराश्यप्रसङ्गात्, वैराग्योपदेशादिवैयर्थ्यात्, अपुनरावृत्तिश्रुत्यादिविरोधाच्च।

सति आरोपरूपाशुद्धिमत्तया तद्दशायां शुद्ध्यभावान्न नित्यत्वं शुद्धेरिति परिहरति आरोपसम्भव इति। ननु नित्यशुद्धेः परमार्थत्वान्नारोपिताशुद्ध्या विरोधः। यथा स्फटिकरक्तात्वारोपेपि श्वैत्यस्य न विरोध इति शङ्कते उपरक्तेपीति। ब्रह्मण्येवेति। शुक्तिरजतादाविव परोक्षभ्रमस्थलेपि प्रातिभासिकमुत्पद्यत इतीदमुक्तमिति ध्येयं। किन्त्विति। भ्रमसुखदुःखाद्यनर्थाधारतयाऽशुद्धिं प्रसञ्जयाम इत्यर्थः। एवञ्च विषमो दृष्टान्त इत्याह न तथेति। तथा च भ्रान्तिविषयत्वं न दोषः अपितु भ्रान्त्यादिप्रत्यनीकस्वरूपस्य भ्रान्त्याश्रयत्वं। तद्धेतुदोषाश्रयत्वं च दोष इत्यर्थः। भ्रान्तिरपीति। तद्धेतुभूतदोषादिरपीत्यर्थः। एवं तर्हि भ्रान्त्यादिदोषस्य स्वत एव निवृत्ततया नारोपितदोषनिवर्तकतयापि सार्थक्यमित्याह स्थितं तर्हीति। ननु भ्रमादेरसत्वेपि तत्सत्वभ्रमनिवृत्तिः प्रयोजनमिति शङ्कते असत्येवेति। तत्सत्वभ्रमस्य सत्यत्वे चाद्वैतहानेः मिथ्यात्वे च स्वत एव निवृत्तस्य निवर्त्यत्वाभावेन नैष्फल्यात् तत्सत्यता भ्रमादिनिवर्त्यत्वोक्तौ च उत्तरोत्तरं तथेत्यनवस्थास्यादित्ययुक्तमित्याह न तत्सत्वेति। ननु ब्रह्म न निर्विशेषस्वरूपेण भ्रान्त्याश्रयः। किन्तु विशिष्टजीवेश्वररूपाभ्यामिति न नित्यशुद्धिविरोध इति शङ्कते स्वरूपेणेति। जीवेश्वरयोरपि कल्पितत्वात्कल्पकान्तराभावात् नित्यशुद्धं ब्रह्मैव भ्राम्यतीति वक्तव्यमिति स्वरूपेपि भ्रान्तिरूपा शुद्धिरनिवार्येति भावः। तद्भावः स्वात्मनि जीवेश्वररूपेण भ्रान्तिः। किञ्चेश्वररूपेण कल्पना हि स्वस्मिन् सार्वज्ञं। तच्च सर्वविषयकत्वान्निर्विशेषात्मकशुद्धिगोचरमपीति शुक्तिज्ञानं रजतज्ञानमिव कथमितर विषयकज्ञानं सहेत तथा च स्वयमेव स्वात्मानं मारयेदिति व्याघातप्रसङ्ग इत्याह कथं सर्वज्ञोपीति। यदि सर्वज्ञत्वं तद्ज्ञानस्य कथं भ्रान्तित्वमित्यर्थः। किञ्चेश्वरभावः सार्वज्ञं जीवभावस्तदभावः। तथा च विरुद्धयोः कथमेकत्र रजतत्वतदभावयोरिवारोप इत्याह कथञ्चैक आत्मेति। प्रपञ्चयिष्यत इति। जीवब्रह्म भेदसमर्थनावसर इत्यर्थः।

उत्तरत्रेति। शुद्धिर्नित्यानित्यावेति विकल्पे अनित्येत्यत्रेत्यर्थः। पूर्वं संसार इव उत्तरत्रापि संसारप्रसङ्ग इत्याह। त्रिवर्गेति। अस्तु को दोष इत्यत्राह वैराग्येति। वैराग्योपदेशादिवैयर्थ्यादिव।

अत एव न द्वितीयः-बन्धमोक्षयोर्व्युत्क्रमताप्रसङ्गात्, शुद्धेरसाध्यत्वेन विचारादिनैष्फल्याच्च। तृतीयस्तु न शुद्धेर्नित्यस्वरूपैक्ये स्यात्। निरवधित्वसावधित्वयोर्नित्यवैरात्। अतिरेके च स एव सत्यासत्यविकल्पावतार इति।

यद्यप्यस्मन्मते नित्यशुद्ध ईश्वरः, साध्यशुद्धिः क्षेत्रज्ञश्च जिज्ञास्येते, तथाऽपि न प्रतिबन्दी, ईश्वरशुद्धेरसाध्यत्वात्। जीवशुद्धेस्साध्याया अपि स्वरूपान्यत्वात्सत्यत्वाच्च। उदारगुणसागरः परमपुरुषः स्वाराधनात्मकशास्त्रार्थसंप्रीतस्त्रिवर्गमपवर्गं च प्रयच्छतीति हि प्राची मर्यादा। स यदि स्वयमेव भ्राम्येत् स्वाश्रितत्राणौपयिकगुणहीनो वा, न तर्हि जिज्ञास्यः, स्वरक्षणेऽप्यशक्तस्येति न्यायात्। कल्पितसार्वज्ञ्यादियोगात् तदभावेऽपि तीर्थादिवद्वा तस्य भजनं स्यादिति चेन्न, कल्पितस्य सार्वज्ञ्यादेर्जिनादिष्वपि सिद्धेः तदुपसत्तिप्रसङ्गात्। सर्वैस्तेषु न तत्क्लृप्तिरिति चेन्न, अविशेषात्। महाजनपरिग्रहाद्विशेष इति चेन्न, सर्वेषां सर्वतस्सम्मूढत्वमिच्छतां क्वचिदपि प्रामाणिकत्वादिलक्षण महत्त्वस्यासिद्धेः, प्राचुर्यस्य विगानादप्रयोजकत्वाच्च। यत्तु तीर्थादिवदिति तत्तदा सह्येत, यदि तत्सेवयेव तदुपसत्त्या प्रसाद्योऽन्यः। न हि क्रियातच्छक्त्यपूर्वाण्येव फलन्तीति नैगमः पन्थाः।

द्वितीयोपि नेत्याह अत एवेति। हेत्वन्तरमाह बन्धेति। शुद्धेर्विनाशे संसारोत्थानाच्छुद्धिकाले विरोधेन संसारासम्भवादिति भावः। किञ्च शुद्ध्यर्थं हि तत्वज्ञानं वाच्यं शुद्धिश्चेत्पूर्वावधिरहिता तदा तदर्थं श्रवणनिदिध्यासनादिवैयर्थ्यमित्याह शुद्धेरसाध्यत्वेनेति। तृतीयस्त्विति ।पूर्वा वधि (उभया)मत्वमित्यर्थः। विकल्पावतार इति। सत्यत्वे चाद्वैत हानिः मिथ्यात्वे च न मुक्तिरिति विकल्पपूर्वकं दूषणावतार इ. र्थः।

नन्वनित्यशुद्धियोगिनो नित्यशुद्धियोगिनश्च जीवेश्वरयोः जिज्ञासतायाः सिद्धान्तेपि सत्वात् कथमेवं विकल्प्य दूषणाभिधानमित्यत्राह यद्यपीति। शुद्धयशुद्ध्योर्नयौगपद्यविरोधः आश्रयभेदात्। साध्यत्वेनाभिमतायाः शुद्धेः जीवस्वरूपादन्यत्वेन न साध्यता विरोधः । सत्यत्वान्न मिथ्यात्वप्रयुक्तजिज्ञास्यत्वविरोधश्चेति भावः। शास्त्रार्थसम्प्रीतः-अनुष्ठितेन शास्त्रार्थेन सम्प्रीतः । प्राची-वैदिकी। उन्मादिनो वा ज्ञानादिरहितस्य वा रक्षकत्वं दूरे। स्वरक्षणेपि शक्तिरहितत्वादित्याह स्वरक्षण इति। ननु कल्पितसार्वज्ञमादाय फलप्रदानोपयोगि भूताराधनाराधकतदिष्टपरिज्ञानसम्भवात्तदभावेऽपि तद्ध्यानादेः पुण्यतीर्थस्नानादिवददृष्टार्थत्वसम्भवाच्च कथं ब्रह्मणो न जिज्ञास्यत्वमिति शङ्कते कल्पितेति। आदिशब्देन दयादि गृहयते। सर्वैरिति। तथा च तत्र न कल्पितं सार्वज्ञयमिति भावः। अविशेषादिति। कैश्चिद्ब्रह्मण एवानभ्युपगमादिति भावः। महत्वं किं प्रामाणिकत्वं उत प्राचुर्यं नाद्य इत्याह सर्वेषामिति। सर्वे सर्वत्र भ्रान्ता इति युष्मन्मतस्थितिः सर्वस्य मिथ्यात्वाङ्गीकारात्। तथाच युष्मन्मते कस्यापि तत्वदर्शित्वतत्वोपदेष्ट्त्वलक्षणं महत्वं न सिध्यतीत्यर्थः। न द्वितीय इत्याह प्राचुर्यस्येति। "शतमप्यन्धानां न पश्यतीति" न्यायेन प्राचुर्यमप्रयोजकमित्याह अप्रयोजकत्वाचेति। यदीति। यथा तीर्थादिसेवया तीथदिरन्यः ईश्वरः प्रसाद्यः स्यात् तथा ईश्वरस्य सेवया अन्यः प्रसाद्यः स्यात् स्यात्तीर्थादितुल्यतेत्यर्थः। कर्मणोहि स्वभावः किञ्चित्कर्माव्यहितोत्तरकालमेव फलं जनयति। किञ्चिद्विनष्टमपि कालान्तरे तथा स्वभावात्। क्रियैव फलं जनयतीति कर्ममीमांसावृत्तिकारान्तरपक्षं।

उक्तन्यायेन जैनगन्धिवेदान्तिमतेऽपि जिज्ञासानुपपत्तिर्द्रष्टव्या।

तदेतदखिलमन्तर्निधाय ब्रह्मशब्दाभिधेयमुभयलिङ्गं सर्वेश्वरं प्रस्तुत्य तस्यैवारम्भसूत्रे विवक्षितत्वमाह- ''तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्य'' (श्री भाष्य.जि ज्ञा) इति ॥

इति श्री कवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां जिज्ञासानुपपत्तिवादो द्वितीयः ॥ २ ॥

शक्त्यात्मनावस्थितायाः क्रियायाः फलजनकत्वमिति भट्टपक्षं। तज्जन्यापूर्वमवेफलं जनयतीति गुरुपक्षं दूषयति नहीति। ''सएवैनं भूतिं गमयति स एनं प्रीतः प्रीणाति अन्नादो वसुदानः''(बृ-६-४-२४)'' इत्यादि श्रुतिभिः ''लभते च ततः कामान्मयैव विहितान् हि तान्'' (श्री.भग.गी.७-२२) इत्यादि स्मृतिभिः ''फलमत उपपत्तेः'' (ब्र सू.३.२.३७) इत्यादिसूत्रैः ''फलसम्भित्सया कर्मभिरात्मानं पिप्रीपति स प्रीतोऽलं फलाये''त्यादि द्रमिडभाष्य कारादिमहर्षिवचनैश्च ईश्वरस्यैव फलप्रदत्वावगमादिति भावः। जैनवद्भेदाभेदात्मकानेकान्तवादिनो भास्करस्य मतेपि जिज्ञासानुपपत्तिस्समानेत्याह उक्तेति। ब्रह्मणस्सर्वज्ञत्वात् तदभिन्नस्य जीवस्यापि सर्वज्ञत्वेन विदिताविदिताकारा भावात् जिज्ञासा न सम्भवति। ब्रह्मणो नित्यशुद्धत्वे तदभिन्नस्यापि जीवस्य नित्यमुक्त्वाक्तत्वात्तदर्था जिज्ञासा न सम्भवति। जीवाशुद्ध्या तदभिन्नस्य ब्रह्मणोप्यशुद्धत्वात् ''स्वरक्षणेप्यशक्तस्ये''ति न्यायाज्जिज्ञास्यता न सम्भवतीति भेदसत्वेप्यभेदप्रयुक्तानां दोषाणां दुष्परिहरत्वादिति द्रष्टव्यं।

अयमर्थो भाष्याभिप्रेतश्चेत्याह तदेतदिति। एतेन सत्वविशिष्टं ज्ञानं हेतुः अखण्डविषय साक्षात्कारो जिज्ञासायाः फलं तदिच्छैव जिज्ञासेत्येकंमतं, प्रथमोत्पन्नोऽद्वैतसाक्षात्कारः प्रतिबध्दत्वान्नाविद्यानिवर्तकः स एव जिज्ञासा हेतुः अप्रतिबद्धज्ञानं फलं तदिच्छैव जिज्ञासेति द्वितीयं, प्राथमिकज्ञानमनवधारणं जिज्ञासा हेतुः अवधारणं ज्ञानं तत्फलं तदिच्छैव जिज्ञासा हेतुरिति तृतीयं। एवं च हेतुफलभावसत्वात् जिज्ञासायां नानुपत्तिरिति नवीनोक्तं निरस्तं। प्राथमिकज्ञानस्यापि समानविषयत्वेनाविद्यानिवर्तकत्वसम्भवे अखण्डविषयकज्ञाने जिज्ञासायोगात् समानविषयत्वस्यैवाज्ञान निवर्तकत्वे तन्त्रत्वात्। अन्यथा रूप्यादिगोचर शुक्त्यादिज्ञानस्यापि रजतादिभ्रमानिवर्तकत्वप्रसङ्गात्। नापि ज्ञानस्य प्रतिबन्धकत्वं तीरस्थवृक्षादिगोचरोर्ध्वाग्रत्वज्ञानस्य अधोग्रत्वभ्रमानिवर्तकत्वात्। विशेषदर्शनत्वाभावात्। तद् भ्रमस्योपाधिनिवृत्त्यैव निवर्त्यतया ज्ञाननिवर्त्यत्वाभावात्। नाप्यनवधारणत्वं प्राथमिकज्ञानस्यैककोटिकत्वेन संशयरूपानवधारणत्वायोगात्। अन्यादृशानवधारणत्वस्याविद्यानिवर्तकत्वे बाधकत्वाभावात्। अन्यथा अयं घट इति ज्ञानान्तरमपि प्रामाण्यसंशयं विनापि संशयापत्तेरिति ॥

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां द्वितीयो वादस्समाप्तः।

॥ अथ ऐकशास्त्र्यसमर्थनवादस्तृतीयः ॥३॥

त्र्यन्ताः कर्मभागेन सौहार्दं समधिश्रिताः।
मुक्तिं यद्भजनादाहुस्तमनन्तमुपास्महे॥

स्थितं तावदध्ययनविधिनाऽध्यापनविधिना वा प्रयुक्तमध्ययनं साङ्गसशिरस्ककृत्स्नस्वाध्याय विषयमिति। रागतो विधितो वा प्रयुक्तस्तदर्थविचारोऽपि कृत्स्नगोचरः, तयोस्संकोचकाभावात्।

ब्रह्मशब्दविचारानन्तरं तद्वाक्यार्थविचारः कृतः। इदानीं तद्वाक्यगताथशब्दार्थावधिविचारः क्रियत इति सङ्गतिं दर्शयन् वादार्थं सङ्ग्रहेण दर्शयति त्र्यन्ता इति। एकार्थत्वलक्षणहेतुसूचनमुखेन ऐकशास्त्र्यहेतुभूतार्थविरोधाभावं सूचयन् ऐकशास्त्र्यप्रयोजकैकग्रन्थत्वमाह सौहार्दं समधिश्रिता इति। एकग्रन्थत्व एवैकदेशत्वमिति व्याख्येयैक्यरूपहेतुमाह त्र्यन्ता इति।

ननु "स्वाध्यायोध्येतव्य" (तै-आ २-२७) इति विधेरर्थज्ञानपर्यन्तत्वपक्षे विचारशास्त्रं कृत्स्नं गोचरमस्तु। रागप्रयुक्तिपक्षे कथं कृत्स्नगोचरमिति कथमैकशास्त्र्यमित्यतशाह स्थितं तावदिति। रागप्रयुक्तिपक्षेपि विचारप्रयोजिकाया आपातप्रतीतेः कृत्स्नविषयत्वात् तदधीनविचारोपि कृत्स्नगोचर इति तच्छास्त्रमपि कृत्स्नगोचरमेव मंतव्यमिति भावः। ननु स्वाध्यायाध्ययनविधेः कृत्स्नस्वाध्यायगोचरत्ववदङ्गगोचरत्वादङ्ग विचारशास्त्रस्याप्यैकशास्त्र्यापत्तिः। प्रयोजकस्याविशेषादिति चेत् सत्यं स्वाध्यायत्वरूपोपाधिना प्रवृत्तो विचार एक एव। पूर्वोत्तरभागयोः स्वाध्यायावयवयोः कर्मब्रह्मपरयोरेकग्रन्थैकदेशत्वात्। अङ्गानां तु वेदोपकारकत्वेपि ज्यौतिषत्वादिभिन्नभिन्नोपाधिना विचारस्य प्रवृत्तत्वात्। न च ज्यौतिषादीनां एकावयवत्वं नास्ति येन तद्विचारशास्त्रैक्यं शङ्कचेत। नचैवं वेदानामपि ऋगादिभेदेन भिन्नत्वात् ऋग्यजुषोश्चैकावयत्वाभावात् कथं तद्विचारैक्यं। वेदत्वरूपैणैक्येत्वङ्गत्वरूपेण विद्यास्थानत्वेन वा सर्वेषामैक्यप्रसङ्गादिति वाच्यं। वेदानां भिन्नानां सशिरस्कानामेव प्रत्येकं तन्त्रेण व्याख्यानं सम्भवदिदं तत्पूर्वोत्तरभागव्याख्यानं सदेकमेव भवति। यथा ज्यौतिषादीन्यङ्गानि प्रत्येकं वेदानां तथाप्येकमेव ज्यौतिषादिशास्त्रं यथा वा प्रयाजादीनि प्रत्येकमङ्गत्वेप्याग्नेयादीनामङ्गानि सकृदनुष्ठितानि भवन्तीति। ननु तर्हि साङ्गसशिरस्कस्वाध्यायविषयमिति साङ्गग्रहणं किमर्थमिति चेत् साङ्गग्रहणं विचारप्रयोजकापातप्रतीतिसिध्यर्थमिति गृहाण। ननु स्वविधिप्रयुक्तिपक्षे 'स्वाध्यायोध्येतव्य' (तै-आ २-२७) इति स्वाध्यायशब्दस्य सङ्कोचकाभावादध्ययनस्य कृत्स्नविषयतया विचारस्य कृत्स्नविषयत्व सिद्धिरस्तु। अध्यापनविधिप्रयुक्तिपक्षे कथं कृत्स्नविषयत्वमिति चेन्न "अष्टवर्ष ब्राह्मणमुपनयीत तमध्यापयीत" (शतपथ ब्रा) इति अध्यापनविधिना अध्ययनविधिसिद्ध व्रतनियमविशेषयुक्तस्य कृत्स्न विषयस्यैव अध्ययनस्य स्वाङ्गभूतोपनयनद्वारतया स्वीकारात्। अध्यापनविधिः कृत्स्न स्वाध्यायाध्ययनं प्रयुङ्क्ष इति न दोषः। तयोरिति। तदर्थविचारे विधितो रागतो वा प्रवृत्तौ व्याख्यानं विना दुर्ज्ञानत्वात् तत्तत्प्रवृत्तंपुरुषानुजिघृक्षया प्रवृत्तं मीमांसाशास्त्रं तद्व्याख्यनरूपं कृत्स्नगोचरमिति भावः।

ननु विधि प्रयुक्तिपक्षे सङ्कोचकाभावात् सर्वगोचरो विचारः स्यात्। रागप्रयुक्तौतु विचारस्तत्साध्य निर्णयो वा न स्वतः पुरुषार्थ इति। यस्य यत्पुरुषार्थरागसम्भवः तस्य तन्निर्णयोपयोगिविचार एव इच्छा स्यादिति विचारस्सङ्कोचमर्हतीति शङ्कते नन्विति। यद्यपि पुरुषाणां रागस्सङ्कुचितोस्तु तथापि सर्वपुरुषार्थेषु

ननु विधिप्रयुक्तौ माभूत्सङ्कोचः, रागप्रयुक्तौ तु स्यात्, यावद्रागं प्रवृत्त्युपपत्तेः, मैवम्; विकल्पासहत्वात्। किं ब्रह्मणि विचारसङ्कोचः किं वा कर्मणि? नाद्यः पुरुषस्य चतुर्ष्वपि पुरुषार्थेषु रागसम्भवात्, क्रमेण भोगसम्भवे विरोधाभावाच्च। सन्ति ह्युभयभावनास्तथाविधाः। यस्य तु क्वाचित्को रागः, तस्यैकदेशविचारे का विचिकित्सेति चेन्न, यस्य लोकायतोपप्लुतमतेर्द्विवर्गमात्रनिष्ठस्य वेदोदितेषु चतुर्ष्वप्यनास्था, यस्य चाशक्तिरापद्वा तस्य केति प्रसङ्गात्। अस्त्वनर्हस्यानधिकारः, स्वार्हं प्रति प्रवृत्ता मीमांसेति चेत्, तुल्यं त्रिकाण्ड्यामपि। तिष्ठतु पुरुषार्थरागः, कृत्स्नप्रवचनादिरागादपि कृत्स्नविचारस्समस्ति, तेन न ब्रह्ममात्रे विचारसङ्कोचः। कर्ममात्रे च विचारं सङ्कोचयन् कबन्धमीमांसकस्तु राहुमीमांसकैरपि प्रतिवक्तव्यः, सिद्धेऽपि व्युत्पत्तिसम्भवात्। अप्राप्ते स्वतः पुमर्थे च विषये प्रवृत्त्यनङ्गत्वेऽपि, श्रवणादियोगादर्थज्ञानस्य स्वतन्त्रत्वे उपायानुष्ठानशेषत्वेऽपि, तदुपयोगिसिद्धार्थबाधायोगाच्चेति। कर्मशेषभूतस्यात्मनः शास्त्रान्तराद्विचार इति वदताऽपि शारीरकं

प्रत्येकं रागिणामनुग्रहाय कृत्स्नगोचरत्वं विचारशास्त्रस्य युक्तं। यथा पश्वादिसर्वपुरुषार्थेषु एकस्येच्छाया अभावेपि प्रत्येकमिच्छावतामनुजिघृक्षयैव विचारशास्त्रमेकं यथा वा तत्तत्सर्गपिपठिषु भेदेपि रघुकाव्यादि व्याख्या तथैव मीमांसाशास्त्रमिति। परिहरति मैवमिति। परिहारान्तरमाह विकल्पेति। त्रिवर्गापवर्गयोः परस्परविरोधात् एकस्योभयत्र रागासम्भवमाशङ्क्याह क्रमेणेति। उभयभावनाः कर्मब्रह्मोभय पराश्चतुर्मुखादयः। ननु रागानुसारेण शास्त्रप्रवृत्तौ कस्यचित्कदाचिदेवेच्छा जायत इति तद्रागानुसारेण विशेषोद्देशेन मीमासाशास्त्रं प्रवर्तते इति शङ्कते यस्यत्विति। द्विवर्गः अर्थकामौ। वेदोदितेषु वेदप्रतिपन्न साधनकेषु। ननु तादृशपुरुषानुसारेण मीमांसाशास्त्रमेव न स्यादित्युक्तं। दूषणबलाद्रागाधीनत्वं न स्यात्। न तु मीमांसाशास्त्रानारम्भ इति चेन्मैवं। तत्र त्वयापि हेत्वन्तरं यद्वक्तव्यं तत्तु पूर्वोत्तरभागसाधारणमिति तात्पर्यं। यदि रागशून्यस्यानधिकारःतदाप्रत्येकं रागाणामननुगतत्वात्तद्वतो नाधिकार इति सर्वगोचररागोधिकारी सिध्यतीति तमेवाधिकृत्य शास्त्रं प्रवर्तत इत्याह तुल्यमिति। त्रिकाण्डी-कर्मकांण्डं देवताकाण्डं ब्रह्मकाण्डं चेत्यर्थः। किञ्च कृत्स्नवेदार्थजिज्ञासोरभावेपि कृत्स्नप्रविविक्षुरूपाधिकारिसम्भवात् कृत्स्नगोचरशास्त्रं प्रवर्तत इत्याह तिष्ठत्विति। ननु पूर्वोत्तरभागसाधारणरागासम्भवः। सिद्धेव्युत्पत्त्यभावेन रागप्रयोजिकायाः आपातप्रतीतेरसम्भवात्। भावेपि सिद्धस्य प्रवृत्तिनिवृत्त्यविषयस्य विचारे प्रयोजनाभावादुपासनाविधिशेषार्थवादतया स्वार्थविवक्षाविरहाच्च तद्विचारे रागाभावात्पूर्वभाग एव विचारसङ्कोच इति मीमांसकैराशङ्किते सति सिद्धेव्युत्पत्त्यसम्भवादिना राहुमीमांसकैरैकशास्त्र्यमनभ्युपगच्छद्भिरप्युत्तरभागेपि रागादिस्समर्थनीय इति पूर्वोत्तरभागसाधारण्यं रागस्येत्याह कर्ममात्र इत्यादिना।असाध्यत्वेपि प्राप्यत्व सम्भवाद्विचारस्सम्भवतीत्याह अप्राप्त इति। ननु यदि श्रवणादेव प्रीत्यर्थं ब्रह्मबोधनं तदा बालोपच्छन्दनवाक्यवदयथार्थत्वेपि प्रीतिसम्भवान्नास्य प्रामाण्यं। यद्युपासनानुष्ठानशेषत्वं तदा आरोपितेनाप्युपासनानुष्ठानविधेः। ब्रह्मणि वेदान्तानां न प्रामाण्यमित्यत्राह अर्थज्ञानस्येति। स्वातन्त्र्यं उपायानुष्ठानमपेक्षय प्रयोजनपर्यवसानं। तद्ज्ञानस्य प्रीतिहेतुत्वेपि कामिन्यादिदर्शनवद्बाधकाभावादु पायानुष्ठानशेषत्वपक्षेपि स्वर्गाद्यर्थवादवदुपासनापेक्षित फलसमर्पकतया प्रामाण्यं स्यादेव। नच

शास्त्रैकदेश इति स्वीकर्तव्यम्, अन्यतस्तदयोगात्। तेनैव दन्तिभुक्तकपित्थन्यायेन निस्सार एव वेदान्त इति नास्तिकानां वचनमवधूयते।

अस्तु तर्हि ब्रह्मैकविषयतया विचारसङ्कोचः, अतिशयितपुरुषार्थप्रतीतेः 'स्थितेऽरविन्दे' (स्तोत्ररत्नं २८) इति न्यायादिति चेन्न, कर्मविचारस्य कैश्चिदप्यननुष्ठानप्रसङ्गात्। अस्त्विति चेन्न, प्रत्यक्षविरोधात्। अतिशयितपुरुषार्थप्रतीत्यभावात्कस्यचिदुपपत्तिरिति चेन्नः तदभावस्तस्य त्रय्यन्तभागानध्ययनाद्वा तत्सहकारिविरहाद्वा? नाद्यः, विधेः कृत्स्नविषयत्वस्थापनात्। न द्वितीयः, साङ्गाध्ययनादेव तत्रापि तत्सिद्धेः। न हि साङ्गाध्ययनविधेस्तत्रैव सर्पमारः, अन्यत्रापि तत्प्रसङ्गात्। तथात्वे वा क्व शास्त्रारम्भः? तत्सिद्धावप्यनादिदुर्वासनादार्ढ्यादपथे प्रवर्तन्ते कर्ममीमांसका इति चेन्न, त्वयाऽपि विविदिषासाधनाधिकारे कर्मणां सत्पथत्वस्वीकारात्। तथाऽपि तद्विचारश्शारीरकशेष इति चेत्, सिद्धं शास्त्रैक्यम्। कर्मस्वरूपादिविचारमन्तरेण विविदिषार्थविनियोगायोगात्। वेदनार्थविचारपक्षेऽपि किं पुनः। भवान्तरीयसुकृतविशेषमृदितकषायस्य कस्यचिदयत्नेन विविदिषोत्पत्तौ किं तदर्थकर्मविचारेणेति चेन्न, तथैव कस्यचिदत्यन्तमृदितकषायस्य जातिस्मरणादिवत्सिद्धज्ञानतया शारीरकेऽप्यनारम्भात्।

विपर्ययसमर्पकस्य वाग्धेनुवाक्यवदप्रामाण्यं बाधकाभावात्। अन्यथा ध्रुवारुन्धतीदर्शनवाक्यस्याप्यप्रामाण्यप्रसङ्गादिति भावः। प्रसङ्गात् कर्ममीमांसैकदेशिनापि नेयं शङ्का कार्येत्याह कर्मशेषेति। अन्यत इति। शास्त्रैकदेशादन्यत इत्यर्थः। तेनैवेति। मीमांसकेनैवेत्यर्थः। अतस्तन्निरासोऽपि नास्माकमेव भर इति भावः। पूर्वं कबन्धमीमांसकं कर्ममात्रसङ्कोचकं राहुमीमांसकेन निरस्य इदानीं ब्रह्ममात्र एव रागं सङ्कोच्य विचारमपि तन्मात्र एव सङ्कोचयन्तं कबन्धमीमांसकमुखेन निरासयितुमुपक्रमते।

अस्तु तर्हीत्यादिना। स्थितेरविन्द इति न्यायादिति। ''स्थितेऽरविन्देमकरन्दनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते'' (स्तोत्ररत्नं) इति न्यायादित्यर्थः। नेति। कारणीभूतरागाभावादिति भावः। तत्सहकारीति। व्युत्पत्त्यादिकं विवक्षितं। तत्रापीति। कर्मभाग इव ब्रह्मभागेपि व्युत्पत्त्यादिसहकारिसिद्धेरित्यर्थः। तत्रैवेति। ब्रह्मभाग इत्यर्थः। सर्पेण मारो मरणं। अन्यत्रापीति। कर्मभागेपीत्यर्थः। नचायमिष्टप्रसङ्ग इत्याह तथात्वेवेति। तत्सिद्धावपीति। तथाच सत्पथवर्त्यनुग्रहाय ब्रह्मविचारार्थमेव शास्त्रप्रवृत्तिरिति नासत्पथवर्त्यनुग्राहकेणैक्यमिति भावः। त्वयापीति। कर्मविचारशास्त्रस्यापि सत्पथवर्त्यनुग्रहार्थप्रवृत्तत्वादैक्यं युक्तमिति भावः। ननु विविदिषार्थत्वेन कर्मणां सत्यपथत्वमस्तु तानि तु प्रसिद्धयज्ञादिभ्यो भिन्नानि। तद्विचारश्च सर्वापेक्षा (ब्र.सू. ३-४-२६) इत्यादिना, शारीरकैकदेशतया, कृत एवेति शङ्कते तथापीति। हेतुमाह कर्मस्वरूपेति। विविदिषार्थानां कर्मणां स्वर्गार्थानां मासाग्निहोत्रनैयमिकाग्निहोत्रवद्भेदो वास्तु। नित्यकाम्यज्योतिष्टोमादिवद्विनियोगपृथक्त्वमात्रं वास्तु। सर्वथा कर्मस्वरूपविचारं विना विविदिषार्थतया विनियोगो न युक्तः। नच विविदिषार्थत्वविचार एव कर्मविचारः। तथा च कर्मस्वरूपविचारो जैमिनीय एवेति तेनैकशास्त्र्यमित्यर्थः। वेदनार्थत्वं वदतो विवरणकारस्य मते कर्मविचारशास्त्रस्याङ्गविषय शास्त्रत्वादङ्गिशास्त्रेण सुतरामभिन्नत्वमिति भावः। भावान्तरीयेति। ब्रह्ममात्रे विचारसङ्कोचस्सम्भवतीति भावः। तथैवेति भावन्तरीय सुकृतवशात् धर्मरुचिजातिस्मरणादिकमिव स्वयमागतविज्ञानाः ( ) इत्याद्यनुसारात् ज्ञानमपि सिद्धं चेत् ब्रह्ममीमांसाशास्त्रस्याप्यनारम्भप्रसङ्गादिति भावः। तदर्हस्य

तदर्हस्य तदारम्भ इति चेत्, एवमुभयार्हस्य उभयारम्भ इति तुल्यम्। न ह्यनधिकारिणं विधिरधिकुरुते: रागोऽपि तथा; ''न ह्यशकनीयमर्थं वेदोऽपि विदधाती''ति न्यायात्। यदा न यावज्जीवमनुष्ठेयं ज्ञानमपवर्गोपाय इति सेत्स्यति, तदा तदुपचयार्थं तदर्थविविदिषानुवृत्त्यर्थं वा सत्कर्मणां नित्यानुष्ठेयत्वेन विचारोऽवश्यंभावी। न च जन्मान्तरकर्मबलाद्यावज्जीवं विविदिषा स्यादिति निश्चेतुं शक्यम्, प्राक्तनैरद्यतनैर्वा प्रबलैर्विरोधिकर्मभिः तत्प्रतिबन्धशङ्कयाऽपि नित्यं सत्कर्मणां संग्राह्यत्वात्। अन्यथा प्राक्तनैरेव कर्मभिर्वृष्टिस्स्यादिति कारीर्यादिकं नानुष्ठीयेत।

नच नित्यनैमित्तिकविधिः विविदिषोत्पत्त्या निवर्तते, वर्णाश्रमादिनिबन्धनत्वात्तस्य। वर्णाश्रमाद्यभिमाननिवृत्त्या तन्निवृत्तिरिति चेत्, केयमभिमाननिवृत्तिः? किं तद्भ्रमस्य निवृत्तिः? उत स्वसमवेतत्वभ्रमस्य निवृत्तिः? किंवा देहात्मतादात्म्यभ्रमस्य निवृत्तिः? अथवा वर्णाश्रमाद्याश्रयपिण्ड सम्बन्धभ्रान्तिनिवृत्तिः? अथवा पिण्डस्यैव निवृत्तिः? नाद्यः, असिद्धेः। न द्वितीयः, कर्ममीमांसकानामपि

ब्रह्मजिज्ञासोः। उभयार्हस्येति। कृत्स्नवेदार्थजिज्ञासूनां सम्भवात् तदर्थं कृत्स्नमीमांसाशास्त्रमारम्भणीय मेव। कस्यचिदुभयजिज्ञासाविरहस्त्वप्रयोजकेति भावः। ननूभयार्हं प्रति कृत्स्नविचारार्थं शास्त्रमिति कुतः। एकैकार्हं प्रत्येकैकविचारशास्त्रारम्भः कुतो न स्यादित्यत्राह। नह्यनधिकारिणमिति। अध्ययनविधेरर्थज्ञानकामाधिकारत्वपक्षे स्वाध्यायमात्रार्थज्ञानकामनाया एव अधिकारिकोटिप्रवेशात् एकदेशार्थज्ञानकामस्याधिकाराभावान्न तमुद्दिश्य विचारशास्त्रप्रवृत्तिः। रागप्रयुक्तिपक्षेपि साङ्गाध्ययन विधेः कृत्स्नागोचरतया तदधीनापातप्रतीत्युत्थापितरागोपि कृत्स्नार्थगोचरो युक्त इति तदधीनोपायविचारगोचरो रागोपि कृत्स्नगोचर इति तदर्थशास्त्रारम्भस्यापि कृत्स्नगोचरत्वादेकदेश विचारकामं नाधिकरोति शास्त्रमित्यर्थः। न हीति। अशकनीयविधायकत्वं यथा शास्त्रस्य न सम्भवति तथा विधिरागयोरप्यनधिकारिप्रवर्तकत्वं न सम्भवतीत्यर्थः। एवं ब्रह्मसूत्रविचारसङ्कोचं पुरुषविशेषेभ्युपगम्य तदन्यपुरुषविशेषमादाय सर्वविचारस्समर्थितः। वस्तुतः सत्कर्मणां ज्ञानार्थत्वे विविदिषार्थत्वे वा ब्रह्ममात्रविचारसङ्कोचः क्वापि पुरुषे न सम्भवतीत्याह यदा चेति। यद्यपि वेदनार्थत्वं उपचयार्थं कर्मापेक्षा विविदिषार्थत्वपक्षे तूत्पन्नायास्स्वयमेवानुवृत्तेः कथं तदपेक्षेत्यत्राह न च जन्मान्तरेति। हेत्वभावादिति भावः। किञ्च प्रतिबन्धकवशाद्विविदिषाविच्छेदशङ्कया तन्निरासमुखेन विविदिषोपचयार्थतयाप्युपयोग इत्याह प्राक्तनैरिति। प्रतिबन्धशङ्कयेत्यनन्तरं उक्तनिश्चयाभावेनेति शेषः। संग्राह्यत्वादित्यत्र तद्विचारोवश्यंभावीतिशेषः।

कस्यचिदुक्तनिश्चयसम्भवेपि कर्मापेक्षामुपपादयति नचेति। ततश्च न विचारसङ्कोच इति भावः। ननु वर्णाश्रमादेरात्मन्यभावात्तदभिमान निबन्धनः कर्मविधिर्नित्यानित्यविवेकेन निवृत्ताभिमानतया निवर्तते। जन्मान्तरकर्मसिद्धं विविदिषस्य तदर्थं कर्मविचारापेक्षाभावाच्च ब्रह्ममात्रे विचारसङ्कोच इत्याशयेन शङ्कते वर्णाश्रमेति। तद्भ्रमस्येति। तत्स्वरूपाध्यासस्येत्यर्थः। किंवा देहात्मेति। वर्णाश्रम शब्देन तद्विशिष्टदेहः अभिमानशब्देन तादात्म्याभिमानश्च विवक्षित इति भावः। पिण्डस्यैवेति। वर्णाश्रमादिशब्दस्य देहपरत्वादभि मानशब्दस्याभिमन्यमानपरत्वादिति भावः। सर्वसपक्षसाधारणं दूषणमाह असिद्धेरिति। मोक्षदशायामेव

पारलौकिकात्मविदां वर्णादिस्वसमवेतत्वभ्रमाभावेन कर्मणामधिकार्यभावप्रसङ्गात् । नहि देहात्मभ्रमवन्तं प्रति धर्मोपदेशः । न तृतीयः, भ्रमनिवृत्तिर्हि देहातिरिक्तात्मविसं भौपयिकतया पारलौकिककर्मानुष्ठानयोग्यतामेवावहेदिति कथं तथा सा निवर्तते? न चतुर्थः, तत्संबन्धस्य सत्यत्वेन भ्रमत्वासिद्धेः। न पञ्चमः, ब्रह्मविचारस्याप्यनारम्भप्रसङ्गात् प्रत्यक्षादिविरोधाच्च । वास्तवनिवृत्तिमात्रविवक्षायामविरोध इति चेन्न, तस्य कर्माधिकारदशायामपि भवता स्वीकारात् । किंच यावता कर्माधिकारो निवर्तत इति मनुषे, तावता वेदान्तश्रवणाद्यधिकारोऽपि निवर्तत इति ब्रह्ममीमांसैव न स्यात् । नचायमिष्टप्रसङ्गः, तत्त्वज्ञानोदयात्पूर्वं तदनभ्युपगमात् ।

ननु कर्ममीमांसाया वेदान्तविचारानुपयुक्तत्वान्न तया सहास्यैकशास्त्रत्वमितिचेन्न, अनुपयोगासिद्धेः । कोऽसावुपयोग इति चेत्, न्यायोपजीवनं तावत् । तथाहि-बाह्यान्तरनिमित्ताप्रामाण्यनिराकरणेन प्रमाणलक्षणं तावत्कृत्स्नोपयुक्तम् । भेदलक्षणोपजीवी च गुणोपसंहारपादः । तार्तीयाश्च श्रुतिलिङ्गादयस्सार्वत्रिकाः । प्रयुक्तिश्च वर्णाश्रमादिधर्माणां

तदध्यासनिवृत्तेरिति भावः । ननु कर्ममीमांसकानां न देहात्मविवेकोस्तीत्यत आह न हीति । तथा सति देहस्य वर्तमानस्य विनाशेन देहान्तरानुभाव्यफलकर्मानुष्ठानं न स्यादित्यर्थः । भ्रमत्वासिद्धेरिति । प्रातिभासिकभ्रमत्वासिद्धेरित्यर्थः । व्यावहारिकस्यामोक्षमनुवृत्तेरिति भावः । ब्रह्मविचारस्यापीति । देहरूपपिण्डसाध्यत्वादितिभावः । वास्तवनिवृतीति । पारमार्थिकात्यन्ताभावस्य व्यावहारिकप्रतियोगिना विरोधाभावादिति भावः । सर्वपक्षसाधारणं दूषणमाह किञ्चेति । श्रवणविधिरपि त्रैवर्णिकाद्यधिकारिकः । तथा चानिवृत्ताभिमानेषु कर्मविचारः सम्भवति ब्रह्मविचारस्तु नित्यानित्यविवेकाधिकारकत्वान्निवृत्ताभिमानस्यैवेति वैषम्यं नास्तीति भावः ।

नन्वस्तूक्तरीत्या विचारसङ्कोचाभावः । तथापि पूर्वोत्तरशास्त्रयोः परस्पराकांक्षाविरहात्कथमेकशास्त्र्यमिति चोदयति नन्विति । न्यायेत्यादि । उपयोग इत्यनुषङ्गः बाह्येति । बाह्यहेतूत्था प्रामाण्यं प्रथमपादे निराक्रियते । आभ्यान्तरहेतूत्थाप्रामाण्यं त्रिपाद्यामिति भावः । कृत्स्नेति पूर्वोत्तरभाग विचारात्मके कृत्स्नशास्त्रे उपयुक्तं । भेदेति । ''सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्'' (ब्र.सू.३-३-२) इत्यत्र तावत् ''एकंवा संयोगचोदनाख्याऽविशेषात्'' (जै.मी.सू.२-४-७) इति शाखान्तराधिकरणन्यायः व्युत्पादनमुपजीव्यते । नचेदमेव तद्व्युत्पादनमिति वाच्यं । चेदनाद्यविशेषादित्यादिशब्दस्य संयोगरूपचोदनाख्याविशेषादिति पाठापेक्षत्वात् एकमिति साध्य निर्देशश्च तन्नयायोपजीवनेन तत्साध्यलाभादेव । तथा ''गुणश्चापूर्वसंयोगे वाक्ययोस्समत्वात् '' (जै.मी.सू.२-२-२३) इत्यधिकरणव्युत्पादितो गुणाद्भेदो ''न वा प्रकारणभेदात् परोवरीयस्त्वादिवदि'' (ब्र-सू-३.३.७)ति छान्दोग्य बृहदारण्यकोद्गीथयोर्भेदार्थमुपजीव्यते। तथा ''नानाशब्दादि भेदात्'' (ब्र.सू.३.३.५६) इत्यत्र शब्दान्तराभ्यासादिभेदव्युत्पादनमादिशब्दादपेक्ष्यते । ''श्रुत्यादिबलीयस्त्वाच्च न बाधः '' (ब्र.सू.३.३.४१) ''लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि'' (ब्र.सू.३.३.४३) इत्यादिना तार्तियन्यायानामेवोपजीवनमित्याह तार्तीया इति। ''विहितत्वाच्चाश्रमकर्मापि'' (ब्र.सू.३.४) इत्यादिना

विद्याप्रयुक्तत्वाश्रमप्रयुक्तत्वादिविमर्शे निविशते। गतिचिन्तायां च पाश्चमिकः क्रमः। कर्ता विद्याधिकारिचिन्तने विशेष्यते। अतिदेशादयश्च "तदेव रूपं यदमुष्य रूपम्" (छां-२-६-६) इत्यादिषु। अतः

विद्याङ्गत्वाश्रमाङ्गत्वनिर्णये कृते चातुर्थन्यायेन प्रयुक्तिःसिद्ध्यतीत्याह प्रयुक्तिश्चेति। विमर्शो विचारः। "वायुमब्दादविशेषविशेषाभ्यां" (ब्र.सू.४.३.२) इत्याधिकरणे अर्थस्य क्रमनियामकत्वं श्रौतक्रमस्य पाठक्रमाद्बलीयस्त्वं च पञ्चमसिद्धमुपजीव्याब्दादित्ययोरन्तराले वायुदेवलोकशब्दार्थ निवेशं सिद्धं कृत्वा वायुदेवलोकशब्दयोर्भिन्नार्थत्वं पूर्वपक्षीकृत्य ऐकार्थ्यं प्रसाध्यते। एवं "तटितोधिवरुणस्सम्बन्धात्" (ब्र.सू.४.३.३) इत्यधिकरणेपि पाश्चमिकन्याय उपजीव्यत इत्याह गतिचिन्तायामिति। "फलार्थत्वात्कर्मणश्शास्त्रं सर्वाधिकारं स्यात्" (जै.मी.सू.६.२.४) इत्यधिकरणे समर्थानामेवाधिकारस्स्यान्नशक्याङ्गोपसंहारेणान्येषामिति षाष्ठनिर्णय उपजीव्यते। अत्र विधुरादीनां देवादीनां च किं सामर्थ्यमस्ति उत नेत्यादिचिन्तयाधिकारिविशेषनिर्णयः क्रियते। नैष्ठिकादिभ्रष्टानां पातित्यात्कर्ममात्रानधिकारेणासामर्थ्यात् ब्रह्मविद्यानधिकारश्च प्रतिपाद्यते। तथा स्वर्गकामाधिकरणे फलकामाधिकारे सिद्धे मोक्षकामानां देवादीनामप्यधिकारोऽस्तीति चिन्त्यत इत्याह कर्मविद्याधिकारीति। अतिदेशादयश्चेति। "य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" (छां.२.६.६) आप्रणखात्सर्व एवसुवर्णः (छां.२.६.६) "कप्यासं पुण्डरीकमेवाक्षिणी तस्योदितिनाम स एष सर्वेभ्यः पाप्मभ्य उदितः" (छां.२.६.७) इत्यन्तरादित्ये श्रुतानां धर्माणां "य एषोऽन्तरक्षिणि पुरुषो दृश्यते" (छां.४.१५.१) इत्यक्षिपुरुषेपि "यदेवरूपं तदमुष्यरूपं"- इति श्रौतातिदेशेन विग्रहादीनां "यन्नाम तन्नामेति" (छां.२.६.७)ति श्रौतातिदिष्टनाम्नामपहतपाप्मत्वादितद्धर्माणां च "एककपालानां वैश्वदेविकः प्रकृति" (जै.मी.सू.७.२.२३) रित्यादि पूर्वतन्त्रन्यायेन प्राप्तिमुपजीव्य अक्षिपुरुषेपि (१) तद्धर्मोपदेशादित्युक्तं। आदिशब्देन ऊहादयो विवक्षिताः। तथाहि "सवपिक्षा च यज्ञादिश्रुतेश्ववत्" (ब्र.सू.३.४.२६) इति कर्मणां विद्यार्थत्वे सिद्धे "अगन्म सुवस्सुवरगन्मे" (तै.यजु.सं २.२.६) तिमन्त्रस्य सौर्यादौ "अगन्म ब्रह्मवर्चसं ब्रह्मवर्चसमगन्मे" तिवद्विद्यार्थत्वानुष्ठाने "अगन्म विद्यां विद्यामगन्मे" त्यूहस्यापि नावमिक "फलदेवतयोश्च" (२) त्याद्यधिकरणसिद्धत्वात्। तथा "हानौतूपायनशब्दशेषत्वात्कुशाच्छब्दस्तुत्युप (गूह) गानवत्तदुक्तं" (ब्र.सू.३.३.२६) इत्यत्र शाखान्तराम्नातोपायनवाक्यस्य हानिवाक्यशेषत्वं कुशादि दृष्टान्तेनोपपाद्य सम्भवत्येकवाक्यत्वे हान्युपायनयोश्चिन्तने विकल्पापादकवाक्यभेदो न न्याय इत्यत्र "प्रतिषेधः प्रदेशेनारभ्य विधानेच प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्" (जै.मी.सू.२०.८.२) "अपितु वाक्यशेषस्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यादिति (जै.मी.सू.२०.८.४) पूर्वोत्तर पक्षसूत्राभ्यां "नार्षेयं वृणीतें" ( ) "यजतिषु ये यजामहं करोति नानूयाजेषिति" ( ) चानारभ्याधीतमहापितृयज्ञ प्रकरणाधीतवाक्ययोर्निर्णीतमेकवाक्यत्वं 'तदुक्त' (ब्र.सू.३.३.२६) मितिसूत्रखण्डेनानूद्यत इति तन्न्याय उपजीव्यते। तथा "न स्थानतोपि परस्य" (ब्र.सू.३.२.२२) इत्यधिकरणे "दर्शयति चाथो अपि स्मर्यते" (ब्र.सू.३.२.२७) इत्यादिसूत्रेषु श्रुतिदर्शयति गुणमित्युक्तिः पदाहवनीयन्यायेन विशेषनिषेधस्य विहितविशेषेतरविषयत्वमभिप्रेत्य। सच न्यायो दाशमिकः। तथा अहीनसत्रयोर्लक्षणतो भेदे तदुपजीवनेन "द्वादशहवदुभयविधं बादरायण" (ब्र.सू.४.४.२२) इत्युक्तं। एवं "पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत्" (ब्र.सू.३.३.४४) इति विद्यामयमनश्चिदादीनां विद्यामयकत्वङ्गत्वसाधनार्थेधिकरणे

कर्ममीमांसानिरूपितस्वरूपैस्तत्तन्नयायैरेव हि वेदान्तार्थो विचार्यते। अपूर्वास्तत्र कतिपये न्यायाः विद्याङ्गभूतयज्ञादिस्वरूपशिक्षणं च। अन्यथा 'यज्ञेने'त्यादिवाक्यार्थानवबोधप्रसङ्गात्। न ह्यविदितपदार्थविशेषो वाक्यार्थावसायी स्यात्। यज्ञादिकल्पनं च तत्र तत्र क्रियते; तदपि यज्ञादिस्वरूपनिरूपणसापेक्षम्।

यच्चातिशयितपुरुषार्थप्रतीत्या तदर्थो वेदान्तभाग एव प्रवर्ततामिति, तत्रेयं प्रतीतिः किमापातसम्भवा? उत निर्णयात्मिका? न प्रथमः "अपाम सोमममृता अभूम" (कृष्ण यजुः तै.सं.३-२-७ अनु) "अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवति" (आप.श्रौत.८-२-२) इति कर्मभागेऽप्यक्षयफलापातोपलम्भात्, ब्रह्मभागेऽपि "न प्रेत्य संज्ञाऽस्ती" (बृ.४-४-२२) त्यादिभिर पुरुषार्थापातोपलम्भात्। ननु पूर्वापरवाक्यानुगुण्यात्तेषां स्तुतिमात्रपरत्वम्, अस्य तु वाक्यस्य तस्मादेव परमपुरुषार्थ एव तात्पर्यमिति वैषम्यमस्तीति चेत्; किं तेन, अप्रमितत्वेन विचारनियमं प्रत्यनुपकारकत्वात्। न द्वितीयः, मीमांसया विना तदसिद्धेः। तत्त्वविदुपदेशात्तत्सिद्धिस्संभवतीति चेत्, तर्हि ब्रह्ममीमांसाया अप्यनारम्भस्स्यात्; तदुपदेशत एव ब्रह्मस्वरूपसिद्धेः, तत एव भ्रमनिवृत्तेश्च। अत एकस्यैव पुरुषस्य वेदोदितसर्वपुरुषार्थयोग्यतामाश्रित्य एकव्याख्येयव्याख्यानात्मना विंशतिलक्षणमेकं शास्त्रमिति।

पूर्वपक्षे विद्यामयस्यापि क्रियामयक्रत्वङ्गत्वे मानसग्रहो निदर्शितः। तस्य च द्वादशाहाङ्गत्वं दाशमिके "मानसमहरन्तरं स्यात् भेदव्यपदेशात्" (जै.मी.स.१०-६-३४) इत्यधिकरणसिद्धमुपजीव्यते। एवं तन्त्रन्यायोपि "विहितत्वाचाश्रमकर्मापि"(ब्र.सू.३.४.३२) इत्यत्रापेक्ष्यते। तत्रहि कर्मणामाश्रमाङ्गत्वविद्याङ्गत्वसाधनमुखेन तन्त्रानुष्ठानं फलमित्युक्तं। पृथक्प्रयुक्तिशक्तिमदुभयगोचरत्वे देशकालाद्यैक्येन सकृत्करणं तन्त्रं। तच्चैकादशसिद्धं। विद्यार्थकर्मणैव प्रसङ्गान्नित्यसिद्धिरिति विहितत्वाच्चे। (ब्र.सू.३.४.३२) त्यधिकरणस्य प्रसङ्गः फलमिति केचित्। ननु कर्ममीमांसा निरूपितन्यायैर्वेदान्तार्थो विचार्यते चेत् तद्विचारसिद्धत्वाद्विचारवैयर्थ्यमित्यत आह अपूर्वास्त्विति। विभाषा जसी (अष्टा-२.२.३२) ति सर्वनामसंज्ञा विकल्पः। उपयोगान्तरमाह विद्येति। अङ्गाङ्गिविचारत्वाद्दर्शपूर्णमासप्रयाजादिशास्त्राणामिव शास्त्रैक्यमवर्जनीयमिति भावः। कर्मकाण्डस्य शारीरकतृतीयाध्यायेनैक्यमाह अन्यथेति। तत्रहेतुमाह नहीति। "तस्यैवंविदुषो यज्ञस्य" (तै.ना.१०अनु) इत्यादिना विद्याया यज्ञत्वनिरूपणं च कर्मनिरूपणसापेक्षमित्याह यज्ञादीति।

पूर्वोक्तातिशयितपुरुषार्थप्रतीतिरूपहेतुत्वंशं दूषयितुमनुवदति यच्चातिशयितेति। ननु कर्मभागे क्षयिष्णुफलापातप्रतीतिरप्यस्तीतिचेत् तत्राह ब्रह्मभागेपीति। "न प्रेत्य संज्ञास्ति"(बृ.४.४.२२) प्रेत्यसुखानुभवो नास्तीत्यर्थः। ननु पूर्वापरेति। कर्मफलस्य वस्तुतः क्षयिष्णुत्वमेवेति भावः। किं तेनेति। निश्चितनियामकत्वं न तु वास्तवस्य। तन्निश्चयस्तु विचारात्प्राङ् नास्तीति भावः। निर्णयात्मिकेति पक्षं दूषयति नद्वितीय इति। ब्रह्मस्वरूप सिद्धेरिति। ब्रह्मनिर्णयसिद्धेरित्यर्थः। ननु साक्षात्कारस्य भ्रमनिवर्तकत्वात् तस्य च श्रवणादि क्रमेण सम्भवात्तदर्थं शास्त्रमित्यत्राह तत एवेति। स्वतो परोक्षे विषये विचारं विनाप्यपरोक्षसम्भवाद्विचारवैफल्यमिति भावः। उक्तमुपसंहरति अत इति। आत्मनेत्यनन्तरं प्रवृत्तमितिशेषः। ननु किञ्चित्प्रयोजनसिद्ध्यर्थं तदर्थिनं प्रति तत्साधनार्थविशेषप्रतिपादनार्थं प्रवर्तमानं

एतेनार्थप्रयोजनाधिकारिभेदाच्छास्त्र भेद इति निरस्तम्, सामान्यतो वेदार्थपुरुषार्थतदर्थित्वरूपेण तेषां भेदासिद्धेः, अवान्तरार्थभेदादेश्शास्त्रैक्येऽप्यविरोधात्। अन्यथा षट्काध्यायादिभेदेऽपि भिन्नशास्त्रत्वप्रसङ्गात्। नचैवं वेदार्थानुबन्धित्वाविशेषाद्विद्यास्थानभेद विलयप्रसङ्ग इति वाच्यम्, उपकारभेदेन तद्भेदव्यवस्थापनात्। अत एव हीतिहासपुराणयोरदूरविप्रकर्षादेकविद्यास्थानत्वनियमः। नच धर्मशास्त्रस्येवात्र महर्षिभिः पृथक्परिसङ्ख्यानम्। तथाऽपि भिन्नकर्तृकयोः कथमेकप्रबन्धत्वमिति चेन्न; एकेनापि कर्त्राऽनेककार्यारम्भदर्शनात्, अनेकैरप्येक रथगोपुरप्राकारादिनिर्माणदर्शनाच्च। निबन्धनेष्वयं विशेष इति चेन्न; तत्राप्येकेन विदुषाऽनेकप्रबन्ध करणदर्शनात्, पाणिनीयवृत्तिकादम्बरीप्रभृतिषु चानेककर्तृकत्वेऽप्येकप्रबन्धत्वसंप्रतिपत्तेश्च। तत्र कर्तृभेदे किं प्रमाणमिति चेत्, कर्मब्रह्ममीमांसयोरपि वा किम्? उपदेशपारम्पर्यमिति चेत्, तुल्यम्।

अस्तु तर्ह्यर्थविरोधाद्भेद इति चेत्; कोऽसौ विरोधः? द्वैताद्वैतगोचरत्वमिति चेन्न,

---

शास्त्रं। अर्थप्रयोजनाधिकार्यैक्ये एकं तद्भेदाद्भिन्नमेवस्यात्। यथान्यायशास्त्रशब्दशास्त्रे प्रत्येकमर्थाद्यभेदभिन्ने परस्परं तद्भेदाच्च भिन्ने। इहच कर्मब्रह्मलक्षणार्थभेदाद्भोगमोक्षरूपप्रयोजन भेदात्तदर्थिरूपाधिकारिभेदात्कथं शास्त्रैक्यमित्याशङ्कामनूद्य परिहरति एतेनेति। अर्थो वेदार्थप्रतिपादनं। प्रयोजनमपि वेदार्थनिर्णयः। अधिकार्यपि वेदार्थनिर्णयार्थी। तदेकमेवेति न शास्त्रैक्यविरोध इति भावः। ननूक्तरूपेणैक्येप्यवान्तरार्थप्रयोजनादिभेदाच्छास्त्रभेदः स्यादित्यत्राह अवान्तरेति। अन्यथेति। पूर्वमीमांसाशास्त्रस्याप्यैक्यं न स्यादिति भावः। ननु येन केनचिदाकारेण क्रोडीकारमात्रेणैक्ये वेदार्थानु बन्धित्वात् लौकिकार्थानुबन्धित्वादिरूपेणैक्यसम्भवाच्छन्दश्शिक्षाप्रभृतीनामप्यैक्यं स्यादिति शङ्कते नचैवमिति। उपकारेति। यद्रूपेण प्रयोजनमुद्दिश्यशास्त्रं प्रवर्तति तद्रूपभेदाभेदाभ्यां शास्त्रभेदाभेदौ। तथा च शिक्षादीनां वर्णशिक्षणादिरूपभिन्नप्रयोजनरूपेणैव प्रवृत्तत्वान्नविद्यास्थानैक्यं नैकग्रन्थत्वं वा। न तु वस्तुत एक धर्मक्रोडीकारमात्रेण विद्यास्थानैक्यं। अन्यथा प्रमेयत्वरूपधर्ममात्रेण सर्वशास्त्रभेदविलय प्रसङ्गात्। मीमांसाशास्त्रं तु वेदार्थविशदीकरणरूपैकधर्मेणेति विद्यास्थानैक्यमितिभावः। अत एव हीति। अदूर विप्रकर्षः-तत्वनिर्णयप्राधान्यं। नन्विह वेदार्थविशदीकरणादेकविद्यास्थानत्वे स्मृतेरपि इतिहासपुराणाभ्यां सहैकविद्यास्थानत्वप्रसङ्गः। तत्वाचारविशदीकरणरूपावान्तरभेदविवक्षायां कर्मब्रह्मविवक्षया मीमांसायामपि विद्यास्थानभेदप्रसङ्गादित्यत्राह नचेति। तत्तत्प्रवृत्तिप्रयोजकोपकार विशेषमालोच्य विद्यास्थानभेदान् परिगणयद्भिः तत्तत्प्रबन्धाभिप्रायविद्भिर्महर्षिभिरेकविद्यास्थनत्वेन कीर्तनान्मीमांसाया एकोद्देशेन प्रवृत्तिरवगम्यते नतु स्मृत्यादाविति भावः। नन्वेकप्रयोजनोद्देशेन प्रवृत्तेरितिहासपुराणयोर्नैकप्रबन्धत्वं किमुत भिन्नकर्तृकयोर्मीमांसाशास्त्रयोरितिशङ्कते तथापीति। किं कर्तृभेदाभेदौ कार्यभेदाभेदयोः प्रयोजकौ यद्वा प्रबन्धभेदाभेदयोः। नाद्य इत्याह एकेनापीति। द्वितीयं शङ्कते निबन्धेष्विति। एकेन विदुषेति। कालिदासादिभिःरघुकाव्यमेघसन्देशादिकरणदर्शनादिति भावः पाणिनीयेत्यादि। जयादित्यवामनाभ्यां काशिकावृत्ताख्यप्रबन्धकरणदर्शनात् पितृसुताभ्यां भट्ट बाणतत्सुताभ्यां कादम्बरीकरणदर्शनात्। भोजादिभिश्चम्पूकाव्यकरणदर्शनादिति भावः। तत्रेति। पाणिनीयवृत्त्यादिष्वित्यर्थः। ननु मा भून्नामकर्तृभेदादिकं बाधकं। साधकं किमिति चेत्कर्तृसङ्कल्प एव।

तयोरेकनिष्ठत्वासिद्धेः। न हि कर्मकाण्डनिरूपितफलकरणेतिकर्तव्यतादीनामैक्यं ब्रह्मैक्यादिविषयेषु वेदान्तेष्वभिधीयते । तत्सत्यत्वमिथ्यात्वप्रतिपादनाद्विरोध इति चेन्न, वेदान्तभागस्य प्रपञ्चमिथ्यात्वतात्पर्याभ्युपगमे कर्मभागस्य तत्सत्यत्वप्रतिपादनतात्पर्यासिद्धेः । सत्यत्वाभावेऽपि हि त्वदुक्तव्यावहारिकमर्यादया फलकरणभावादिकं निरूपयितुं शक्यते । अन्यथा वेदान्तविचारस्यापि प्रमाणतर्कादिभेदसापेक्षत्वेन स्वव्याघातप्रसङ्गः । सगुणब्रह्मोपासनतत्फलादिचिन्तनमपि शास्त्रान्तरसाध्यं स्यात् ।

यदा त्वस्मदुक्तन्यायेन सकलकर्मसमाराध्यमनन्तगुणविभूतिकं ब्रह्म वेदान्तवेद्यम्, तदा तु न विरोध गन्धोऽपि । निरीश्वरत्वसेश्वरत्वाभ्यां विरोध इति चेन्न; जैमिनिसूत्रेष्वीश्वरप्रतिक्षेपादर्शनात्, अर्वाचीनव्याख्यातृजल्पितानां तु अनादरणीयत्वात् । अत एव सेश्वरमीमांसापक्षोऽपि नातीव विच्छिन्नः; परैरनूद्यते च । देवताकाण्डं च कर्मकाण्डशेषतया भाष्यकारैः परिगृहीतम् । ''तदुक्तं संकर्ष'' (संकर्ष काण्ड) इति तत्रत्यसूत्राणि चोदाहरन्ति । तस्य च काण्डस्योपसंहारे ''अन्ते हरौ तद्दर्शनात्''

तदवगमश्च मीमांसाशास्त्रं पूर्वोत्तरमीमांसेतिव्यवहारात् । विंशतिलक्षण्येकं शास्त्रमिति कर्तभिप्रायज्ञवृत्तिकर्तृबोधायनव्यवहाराश्च । ननु तथा सति कर्मब्रह्मकाण्डयोरध्यायपरिगणने पूर्वोत्तरषट्कयोरिव सप्तदशोध्ययोष्टादशोध्याय इति परिगणनापत्तिरिति चेत्पुराणेष्वंशभेदेनाध्याय सङ्ख्याव्यवहारवत्काव्ये काण्डपर्वभेदेन सर्गाध्यायव्यवहारवद्व्यवहारोपपत्तेः ।

नन्वर्थविरोधो भेदकोस्त्विति शङ्कते अस्तु तर्हीति । कर्ममीमांसाया द्वैतगोचरत्वं ब्रह्ममीमांसाया अद्वैत गोचरत्वमित्यर्थविरोधस्य भेदकत्वे पूर्वोत्तरभागात्मकवेदस्यापि तथा विरोधादेकप्रबन्धत्वं न स्यादित्यभि प्रायेण परिहरति नेति । हेतुरप्यसिद्ध इत्याह तयोरिति । एकनिष्ठतया विरोधं शङ्कते तत्सत्यत्वेति । असिद्धिमुपपादयति सत्यत्वाभावेपीति । पूर्वकाण्डे सत्यत्वस्यानिरूपणादिति भावः । अन्यथेति । फलकरणेतिकर्तव्यतादिनिरूपणार्थं तत्सत्यत्वतात्पर्याभ्युपगमे वेदान्तभागेपि प्रमाणतर्कादिव्युत्पादनार्थं तत्सत्यत्वतात्पर्याभ्युपगमप्रसङ्गाद्व्याधात इत्यर्थः । सगुणेति । त्वयापि सगुणोपासन विचाराङ्गी कारात्तत्रापि सत्यत्वतात्पर्यभ्युपगमप्रसङ्गेनार्थविरोधात् ब्रह्मकाण्डस्यापि भेदा भेद प्रसङ्ग इति भावः ।

किञ्च वयं सगुणनिरूपकशास्त्रैक्यं ब्रूमः । यदीदमेव शास्त्रं सगुणनिरूपकं सिद्धं तर्हि विरोधाभावादैक्यमित्याह यदात्विति । निरीश्वरत्वेति । प्रतिपाद्याभ्यामिति शेषः । असिद्ध्या परिहरति नेति । नन्वसिद्धिर्नास्ति व्याख्यानतो विशेषप्रतिपत्तेरित्यत आह अर्वाचीनेति । असूत्रार्थत्वादिति भावः । यत एवार्वाचीनजल्पितानां न सूत्रार्थत्वं अत एव केचन सेश्वरमीमांसापरतयापि व्याख्यातवन्त इति । ईश्वरनिराकरणं न सूत्रकृदभिप्रेतमित्याह अतएवेति । ईश्वरनिराकरणस्यासूत्रार्थत्वं परसम्मत्यापि दर्शयति परैरनूद्यते चेति । देवताकाण्ड चेति । शाबरभाष्यकारादिभिरित्येके । अन्ये तु भाष्यपदं वृत्तिपरं उपवर्षादिभिरित्यर्थ इत्याहुः । ननु देवताकाण्डमेवासत् तत्कथं कर्मशेषत्वमित्यत्राह तत्रत्येति । अद्य यावदुपदेशपरम्परया निबन्धपरम्परया कोशपरम्परया चोपलम्भादित्यर्थः । तत्र सूत्राक्षरपर्यालोचनया पूर्वोत्तरमीमांसयोरैकशास्त्र्यं देवताविशेषनिर्धारणं च सिध्यतीत्याह तस्य च काण्डस्येत्यादिना । तत्ववादिनः तत्वविदः इत्याहुः । ''अथातो ब्रह्मजिज्ञासा'' (ब्र.सू.१.१.१) इति शास्त्रस्य

(संकर्षकाण्ड) इति देवताकाष्ठां प्रदर्श्य ''स विष्णुराह हि'' (संकर्षकाण्ड) इति सर्वदेवताराधनानां तत्पर्यवसानाय तस्य सर्वान्तरात्मत्वेन व्याप्तिं प्रतिपाद्य ''तं ब्रह्मेत्याचक्षते तं ब्रह्मेत्याचक्षते'' इति तस्यैव वेदान्तवेद्यपरब्रह्मत्वोपक्षेपेणोपसंहारात्, सामान्यतोऽपि विशेषतश्चेश्वरः प्रस्तुत इति तत्त्वविदां संप्रदायः। अत एव कर्मकाण्डदेवताधिकरणमपि कर्मप्राशस्त्यमात्रपरम्; किमलौकिकदेवता विग्रहादिसमर्थनप्रयासेन? यथाश्रुतकर्मण एव फलप्रदत्वशक्तिरित्येतावतैवोक्तेन परप्रतिक्षेपात्, अश्रुतवेदान्तानां प्ररोचनासिद्धेश्च, सहसा च गुह्यार्थानामवचनीयत्वात् । एवं सति ब्रह्मकाण्डदेवताधिकरणैकरस्यसिद्धेः।

द्रव्यदेवतयोर्द्रव्यबलीयस्त्ववर्णनमपि न देवताविग्रहाद्यपारमार्थ्यलिङ्गम्, प्रतीतिसन्निकर्षविप्रकर्षाभ्यामेव प्राबल्यदौर्बल्यसिद्धेः। यद्यपि द्रव्यस्यापि धर्मत्वं परोक्षम्, अथापि स्वरूपतः प्रत्यक्षतया

सङ्गतिकथनसमये ''जयतीर्थेन'' ''सविष्णुराहहि'' (संकर्षकांड) इत्यादिना माध्वास्तत्ववादिन इत्याहुः। ननु पूर्वकाण्डे ''देवतावा प्रयोजयेदतिथिवद्भोजन स्य तदर्थत्वात्'' ''आर्थापत्यात्'' ''ततश्च तेन सम्बन्धः'' (जै.मी.सू.९.१.६.७.८) इति सूत्रैर्देवतायाः प्रयोजकत्वं पूर्वपक्षीकृत्य ''अपि वा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्यात्'' ''गुणत्वेन देवताश्रुतिः'' (जै.मी.सू.९.१.९) ''अतिथौ तत्प्रधानत्वमभावः कर्मणिस्यात्तस्य प्रतिविधानत्वात्'' (जै.मी.सू.९.१.९) इति सूत्रैर्देवतानिराकरणं कथं क्रियत इत्यत्राह अत एवेति । देवताकाण्डे नैकशास्त्र्यादित्यर्थः । ननु यदि प्राशस्त्यमात्रपरं तर्हि पूर्वपक्षनिराक्रिया न स्यात्। प्राशस्त्यपरत्वं चायुक्तं न्यायनिबन्धनत्वाच्छास्त्रस्येत्यत्राह किमलौकिकेति। अन्वारुह्यवादेन परपक्षप्रतिक्षेपः । न्यायनिबन्धत्वेऽपि प्ररोचनालक्षणप्रयोजनसामान्यात्प्राशस्त्य परत्वोक्तिरिति भावः । प्ररोचनार्थत्वमुपपादयति अश्रुतेति । फलप्रदत्वाभिमतेन्द्रादिदेवतानां प्रलये सत्यनन्तरसर्गे तत्फलावाप्तिर्नस्यात्। अकृताभ्यागमश्चस्यादिति बुद्ध्या कर्मण्यश्रद्धा स्यादिति कर्मणः फलप्रदत्वोक्तौ तु कर्मणि श्रद्धोत्पादकतया प्ररोचनासिद्धिरिति भावः। ननु किमर्थमन्वारोहेण चित्तसंक्षोभः क्रियते यावता परमात्मसमर्थनादेव प्ररोचनासिद्धिरित्यत्राह सहसा चेति । निर्धारितकर्मस्वरूपस्यैव ब्रह्मविचाराधिकार इति भावः। अन्वारुह्यवादत्वे हेतुमाह एवं सतीति ।

ननु ''विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्''( ) इत्यधिकरणे ''ऐन्द्रमेकादशकमालं निर्वपेदि'' ( ) ति विकृतियागे द्रव्यत आग्नेयसाम्याद्देवतातस्सन्नाय्यसाम्याच्च कस्य धर्मा ग्राह्या इति विचारे द्रव्यसाम्यस्य बलवत्त्वात्तेन प्रकृतिनियम इति समर्थितं। तत्र प्राबल्यदौर्बल्ये सत्वासत्वनिबन्धने एवेति विरोध इत्यत्राह द्रव्यदेवतयोरिति । देवतायाः स्वरूपं देवतात्वं चाप्रत्यक्षं द्रव्य तुं प्रत्यक्षमिति प्रतीतिशैघ्र्यविलंबाभ्यामेव प्राबल्यदौर्बल्ये । नतु सत्वासत्वाभ्यामिति भावः । धर्मत्वमिति । अलौकिकश्रेयस्साधनत्वमित्यर्थः एवं सर्वत्रेति। तत्रेत्थं व्याख्यातं ''देवतावा प्रयोजयेदतिथि वद्भोजनस्य तदर्थत्वात् '' इत्यादौ देवतायाः प्रधानत्वं कर्म प्रति पूर्वपक्षीकृत्य 'अपिवे ' (जै.मी.सू.९.२.९) ति राद्धान्तः उक्तःतस्यायमर्थः ''अपिवेति'' सार्धाङ्गीकारं परपक्षव्यावर्तनं यद्यपि देवताया विग्रहहविरादानयुगपत्कर्मसन्निधिप्रीतिफलप्रदान रूपविग्रहपञ्चकं दुर्निषेधं, द्रव्यापेक्षया सम्प्रदानस्य प्राधान्यं, यजेश्च देवताराधनवाचितया यागस्य तादर्थ्यं सिद्धपरवाक्येषु च परावरदेवतयोः स्वरूपादिकमन्यार्थमामनामः। तथापि कर्तव्योपदेशेषु यज्ञादिरूपकर्मस्वर्गादिफलसाधनतया चोदितत्वात् प्रधानं

विशेषोऽस्त्येव । एवं सर्वत्राविरोधः सेश्वरमीमांसायामनुसन्धातव्यः । तथाऽपि "मध्वादिष्वसम्भवादनधिकारं जैमिनिः "(ब्र.सू.१-३-३०)" धर्मं जैमिनिरत एव "(ब्र.सू.३-२-३९)" शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः" (ब्र.सू.३.४.२) "परामर्शं जैमिनिरचोदनाचापवदति हि" (ब्र.सू.३-४-१८) "परं जैमिनिर्मुख्यत्वात्" (ब्र.सू.४-३-२२) "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" (ब्र.सू.४-४-५) "भावं जैमिनिर्विकल्पामननात्" (ब्र.सू.४-४-२२) इति सूत्रेषु जैमिनिमतस्य पूर्वपक्षत्वेनोपादनाद्विरोधस्सिद्ध इति चेन्न; अत्यल्पतराप्रधानार्थविवादस्य प्रधानभेदकत्वाभावात् । अत एव हि शास्त्रेषु वार्तिकावतारः । किं पूर्वकृतप्रासादखण्डविषमांशापनयने शेषनिर्माणे तदैक्यं नास्ति? अतः प्रतिसंस्कारेणात्रापि सन्धानम् । यद्वा वैभवोक्तेषु तत्त्वभ्रमो मन्दधियां माभूदिति तदनुवादप्रतिक्षेपौ । "तदुक्तं तदुक्त"मिति जैमिनिपरिग्रह

सत् साध्यतया बुद्ध्यारोहेण पुरुषं प्रवर्तयति । कृत्स्नं च देवतादिकं क्रियाशेषभूतं इत्यादि द्रष्टव्यं । मध्वादिष्विति । मधुविद्यादिषु वस्वादीनामनधिकारं जैमिनिराचार्योमन्यते कुतः असम्भवात् तत्र हि विद्यायां वस्वादयः उपास्याः । नच तत्र त एव कर्तारस्सम्भवन्ति कर्मकर्तृविरोधात् इत्यर्थः । धर्ममिति । धर्ममेव फलप्रदं जैमिनिराचार्योमन्यते । अत एव स्वर्गसाधनताबोधकश्रुतेरुपपत्तेरित्यर्थः । शेषत्वादिति । "तत्वमसि" इत्यादिसामानाधिकरण्येन कर्मसु कतुरिव ब्रह्मत्वावगमात्तद्वेनस्य संस्कारतया कर्मशेषत्वाद्द्रव्यादिष्विव फलश्रुतिरर्थवाद इति जैमिनिर्मन्यत इत्यर्थः । परामर्शमिति । "त्रयो धर्मस्कन्धाः" (छां-२-२३८) इत्यत्र चोदनाभावादुपासनस्तुत्यर्थमनुवादमेव जैमिनिर्मेने । "वीरहावा एष देवानां योऽग्निमुद्वासयते" (यजुःसं.२.५.२) इत्यत्रापवदति चाश्रमान्तरमित्यर्थः । परमिति । परमेव ब्रह्मोपासीनानर्चिरादिर्नयतीति जैमिनिर्मन्यते "ब्रह्म गमयती"ति मुख्यत्वादित्यर्थः। ब्राह्मेणेति । अस्य स्वरूपाविर्भावो ब्राह्मेण अपहतपाप्मत्वादिस्वरूपेण । तेहि स्वरूपगुणाः प्रत्यगात्मनोपि स्वाभाविका इति "य आत्मापहतपाप्मा" (छां.८.७) इत्यारभ्य उपन्यासादिभ्योवगम्यते । न तु ज्ञानस्वरूपेणाविर्भाव इति जैमिनिर्मन्यत इत्यर्थः । भावमिति । "स एकधा भवति" (छां-७-२६-२) इत्यादिना देहेन्द्रियादिभिर्विविधताश्रुतेर्देहादीनां भावमेव जैमिनिर्मेने । न कदाचिच्चितोऽशरीरत्वमित्यर्थः । यद्यपि नैते पूर्वकाण्डे प्रतिपादिता इति न पूर्वकाण्डभेदकाः तथापि भिन्नमतस्थत्वमात्रेण शङ्क्यमिति ध्येयं । प्रौढिवादेन परिहरति अत्यल्पतरेति । अत्यल्पतरविवादस्याप्रधानार्थविवादस्य चेत्यर्थः । अत एवेति । अत्यल्पतराप्रधानार्थविरोधस्य भेदकत्वाभावादेव वार्तिकस्य सूत्रविरुद्धस्यापि व्याकरणैकदेशत्वमिति भावः । वार्तिकस्य सूत्रैकदेशत्वे दृष्टान्तमाह किं पूर्वकृतेति । एवं च जैमिन्युक्तविरुद्धांशशिक्षणेष्वैकशास्त्र्यं न विरुद्धमित्याह अत इति । विरुद्धांशापनयनस्य दोषत्वाभावादित्यर्थः । तात्त्विकपरिहारमाह यद्वेति। गुरुशिष्ययोरैककण्ठ्यं वैभवोक्तिहेतुरिति तयोरैककण्ठ्यमुपपादयति तदुक्तमित्यादिना । "तदुक्तमिति । संज्ञातश्चेत्तदुक्तं (ब्र.सू.३.३.१) "अक्षारधियांत्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं " (ब्र.सू.३.३.२४) "प्रदानवदेव तदुक्तं" (ब्र.सू.३.३.४२) इत्यादिषु जैमित्युक्तस्यैव स्वग्रन्थोक्तत्वमभ्युपगम्य तदुक्तमित्यभिप्रायाच्छिष्याचार्यसङ्कल्पाभ्यामैकग्रन्थत्वमित्यर्थः । अन्यथा सामान्यत उक्तमित्युक्त्ययोगादिति भावः । किं च क्वचित् जैमिनिमतस्यैव बादरायणेन सिद्धान्ततया स्वीकारात् जैमिनिनापि क्वचिद्बादरायणमतस्य सिद्धान्ततयास्वीकारात् परस्परव्यतिरेकेण निर्देशेनैवैक्यं

एव बहुशो दृश्यते। विशेषतश्च ''साक्षादप्यविरोधं जैमिनिः'' (ब्र.सू.२-२-२५) ''सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति'', (ब्र.सू.२-२-२२) ''अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके'' (ब्र.सू.२-७-२८) ''तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः'' (ब्र.सू.३-४-४०) इति सूत्रेषु भगवता बादरायणेन स्वाभिमतार्थस्थापनाय जैमिनिस्स्वनाम्नैवोपात्तः। स च भगवान् जैमिनिः 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्' (पू.मी.सू.१-१-७) इति स्वोक्तार्थसंप्रतिपत्तये स्वाचार्यं बादरायणमेव पुरस्करोति। जैमिनेर्बादरायणशिष्यत्वं च महाभारतादिषु प्रसिद्धम्- ''सुमन्तुं जैमिनिं वैल्वं वैशम्पायनमेव च ''(श्री महा भा) इत्यादिना। नन्वत्र व्यासशिष्यो जैमिनिरित्युक्तम्, सत्यं व्यास एवात्र बादरायणः''- ''द्वीपे बदरिकामिश्रे बादरायण मच्युतम्। पराशरत्सत्यवती पुत्रं लेभे परन्तपम्'' ॥ (श्री महा भा) इति हि स्मर्यते। व्यासव्यतिरिक्तेऽपि बादरायणसंज्ञा प्रयुक्तेतिचेत्, तथाऽपि ''तपोविशिष्टादपि वै

सिद्ध्यतीत्याह विशेषतश्चेति। साक्षादिति। अग्रनयनादियोगेन परमात्मन्येवाग्निशब्दस्य साक्षाद्वृत्तेः तत्सामानाधिकरण्याविरोधं जैमिनिर्मन्यत इत्यर्थः। सम्पत्तेरिति। ''लोमानि बर्हिर्हृदयं गार्हपत्यं'' (छां-५-१८-२) इत्यादिना उपासकहृदयादीनां यद्वैश्वानरविद्यायां वेदित्वादिकल्पनं तद्विद्याङ्गभूतायाः प्राणाहुतेरग्निहोत्रत्वसम्पादनार्थं। दर्शयति च श्रुतिः ''य एतदेवं विद्वानग्निहोत्रं जुहोति इति'' (छां-५-२४-२)। अन्यार्थंत्विति। ''तौह सुप्तं पुरुषमाजग्मतुः'' (कौषी-४.३०) इत्यादौ यद्देहातिरिक्त जीवसद्भावप्रतिबोधनं ''यो वै बालाके एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म सवेदितव्यः'' (कौषी) इति वेद्यतयोक्तब्रह्मप्रतिपाद (बोध)नार्थमिति ''क्वैष बालाके पुरुषोरायिष्ट'' (कौषी) इति प्रश्नात् ''अथास्मिन् प्राण एवैकधाभवति'' (कौषी-४.२८) इति प्रतिवचनाच्चावगम्यते। एके वाचसनेयिनोपि एतत्प्रतिवचन समानार्थं प्रश्नं क्वैष एत ( ) दित्यादिप्रश्नपूर्वकं ''य एषोन्तर्हृदयकाशकशस्तस्तिमन् शेत (बृह.४-१-१७) इत्यन्तमधीयत इत्यर्थः। तद्भूतस्यत्विति। तद्भूतस्य (ब्र.सू.३.८.२०) नैष्ठिकाद्याश्रमं प्राप्तस्य नातद्भावः अतद्भावः अतथाभावः अनाश्रमित्वेनावस्थानं न सम्भवति। कुतः तद्रूपाभावेभ्यः तेषां नैष्ठिकवैखानसपरिव्राजकानां रूपाणि धर्माः तन्निवृत्तिभ्यो नियमात् ब्रह्मचार्याचार्यकुलवासी तृतीयो त्यन्तमात्मनमाचार्यकुलेवसादयन् (छां-२-२३-२) इति ''अरण्यमियात्'' इति 'सन्यस्यग्नीन्नपुनरावर्तयेत्'' इति च शास्त्राणि हि नियच्छन्ति। जैमिनेरप्येवमेव मतमित्यर्थः। जैमिनेरप्यभिप्रायं दर्शयति सच भगवानिति। उत्पत्तिः जन्म स्वभाव इत्यर्थः। औत्पत्तिकः नित्य इति यावत्। नित्यश्शब्दार्थसम्बन्धो न साङ्केतिकः। येन प्रमाणं न स्यात्। नित्यत्वात्तस्यधर्मस्य। उपदेशो ज्ञानं ज्ञापकः। तच्च ज्ञानं न व्यतिरेकः न विपर्ययः संशयस्याप्युपलक्षणमेतत्। तथानुपलब्ध्येर्थे प्रवत 'मानत्वान्नानुवादकोपि तस्मादनपेक्षत्वादनधिगतार्थबोधकत्वाच्चोदना धर्मे प्रमाणं भवत्येव। बाद रायणस्याचार्यस्य मतेनेति सूत्रार्थः। स्वाचार्यमिति। तत्पुरस्कारप्रवृत्ते शास्त्रे न तद्विरुद्धाभिधानं सम्भवतीति भावः। नन्वाचर्यत्वान्न ब्रह्मसूत्रकृत्पुरस्कारः। तत्र मानाभावात्। किन्त्यैतिकायनादिवत्तद्ग्रहणं क्वचित्सम्मतिमात्रादित्यन्यत्र तद्विरुद्धाभिधाने नानुपत्तिरित्यत्राह जैमिनेरिति। ननु न व्यास एव बादरायणः। बादरायणशब्दस्यैतिकायनादिवत्बादरिशब्दादपत्यप्रत्ययान्तत्वेन व्युत्पन्नत्वादिति शङ्कते नन्वत्रेति। द्वीपइत्यनेन बदराणां समूहो बादरं तदयनं यस्येति व्युत्पत्तिस्सूचिता। बादरायणसंज्ञा बादरायणशब्द

वसिष्ठान्मुनिसत्तमात् । मन्ये ज्येष्ठतमं त्वाऽद्य रहस्यज्ञानवेदने'' (श्री.महा.भा) इति रहस्यतमार्थज्ञापकत्वेन प्रसिद्धिप्रकर्षादेः संप्रदायादत्र व्यास एव स्वीक्रियते । अत एव हि युष्मद्भूमिकामाश्रिताः वाचस्पतिप्रभृतयोऽपि व्यासमेव ब्रह्मसूत्रकृतमाचख्युः । येषु च सूत्रेषु पूर्वपक्षतया जैमिनिमतमुक्तं शारीरके तेष्वपि देवतासद्भावः परब्रह्मसद्भावो मुक्तस्य परब्रह्मसाम्यापत्तिर्विग्रहादिसद्भावश्च प्रतीयते, तदपि च तत्प्रणीत कर्मकाण्डदेवताधिकरणादेरन्यपरत्वं स्थिरीकरोति । न ह्यर्वाचीनवज्जैमिनिहृदयानभिज्ञस्तदाचार्यो बादरायणः, अतः परस्परसम्मत्या कार्यान्तरेष्विवात्रापि यथांशकरणमपि युक्तम् ।

तदेतदखिलमभिप्रेत्योक्तं भगवता बोधायनेन-''संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिः'' (बोधायन वृत्ति) इति । तदेतदुपादाय व्यस्तृणीत च भाष्यकारः । नन्वेतावताऽपि कर्मब्रह्ममीमांसयोरैकशास्त्र्ये प्रबन्धैक्ये वा किंप्रमाणमुपन्यस्तमिति चेत्, किं वा कर्मकाण्डद्वादशाध्यायादौ शारीकचतुरध्याय्यां च प्रत्येकमैकशास्त्र्ये त्वया निर्णीतम् ? क्रमविशेषनियामकसंगतिविशेषविशिष्टाविरुद्धावान्तरार्थशास्त्रान्तरव्यावृत्तासाधारणोपकारार्हसप्रकारैकप्रधानार्थत्वमिति चेत् इदं तु किंप्रमाणमिति निपुणो भूत्वा त्वमेव निरूपय, त्यज वा सर्वत्रैक्यम् । तस्मात् ''अथातो धर्मजिज्ञासा'' (पू.मी.सू. १-१-१) इत्यारभ्य ''अनावृत्तिश्शब्दादनावृत्तिश्शब्दात्'' (ब्र.सू.४-४-२२) इत्येवमन्तं कर्मदेवतापरदेवतागोचरतया विभक्तकाण्डत्रयं विंशतिलक्षणमेकं शास्त्रमिति तदिदं-मीमांसाशास्त्रमित्यादिना भाष्येण दर्शितमिति ॥

॥ इति श्रीकवितार्किक सिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां ऐकशास्त्र्यसमर्थनवादस्तृतीयः ॥३॥

इत्यर्थः । तथापीति । ज्ञानपदस्य कर्मणिव्युत्पत्त्या ''ज्ञान वेदन'' इति वेदनशब्दस्य णिजन्तव्युत्पन्नतया रहस्यार्थोपादेशरूपसूत्रकर्तृत्वं व्यासस्यैवयुक्तमित्यर्थः । ''अवतीर्णोमहायोगी सत्यवत्यां पराशरात्'' (स्कान्दं) इत्यारभ्य ''चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा''(स्कान्दं) इत्यादि स्कान्दवचनादिकण्ठोक्तिरादिशब्दार्थः । कर्मकाण्डे देवतानिराकरणं नाभिप्रेतमित्यत्र हेत्वन्तरमाह येषु चेति । ननु जैमिनीयसूत्राणां देवतानिराकरणपरतया व्याख्यानात् तदभिप्रायापरिज्ञानाद्वेदान्ते तथा तथा जैमिनिमतोपन्यासो व्यासस्येत्यत्राह नहीति । आचार्यबादरायणशब्दाभ्यां तदभिप्रायापरिज्ञानाभावे हेतुरुच्यते अत इति । व्याख्येयैक्यात्सामान्येन वेदार्थनिर्णयोद्देशेनैव विचारशास्त्रचिकीर्षोदयस्य युक्तत्वात्परस्परविरोधाभावाच्चेत्यर्थः ।

शास्त्रैकत्वसिद्धिरिति ।एकग्रन्थत्वसिद्धिरित्यर्थः । परमुखेनैव प्रमाणयितुमाशङ्कते । नन्विति । ऐकशास्त्र्य इत्येकग्रन्थस्याप्युपलक्षणं । क्रमविशेषनियामक सङ्गतिविशेषविशिष्टत्वादीनां हेतुतयोपन्यासात् शास्त्रान्तरेति । न्यायविद्यादि विद्यास्थानान्तरसाध्य विलक्षणकर्मभाग तात्पर्यरूपोपकारजननार्हत्वात्कर्ममीमांसाया इति भावः किम्प्रमाणमिति । कस्य प्रमाणमिति समासः। तथा च विंशतिलक्षण्यैकशास्त्रस्य प्रमाणं किं द्वादशलक्षण्यैकशास्त्रस्य वेति निपुणं निरूपणे विंशतिलक्षण्या एव प्रमाणं भवेदिति वेदार्थनिरूपणोपकारार्हतया विंशतिलक्षणीसाधारण्यादिति भावः । सर्वत्र पूर्वषट्कादावपीत्यर्थः । उक्तार्थे भाष्यार्थं संवादयन्नुपसंहरति तस्मादित्यादिना ।

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां तृतीयो वादस्समाप्तः ॥

॥ अथ अविधेयज्ञानभङ्गवादश्चतुर्थः ॥४॥

विधित्रस्तैर्यत्तत्कथितमविधेयश्रुतिपथैर्विधत्ते दुखाब्धेर्विलयमविधेया मतिरिति।
तदुद्ध्योपायं भगवदुपसत्तिं प्रथयते नमस्यामस्यामो यतिपरिवृढाय प्रतिकलम् ॥

यदेतद्भ्रान्तजनजल्पितम्; समूलस्य संसारस्य संविन्मात्रे परस्मिन्ब्रह्मण्यारोपितत्वादलीक कलधौतादेरिवाधिष्ठानयाथात्म्याध्यवसायादेव विलयः; नपुनः कर्मणोपासनेन वा विहितेनादृष्टद्वारा। आहुश्च - ''मणिमन्त्रौषधादिभ्यो दण्डघातादिनाऽपि वा। क्रियते नैव केनापि मायाकुण्डलिखण्डनम्'' इति। यत्पुनरुन्मत्तान्प्रति भिषज्यते; तदपि तत्रानारोपितत्वाभिमतदोषविशेषमोक्षणायैव, न पुनस्तदधीनधीविशेषमात्रसिद्धमिथ्यापदार्थनिवर्तनाय। दोषे तु शममुपेयुषि स्वरसवाहितत्त्वज्ञानादेव तन्निवृत्तिः। अत्राप्याहुः-''भ्रान्तभेषजनिर्माणं न भ्रान्तेरुपशान्तये। किन्तु भ्रान्तिनिदानस्य दोषस्यैवोपशान्तये''इति। नचात्रापि दोषनिवारणाय वैधापेक्षानुप्रवेशः; दोषस्याप्यत्र दृङ्मात्राधीनसिद्धितया मिथ्यात्वाविशेषेण एकहेलयैव तत्त्वज्ञानेन निवार्यत्वात्। ततश्च -

''विश्वमिथ्यात्वविज्ञानकुक्षिनिक्षेपभक्षितः। नापेक्षते पुनर्दोषः कर्मायत्तात्मबाधकम्'' ॥

लौकिकस्य तु दोषस्य व्यावहारिकव्यवस्थानतिक्रमाद्भेषजाद्यवकाशः। यद्यप्यविद्यायामपि सा समाना; तथाऽपि तथाविधत्वप्रबोधनाय प्रवृत्तत्वाद्वाक्यस्य तावतैव तन्निवृत्त्युपपत्तिः। नच ज्ञानं स्वरूपेण विधातुं शक्यम्, अत एव ''द्रष्टव्य'' इत्यपि फलानुवाद इति निरणैषुः। तदर्थतया च न श्रवणादि

ऐकशास्त्र्यसिद्धये कर्मणां ज्ञानार्थत्वमुक्तं तदयुक्तं। वाक्यजन्यज्ञानमात्रस्यैव मोक्षहेतुत्वात्तत्र कर्मणामनपेक्षितत्वादित्युत्थानात्सङ्गतिमभिप्रेत्य वादार्थं संगृह्णाति विधित्रस्तैरिति। विधिविषयत्वेऽदृष्टद्वारा निवर्तकत्वप्रसङ्गेन प्रपञ्चमिथ्यात्वभङ्गप्रसङ्गस्त्रास हेतुः। अविधेयश्रुतिपथैः- अविधेयं श्रुतिमार्गैरित्यर्थः। प्रतिकलं सदा नमस्यामस्यामः पूजां प्रयुञ्ज्महे इति यावत्।

अलीककलधौतादेरिव-मिथ्याभूतशुक्तिरजतादेरिवेत्यर्थः। अधिष्ठानयाथात्म्याध्यवसायः-अधिष्ठान (तत्व) सत्यत्वनिश्चयः-मायाकुण्डली-रज्जावारोपितस्सर्पः। मणिमन्त्रौषधादिभ्यः इति हेतौ पञ्चमी। मणिमन्त्रौषधादिभिः दण्डधातादिना वा न निवर्तते अपितु रज्जुतत्वज्ञानेन निवर्तत इत्यर्थः। ननु तर्ह्युन्मत्तान् प्रति लोके चिकित्साकरणं न स्यादित्यत्राह यत्पुनरुन्मत्तानिति। भ्रान्तेरिति। भ्रान्तिसिद्धार्थस्येत्यर्थः। दोषस्यापीति। ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वज्ञानेन अविद्याया अपि विषयीकरणात् प्रपञ्चेन सह तन्निवृत्तिर्दुर्वार एवेति भावः। भक्षितः-निवृत्तः। ननु लोकेपि दोषस्यैवं निवृत्तिसम्भवाद्भेषजादिकरणं नस्यादित्यत्राह।

लौकिकस्यत्विति। प्रातिभासिक मिथ्यात्वाभावादित्यर्थः। तथाविधत्वेति। तत्वमस्यादिवाक्यस्य व्यावहारिकमिथ्यात्वमेवज्ञाप्यं तस्मिन् ज्ञाने सत्यविद्यानिवृत्तिरिति भावः। ननु तदेव ज्ञानं विधेयमस्त्वित्यत्राह नच ज्ञानमिति। आज्यावेक्षणविधीनां तत्साधनविधिपरत्वमिति भावः। कथं तर्हि ''द्रष्टव्य'' इति विधिरित्यत्राह अत एवेति। ''श्रोतव्य'' इति श्रवणविधेः फलानुवाद इत्यर्थः। ननु यद्यविधेयाद् ज्ञानाद्बन्धनिवृत्तिस्तर्हि श्रवणादिविधानं (व्यर्थ) किमर्थमित्यत्राह तदर्थतयेति।

विधिनैरर्थक्यम् । तादर्थ्यं च प्रतिबन्धकभेदवासनानिरसनद्वारेण । तस्याश्च प्रतिबन्धकत्वमसम्भावना विपरीत सम्भावनाख्यचित्तविक्षेपहेतुत्वात् । ''ब्रह्म वेद'' (मुंड ३-२-९) इत्यादौ च ज्ञानमात्रस्यैव मोक्षहेतुत्वं श्रूयते । नचास्य वाक्यतस्सिद्धस्यैव ज्ञानस्य विधेयत्वसम्भवः, ''अप्राप्ते शास्त्रमर्थवदिति'' हि न्यायविदः । यत्तु नायं सर्प इति बुध्यस्वेत्यादौ भ्रमनिवृत्त्यर्थं ज्ञानविधिवद्दृश्यते; तत्रापि नायं सर्प इत्येतावतैव सिद्धं ज्ञानं विस्रम्भमभिसन्धाय विधेयवदनूद्यते । यदिच नायं सर्प इत्येतावता भ्रमो न निवर्तेत, तदा जानीहीति परश्शतविधानेऽपि कथं तन्निवृत्तिः? अतः ''तत्वमसि'' (छा-६-८-७) इत्याद्युपदेशात् सोऽहमित्यादिरूपेण विवर्तमानया धियैव विशुद्धाधिष्ठाननिष्ठया समूलभेदभ्रमोन्मूलनमिति ।

अत्र ब्रूमः- ''सिद्धे विश्वस्य मिथ्यात्वे धीमात्रात्तन्निवर्तनम् । तदेव न घटेतेति यथावदभिधास्यते ॥''

यत्तु लौकिकदोषस्याविद्यायाश्च मिथ्यात्वाविशेषेऽपि व्यावहारिकव्यवस्थया वैषम्यमुक्तं, तदपि न, मिथ्याभूतानामपि काचकामलादिदोषाणां ज्ञानेतरनिवर्त्यत्वे दृष्टे सत्यविद्यायामपि तदविरोधात् । अस्त्वविरोधः, तथाऽपि प्रयोजकोपदेशजन्यज्ञानादेव तन्निवृत्त्युपपत्तेः । हेत्वन्तरपरिग्रहे कल्पनागौरवमिति चेन्न, श्रुते तदभावात्, तत्परिग्रह एव तत्प्रसङ्गाच्च । नहि श्रुतहानं न्याय्यम्, येच ब्रह्मव्यतिरिक्तं सर्वं मिथ्येति प्रयोजकज्ञानवन्तः, तेऽपि चक्षुरादिगततिमिरादिदोषनाशाय प्रतिभटभङ्गाय च भेषजशास्त्रादीन् प्रयुञ्जाना दृश्यन्ते, नपुनर्मिथ्यात्वाध्यवसायमहाभेषजं प्रमाणयन्तो जोषमासते । आहुश्च- ''मायावादिमतस्थाश्च महारोगेण (दूषि) पीडिताः । मञ्चे शयाना दृश्यन्ते किंच भेषजकांक्षिणः'' इति । तस्मादविद्यायामपि मिथ्यात्वाध्यवसायस्य प्रयोजकोपदेशवशात्सिद्धावपि दोषान्तरवदेव ज्ञानेतरहेतुनिवर्त्यत्वाविरोधात् तदर्थं कर्माङ्गकोपासनविधानं नानुपपन्नम् । उक्तं च वरदराजाचार्यैः- ''यथा हरीतकीखादः क्रियते दोषशान्तये । तद्वद्दुरितशान्त्यर्थं क्रियतां हरिकीर्तनम्'' इति ।

ननु वाक्यजन्यज्ञानस्य कथं श्रवणापेक्षेत्यत्राह तादर्थ्यं चेति । तस्याश्चेति । भेदवासना-वस्त्वन्तरवासना । असम्भावना निर्विशेषं न सम्भवतीति ज्ञानं । विपरीतसम्भावना भेदज्ञानं तद्द्वारेणेत्यर्थः । ननु श्रवणादीनां सर्वेषामप्यपरोक्षार्थतास्तु प्रकरणस्याविशेषादित्यत आह ब्रह्म वेदेति । प्रकरणाद्बलवता वाक्येन ज्ञानमात्रस्य मोक्षहेतुत्वेवगते तेषां तदर्थत्वमिति भावः । नन्वेवमपि ज्ञानस्याविधेयत्वं कुत इत्यत्राह नचास्येति । अप्राप्तत्वाभावादिति भावः । विस्रम्भमिति विस्रम्भयोग्यतानूद्यत इति भावः । नन्वहं ब्रह्मास्मीति ज्ञानमविद्यानिवर्तकं तत्वमसीति वाक्येन कथं जन्यते तस्य तत्रासामर्थ्यादित्यत्राह सोहिमित्यादिरूपेण ति । यथा त्वं गौरित्युक्ते श्रोतुरहं गौरिति ज्ञानं जन्यते तथा अत्रापीत्यर्थः ।

अभिधास्यत इति । प्रपञ्चमिथ्यात्वभङ्ग इति शेषः ।

मिथ्याभूतानामिति । ततश्च विश्वमिथ्यात्वज्ञानेन निवृत्तिसम्भवेपि तन्निवृत्यर्थतयान्यस्यापि विधानमविरुद्धमित्यर्थः । प्रयोजकेति । ब्रह्मातिरिक्तं सर्वं मिथ्येति प्रयोजकोपदेशजन्यज्ञानादेवेत्यर्थः कल्पनागौरवमिति । दोष इति शेषः । तदभावादिति दोषाभावादित्यर्थः । तर्हि कुत्र गौरवं दोष इत्यत्राह तत्परिग्रह इति । परिग्रहः कल्पना, स दोष इत्यर्थः । स्वप्रवृत्तिविरोधोपीत्याह येचेत्यादिना । न पुनरिति । तथा चोक्तज्ञानस्य मिथ्यावस्तुनिवर्तकत्वे अन्वयव्यभिचार इति भावः । मायावादिमतस्थाः

यत्तूक्तं न ज्ञानं स्वरूपेण विधातुं शक्यमिति, तत्किं ज्ञानस्याभाव्यरूपतया, उताभावार्थतया, यद्वा साक्षात्प्रयत्नविषयत्वाभावात्, अथवा साक्षात्पुरुषव्यापारत्वाभावात्, उत सांशभावनानुप्रवेशविरहात्, अन्यस्माद्वा कुतश्चिदिति । न प्रथमः, भवत्पक्षे वृत्तिरूपस्य परपक्षे त्वात्मविशेषगुणस्य अस्मत्पक्षे तु तदवस्थाविशेषरूपस्य करणाधीनतया भाव्यत्वसिद्धेः । आहुश्च- "कादाचित्कस्वभावस्य भाव्यत्वं केन वार्यते । तस्याकारणजन्यत्वे चार्वाकमतचर्वणम्" इति । न द्वितीयः, "ज्ञा अवबोधने" इति भावार्थतयैव पाणिनीयस्मरणात्, आत्मस्वरूपभूतज्ञानस्य तु विधानप्रसङ्गाभावात् । न तृतीयः, प्रयत्नस्या विधेयत्व प्रसङ्गात् ; लोके हि स्वाभिमतकार्यार्थं प्रयतेतेति प्रयत्नविषयविधानदर्शनात् । न चतुर्थः, भावार्थान्तराणामप्यविधेयत्वप्रसङ्गात् । न पञ्चमः, "यष्टव्य" इत्यादौ यागादेरिव "द्रष्टव्य" इत्यादौ दर्शनादेरपि तदनुप्रवेशे विरोधाभावात् । नापि षष्ठः, ज्ञानविधिविरोधिनः कस्यचिदन्यस्यापि कुतश्चित्सिद्ध्यभावात् । किञ्च यदि ज्ञानं न विधेयम्, कथं तर्हि यागादिविधिरपि न भज्येत? यागोऽपि हि देवतोद्देशेन द्रव्यत्यागात्मा बुद्धिविशेष एव । एवञ्च द्वादशाहे अविवाक्ये दशमेऽहनि बुद्धिविशेषरूपस्य मानसग्रहादेः, कथं विधेयतेष्यते? कथं वा मनश्चिताद्यग्नीनां दृष्टिरूपाणां तत्त्वविषयाणां चोपासनानां विधेयत्वमिष्यते? कथञ्च दर्शनार्थतयाऽपि श्रवणमनननिदिध्यासनानि विधेयानीच्छसि? तान्यपि ज्ञानविशेषरूपाण्येव ।

ननु न तानि ज्ञानरूपाणि, अपि तु तदर्थव्यापाररूपाणीति चेत् तन्न; तदर्थत्वे सत्यपि तेषामपि स्वरूपस्य ज्ञानरूपत्वात् । श्रवणं हि नाम तत्वदर्शिन आचार्यान्न्याययुक्तार्थ गृहणं । मननमपि तथा एवमेवैवतदिति प्रतिष्ठापनरूपो व्यवसायः, निदिध्यासनमपि अनवरतभावनात्मकस्मृतिसन्तानः । तदेवमेषां ज्ञानभूतानामेव यदि विधेयत्वमिष्येत, कथं "द्रष्टव्य" इत्यत्र दर्शनस्य विधेयत्वं नेष्यते । तथाच-

---

सर्वमिथ्यात्वनिश्चयवन्त इति शेषः । तस्मादिति । मिथ्यात्वज्ञानस्य व्यावहारिकनिवर्तकत्वाभावादित्यर्थः । यथा हरीतकी ति । पापाख्याविद्यानिवृत्तिर्नमिथ्यात्वाध्यवसायेन सम्भवतीत्यर्थः ।

भाव्यत्वसिद्धेरिति । जन्यत्वसिद्धेरित्यर्थः । ननु सिद्धेहि करणाधीनत्वे तत्प्रयोजक प्रयत्नाधीनतया विधेयत्वं तदेव कुत इत्यत्राह तस्येति । भावार्थतयेति । धात्वर्थतयेत्यर्थः । नन्वात्मस्वरूपमेव ज्ञानं । न तु तदन्यत् मानाभावादिति तस्य न भावार्थत्वमित्यत्राह आत्मेति । अविद्यानिवर्तकं हि ज्ञानं विधेयमुच्यते । नच तदात्मस्वरूपज्ञानं । तस्य वाक्यमात्रादजन्यत्वामिति भावः । लोक इति । तृप्त्यर्थं भोजने प्रयततेति प्रयत्नविधिदर्शनादित्यर्थः । भावार्थान्तराणामिति । पुरुषशब्दस्यात्मपरत्वे प्रक्षेपादेर्विधेयता न स्यात् । शरीरपरत्वेतु हविस्त्यागरूपस्य मानसव्यापारस्य विधेयता न स्यादिति भावः । तदनुप्रवेश इति । अंशत्रयवत्यां भावनायां केनेति करणांशतायामनुप्रवेशसम्भवादित्यर्थः।एवं च द्वादशाहे इति । "मानसमहरन्तरं स्यात् (द्वादशाह) भेदव्यपदेशात्" (जै.मि.सू.१०-६-३४) इत्यधिकरण इत्यर्थः । कथं चेति । वैश्वानरविद्यायां पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत् (३-३-४४) इति सूत्र इति भावः ।

तदर्थत्व इति । श्रवणादीनामप्यनुभवानुसारात् ज्ञानत्वं । यदि व्यापाररूपत्वं तदधीन ज्ञानस्य मोक्षहेतुतया न वाक्यजन्यज्ञानमात्रस्य हेतुत्वमिति भावः । ज्ञानरूपत्वमेव दर्शयति श्रवणं हित्यादिना ।

''विष्णुर्यष्टव्य इत्यादौ विधिबाधनदर्शनात्। सर्वत्र स्याच्च तद्बाधोदर्शने वा न बाधनम् ॥''

अथ च ध्यानफलतया दर्शनमनूद्यत इति मन्यसे, तदा मननध्यानयोरपि पूर्वपूर्वफलतयाऽनुवाद इति किं न कल्पयसि? अस्त्वेवमिति चेन्न; ''फलोपकार्यङ्गतया श्रवणादित्रयविधि''रिति युष्माभिः प्रतिपादनात्। तथा चैकत्रैव विधेयत्वमनुवाद्यत्वं चेति विरोधः; नहि विरुद्धत्रिकद्वयापत्तिरनुमन्यते तान्त्रिकैः। उक्तं हि-''उद्देशेनानुवादेन प्राधान्येन समन्वितम्। उपादानं विधानं वा गुणत्वं नैव दृश्यते'' इति। ''उपस्थितेऽतस्तद्वचनात्'' (ब्र.सू.३-३-४०) इति सूत्रोक्तन्यायेनोपासनस्य सांसारिकफलोत्तीर्णे प्राकरणिकस्वरूपाविर्भावपूर्वकनिरतिशयानन्दब्रह्मानुभवाख्यफले सति ''द्रष्टव्य'' (बृ.४-५-४) इत्यत्र निष्कारणविधिभङ्गप्रयासेन दर्शनस्य फलत्वं किमर्थं कल्प्यते? । नियोगसाध्यत्वे मोक्षस्या नित्यत्वप्रसङ्गादिति चेन्न, मोक्षशब्देन दुःखध्वंसविवक्षायां साध्यत्वेऽपि नित्यत्वोपपत्तेः, प्रायश्चित्तधर्मसाध्यपापध्वंसवच्च। नच दुःखप्रध्वंसो मोक्षः, किन्तु दुःखहेतुसर्वकर्मध्वंसः, दुःखस्य क्षणिकत्वेन स्वयमेव विनाशात्। पुनर्दुःखानुत्पत्तिविवक्षायां तस्यास्साध्यत्वाभावेन प्रसञ्जकाभावः। ब्रह्मस्वरूपविवक्षायामपि तेनैव दत्तोत्तरत्वम्। नह्यनादिसिद्धं ब्रह्म उपायसाध्यमित्यनुन्मत्तो ब्रवीति। स्वरूपाविर्भावविवक्षायामपि नियोगविशेषादत्यन्तवृत्ते प्रतिबन्धे स्वरूपमात्राधीनस्य स्वरूपाविर्भावस्य स्वरूपवन्नित्यत्वात्पुनः प्रतिबन्धाभावाच्चानिवर्त्यत्वमुपपद्यते।

ननु यद्युपासनविधेः फलतया मोक्षः स्वीक्रियते, तर्हि श्रवणमननदर्शनविधीनां किं फलमिति चेन्न, 'श्रोतव्यो मन्तव्य' (बृ.६-५-६) इत्यनयोर्विधित्वाभावात्, 'द्रष्टव्य' (बृह - ४-५-४) इत्यस्य तु

ननु दर्शनानन्तरस्यान्यत्राविधेयत्वदर्शनात्कथं विधेयतेत्यत्राह। तथा चेति।

''विष्णुरूपांशुयष्टव्यः प्रजापतिरूपांशु यष्टव्यः'' इत्यादौ विधित्वाभाव उपांशुयाजाधिकरणे (पू.मी.२०-७-१८) स्थापित इति भावः।

यद्यप्यन्यत्राप्राप्तत्वाद्विधेयता तदा ब्रह्मदर्शनेपि विधिबाधो न स्यात् विधेयत्वं स्यादित्याह दर्शन इति। तदेति। फलत्वाविशेषादिति भावः। फलोपकारीति। फलोपकारतया फलकरणतया श्रवणस्य विधेयत्वं श्रवणाङ्गतया मनननिदिध्यासनयोर्विधेयत्वं विवरणादवुक्तमिति भावः। एकत्रैवेति । दर्शनस्य मनननिदिध्यासनापेक्षया फलतयानुवाद्यत्वं। एवं दर्शनापेक्षया निदिध्यासनस्य विधेयत्वं। मननापेक्षया फलतयानुवाद्यत्वमित्यर्थः । विरुद्धत्रिकद्वयमेवाह उक्तं हीति ।उद्देश्यत्वानुवाद्यत्वप्राधान्य विधेयत्वोपादेयत्वगुणत्वानां नैकं पदं युगपत्प्रतिपादयितुमीष्ट इति विरोध इति। ''उद्भिदा यजेत'' इत्यादौ नामधेयत्वमुद्भिदादीनां पदानां समर्थितमिति भावः। उपस्थित इति। उपस्थितिः-ब्रह्म प्राप्तिः मुक्तिः। अतस्तस्मादेव मुक्तत्वादेव सत्यसङ्कल्पवत्तया तत्सङ्कल्पादेः पितृलोकप्राप्त्यादिकं फलं। तत्र हेतुः ''तद्वचनात्'' (ब्र.सू.३-३-४०) ब्रह्मसम्पत्त्यनंन्तरं ''स यदिपितृलोककामोभवति '' (छां.८-२-२) इत्यादिना प्रतिपादनात्। तथा च सगुणोपासनस्यार्वाचीनपितृलोकप्राप्तिरेव फलमिति पूर्वपक्षोऽनुपपन्नः अपि तु ब्रह्मप्राप्तिरूपमोक्ष इति निर्णयात् तन्यायेनार्वाचीननान्तरीयकदर्शनं विहाय मोक्षफलत्वमेव युक्तमितिभावः।

तटस्थः पृच्छति नन्विति। ननु 'द्रष्टव्य' इत्यस्य विधिपरत्वे दर्शननिदिध्यासनयोर्विकल्पप्रसङ्ग

पृथग्विधित्वाभावात्, निदिध्यासनापरपर्यायमुपासनमेव दर्शनरूपं तस्मिन्विधेयम्। तथा हि-श्रवणं तावत् साङ्गसशिरस्कस्वाध्यायाध्ययनजनितापातप्रतीतिविदितपुरुषार्थतत्साधननिर्णयार्थिनः पुरुषस्य रागत एव सिद्धमिति न तत्र विध्यपेक्षा। श्रवणप्रतिष्ठार्थत्वान्मननस्य तदपि तत एव सिद्धमिति न तत्रापि। अतो यथावस्थितवाक्यार्थाध्यवसायस्य ध्यानोपकारकत्वात् तज्जनकयोः श्रवणमननयोरिहानुवाद एव। ध्यानं त्वप्राप्तत्वाद्विधेयमेव। यद्यपि चात्र विषयस्यानुकूलत्वात्तच्चिन्तनेऽपि रागस्सम्भवति, तथाऽपि तत्तद्गुणविशेषविशिष्टस्याहरहरनुवर्तनीयस्य साङ्गस्य तस्य फलसाधनत्वधियमन्तरेण तथाविधविशिष्टानुष्ठानस्य रागप्राप्तत्वं न संभवति, सा च धीश्चोदनयैव, तन्मूलश्च रागो यागादिष्वपि समानो विधेरपेक्षितश्चेति न दोषः।

ननु यदि ध्यानोपकारकतया श्रवणमननयोरनुवादस्तर्हि 'द्रष्टव्य' (बृह-४-५-४) इत्येव विधिरस्तु, ध्यानं तु तदुपकारकत्वेन सिद्धत्वाच्छ्रवणादिवदनूद्यत इति कल्प्यमिति चेन्न; ध्यानस्य दर्शनोपकारकत्वं किमदृष्टद्वारा? उत दृष्टद्वारा? न पूर्वः, तस्य चोदनामन्तरेणासिद्धेः। उत्तरत्रापि दर्शनशब्देन किं चाक्षुषं ज्ञानं विवक्षितम्? उत प्रत्यक्षमात्रम्? यद्वा प्रत्यक्षसमानकारमिति? आद्ये, ''न चक्षुषा गृह्यते नापि वाचा ''(मुडं.३-२-८)'' ''मनसा तु विशुद्धेन'' (?) इत्यादिश्रुतिविरोधः। द्वितीयेऽपि किं लौकिकं प्रत्यक्षम्? उत योगिप्रत्यक्षम्? पूर्वत्र ध्यानस्य लौकिकप्रत्यक्षजनकतायामन्वयव्यतिरेकाद्यभावेन अदृष्टद्वारा

इत्यत्राह द्रष्टव्य इत्यस्यत्विति। पृथग्विधित्वाभावमुपपादयति निदिध्यासनेति। ननु ''श्रोतव्य'' इत्यादौ तव्यप्रत्ययस्य दर्शनात् कथं विधित्वाभावः। कथं च प्राप्तिः ''द्रष्टव्योनिदिध्यासितव्य'' इति विधिप्रत्ययभेदे वा कथमेकविधित्वं। दर्शनध्यानपदयोर्वा कथमेकार्थत्वमित्यत्राह तथा हीति। मननस्यापि प्राप्तिमाह श्रवणेति। विध्यपेक्षेत्यनुषङ्गः। ननु ध्यातव्यगोचर श्रवणमननयोर्मोक्षार्थतया विधानं स्यात् रागप्राप्तस्यापि विदेवनादेः राजसूयाङ्गतया विधानवदिति शङ्कां परिहरन्नुपसंहरति अत इति। मोक्षसाधनत्वेन ध्याने विहिते लोकत एव ध्यानोपकारकत्वेन सिद्धयोस्तयोर्ध्यानार्थतयैव प्रवृत्युपपत्तेर्ध्यानविधिमात्रादेव तु तयोंन विधित्वं। विदेवनादीनां तु राजसूयाङ्गत्वं लोकतोनवगतमिति तदर्थं नियतानुष्ठानाय तद्विधानं युक्तमितिभावः।

ननु तर्हि निदिध्यासनेपि विधिर्नस्यादित्याशङ्कते। यद्यपीति। तत्तदिति। अविच्छिन्नत्व दर्शनरूपत्वप्रीतिरूपत्वादयो गुणाः। ननु गुणानामप्राप्तत्वाद्विधानेपि स्वरूपस्य विधानं न स्यादित्यत्राह फलेति। फलसाधनत्वेन प्राप्त्यभावादिति भावः। ननु तथापि फलरागप्रवर्तको न विधिरिति चेत्तत्राह तन्मूलश्चेति। विधिमूलकरागस्य विध्यधीनप्रवृत्युपयुक्ततया विध्यनुगुणत्वमिति भावः। ननु तर्हि तुल्यन्यायान्निदिध्यसितव्य इत्यत्रापि विधित्वं न स्यादिति शङ्कते नन्विति। युक्ता ध्यानोपकारकतया श्रवणमननयोर्लोकसिद्धत्वात्तदर्थतया प्राप्तिः। निदिध्यासनस्य तु लोकतस्तादर्थ्यानवगमादप्राप्तेर्विधित्व मिति परिहरति न ध्यानस्येति। तस्येति। तथा च तदर्थतया विधिस्स्यादित्यर्थः। आद्य इति। इदमुपलक्षणं। नीरूपद्रव्यत्वान्न चाक्षुषत्वमिति युक्तिविरोधश्च द्रष्टव्यः। पूर्वत्रेति। यद्यपीदं चाक्षुषत्वेपि समानं तथापि दूषणान्तरस्य स्फुटत्वात्तदुक्तिरिति मन्तव्यं। भावनावलजंत्विति। प्रमारूपमित्यर्थः। भ्रान्तिरूपं

तत्सिद्धौ तत्रापि चित्रपशुफलत्वादाविव विध्यपेक्षैव। भावनाबलजं तु प्रत्यक्षं नाभ्युपगच्छामः। तस्यच 'वृक्षे वृक्षे च पश्यामी' (श्रीमद्रमायणं अर. २-४) तिवद्भ्रान्तौ स्मृतिवैशद्यमात्रे वा पर्यवसानात्। न भ्रान्तिः. अनङ्गीकारात्। नापि स्मृतिवैशद्यम्, अस्मत्पक्षाङ्गीकारप्रसङ्गात्। इतरत्र तु योगितप्रत्यक्षस्य प्रकृष्टादृष्टजन्यत्वात्तन्मूलविध्यपेक्षायां "निदिध्यासितव्य" इत्ययमेवात्र विधिरङ्गीकार्यः। तृतीये तु "द्रष्टव्य" इत्यनेन ध्यानस्यैव वैशद्यलक्षण विशेषविधानमिति तदेव सामान्यतो "निदिध्यासितव्य" इत्युच्यत इति वैशद्यविशिष्टध्यानसिद्धौ ध्यानदर्शनयोस्साध्यसाधनभावाभावात् कथं दर्शनार्थतया ध्यानानुवादः। नन्वेवमस्तु ध्यानस्य विधेयता, दर्शनं तु योगिप्रत्यक्षात्मकं पृथग्विधेयमिति किं नाङ्गीक्रियते, पृथक्फलनिर्देशाभावादिति न वक्तव्यम्; मोक्षार्थतया विधेयस्य दर्शनस्य प्रधानत्वे तन्निर्वर्तकतया ध्यानस्यापि विधाने पृथक्फलनैरपेक्ष्यात्प्रधानवाक्यार्थैक्योपपत्तेश्च, अन्यथा दर्शनशब्दस्य मुख्यार्थभङ्गश्चेतिचेत्।

मैवम्, 'ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' (छां.७-२६-२) इति क्वचिद् ध्रुवानुस्मृतेः साक्षात्सर्वग्रन्थिविप्रमोक्षहेतुत्वं श्रूयते स्मृतिलम्भ इति सप्तम्या। क्वचित्तु "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे (मुंड-२-२-१) इति दर्शनस्य तयैव फलसाधनत्वं श्रूयते। अनयोर्न तावदेकफलसाधनयोर्विकल्पः; गुरुलघुविकल्पायोगात्। अधिकारिभेदेन व्यवस्थितविकल्पकल्पनायामतिगौरवम्, विकल्पकल्पनतद्व्यवस्थाकल्पना चेति। किञ्च विकल्पस्य प्रयोगत्रयेण प्रामाण्यत्यागाप्रामाण्यस्वीकारत्यक्तप्रामाण्यस्वीकार स्वीकृताप्रामाण्यपरित्यागा

तदस्त्वित्यत्राह न भ्रान्तिरिति। अतत्वज्ञानान्मुक्तिप्रसङ्गेनानङ्गीकारादिति भावः। इतरत्रत्विति। अदृष्टस्य विहितजन्यत्वादिति भावः। तृतीयेत्विति। प्रत्यक्षसमानाकार इति पक्ष इत्यर्थः। साध्यसाधनभावाभावादिति। "निदिध्यासितव्यो" "द्रष्टव्य" इति पदयोरेकविषयत्वे तदर्थस्य स्वापेक्षया पौर्वापर्याभावादिति भावः।

तन्निवर्तकतयेति। यद्यपि "द्रष्टव्य" इत्यत्र विरुद्धत्रिकद्वयापत्तिः स्यादिति श्रवणादिविध्युक्तदोष प्रसङ्गः। तथापि न वाक्यात्तादर्थ्यं। अपितूपनयनस्याध्यापनं प्रतीव प्रकरणादिति न विरोध इति भावः। नन्वेवं सति वाक्यभेदस्यादित्यत्राह प्रधानेति। "अर्थैकत्वादेकं वाक्यमिति" न्यायादङ्गिशास्त्रस्याङ्गशास्त्रेण भेदा भावाच्चेति भावः। पक्षान्तरे लक्षणादोषमाह अन्यथेति। धृवेति। "स्मृतिलम्भ" इति सप्तम्याः स्मृतेः सर्वग्रन्थिविप्रमोक्षहेतुत्वं श्रूयत इत्यन्वयः तयैवेति। सप्तम्येत्यर्थः। गुरुलघ्विति। धृवानुस्मृतेर्बहुकालानुष्ठेयाया गुरुत्वाद्दर्शनस्य लघुत्वात् फलस्य तुल्यत्वे गुरुणि प्रवृत्त्ययोगाद्गुरुविधान वैयर्थ्यप्रसङ्गादिति भावः। अधिकारि भेदेनेति। स्नानादावनन्यगत्या कल्पनमिति भावः। किञ्चेति "व्रीहिभिर्वा यवैर्वा यजेत" (आप.श्रौसू.६-३२-२३) इत्यत्र दर्शपूर्णमासप्रथमप्रयोगे व्रीहि शास्त्रानुष्ठाने द्वितीयप्रयोगे यवशास्त्रानुष्ठाने व्रीहिशास्त्रे प्रथमगृहीत प्रामाण्यपरित्यागाप्रामाण्य स्वीकारौ, यवशास्त्रे त्यक्तप्रामाण्यस्वीकारस्वीकृताप्रामाण्यपरित्यागौ पुनः प्रयोगान्तरे व्रीहिपरिग्रहे यवशास्त्रे स्वीकृत प्रामाण्यपरित्यागत्यक्ताप्रामाण्यस्वीकारौ व्रीहिशास्त्रे त्यक्तप्रामाण्यस्वीकार स्वीकृता प्रामाण्य परिग्रहाविति प्रत्येकं शास्त्रयोश्चत्वारोदोषा इत्यष्टौ दोषा इत्यर्थः। अन्याय्यं विकल्पस्वीकरणं न्यायादपेतमिति

वृत्तिरूपाष्टदोषदुष्टत्वादन्याय्यत्वमेव । नापि समुच्चयः, यौगपद्यस्याशक्यत्वात् । क्रमेऽप्युपकार्योपकारकयोरुपकार्यस्य फलहेतोरङ्गिनः स्वाङ्गेन सह समुच्चयायोगात् । न च क्रमिकयोरपि दर्शपूर्णमासयोरिव ध्रुवानुस्मृति दर्शनयोरेकं कारणत्वं । तदुपस्थापकश्रुत्यद्यभावात् । न च अङ्गभूतायां ध्रुवानुस्मृतावङ्गिनो दर्शनस्यैव फलं कीर्त्यत इति न विरोध इति वाच्यम्, अङ्गाङ्गिभावस्याद्याप्यनिश्चितत्वात्, दृष्टद्वारस्यासिद्धेः अदृष्टद्वारकल्पने गौरवात् । स्वतः प्रतीयमानार्थभङ्गे च श्रुतहानिदोषात् । न चात्र प्रजापतिवाक्यनयः, भूयसां न्यायविरोधात्, ''द्वैधे बहूनां वचन''मिति तान्त्रिकाः । भूयांसि हि वाक्यानि ध्यानोपासनादिशब्दैर्ध्रुवानुस्मृतिमेव मोक्षसाधनमभिदधति । न केवलं श्रुतिरेव, स्मृतीतिहासपुराणसर्वोत्तरतन्त्रयोगसांख्यशास्त्राण्यपि । दर्शनं त्वल्पवाक्यावसितम् । एवमीश्वरोपासनस्यैव भूयोभिर्वाक्यैर्मोक्षसाधनत्वावसायात् तदन्यनिषेधश्रुतिसामर्थ्यात् क्वाचित्कजीवोपासनानां मोक्षसाधनतया श्रुतानां यथालिङ्गं जीवविशिष्टपरमात्मविषयतया अङ्गतया वा निर्वाहः, अत्र तु न तथेति विशेषः । अतः परिशेषाद्

न्यायविरुद्धमिति यावत् । किं युगपदनुष्ठितयोस्समुच्चय उत क्रमेणेत्यभिप्रेत्याद्यं दूषयति यौगपद्यस्येति । द्वितीयेपि किमङ्गाङ्गिनोस्समुच्चय उत प्रधानयोः आद्य आह क्रमेपीति । उपकार्योपकारकयोः सतोरित्यर्थः । द्वितीय आह न च क्रमिकयोरिति । यथा दर्शपूर्णमासयोस्समुच्चये द्विवचनं तथेह नास्तीत्यर्थः । नन्वेकफलोद्देशेन माभूदुभयविधिः दर्शनमेव फलार्थं विधीयते तदङ्गभूतस्मृतौ तु तत्फलस्यानुवादमात्रमित्यशङ्क्याह नचाङ्गेति । किमङ्गत्वं सन्निपत्य उतारात् नाद्य इत्याह दृष्टेति । नद्वितीय इत्याह अदृष्टद्वारेति । ननु ''निदिध्यासितव्यो'' ''द्रष्टव्य'' इत्यनयोः प्रकरणादङ्गाङ्गिभावेत्व कल्पनागौरवमिति चेत्तत्राह स्वत इति । स्वरसत इत्यर्थः । ननु दहरविद्यायां प्रजापतिवाक्ये निर्मुक्तजीवस्वरूपज्ञानमभिधाय तस्य स्वरूपाविर्भावादिफलाभिधानस्य न जीववेदनफलत्वं अपितु ब्रह्मविद्याफलस्याङ्गं जीववेदनाभिधानमित्युक्तं तदपि नस्यादित्यत्राह नचात्रेति । युक्तं तत्राङ्गेऽङ्गिफलानुवादः । तत्प्रकरणगृहीतवाक्ये तत्फलकीर्तनात् । अङ्गतयाप्येक वाक्यतानिर्वाहात् । इहत्वतथाभूतवाक्यान्तरसिद्धस्य कथं तन्न्याय इति भावः । नन्वनारभ्याधीत पर्णताफलानुवादवत्स्यादित्यत्राह भूयसामिति । युक्तं पर्णतावाक्येऽनुवाद इति तद्वाक्यस्य यागान्वि तजुहूद्देशेन पर्णताविधानेन चरितार्थत्वात् । ''स्मृतिलम्भे'' (छा.७-२६-२) इत्यादिवाक्यानां तु विधेयाभावाद्वैयर्थ्यमिवस्यादित्याह भूयसांन्यायेति । मोक्षसाधनत्वमभिदधतीति । न तेषामन्यद्विधेयान्तरमिति भावः । सर्वोत्तरतन्त्रेति । ''अथातोब्रह्मजिज्ञासा'' (ब्र.सू.१-१-१) इत्यारभ्य ''अनावृत्तिश्शब्दात्'' (४-४-२२) इत्यन्तं सर्वमुत्तरशास्त्रमित्यर्थः । अत्र तु न तथेति भूयः श्रवणाभावो निषेधश्च नास्तीत्यर्थः । नन्वेवं सति विकल्प्य वा समुच्चित्य वा साधनतापत्तिरित्यत्राह अत इति । उक्तन्यायेन विकल्पादेरसम्भवादिति भावः । इदं तु ''साच स्मृतिर्दर्शनसमानाकारा'' इत्यादिना भाष्ये विस्तृतमित्याहुः । विस्तृतं चेदमिति । नन्वत्र छागपशुन्यायः कथं ध्यानदर्शनयोस्सामान्यविशेषरूपत्वाभावादिति चेदत्राह ''स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः'' (छां-७-२६-२) ''तस्मिन् दृष्टे परावरे'' (मुंड- २-२-१) इति सप्तमीभ्यां प्रत्येकं नित्यवत्साधनतावगमस्वारस्याद्विकल्पस्य च निरासात् उभयोरेक परत्वेऽवधृते

ध्रुवानुस्मृतिदर्शनयोरैक्य एव पर्यवसानम् । विस्तृतं चैतद्भाष्य एव-छागपशुन्यायेन वेदनध्यानादिशब्दानामुत्तरोत्तरं विश्रान्तिप्रतिपादनात् । एवं स्थिते स्मृतिदर्शनशब्दयोर्मुख्यैकार्थासम्भवे कस्यचिदौपचारिकत्वमवश्याश्रयणीयमिति चावधारिते स्मृतिशब्देन प्रत्यक्षज्ञानोपचारे अतिशयासिद्धेः; दर्शनशब्देन तु स्मृतेरुपचारे प्रत्यक्षसमानाकारतारूपवैशद्यातिशयलक्षणविशेषसिद्धेश्च दर्शनशब्देन विशदतमा ध्रुवानुस्मृतिरेव विवक्षितेत्यङ्गीक्रियते । अतोऽत्रापि निदिध्यासितव्य इति ध्रुवानुस्मृतिविधानात् "द्रष्टव्य" इत्येतदपि तद्विशेषसमर्पकमिति । तेन 'स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः' (छा.७-२६-२) 'तस्मिन्दृष्टे परावरे' (मुंड-२-२-१) इत्यत्र छागपशुन्यायनिर्णीतोऽर्थः एकस्मिन्नपि वाक्ये "निदिध्यासितव्यः", "द्रष्टव्य" इत्यनयोरप्याश्रीयत इति न विरोधः । नच तव्यप्रत्ययद्वयविरोधः, 'अग्नये पथिकृते' (पू.मी.६) इत्यादिषु एकविधेयत्वेऽपि चतुर्थीद्वयवदविरोधात् । एवं स्थिते यदि वाक्यार्थज्ञानस्य मोक्षोपायता तदोपासनादिविधिनैरर्थक्यं दुष्परिग्रहम्, शब्दजन्यप्रत्यक्षवादस्तु परिहरिष्यते (वादः ७) ।

यत्तु वाक्यार्थज्ञानोत्पत्तौ प्रतिबन्धकभेदवासनानिरासद्वारेण श्रवणमननिदिध्यासनानामुपकारकत्वमुक्तम्, तदपि हास्यं, वाक्यस्याकाङ्क्षायोग्यतासन्निधिपरामर्शमन्तरेणापेक्षणीयान्तराभावात् । सत्यां तु सामग्रयां वाक्यार्थज्ञानानुत्पत्त्यनुपपत्तेः । नच प्रतिबन्धकमपि सामग्रीवैकल्यपर्यवसितम्, यथाऽऽहुः-"प्रतिबन्धोऽ विसामग्रीतद्धेतुप्रतिबन्धक" (न्यायकु - १-१०) इति । विपरीतवासनायाः प्रतिबन्धकत्वस्यैवासिद्धेः, सत्यामपि विपरीतसर्पादिवासनायामाप्तोपदेशलिङ्गादिभिः सर्पादिबाधकं तत्त्वज्ञानमुत्पद्यते । अत एव "असम्भावनाविपरीत सम्भावनाख्यचित्तविक्षेपद्वारा भेदवासनायाः प्रतिबन्धकत्व" मित्येतदपि निरस्तम् ।

अन्यतर शब्दस्यान्यपरत्वस्यावश्यकत्वे छागपशुन्यायेन स्मृतिशब्दस्य दर्शनपरत्वं तस्य दर्शन समानाकारध्यानपरत्वादिति । स्मृतिशब्देनेत्यादि । समानाकारत्वं हि ज्ञानत्वादि । तच्च दर्शनविधानादेव सिद्धं । किञ्च स्मृतिशब्दस्य लक्षणाङ्गीकारेपि दर्शनशब्दस्य चाक्षुषज्ञानवाचिनोपि प्रत्यक्षमात्रे लक्षणावाच्येति पदद्वयलक्षणा न न्यायेति भावः । एवं "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" (छा.७-१६-२) "तस्मिन् दृष्टे परावरे" (मु.२-२-१) इत्यत्र निर्णीतमर्थं "निदिध्यासितव्यो द्रष्टव्य" इत्यत्रातिदिशति । अत इति । ननु भिन्नवाक्य एवैतद्दर्शनात्कथमेकवाक्ये प्रवृत्तिः । अन्यथा गोबलीवर्दन्यायोच्छेद प्रसङ्गादित्यत्राह तेनेति । एकस्मिन् वाक्ये सामान्यविशेषोपादानस्य प्रयोजनाभावे गोबलीवर्दन्यायावतारादिति भावः । एकविभक्त्यैव देवतात्वबोधाद्विभक्त्यन्तरस्यानुवाद्यत्व वत्तव्यप्रत्ययस्यापीत्याह अग्नय इति । एवं स्थित इति । एवं स्वपक्षे स्थिते परपक्षे दोष उच्यत इत्यर्थः । नैरर्थ्यक्यमिति । वाक्यश्रवणादेव वाक्यार्थज्ञानसिद्धेरिति भावः । शाब्दप्रत्यक्षार्थतया सार्थक्यमित्यत्राह शब्देति ।

शाब्दप्रत्यक्षभङ्ग इति शेषः। शाब्दप्रत्यक्षमभ्युपेत्यापि तादर्थ्यमयुक्तमित्याह यत्त्वित्यादिना । परामर्शः ज्ञानमित्यर्थः । अपेक्षणीयान्तराभावेपि श्रवणादिकं विना नोत्पद्यत इत्यत्राह सत्यांत्विति । प्रतिबन्धक इतीत्यनन्तरमितिशब्दो द्रष्टव्यः । प्रतिबन्धकनिवृत्यर्थं श्रवणादय इति भावः । दूषयति विपरीतेति । सत्यामपीति । नचात्रापि विपरीतवासनानिवृत्तिरस्ति, तद्धेतुश्रवणादेरभावादिति भावः । अत एवेति । यत एव तत्वज्ञानं भेदवासनाजन्यरजतज्ञाने सत्येनोत्पद्यते अत इत्यर्थः । भेदवासनायाः प्रतिबन्धकत्वे साधकाभावमुक्त्वा बाधकमाह यदि चेति । तत्र हेतुमाह उक्तंहीति । यावच्छरीरपातं-यावन्मोक्षं ।

यदिच भेदवासनानिरसनद्वारेणाद्वैतवाक्यार्थज्ञानोत्पत्तिरिष्यते, तदा न कदाचिदपि तदुत्पत्तिस्सेत्स्यति, उक्तं हि - ''यावच्छरीरपातं हि किं न वर्तेत वासना। तन्निवृत्तौ कथं पुंसामुन्मीलननिमीलने'' इति। किञ्च अनादिकालोपचितानां पटुतरप्रत्ययाभ्यासादैर्दृढतरनिरूढानाम परिमितानां भेदवासनानां कतिपयकालसाध्या विशदप्रत्ययादिमूलाल्पीयस्तमाद्वैतवासनया निरसितुमशक्यत्वात्। किञ्च तत्त्वज्ञाने सति तद्विषयभावनया तद्विपरीतवासनानिरासः तन्निरासे च तत्त्वज्ञानमिति मिथस्संश्रयस्स्यात्। तदप्याहुः-''उत्पन्ने सति विज्ञाने वासना तु निरस्यते। निरस्तवासनस्यैव विज्ञानमिति दुर्भणम्'' इति। अनुत्पन्न एव तत्त्वज्ञाने श्रवणमननिदिध्यासनैः क्रमात्तन्निरास इति चेत्, किं तानि तत्त्वगोचराणि? उतातत्त्वगोचराणि? पूर्वत्र विपरीतवासनायां सत्यां तेषामप्यनुत्पत्तिरेव। उत्तरत्रातत्त्ववासनया कथं तत्त्वज्ञानोत्पत्तिप्रतिबन्धकवासना निरासः? तथाच- ''सागरं गन्तुकामस्य हिमवद्गमनोपम''मिति न्यायः। किञ्च अभेदज्ञाने सिद्धे भेदवासनानिरासस्य किमर्थमपेक्षा? तदसिद्धौ तु तत्प्रतिपक्षवासनानिरासाभिलाषानुत्थानम्। नह्यभेदज्ञानप्रतीतिरभेदप्रतीतिमन्तरेण स्यात्। नच प्रतीतौ तु वैशद्यावैशद्यादिवैषम्यं त्वया वक्तुं शक्यम्, अभेदस्य ब्रह्मस्वरूपायमाणस्य सर्वदैकरूपत्वात्, विशेषग्रहे च भेदप्रतीतित्वप्रसङ्गात्। नच व्यावहारिकभेदोऽत्रास्तीति वाच्यम्, भेदवासनानिरासद्वारेणाभेदग्रहस्य परमार्थविषयत्वात्। अतो न भेदवासनानिरासद्वारेण श्रवणादित्रयस्य दर्शनोपकारकत्वमिति।

यत्पुनरुक्तम्, ''ब्रह्म वेद ब्रह्मैव भवति'' (मुंड-३-२-१) इत्यादौ ज्ञानमात्रस्यैव मोक्षहेतुत्वं श्रूयते; न हि प्रतिपन्नेऽर्थे नास्तिकत्वं न्याय्यम्; अत एवोच्यते ''नैषा करणमितिस्तर्केणापनेया'' (कठ-२-९) इतीति, तदप्यसत्; सामान्यशब्दानां विशेषे पर्यवसानस्य पश्चाधिकरणादिन्यायसिद्धत्वात्। न्यायानपेक्षत्वे किं शारीरकशास्त्रेणापि। ध्यानोपासनशब्दयोश्च ज्ञानविशेषविषयतया

भेदवासनायाः सत्वात्तदूर्ध्वं ज्ञानोत्पत्त्ययोगादिति भावः।

यावच्छरीरपातं वासना सत्वे हेतुमाह कथमिति। उन्मीलनादीनां यद्यद्वैतज्ञानस्य निवर्तकत्वं तदा एकेनापि निवृत्तिः स्यात्। यदि तावत्संख्येन ज्ञानेन तदा तावत्कालीन (ध्या) ज्ञानासम्भवान्निवृत्तिरेव न स्यादिति भावः। ननु न्यूनापि तत्त्वविषयकभावना आप्रयाणमनुवृत्ता निवर्तिका विधानादित्यत्राह किञ्चेति। अनुत्पन्न इति। ध्यातव्यादिज्ञानं ध्यानाद्यहेतुरिति भावः। कथमिति। प्रत्युत प्रतिबन्धकभेदाद्वासनाद्वारा प्रतिबन्धकत्वमिति भावः। सागरं गन्तुकामस्य-सागरं तर्तुकामस्य हिमवद्गनोपमं साधनतया गण्डपाषाणग्रहणायेति शेषः। अभेदज्ञानं सिद्धमसिद्धं वेति विकल्प्याद्ये दोषमाह किञ्चेति। तत्फलस्य सिद्धत्वादिति भावः। द्वितीय आह तदसिद्धाविति। अभेद एव तात्विक इति ज्ञाने सत्येव तद्विपरीतभेदभ्रमनिरासाभिलाषो भवेत् नान्यथेति भावः। तत्र हेतुमाह नहीति। अभेदप्रतीतिमन्तरेण अभेदस्य तात्त्विकत्वप्रतीतिमन्तरेणेत्यर्थः। ननु श्रवणात्पूर्वभाविज्ञानं त्वविशदमिति विशदज्ञानार्थं श्रवणमिति शङ्कते नचेति। किं स्वरूपमात्रविषयत्वेन वैशद्यमुततद्गतविशेषविषयतयेति विकल्प्य आद्य आह अभेदस्येति। तुल्यविषयत्वे वैषम्यायोगादिति भावः।

द्वितीयेऽपि किं पारमार्थिको विशेष उत व्यावहारिक इति विकल्प्य आद्य आह विशेषेति। तथाच

ज्ञानसामान्यविषयवेदनादिशब्दानां तस्मिन् विशेषशब्दार्थ एव पर्यवसानं युक्तम्, विकल्पसमुच्चयफलान्तरार्थाद्यसम्भवस्योक्तत्वात्; तदुक्तम्- ''अष्टदोषा विकल्पे स्युर्गौरवं च व्यवस्थितौ। समुच्चयेऽनपेक्षा स्यादङ्गाङ्गित्वं न मीयते'' इति। तथा विद्युपास्योर्व्यतिकरेणोपक्रमोपसंहारदर्शनाच्च तयोरैकार्थ्यं सिद्धम्। ''मनो ब्रह्मेत्युपासीत'' (छां.३-२८-२) इति विहितमेव ह्युपासनम्, ''भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद'' इति फलविधानार्थमनूद्यते। नह्यफलं विधायान्यत्सफलमनुवदितुं युक्तम्, एवं, ''यस्तद्वेद यत्स वेद'' (छां.४-२-४) इति वेदनशब्दमात्रश्रावी जानश्रुतिः तदर्थम् 'यां देवतामुपास्से' (छां.४-२-२) इत्युपासिनाऽनु वदति। एवमन्यत्रापि। तथा ''तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते'' (तै.आ.३) ''नाहं वेदैर्न तपसा'' (श्री.गीता.२२-४३) इत्यादिश्रुतिस्मृत्योर्वेदनभक्तिशब्दाभ्यां मोक्षोपायमभिधाय तदपरोपायनिषेधपरयोः परस्परार्थप्रतिक्षेपानुपपत्तेः वेदनशब्देनापि तैलधारावदविच्छिन्नभक्तिरूपज्ञानविशेष एव विवक्षित इति स्वीकर्तव्यम्। एवं ध्यानोपासनभक्तिशब्दसमानार्थतया वेदनादिशब्दानां विशेषविषयत्वे निश्चिते सति सामान्यमात्राश्रयणं न्यायानभिज्ञतानिबन्धनम्। तदुक्तम्- ''पशोश्छागत्वनिर्णीतौ निपुणन्यायपूर्वकम्। गर्दभादिषु तुल्यत्वं गर्दभप्रायकल्पितम्'' इति। यत्पुनर्वाक्यतस्सिद्धस्यैव ज्ञानस्य विधेयत्वं न सम्भवतीति तदस्माकमिष्टमेव, ततोऽन्यस्यैव विधानोपपादनात्। प्रत्यक्षविरुद्धश्चायमविधेयज्ञानाधीनमोक्षवादः वाक्यार्थज्ञानमात्रेणाविद्यानिवृत्त्यदर्शनात्; आहुश्च- ''तत्त्वमस्यादिवाक्यस्य शतशश्श्रवणेऽपि हि। दृश्यते त्वमहंपूर्वो विवादो ब्रह्मवादिनाम्'' इति। ननु येषां वाक्यार्थज्ञानं जातं तेषां तन्निवृत्तिरस्त्येव, येषां तु सा नास्ति तेषां तदपि न जातमित्यविरोध इति चेत् तन्न, तज्ज्ञानाभावे तत्प्रवचनाद्यसंभवात्, तदसंभवे

ब्रह्मणस्सविशेषत्वं स्यादिति भावः। द्वितीयं शङ्कते भेदेति। भेदवासना निरासससाध्यस्येत्यर्थः। अत इति। तथा च ज्ञानस्य वाक्यादेव संभवत् श्रवणादीनां वैयर्थ्यं स्थिरमिति भावः। प्रतिपन्न इति अन्यथा यागादीनामपि स्वर्गसाधनत्वं वक्तव्यं स्यादिति भावः। करणमिति। यागादीनां स्वर्गादिकरणत्वनिश्चय इत्यर्थः। पश्वधिकरणन्यायः छागपशुन्यायः। न्यायानपेक्षत्वइति। न्यायव्युत्पादनार्थत्वाच्छारीरक शास्त्रस्येति भावः। ननु ध्यानादिशब्दानामपि ज्ञानमात्रवाचित्वमेव विशेषवाचित्वेपि ज्ञानपरत्वं वा भवतु। यथा व्रीहिपदस्य सतुषद्रव्यपरत्वमित्यत्राह ध्यानोपासन शब्दयोश्चेति। ज्ञानविशेषवाचित्वात्। सामान्यशब्दस्यैव छागपशुवद्विशेषविषयत्वस्य युक्तत्वादिति भावः। उक्तार्थे पूर्वसम्मत्या दार्ढ्यं प्रकटयति तदुक्तमिति। अनपेक्षा स्यादिति। दर्शपूर्णमासवत्सापेक्षो नश्रुत इति भावः। छागपशुन्यायमनपेक्षयापि सामान्यशब्दस्य विशेषपरत्वमाह तथा विद्युपास्योरिति। उपक्रान्तस्यैवोपसंहार्यत्वादिति भावः। विद्युपास्योव्यतिरेकेण निर्देशं दर्शयति मनोब्रह्मेति। व्यतिकरत्वमेवाह नह्यफलं विधायेति। सफलं फलार्थमित्यर्थः। निषेधबलादपि सामान्यशब्दस्य विशेषपरत्वमाह तथेति। ननु श्रुत्यास्मृतेर्बाधोस्तु न परस्पर प्रतिक्षेप इति चेन्न। अबाधेनाप्युपपत्तौ बाधो नान्यायः। ''यमेवैषवृणुते'' (कठ.१-२-२३ मुं.३-२-४) इति श्रुत्यनुगृहीतत्वाच्च न बाधो युक्त

च शिष्याणां श्रवणादेरप्यसिद्धिप्रसङ्गात्। एवमाचार्यस्यापि।

अथ वाक्यार्थज्ञानेन निवृत्ताविद्या एवाविद्यावतां श्रावका इति चेन्न; तेषां श्रावकत्वादिव्यापारस्य तत्करणशरीरेन्द्रियादेस्तत्प्रयोजनस्य च ख्यातिलाभपूजापरानुग्रहादेस्तत्तत्प्रतिभासस्य चाविद्यामन्तरेणासम्भवात्। अविद्यानिवृत्तावपि बाधितानुवृत्त्या भेदप्रतिभासात् प्रत्यक्षाद्यविरोधः प्रवचनाद्युपपत्तिरितिचेत्; तन्न; भवत्पक्षेबाधितानुवृत्त्यसम्भवस्यवक्ष्यमाणत्वात्। तथाप्यविशद प्रतिपत्तिमात्रादविद्याविशेषवशादेव वा प्रवचनाद्युपपत्तिरिति चेन्न, विशदप्रतीतिपरामर्शरूप प्रत्यक्षसिद्धान्तयोर्विराधात्। विशदाध्यक्षितसमस्ततत्वार्थाश्च वासुदेवादयोऽर्जुनादिभ्य उपदिशन्तीति हि स्वीकृतं युष्माभिः। नचाद्वैतसिद्धान्तश्रावकास्स्वात्मनां तदनभिज्ञतामनुमन्यन्ते। तथा सत्यविवादश्च। किञ्च प्रतिवादिनः प्रबलाविद्याः कथं भवत्पक्षं प्रतिक्षिपन्ति? न तावदविदित्वैव, निराश्रयवादायोगात्। विदित्वा चेत् कथं तर्हि प्रतिवादिना विदिते भवत्पक्षे भवतां ज्ञानानुत्पत्तिः? नहि स्वोक्तं परे जानन्ति वयं तु न विद्म इति स्वस्थैरभिधेयम्।

यत्तदविद्यानिवर्तकं विशदमद्वैतज्ञानमुदेष्यति, यच्चेदानीं श्रवणादविशदमुत्पन्नम्, तदुभयं भिन्नविषयमेकविषयं वा? भिन्नविषयत्वे तस्यान्यसिद्धान्तज्ञानवत्तदनुपकारकत्वम्। एकविषयत्वेऽप्यन्यूनानतिरिक्तविषयं वा प्रकारविशेषविशेषितविषयं वा? आद्ये पश्चात्तनस्याप्यनिवर्तकत्वम्, इदानीन्तनस्यैव वा निवर्तकत्वं स्यात्; अविशेषात्। द्वितीये ब्रह्मणस्सविशेषत्वं

इति भावः। ननु तर्हि परे किमर्थं ज्ञानमात्रस्य हेतुत्वं वदन्तीत्यत्राह एवमिति। तदज्ञानिबन्धनमिति भावः। परानुपहसति तदुक्तमिति। ननु प्राप्तस्य कथं विधेयतेत्याशङ्क्य अत्र पूर्वोक्तंमा विस्मार्षीरित्याह। यत्पुनरिति। ननु तन्मात्रेणैव मोक्षसिद्धेः किं गुरुभूतज्ञानविधिकल्पनाप्रयासेत्यत्राह प्रत्यक्षविरुद्ध श्चेति। त्वमहं पूर्वोविवाद इति। विवादस्याविद्याधीनभेदज्ञानोत्पन्नत्वादविद्यानिवृत्तौ विवादायोगादिति भावः। विरोधपरिहारं शङ्कते नन्विति। सा-अविद्यानिवृत्तिः। स्वक्रियाव्याघातमाह न तज्ज्ञानाभाव इति। तथा च भेदवासनानिवृत्त्यर्थं श्रवणादिविधिरित्यभ्युपगमविरोध इति भावः। ननु शिष्यस्य श्रवणाभावेप्याचार्यस्य भेदवासनानिवृत्त्यर्थं श्रवणादिविधिरस्त्वित्यत्राह एवमाचार्यस्यापि। श्रावकाभावादिति भावः।

श्रावकसत्वं शङ्कते अथेति। नेति। श्रावकत्वादीनामविद्याधीनत्वादिति भावः। अविद्याधीनत्वं नास्तीति शंकते अविद्यानिवृत्तावपि।भवत्पक्ष इति। तस्य वासनामूलत्वाङ्गीकारात्तासामप्यविद्यया तुल्यं निवृत्तिसम्भवादिति भावः। ननु तर्ह्यविद्या न निवर्तति अविशदमेव वा भेदज्ञानं प्रथममस्तु तेन ज्ञानेन काचिदेवाविद्या निवर्तति तथा चानिवृत्ताविद्यान्तरात्प्रवचनाद्युपपत्तिरिति शङ्कते तथापीति। विशदेति। गुरुमुखश्रवणेनार्थो मयाविशदमवगत इत्यनुव्यवसायप्रत्यक्षविरोध इत्यर्थः। सिद्धान्तविरोधं दर्शयति विशदाध्यक्षितेति। गीताभाष्य इति भावः। अविद्याविशेषात्प्रवचनमित्येतद्दूषयति। नचेति। अज्ञानानुमतौ दोषमाह तथा सतीति। अद्वैतस्य त्वयाऽज्ञाने तत्साधनार्थं प्रवृत्त्ययोगाद्विवाद एव न स्यादिति भावः। येषामविद्यानिवृत्तिर्नास्ति तेषां ज्ञानमपि न जातमित्यत्र परेषां प्रवचनाद्यसम्भवः उक्तः। इदानीं दोषान्तरमाह किञ्चेति। निराश्रयेति। निर्विषयविवादायोगादित्यर्थः।

स्यात्। सविशेषमिदानीं गृहीतं पश्चात्तु निर्विशेषं प्रकाशिष्यत इति वैषम्यमिति चेत्; कथमिदं त्वयाऽवगतम्? श्रुतेरितिचेत्; तर्हि श्रुतेरेव निर्विशेषज्ञानमिदानीमेव जातमिति कः पश्चातनस्य विशेषः?। ज्ञानमिदानीं जातं न्यवसायस्तु पश्चाद्भविष्यतीति विशेष इति चेन्न; वेदप्रामाणयनिश्चये तदानीमेव व्यवसायोदयात्, तदनिश्चयेतु पश्चादपि तदसिद्धेः। प्रमाणत्वाभ्युपगमे वा तदर्थविशेषे सन्देह इति चेत्,; तर्हि विशदप्रवचनप्रवीणेभ्य आचार्येभ्यो न्यायपूर्वं द्विस्त्रिश्शतशो वा श्रोतव्यम्, नपुनश्श्रवणदशायामेव सन्दिहानेन भवता पश्चादनवरतध्यानेनापि ज्ञातुं शक्यम्। मननवदाहार्यसन्देहनिराकरणाय पश्चात्तनं ज्ञानमिति चेन्न; मननेनैव संभावितनिष्कम्पत्वे पुनरन्यावकाशाभावात्; अन्यथाऽतिप्रसङ्गात्। अस्तु तर्हि पारोक्ष्यापारोक्ष्यलक्षणं वैषम्यमितिचेत्; विषयातिरेकाभावेनैव प्रागुक्तेन तदसिद्धेः; सिद्धावपि बाधकत्वमबाधकत्वं च प्रत्यकिञ्चित्करत्वात्। परोक्षेणापि शास्त्रानुमानजन्यज्ञानेना परोक्षभ्रमबाधस्याभ्युपगमात्, प्रत्यक्षेणापि देहात्मभ्रमादिना शास्त्रबाधानाभ्युपगमाच्च। उत्पन्ना भ्रान्तिरनित्यत्वात्स्वयमेव निवर्तते, भ्रान्त्यनुवृत्तिनिवृत्तिस्तु कारणानुवृत्तिनिवृत्त्या भवति, तदनुवृत्तौ तु बाधकस्य प्रत्यक्षत्वेऽपि भ्रान्त्यनुवृत्तिर्भवत्येव, चन्द्रैकत्वे प्रत्यक्षेऽपि अङ्गुल्यवष्टम्भादिना भ्रान्त्यनुवृत्तिवत्। वाक्यजन्यज्ञानमपरोक्षमिति च सर्वलोकविरुद्धम्; पृथक्चैतत्प्रपञ्चयिष्यामः (वादः७)। तदेतदखिलं

श्रवणजन्यमपिज्ञानमविशदं श्रवणादिहेतुरित्यत्र दोषान्तरमाह यदिति। तस्येति। ध्यानादिद्वारा भाविविशदज्ञानानुपकारकत्वमित्यर्थः। आद्य इति। निवृत्तस्य पुनर्ननिवृत्त्ययोगात्पश्चात्तनज्ञानस्य वैयर्थ्यमितिभावः। अविशेषात्- स्वरूपविषयत्वाविशेषादित्यर्थः। सविशेषत्वमिति। विशदज्ञानस्य तत्वज्ञानत्वादिति भावः। सविशेषमिति। श्रवणात्सविशेषविषयकं ज्ञानमुत्पद्यत इति प्रवचनाद्युपपत्तिरिति भावः। कथमिति। निर्विशेषज्ञानं भविष्यतीति कथमवगतमित्यर्थः। श्रुतेरिति। निर्विशेषबोधनसामर्थ्यपर्यालोचनयेत्यर्थः। तर्हीति। इदानींतनस्यापि तादृशश्रुतिजन्यज्ञानत्वादिति भावः। व्यवसायः-अप्रामाण्यशङ्काशून्यज्ञानमित्यर्थः। ननु प्रामाण्यनिश्चयेपि तत्तात्पर्यसन्देहेन व्यवसायाभाव इति शङ्कते प्रमाणत्वेति। तर्हि श्रवणवेळायामेव शक्तितात्पर्यावधारणे मननादिवैयर्थ्यमित्याह तर्हीति। ननु न्यायतस्तात्पर्यावधारणेपि न्यायाभासोत्थापितसन्देहनिराकरणाय मननवद् ज्ञानान्तरमिति शङ्कते मननवदिति। अन्यानवकाशाभावादिति। निदिध्यासनवैयर्थ्यप्रसङ्गादिति भावः। मननानन्तरमपि चेदाहार्यसन्देहः तदा निदिध्यासनानन्तरमपि स्यादिति निदिध्यासनवैयर्थ्यमित्याह अन्यथेति। ननु श्रवणहेतुभूतं ज्ञानं परोक्षमिति नाविद्यानिवर्तकमिति प्रवचनाद्यनुपपत्तिरितिशङ्कते अस्तु तर्हीति। विषयेति। प्रमाणैक्ये चेति शेषः। एकस्य प्रमाणस्य एकस्मिन् विषये पारोक्ष्यापरोक्ष्यज्ञानजनकत्वं न दृष्टमित्यर्थः। ननु सहकारिवैचित्र्यादपरोक्षजनकस्य मनसः आत्मस्मृतिजनकत्वं दृष्टं। अत इहापि मननादि वैचित्र्याद्वैषम्यं सम्भवतीत्यत्राह सिद्धावपीति। बाधकत्वं किं तदप्रामाण्यनिश्चयप्रयोजकत्वं तदभावापादकत्वमिति मनसिकृत्याद्यंदूषयति परोक्षेणापीति। देहात्मभेदात्मबोधकशास्त्रजन्यज्ञानस्य गगननीलिमाद्यभावानुमितेश्च परोक्षत्वेप्यप्रामाण्यापादकत्वदर्शनात् प्रत्यक्षेणापि देहादिभ्रमेण तददर्शनादिति भावः। द्वितीये व्युत्पन्न भ्रान्त्यभावापादनमुतानुत्पादापादनं वेति विकल्प्य आद्य आह उत्पन्नेति। द्वितीयं दूषयति भ्रान्तीति। कारणानुवृत्त्यननुकृत्यधीनत्वं दर्शयति चन्द्रैकत्व इति॥

मुखान्तरेण प्रपश्चितं भाष्ये-''न तावद्वाक्यार्थज्ञानमि'' (श्रीभाष्यं)त्यादिना विस्तरेण ॥

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां अविधेयज्ञानभङ्गवादश्चतुर्थः ॥ ४ ॥

॥अथ बाधितानुवृत्तिभङ्गवादः पञ्चमः ॥ ५ ॥

नानुवर्तेत संसारो यत्प्रसादैकबाधितः ।

प्रसीदतु स मे देवः प्रथमाञ्जलिकिङ्करः ॥

यदुच्यते तत्त्वमस्यादि (छां-६-८-७)वाक्यात्तत्त्वज्ञाने जातेऽपि ब्रह्मविदां बाधितानुवृत्त्या भेदप्रतिभासादेराशरीरमनुवृत्तिः, तदनुवृत्तावपि छिन्नमूलतया दग्धपटादिवदबन्धकत्वं चेतिः; तत्र पृच्छामः, बाधितत्वे कथमनुवृत्तिर्भवता वक्तव्या ।तस्यां वा तत् कथम्। प्रमाणबलात् मिथ्यात्वाध्यवसायेऽपि द्विचन्द्रादिष्विव दोषमहिम्ना प्रतिभासानुवृत्तिरिति न विरोध इति चेत् समस्तद्वैतकुक्षिम्भरिणाऽप्यद्वैतज्ञानेनाबाधितः कोऽसौ दोषः । अविद्यैवेति चेत् कथं तर्ह्यविद्यानिवृत्तिः? न हि तन्निवृत्तावपर्यवसितः कश्चित् बाधो नाम । तन्निवृत्तावपि तन्मूलवासनाऽस्तीति चेत्-सा किं

॥वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिहंदेवेन कृतायां शतदूषणीटीकायां श्चतुर्थोवादस्समाप्तः ॥

पूर्वत्र बाधितानुवृत्त्यसम्भवस्य वक्ष्यमाणत्वादित्युक्तबाधितानुवृत्तिं निराकुर्वन् वादार्थं सङ्गृह्णाति नानुवर्तेतेति । बाधितस्य संसारस्यानुवृत्तिर्नास्तीत्यर्थः । तत्र हेतुः यत्प्रसादेति । तत्प्रसादेन निश्शेषमेव नाशादित्यर्थः ''अञ्जलिः परमामुद्रा क्षिप्रं देवप्रसादिनी'' ( ) इति वचनगतक्षिप्रशब्दार्थाभिप्रायेणाह प्रथमेति ।

ब्रह्मविदामिति । ब्रह्मविदां शरीरावस्थानपर्यन्तं भेदप्रतिभासादेरनुवृत्तिः (बाधितानुवृत्त्या) बाधितानुवृत्तिरूपा न तु पूर्ववदित्यर्थः । स्वार्थे तृतीया । तर्हि पूर्वानुवृत्तेः को भेदइत्यत्राह तदनुवृत्तावपीति । निवृत्तकारणकत्वेन न कार्यकरत्वं दग्धपटवदिति भावः । छिन्नमूलत्वविरोधमजानानस्य शङ्कामनुवदति प्रमाणेति । समस्तद्वैतकुक्षिम्भरिः समस्त द्वैतनिवर्तकः । अबाधितः- अनिवृत्तः । ननु बाधो नाम मिथ्यात्वज्ञानं न निवृत्तिरिति चेत्तत्राह न हीति । मिथ्यात्वज्ञानं न बाधः अपितु निवृत्तिरेव । अन्यथा छिन्नमूलत्वोक्तिविरोधात् । त्वत्प्रकरणपाठकबालकानामप्यविद्याया बाधितत्वेन बाधितानुवृत्ति रूपजीवन्मुक्ति प्रसङ्गात् । अपित्वविद्यानिवृत्तावेव बाधस्य पर्यवसानं वक्तव्यमिति तदपर्यवसितःतदन्यो न बाध इत्यर्थः । शङ्कते तन्निवृत्तावपीति । तत्वज्ञानं ब्रह्मव्यतिरिक्तकृत्स्नमिथ्यात्वज्ञानं । आदिपदेन तन्मूलभेदज्ञानसत्यत्वप्रमात्वादिगृह्यते । ननु वासनाया ब्रह्मस्वरूपात्मकत्वान्नदोष इत्यत्राह नचेति । भेदेति । नित्यस्य ब्रह्मण एव भेदप्रतिभासहेतुत्वादिति भावः । साध्यत्वादिति । वासनायाः अविद्याजन्यत्वादिति भावः । आदिशब्देन विनाशित्वादि गृह्यते । तस्यास्सत्यत्वमप्यसम्भवतीत्याह

ब्रह्मवत्सत्यत्वात् तत्त्वज्ञानेनाबाधिता, उत मिथ्यात्वेऽपि तदविषयत्वात्? न प्रथमः; द्वैतापसिद्धान्तादिदोषप्रसङ्गात्। न च सा ब्रह्मस्वरूपानुप्रवेशिनी, भेदप्रतिभासानुवृत्तेरनिर्मोक्षप्रसङ्गात्। ब्रह्मणः सावद्यत्वादिदोषप्रसङ्गाच्च। न चासत्याविद्योपात्ता वासना सत्येति संपद्यते। न चोपादानध्वंसे कार्यानुवृत्तिमुन्मत्तोऽप्यनुसन्धत्ते। नापि द्वितीयः; वासनाया अपि श्रवणसमयसमधिगत ब्रह्मव्यतिरेकलक्षणैकोपाधिक्रोडीकारात्। अन्यथात्वविद्याया अपि बाधकज्ञानाविषयत्वप्रसङ्गात्। "नेह नानास्ति" (बृह.६-४-२९) इत्यादेरविशेषात् तद्विषयत्वमिति चेत्-तुल्यम्। यदि च वाक्यार्थज्ञानात् वासना न निर्वतते, कुतस्तर्हि तन्निवृत्तिः? न तावददृष्टादेः; तथा सति ज्ञानबाध्यत्वाभावेन सत्यत्वप्रसङ्गात्। अत एव न स्वतः; व्याघाताच्च। न हि वध्यघातकयोस्तादात्म्यं दृष्टम्। न च सहकार्यन्तरमन्तरेण घटादिष्वपि स्वप्रध्वंसहेतुता। अहेतुकविनाशवादे तु सौगतचार्वाकादिसौहार्दोद्वारप्रसङ्गः। अविद्यायाश्च तद्वदेवाहेतुकनिवृत्त्यविरोधः स्यात्। न च दहनान्त्यशब्द-चरमसंस्कारादिवदिति वाच्यम्, तत्रापि तत्तदवस्थान्तर-कालविशेषादिसामग्री सहितपरमेश्वरसङ्कल्परूपस्य कारणस्यास्माभिरभ्युपगमात्। द्विचन्द्रादौ तु अङ्गुल्यवष्टम्भतिमिरादिदोषस्य चन्द्रैकत्वज्ञानाविषयत्वात्, तदुभयविषयैकज्ञानोदयेऽपि

नचासत्येति। नचोपादानेति। भावकार्यत्वाद्वासनाया अविद्योपादानकत्वमिति भावः। वासनाया अपीति। ब्रह्मव्यतिरिक्तत्वेन वासनायास्तद्व्यतिरिक्तमिथ्यात्वज्ञानेन बाधितत्वादिति भावः अन्यथेति। ब्रह्मव्यतिरिक्तं मिथ्येति ज्ञानविषयत्व इत्यर्थः। तद्विषयत्वं शङ्कते नेह नानेति। तथा सतीति। ज्ञानाबाध्यत्वं सत्यत्वमिति भावः। अत एव। सत्यत्वप्रसङ्गादेवेत्यर्थः। व्याघाताच्चेति। स्वस्यैव स्वध्वंसहेतुत्वे द्वितीयक्षण वृत्तिमत्वं व्याहतमित्यर्थः। ननु ध्वंसमात्रस्य प्रतियोगिजन्यत्वात् ध्वंसप्रतियोगिनि वध्यघातकभावो दृष्ट इत्यत्राह नच सहकारीति। आगन्तुकहेत्वन्तरसापेक्षत्वेन द्वितीयक्षण एव ध्वंसानुदयादित्यर्थः अहेतुकेति। किं कार्यस्याहेतुकत्वात् ध्वंसस्याप्यहेतुकत्वमुच्यते उत विनाशमात्रस्याहेतुकत्वादिति विकल्पे आद्ये चार्वाकमत प्रसङ्गः। द्वितीये क्षणिकत्वप्रसङ्गेन सौगतमतप्रसङ्ग इत्यर्थः। अविद्यायाश्चेति। श्रवणाद्यायासवैयर्थ्यमिति भावः।ननु क्वचिदहेतुकनिवृत्त्यङ्गीकारो न दोषाय यथा दहनस्य दाह्यनाशानन्तरं स्वत एव नाशः तथा अंत्यशब्दस्य मरणसमयानुभवजन्यसंस्कारस्य च स्वत एव नाश इत्यत्राह न चेति। अहेतुक निवृत्तिरिति शेषः। दहननाशः दहनस्य सूक्ष्मावस्थान्तरापत्तिः तद्धेतुश्च दाह्यभस्मीभावावस्था। अंत्यशब्दनाशश्च तदातनो यत्किञ्चिद्द्रव्यसंयोगादिः तद्धेतुश्च प्रसिद्ध एव। संस्कारनाशावस्था नरकानुभवादिः। अतिरिक्ताभावपक्षेपि त एव आगन्तुकहेतवः। उपान्त्यशब्दस्तन्नाशो वाऽन्त्यशब्दनाशकः। ईश्वरसङ्कल्पोप्यागन्तुककारणमित्याह तत्रापीति। अतः स्वतो निवृत्त्ययोगाद् ज्ञानादेवाविद्ययासह निवृत्तौ बाधितानुवृत्त्यसम्भव इति भावः। ननु यदि मिथ्यात्वज्ञाने सति भेद प्रतिभासासम्भवः कथं तर्हि तस्मिन्सत्यपि चन्द्रभेदप्रतिभास इत्याशङ्क्य वैशम्यमाह द्विचन्द्रादाविति। द्विचन्द्रादौ तु दोषस्याबाध इति तन्मूलभ्रमपरम्परानुवृत्तिर्घटत इत्युत्तरेणान्वयः। चन्द्रैकत्वज्ञानं - चन्द्रभेदमिथ्यात्वज्ञानं तदविषयत्वादित्यर्थः। तद्विषयत्वेपि किं स्वरूपेण विषयत्वं उतमिथ्यात्वेन। नाद्य इत्याह तदुभयविषयेति। विरोधाभावादिति। तत्र मिथ्यात्वानवगाहित्वादित्यर्थः। द्वितीयेपि किं लौकिकं प्रत्यक्षं उत यौक्तिकं नाद्य इत्याह दोषो मिथ्येति। द्वितीय आह यौक्तिकेति। वासनाया

पार्श्वस्थतारकाप्रकाशस्येव दोषप्रकाशांशस्य चन्द्रैकत्वप्रकाशेन विरोधाभावात्, दोषो मिथ्येति तु ज्ञानस्य लौकिकानामनुदयात्; यौक्तिकमिथ्यात्वज्ञानस्यैव भ्रान्तित्वेन तत्सत्यत्वाच्चाबाध इति तन्मूलभ्रमपरम्परानुवृत्तिर्घटते। तद्विषयान्यथात्वाध्यवसायेन भयविस्मयादिकार्यनिवृत्तिश्च। तव तु न तथा, कारणभूताविद्यावत् कार्यभूतशोकादिवच्च, मध्यगतभेदवासनाभेदज्ञानयोरप्येकहेलयैव निवार्यत्वात्। अनुवृत्तावपि बाध्यबाधकयोराविद्यत्वेन वास्तवप्रामाण्याभावात्; विशेषेण बाधकबलासम्भवाच्चेति। तदेतत् सर्वमभिप्रेत्य सत्यपि ''वाक्यार्थज्ञाने इत्यादि, भयादिकार्यं तु निवर्तते'' (श्री भाष्यं जिज्ञा) इत्यन्तं भाषितम्॥९॥

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां बाधितानुवृत्तिभङ्गवादः पञ्चमः॥ ५॥

व्यावहारिकत्वेन तदवच्छिन्नाभावसाधकलिङ्गाभासजन्यस्य परोक्षभ्रान्तित्वेन तस्य व्यावहारिकसत्यत्वात्तेन न बाध इति भावः। ननु यदि द्विचन्द्रादिभ्रमस्य बाधितमूलत्वं न स्यात् तर्हि तन्निबन्धनभयविस्मयादिप्रसङ्ग इत्यत आह तद्विषयेति। न तथेत्येतद्विवृणोति कारणेति। अविद्यानिवर्तकज्ञानस्य विरोधिविषयत्वेन निवर्तकत्वे तदानीमेवाविद्यावद्वासनाया अपि निवृत्तिप्रसङ्गात् बाध्यबाधकज्ञानयोर्मिथ्यात्वाविशेषेण वास्तवप्रामाण्यतदभावाभ्यामपि विशेषाभावाद्बाधकज्ञानस्य बाध्यप्रतिभासापेक्षयाऽविशेषेण बलाभावाच्च पश्चादप्यनिवृत्तिप्रसङ्गादेक हेलयैव निवार्यत्वं वाच्यमिति न बाधितानुवृत्तिरिति भावः॥

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतयां शतदूषणीटीकायां पञ्चमो वादस्समाप्तः॥

॥अथ विविदिषासाधनत्वभङ्गवादः षष्ठः ॥६॥

दृष्टानुश्रविकार्थजातविमुखान् पुंसोऽधिकृत्य श्रुतौ
यज्ञादिर्यदुपास्तिसाधनतया साक्षाद्विधिं प्राप्नुते
लीलाभोगविभूतियुग्मभरितस्वात्मप्रदानोन्मुखः
श्रीमानस्तु स मे समस्तदुरितोत्ताराय नारायणः ॥

यदुच्यते, ''तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन'' (बृह-६-४-२२) इत्यत्र यज्ञादिकं विविदिषासाधनत्वेन विधीयते, न तु वेदनसाधनत्वेन, वस्तुविरोधात्; श्रुत्यक्षरपर्यालोचनाच्च । विविदिषन्तीति हि श्रूयते; न पुनःविदन्तीति । तत्र ब्रूमः,कोऽसौ वस्तुविरोधस्तावत्? किं ज्ञानस्य यज्ञादिभिस्साधयितुमशक्यत्वम्? उत तेषां ज्ञानाङ्गभूतशमादिप्रत्यनीकात्मत्वम्? यद्वा तत्त्वज्ञानफलापवर्गप्रत्यनीकत्रिवर्गसाधकत्वम्? यद्वा आश्रमाङ्गतया विहितानां विद्याङ्गत्वे नित्यानित्यसंयोगविरोधः? अन्यो वा कश्चिदिति ।

न प्रथमः । स हि यज्ञादिकमन्तरेण उत्पत्तिदर्शनाद्वा, यज्ञादिसन्निधावप्यनुत्पत्तिदर्शनाद्वा? आद्ये त्वसिद्धिः प्राचीनेष्ववीचीनेषु वाधिकारिष्वननुष्ठित शुद्धधर्मेषु विद्योत्पत्तेरसिद्धत्वात् । द्वितीयेत्वप्रयोजकता सामग्र्यैवहि कार्योत्पत्तिः न पुनर्हेतुमात्रात् संभवति च प्रायशः कर्म कर्तृसाधनवैगुण्यम् । अन्यथा चित्रापशुफलत्वादावपि कस्ते समाश्वासः? । तस्यास्तत्साधनत्वं विदधाति श्रुतिरिति चेत्, अत्रापि यदि श्रुतिर्विदधाति, तदा तद्वदेव समाश्वसिहि ।

अन्यथा विविदिषासाधनत्वेऽपि त्वया न समाश्वसितव्यम्; तत्रापि साध्यसाधनभावस्य

पूर्ववादे वेदनाङ्गत्वात्कर्मणां साङ्गवेदनविचारात्मकं शास्त्रमेकमित्युक्तं । तदयुक्तं । विविदिषार्थत्वेन वेदनाङ्गत्वाभावादित्याक्षेपसङ्गतिमभिप्रेत्य वादार्थं सङ्गृह्णाति । दृष्टेति । आनुश्रविकार्थः स्वर्गादिपुरुषार्थः तत्र दृष्टशब्देन अर्थकामावभिप्रेतौ । त्रिवर्गनिरपेक्षानित्यर्थः । साक्षाद्युपास्तिसाधनतयेत्यन्वयः । स्वात्मप्रदानोन्मुख इति । अनुभाव्यतयेति शेषः ।

वस्तुविरोधादिति । कर्मणां 'विद्यांचाविद्यां' (ईश-११) चेत्यविद्यात्मकतया विद्यात्मकवेदनविरोध इत्यर्थः । विविदिषन्तीति सन्नन्तप्रकृतिधात्वर्थस्योपसर्जनतया तेन नान्वयः अपितु प्रधानभूत प्रत्ययार्थभूतेच्छयेति भावः । साधयितुमशक्यत्वमिति । अकारणत्वादिति भावः । यद्वेति विरुद्धफलकत्वमित्यर्थः । आश्रमाङ्गतयेति आश्रमप्रयोज्यतयानुष्ठानं, विद्याङ्गत्वे विद्यार्थिन इति विद्यार्थत्वरहितस्यानुष्ठानविरहात्सर्वपुरुषानुष्ठेयत्वतदभावाभ्यां विरोध इति भावः ।

स हीति । किं व्यतिरेकव्यभिचारादसाधनत्वमुतान्वय व्यभिचारादित्यर्थः । शुक्लधर्मेष्विति । फलान्तराभिसन्धिरहिततयानुष्ठितधर्मेषु विद्योत्पत्तेरदर्शनान्न व्यतिरेक व्यभिचार इति भावः । अन्वयव्यभिचारः किंसामग्र्याः उत कारणस्येति विकल्प्य आद्यस्यासिद्धेर्द्वितीये दोषमाह अप्रयोजकतेति । अन्वयव्यभिचारो न दोषायेति भावः । ननु विहितकर्मनुष्ठाने फलावश्यंभावादन्वव्यभिचारो दोषायेत्यत्राह

श्रुत्येकावसेयत्वात्। "

कुर्वद्वाऽयमकुर्वद्वा" (चार्वाकाः) इत्यादिचार्वाकदुर्वादस्य त्वयाऽप्यस्मर्तव्यत्वात्। व्यभिचारस्य च समत्वात्। एतेन वाक्यजन्यप्रमितिरूपस्य संस्कारजन्यस्मृतिसन्ततिरूपस्य वा वेदनस्य किं कर्मापक्षयेति निरस्तम्; इच्छाया अप्यनुकूलताबोधाधीनोत्पत्तेः किं कर्मापेक्षयेति समत्वात्। अन्तःकरणनैर्मल्यद्वारेणेति चेत्, तुल्यम्, "यत्रोभयोस्समोदोषः" (श्लोकवार्तिकं) इत्यभियुक्तवचनं किमर्थमित्थं विस्मरसि। "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" (महा भा-शान्ति-२७६-३५) इत्यादिवाचनिकार्थातिलङ्घनं तवाधिकम्।

नापि द्वितीयः; शमादेरविहिताप्रतिषिद्धनिषिद्धविषयत्वेन विद्याङ्गतया विहितेभ्यः कर्मभ्यो व्यतिरिक्तविषयत्वात्। विहितस्य च, "धर्मेण पापमपनुदति" (तै-उ.महाना ७५) कषायपक्तिः कर्माणि ज्ञानं तु परमागतिः" (महा भा-शान्ति २७६-३५) इत्यादिभिर्विद्योपकारकत्वस्यैव श्रुतत्वात्।

न च तृतीयः; फलाभिसन्धिविरहादेव त्रिवर्गानारम्भात्, अनेकफलसाधनस्यापि ज्योतिष्टोमादेरभिसन्धिविशेषेण फलं प्रति नियमस्य सर्वैरभ्युपगन्तव्यत्वात्।

सम्भवति चेति। अङ्गरूपकर्मवैगुण्यात्साधनरूपप्रधानस्य वाऽनिष्पत्तेर्नविद्याहेतुकर्मस्वरूप सत्वमिति नान्वयव्यभिचार इति भावः।

यदि कर्मकर्तृसाधनवैगुण्येप्यन्वय व्यभिचारः तदा दोषमाह अन्यथेति। चित्रायाः-चित्रायागस्य, पशुफलत्वादावित्यर्थः। तस्या इति। श्रुतिबलात्कारणत्वे सिद्धे फलाभावस्थले कर्मवैकल्यं कल्प्यमिति भावः। अत्रापीति। तथा च श्रुत्यक्षरपर्यालोचनैव कार्या नोक्तार्थविरोध इत्यर्थः। अन्यथा श्रुत्या समाश्वासाभावे।

कुर्वद्वेति। चार्वाको हि कारणताखण्डनार्थमेवमाह। साधनत्वेनाभिमतानां यदि कुर्वद्रूप स्वभावत्वमङ्गीक्रियते सर्वदा कार्यजनकत्वं स्यात्। अकुर्वत्स्वभावत्वे कदाचिदपि न जनकत्वं स्यात्। कुर्वत्स्वभावत्वाकुर्वत्स्वभावत्वयोर्विरोधात्। अन्यथा सिकतास्यस्तैलं स्यात्। जलाद्वा दाह इति कारणत्वखण्डनस्य (दुस्त्यजत्वा) तदा सम्मतत्वादिति भावः। विस्मरणशीलं स्मारयति व्यभिचारस्य चेति। एतेन वक्ष्यमाणेन किं कर्मापेक्षयेति। घटमानयेति वाक्यजन्यज्ञाने तज्जन्यस्मरणे वा कर्मानपेक्षणादिति भावः। इच्छाया इति अनुकूलताबोधः इष्टसाधनताज्ञानं। यदीच्छाविशेषे कर्मापेक्षा तदा प्रकृतेपि तुल्यमिति भावः। ननु तर्हि इच्छां प्रत्येव साधनंत्वमस्तु तुल्यत्वादित्यत्राह कषाय इति।

शमादेरिति भिन्नविषयत्वान्नविरोध इति भावः। शमादेस्तावन्मात्रविषयत्वे नियामकमाह विहितस्य चेति।

ननु फलाभिसन्धिविरहेपि तद्योग्यस्य कथं तदनारम्भकत्वं नहि दाहार्थं स्पृष्ट एव वह्निर्दहतीति नियमोस्तीत्यत्राह अनेकेति। "सर्वेभ्यः कामेभ्यो ज्योतिष्टोमः" "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इति विहितज्योतिष्टोमादेस्तत्तत्कामानामेव तत्तत्फलाङ्गीकारादिति भावः। अत एवेत्येतद्विवृणोति अत्रापीति। एकमेववाक्यमुभयत्र विनियोजकं चेन्नित्यानित्यसंयोगविरोधः। विनियोजकवाक्यभेदेतु न विरोधः।

अत एव न चतुर्थः; तत्रापि विनियोगपृथक्त्वेन नित्यानित्यसंयोगविरोधाभावात्। तदेतत् सर्वं सूत्रकारैरेव विस्पष्टमुक्तम्- ''सर्वापेक्षा च यज्ञादिश्रुतेरश्वत्'' (ब्र.सू-३-४-२६) ''शमदमाद्युपेतस्स्या त्तथाऽपि तु तद्विधेः तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात्'' (ब्र.सू.३-४-२७) ''विहितत्वाच्चाश्रमकर्मापि'' (ब्र.सू.३-४-३२) ''सहकारित्वेन च'' (ब्र.सू.३-४-३३) ''अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्'' (ब्र.सू.४-२-२६) इत्यादिभिः।

या च ते श्रुत्यक्षरपर्यालोचना, सोऽपि हस्तसमालोचः; ''सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः'', (छां-दहर) ''तद्विजिज्ञासितव्यम्'', (छां.८-७-१) ''श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' (बृ.६-४-६) इत्यादिश्रुतिशीलापरामर्शात्। न हि तेषु सन्प्रत्ययार्थविधिपरत्वं भवताऽपि स्वीकृतम्। विधिबलावसितपुरुषार्थसाधनत्वार्थसिद्धेच्छानुवादरूपत्वात् प्रत्ययस्य। ध्यायीतेत्यादिविध्यन्तरैकार्थ्यात्; तत्र शाब्दं प्रत्ययार्थप्राधान्यमनादृत्य, इच्छाया इष्यमाणप्रधान त्वादार्थं प्रकृत्यर्थप्राधान्यं स्वीक्रियत इति चेत्-तर्हि, ''क्रियावानेष ब्रह्मविदां वरिष्ठः'', (मुंड-३-२-४) 'कर्मणैव हि संसिद्धिम्' (गीता-३-२०) ''कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते'' (महा-शान्ति २७६-३५) इत्यादिप्रमाणसहस्रैकार्थ्यादत्रापि वेदनपरत्वमङ्गीकुरुष्व।

लोके च, ''असिना जिघांसति'', ''अश्वेन जिगमिषति'' इत्यादिषु प्रकृत्यर्थे करणान्वयो

अन्यथा यावज्जीवं दर्शपूर्णमासाभ्यां यजेत ( ) दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत ( ) ''वसन्ते वसन्ते ज्योतिषायजेत'' (आ.श्रौ.१०-२-१७) ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' (तै.यजु.२.५.५.) इत्यादावपि विरोध प्रसङ्ग इति भावः।

सर्वापेक्षा चेति (ब्र.सू.३-४) ''यज्ञेन दानेनेति'' विनियोजक वाक्यबलात्सर्वकर्माण्यपेक्षन्ते विद्याः। यथा स्वतो गमनसाधनीभूतोप्यश्वो बन्धनादिपरिकरापेक्षस्तद्वदित्यर्थः। शमदमादीति। ''शान्तोदान्त उपरतस्तिति क्षुस्समाहितो भूत्वात्मन्येवात्मानं पश्येत्'' (बृह-६-४-२३) इति विद्यार्थं शमदमाद्युपेतो भवेदित्यर्थः। नच तथा सति कर्मभिर्विरोधः। व्यर्थकर्मविषयतया शमादेर्विरोधाभावात्। भिन्नविषयत्वे हेतुः तदङ्गतयेति। भिन्न विषयत्वे हेत्वन्तरं दर्शयति विहितत्वाच्चेति। आश्रमकर्मणामवश्यानुष्ठेयतया शमदमादयो भिन्नविषया इति भावः। हेत्वन्तरमाह अग्निहोत्रादित्विति। अग्निहोत्राद्याश्रमधर्मस्य तु विद्योत्पत्तिरेवकार्यमित्याप्रयाणादहरहराधेयातिशयवत्तया विद्यारूपकार्यार्थ मवश्यानुष्ठेयमित्यर्थः।

हस्तसमालोच इति। एक हस्तदर्शनात्तदन्य हस्त एतादृश इति निश्चय तुल्य इत्यर्थः। तदेव दर्शयति सोन्वेष्टव्य इति। आदि शब्देन ''तद्विजिज्ञासस्व'' (भृगुवल्ली) इत्यादेस्सङ्ग्रहः। प्रकृत्यर्थस्यैव वाक्यार्थान्वयेपि इच्छानुवादः श्रुतेश्शीलं। तथा चोपसर्जनिनापि प्रकृत्यर्थेन विध्यन्वयवत् करणान्वयो युज्यते हीति भावः। तेष्विति। ''विजिज्ञासितव्यः'' इत्यादिष्वित्यर्थः। अत्र वाक्येष्विति विशेष्यमध्याहार्यं। शङ्कते विधिबलेत्यादिनाचेदित्यन्तेन। अनुवादरूपत्वे हेत्वन्तरमाह ध्यायीतेति। प्रत्ययार्थादरे हेतुमाह इच्छाया इति। तर्हीति। ध्यायीतेत्याद्यैकार्थ्यावत् ''क्रियावानेषः'' (मुंड-३-२-४) इत्यादि वाक्यैकार्थ्याद्विविदिषन्तीत्यादावपि प्रकृत्यर्थ एवान्वय इति भावः।

बहुलमुपलभ्यते। अत्र असेरश्वस्य वा हननगमनेच्छासाधनत्वयोगात् हननादिसाधनत्वस्यान्वयव्यतिरेक सिद्धत्वाच्च अगत्या प्रकृत्यर्थसाधनत्वाश्रयणम्। इह तु न तथा; अन्तः करणनैर्मल्यद्वारेण सत्त्वविवृद्ध्योपकारकत्वस्य ज्ञानतदिच्छयोरविशेषादिति चेन्न; अनन्यपरत्वस्योपपादितत्वात्। अयोगस्य चात्राप्यविशेषात्।

तथा हि योऽयं विविदिषाकामो यज्ञादिष्वधिकरोति, स किं तदानीं वेदनमिच्छति, उत न? आद्ये, विविदिषा सिद्धैवेति न तस्या यज्ञादिसाध्यत्वम्। तथा च चक्रकम्। वेदनेच्छायां जातायामेव विविदिषेच्छा जायते, तस्यां जातायां कर्मानुष्ठानम्, ततो विविदिषेति। अत्रैकैकोभयपर्वसङ्कोचेनाऽऽत्माश्रयान्योन्याश्रयावप्यन्तर्भाव्यौ। द्वितीयेऽपि, वेदनस्यानिष्टत्वे विविदिषाऽप्यनिष्टैव स्यात्, तद्विषयत्वात् तस्याः। विविदिषा हि वेदनं साधयेत्; तच्चापवर्गादिकमिति मत्वैव हि तस्यामभिलाषसम्भवः। ननु वेदनौन्मुख्यलक्षणविविदिषा पूर्वं संवृत्ता। तदर्थप्रवृत्तिपर्यन्ता तु साध्यतयाऽभिमतेति चेन्न; तादृशतीव्रेच्छाया एव उत्पत्त्यनुत्पत्तिविकल्पे प्रागुक्तदोषानतिलङ्घनात्। न हि वेदने तीव्रेच्छायामसम्भवन्त्यां तादृशीमपि तामिच्छेत्, तदुपायवर्गानुष्ठानक्लेशं वा सहेत। ननु दृष्टमेतत् यद्बुभुक्षापिपासादिकामनया भेषजमुपदिश्यते। तत्रापि भोजनादेरिष्टत्वानिष्टत्वविकल्पेन प्रागुक्तप्रसङ्गोदुर्वारः। तत्र यः परिहारस्ते, स नोऽत्रापि भविष्यतीति चेत्-तन्न; भोजनादेः सामान्यतोऽनुकूलत्वज्ञानादेवेष्टत्वसिद्धेः, तथापि दोषवशात्तदातनमनारोग्यात्मकं प्रातिकूल्यमप नेतव्यमिति तावन्मात्रार्थं भेषजोपदेशः; न पुनरिच्छास्वरूपनिष्पत्तये। अत्रापि तर्हि तथाऽस्तु; सामान्यतो वेदनस्येष्टत्वेऽपि तादात्विकतत्प्रातिकूल्यापादकरजस्तमोनिबर्हणेन अन्तःकरणशुद्ध्यर्थं कर्मणां

उपसर्जनिन प्रकृत्यर्थेनान्वयो लोकेपि सिद्ध इत्याह लोके चेति। नन्वत्रास्यादीनामिच्छान्वया योग्यत्वादस्तु प्रकृत्यर्थान्वयः। कर्मणांतु विविदिषान्वये बाधकाभावात्कथं प्रधानत्याग इत्याशङ्कते अत्रासेरित्यादिना। अनन्यपरत्वस्येति। ''क्रियावानेषब्रह्मविदां वरिष्ठः'' (मुंड-३.२.४) इत्यादि वेदनसाधनत्वश्रुतिबलात्प्रत्ययार्थ परित्याग इति भावः। अयोगस्यचेति। इच्छान्वयायोगस्येत्यर्थः। तथा चेति यज्ञादिसाध्यत्व इत्यर्थः। वेदनेच्छायामिति। विविदिषायाः स्वतः प्रयोजनत्वाभावेन वेदनार्थतयैवोद्देश्यत्वादिति भावः।

वेदनस्येति। वेदनस्योद्देश्यत्वाभावे तद्विषयायां विविदिषायामपि पुरुषार्थसाधनत्वाभावादिच्छा न स्यादित्यर्थः। तद्विषयत्वात्तस्या इति। वेदनार्थतयैव पुरुषार्थत्वादिति भावः। अपवर्गः-अविद्यानिवृत्तिः। अखण्डब्रह्मानुभवः आदिशब्दार्थः। तदर्थेति। वेदनार्थश्रवणाद्यनुष्ठानपर्यन्तेत्यर्थः। प्रागुक्तेति तीव्रविविदिषाहेतुभूत यज्ञाद्यधिकारिणस्तीव्रवेदनेच्छाभावे वेदनौन्मुख्यमात्राद्वेदनसाधनश्रवणादाविव ततोऽपि व्यवहितायां श्रवणादिहेतुतीव्रविविदिषायामिच्छा न स्यात्। तीव्रविविदिषाङ्गीकारे तु यज्ञाद्यसाध्यत्व चक्रकयोः प्रसङ्ग इत्यर्थः। न हीति। वेदनस्य तीव्रेच्छाविषयत्वाभावे तत्सम्पादनार्थं तत्साधनभूत तदिच्छायामिच्छा न स्यादित्यर्थः। तादृशीं-तदृशवेदनगोचरां। अतादृशीमिति वा पाठः। तदुपायवर्गेति तादृशकर्मानुष्ठानक्लेशमित्यर्थः। नन्विति। भेषजमुपदिश्यत इति यत्तत् दृष्टमित्यन्वयः। तत्रापीति। भोजनस्य

विनियोग इति चेत्, तर्हि विविदिषासाधनत्वश्रुतिः परित्यक्तैव। अवान्तरव्यापरत्वादविरोध इति चेत् वेदनसाधनत्वमप्यनुमन्यताम्, तत्पूर्वभाविनः सर्वस्यापि यज्ञादिकर्मावान्तरव्यापारत्वोपपत्तेः। एवंच सति, "क्रियावानेष ब्रह्मविदां वरिष्ठः", (मुंडक ३-२-४) "कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तते" (महा-भा-शान्ति २७६-३१) "पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनःपुनः" (महा-भा-उद्यो-३४-७५) इत्यादिभिरैकार्थ्यं च। अतो यज्ञादिकर्म वेदनसाधनमेव।

ननु विविदिषासाधनत्वे यत् चोद्यं यज्ञादेः, तत् भक्तिसाधनत्वेऽपि समानम् तथा हि। किं भगवति भक्तिमान् भक्तिं कामयते, उत तद्विधुरः? न प्रथमः, भक्तेर्निष्पन्नत्वेन साध्यत्वायोगात्। न द्वितीयः, भगवद्भक्तिविधुरस्य तद्भक्तावपि नैरपेक्ष्यात्; भक्त्यवस्थाभेदान्निर्वाहेऽपि प्राग्वदेव दोष इति। तन्न। प्रीतिरूपज्ञानविशेषो हि भक्तिः; प्रीतिश्च तारतम्यवती। विषयस्वभावविशेषाभिमानाभ्यास भेषजादिभिः प्रेमवृद्धिः कामशास्त्रादिष्वपि सम्मता। पुरुषस्य तत्कामना सम्भवति न वेत्येतावदेव चिन्तनीयम्। तत्र यदि सञ्जातमात्रादतिशयितस्य प्रेम्णः फलान्तरं प्रमाणतः सिद्ध्येत्, तदा तथाविधं

अनुद्देश्यतेति तदर्थं भेषजादावप्रवृत्तिरित्यर्थः। ननु भविष्यद्भोजनमिष्टसाधनं भोजनत्वादिति सामान्यत इष्टसाधनताज्ञानाद्यदीच्छा तर्हि सैव बुभुक्षेति किमर्थं भेषजाद्युपदेष इत्यत आह तथापीति। सिद्धेपीच्छा हेतुभूते रोगविशेषाद्द्वेषो भोजने जायते। तेन न प्रवृत्तिः तादृशरोगनिवृत्तये भेषजोपदेश इति भावः। प्रातिकूल्यं-भोजन प्रतिकूलं। स्वार्थेष्व्ञ् प्रातिकूल्येति। वेदनेच्छायां सत्यामपि रजस्तमोभिभूतत्वात्तत्साधन श्रवणादौ दुःखमिश्रगुरुशुश्रूषादि साध्ये प्रातिकूल्यबुद्धिर्भवतीति रजस्तमोनिबर्हणार्थं कर्मानुष्ठानमित्यर्थः। तर्हीति। विविदिषायाः पूर्वं सिद्धत्वाद्रजस्तमोनिबर्हणार्थमेव कर्मानुष्ठानमिति विविदिषार्थतया यागादिकं श्रुतिप्रतिपाद्यं न स्यादित्यर्थः। ननु गुरुशुश्रूषादिदुःखसाध्येपि श्रवणादौ प्रातिकूल्यबुद्धिविरोधिनीच्छा रजस्तमोनिबर्हणमन्तरेण न भवतीति यज्ञादिभिस्तादृशेच्छायां जननीयायां रजस्तमोनिबर्हणस्यावान्तरव्यापारत्वाद्यज्ञादेर्विविदिषार्थतया श्रुतिप्रतिपाद्यत्वं न विरुद्धमिति शङ्कते अवान्तरेति। यद्यप्येवं सति पूर्वोक्तान्योन्याश्रयः स्थिर एव। तथापि दूषणान्तरमाह तर्हीति। एवं व्यापरत्वेनाव्यवधायकत्वे रजस्तमोनिबर्हणप्रतिकूल्यनिवृत्तिविविदिषा श्रवणादीन् द्वारीकृत्य वेदनसाधनत्वमेवाङ्गीकर्तुं युक्तमिति भावः। अस्मिन्नर्थे श्रुत्यन्तरानुगुण्यं पक्षान्तरे तद्विरोधश्चेत्याह एवं च सतीति।

भगवद्भक्तिविधुरस्येति। भक्तेः प्रीतिरूपत्वेन तदुद्देश्यत्वघटित्वात्तदुद्देश्यत्वाभावे तद्भक्तेरप्युद्देश्यत्वाभावादिभावः। प्राग्वदेव-विविदिषास्थलवदेवेत्यर्थः। भक्तिविधुरस्यापि भक्तेर्मोक्षसाधनत्वं ज्ञातवतो भक्तीच्छासम्भवत्येव। तथापि प्रथमकोटिमस्युपेत्याह तन्नप्रीतिरूपेति। विषयस्वभावविशेषात्कामित्यादौ अभिमानाद्वायसप्तोतन्यायेन कुरूपेपि स्वपुत्रादौ अभ्यासाल्लशुन भक्षणादौ भेषजात् कार्पासाथिचूर्णाद्योषधाद्भोजनादौ। आदिशब्देन सुकृतविशेषग्रहः। "कलाविशेषविज्ञाता देवतामपिमोहयेत्" इति कामशास्त्रसिद्धंचेत्याह प्रेमवृद्धिरिति। आदिशब्देन "रोचनालक्ष्मणा मूलकल्कलिप्ततनूर्वधूः। ऋतौ प्राप्नोति सौभाग्यं दयितप्रियतामपि" इत्युक्तायुर्वेदसङ्ग्रहः। सञ्जातमात्रात् प्रथमोत्पन्नात्। सामान्यप्रेममात्रात् फलस्यासिद्धेः तदपेक्षयाऽतिशययुक्तादेव फलसिद्धिरिति तादृशप्रेमकामनायामपि नोक्तदोष इत्याह तत्र यदीति। ज्ञानवदिति। विशेषतो ज्ञानेच्छायामपि सत्यां ज्ञानभावादिति भावः। व्याप्रियत इति न तु विशेषतो ज्ञात इति शेषः। अन्यथेति। विशेषतोऽपि ज्ञाते

तस्यातिशयमभिवाञ्छेदेव। न च तावता तथाविधस्यातिशयस्यापि निष्पन्नत्वप्रसङ्गः; ज्ञानवदुपपत्तेः। सामान्यतोऽवगते हि विशेषतो ज्ञानाय व्याप्रियते। अन्यथा जिज्ञासैव सर्वत्र न स्यात्। नन्वेवं विविदिषायामप्येवमस्त्विति चेन्न; विशेषेच्छाया एव प्रागेवोदयात्; न हि, ''पूर्वं सामान्यतो ज्ञानामिच्छति; पश्चाद्विशेषतः'' इति सम्भवति। न च विषयविशेषावच्छेदमन्तरेण इच्छाजातिविशेषः कश्चित् सम्भवति। भक्तौ तु भोग्याकाराविर्भावतारतम्यवशात् तारतम्यमुक्तमिति। इहापि तत एव तारतम्यमिति चेत्; अस्तु तत्, तथाऽपि काम्यत्वं दुर्वचम्; तथाविधविषयविशेषितस्य वेदनस्य काम्यत्वमन्तरेण तदसिद्धेः, तत्काम्यतायाश्च सिद्धौ, सिद्धा तथाविधवेदनेच्छेति कथं सा काम्या? अतः सिद्धं यज्ञादिकर्म विविदिषासाधनत्वेन न विहितमिति। तदेतत् सर्वमभिसन्धायाह-''एवंरूपायाः ध्रुवानुस्मृतेःसाधनानि यज्ञादीनि कर्माणीति ''यज्ञादिश्रुतेरश्वत्'' (श्री भाष्यं जिज्ञा) इत्यभिधास्यते इति।

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य कृतिषु शतदूषण्यां विविदिषासाधानत्वभङ्गः वादः षष्ठः ॥

ज्ञातव्यान्तराभावादिति भावः। ननु यथा जिज्ञासाकारणतया पूर्वं ज्ञानसत्वेपि ज्ञानान्तरविषयिणी जिज्ञासा तथा वेदनेच्छाया विविदिषेच्छाकारणतया पूर्वं सत्वेपि विविदिषान्तरविषयिणीच्छास्तिवतिशङ्कते नन्विति। कारणीभूताया अपि वेदनेच्छाया इष्यमाणतयाऽभिमतेच्छासजातीयत्वात्सापि प्रथमं न सम्भवतीत्याह नेति। विशेषविषयाया इच्छाया इत्यर्थः। ननु भिन्नविषयत्वेनेच्छाया विशेष उत समानविषयत्वेपीति विकल्पमभिप्रेत्य आद्य आह न हीति। अन्यविषयकेच्छाया अन्येच्छाजनकत्वे मानाभावादिति भावः। द्वितीयं दूषयति नच विषयेति। यद्यपि विषयैक्येपि इच्छाया उत्कटत्वरूपविशेषो लोकसिद्धः तथापि तादृशोत्कटवेदनेच्छाया असिद्धौ उत्कटविविदिषाविषयकेच्छाया असम्भव इति भावः। ननु भक्तावपीष्यमाणायां कथं जातिविशेषसम्भव इत्याकांक्षायां प्रीतिश्च तारतम्यवतीत्यादिनोक्तं स्मारयति भक्तौ त्विति। भोग्यस्याकारो भोग्याकारः प्रियत्वमिति यावत्। आविर्भावो - निष्पत्तिः। प्रियत्वतारतम्यस्य प्रीतितारतम्याधीनत्वात्प्रीतिरूपभक्तितारतम्यमेव भक्तिविषये कामनायां हेतुरित्यर्थः। ननु यादृशीभक्तिस्त्वयेष्यमाणतयाभिमता तद्रूपवेदनविषयत्वमेव इष्यमाणायां विविदिषायां विशेषोस्त्वित्याशङ्कते इहापीति। विविदिषायामपीत्यर्थः। काम्यत्वमिति। विविदिषाया इति शेषः। दुर्वचत्वमुपपादयति तथाविधेति। अतिशयप्रीतिरूपत्वात्मको य इष्यमाण विविदिषायाः प्रकारतया विषयः तद्विशेषितं यद्वेदनं तत्कामनामन्तरेण तद्विषयविविदिषायाः कामनापि न सम्भवतीत्यर्थः।नन्विच्छार्थं कर्मानुष्ठानस्यात्माश्रयग्रस्तत्वे क्वचिदपीच्छा न सम्भवेत् इच्छाहेतुभूतकर्मानुष्ठानभावात्। नचेच्छाविषयवैलक्षण्यादेव जायत इति वाच्यं। वैलक्षण्यज्ञानेपि कस्यचिदिच्छानुत्पत्तिदर्शनात्। अतः कर्महेतुकत्वमावश्यकमित्यत आह अतसिद्धमिति। यथा स्वर्गार्थमनुष्ठितकर्मबलादेव स्वर्गादिशरीरसिद्धिः तथा भोगादृष्टोद्बोधित पूर्ववासनासचिवाद्वैलक्षण्यज्ञानादिच्छोत्पत्तेर्वेदनार्थविहितयज्ञादिभिरेव विविदिषापि सिध्यतीति भावः। विविदिषन्तीत्यस्यसन्निधौ ''मनसैवानुद्रष्टव्य'' मिति विशदवेदनं विधाय ''एतमेवविदित्वा मुनिर्भवति (बृह.६-२२) इति स्तुतत्वाद्वेदनस्यैव प्राकरणिकतया विध्यन्तराकांक्षितत्वात्तत्रैव यज्ञादिकं विधातुं युक्तं, अपेक्षितविधेः। न तु तदुभयरहितः। विविदिषायां अनपेक्षितविधिप्रसङ्गादित्याह यज्ञादिकर्मेति। उक्तार्थं भाष्येण सङ्गमयति तदेतदिति।

वत्सुकुलजलधिनृसिंहगुरुसुतेनसिंहदेवेन कृतायां शतदूषणीटीकायां षष्ठो वादस्समाप्तः।

॥अथ शब्दजन्यप्रत्यक्षभंगवादः सप्तमः ॥७॥

विभूत्यंशे यस्य स्फुरति जगतामक्षमखिलं।
श्रुतिर्जात्यन्धानामुपदिशति यं रूपमिव नः।
निजाध्यक्षप्रेक्षाचुलकितसमस्तः स्वयमसौ।
हृषीकेशो दिव्यं दिशतु मम चक्षुः स्वविषयम्॥

यदूचिरे यद्यपि तत्त्वमस्यादिवाक्यश्रवणसमयसम्भवं परोक्षं ज्ञानमविद्यां न निवर्तयति, तथाऽपि श्रवणादिभिर्निरस्तसमस्तभेदवासनामूलासम्भावनाविपरीतसम्भावनाख्यचित्तविक्षेपलक्षणप्रतिबन्धस्य तदेव वाक्यमविद्यानिवर्तकमपरोक्षं ज्ञानं जनयति। न च शब्दस्य कथमपरोक्षधीहेतुत्वमिति वाच्यम्, इन्द्रियस्यापि कथमिति प्रसङ्गात्। दर्शनादिति चेत्, तुल्यम्। क्व तद्दर्शनमिति चेत्, ''संवित् स्वप्रकाशा'', ''दशमस्त्वमसि'' इत्यादिषु। न ह्यत्र संविद्विषयः स्वविषयो वा प्रकाशो नास्ति, सन्नपि वा परोक्षः; स्वधीविरोधात्। प्रत्यक्षे च विषये परोक्षप्रकाशव्याघातात्। अन्यथा शुक्तितत्त्वप्रकाशेऽपि रजतावभासाविरोधप्रसङ्गात्। न चायं प्रकाश इन्द्रियजन्यः, वाक्यस्य तदानीमबोधकत्व प्रसंङ्गात्;वाक्यमन्तरेणापि तत्प्रसङ्गाच्च। न च रत्नतत्त्वाधिगमवत् शब्दसंभिन्नेन्द्रियजन्यः; अन्यतरेण तदुत्पत्त्युपपत्तौ कल्पनागौरवात्। अन्वयव्यतिरेकाविशेषे सति, इन्द्रियसहकृतशब्दजन्य इति विपरिवर्तप्रसङ्गाच्च।

पूर्ववादे शब्दादपरोक्षज्ञानं नेति वक्ष्यत इत्युक्तं प्रपञ्चयन् वादार्थं संङ्गृह्णाति। विभूत्यंश इति। वादार्थं सूचयति श्रुतिर्जात्यंधानामिति। जात्यंधानांरूपादिज्ञानमिव श्रुतिजन्यज्ञानमपि परोक्षमेवेतिभावः। स्वविषयं चक्षुः स्वगोचरापरोक्षज्ञानं। यद्वा अप्राकृतं चक्षुः।

चित्तविक्षेपः चित्तव्यापारः। ननु परोक्ष ज्ञान जनकश्शब्दो परोक्षजनको न भवतीत्यत्राह नचेति। अन्वयव्यतिरेकाभ्यां कारणत्वं तौ शब्देपि समाविति भावः। किन्तु दशमस्त्वमसीत्यादौ ज्ञानमात्राजनकत्वात्तदभावः शङ्क्यते। यद्वा ज्ञाने सत्यपि परोक्षत्वान्नाद्य इत्याह नह्यत्रेति। द्वितीयं प्रतिवक्ति सन्नपिचेति। उभयत्र स्वानुभवं प्रमाणयति स्वधीति। किंच परोक्षविषयकप्रमाणत्वेनैव परोक्षज्ञानजनकत्वादपरोक्षविषयक प्रमाणस्य परोक्षजनकत्वायोगात् पारिशेषाद(प्रवर्तक) प्यपरोक्षजनकत्व मित्याह प्रत्यक्षेचेति। प्रत्यक्षविषयप्रमाणस्यापि परोक्षज्ञानजनकत्वे चक्षुषा शुक्तित्वप्रकाशस्यापि परोक्षत्वाविरोधादपरोक्षप्रकाशस्यैव भ्रमनिवर्तकत्वाद्रजतभ्रमस्तस्मिन् सत्यपि स्यादित्याह अन्यथेति। केचित्तु प्रत्यक्षविषय शब्दस्य परोक्षज्ञानजनकत्वे रजतप्रत्यक्ष भ्रमवतः (++++++) वेशशाद्रजत भ्रमावृत्तिर्नस्यादित्याह अन्यथेतीत्याहुः। ननु निवर्तकज्ञानं परोक्षमस्तु तदिन्दियकरणत्वं चास्त्विवति शङ्कते नचायमिति। नन्वस्तु वाक्यादपि परोक्षज्ञानं तथापीन्द्रियजन्यमेव निवर्तकमस्त्वित्यत्राह वाक्यमन्तरेणापीति। दशमस्त्वमसीति वाक्याभावे तादृशभ्रमनिवृत्त्यभावान्निवर्तकज्ञानं वाक्यादेवेत्यर्थः। अन्यतरेणेति। वाक्येन्द्रिययोर्निरपेक्षकरणत्वेन क्लृप्तयोरन्यतरसहकारित्वे मानाभावाद्रत्नतत्वाधिगमेपि शाब्दज्ञानस्य तज्जन्यसंस्कारस्य वा

किंनामेन्द्रियं तत्सहकारि स्यादिति चेत्, मनसः सर्वज्ञानकरणसाधारणसहकारित्वं किं न जानासि? । तथापि विनिगमनायां को हेतुरिति चेत्-न; अन्धस्यान्धतमसस्थितस्य वा वाक्यश्रवणात् दशमोऽस्मीति प्रत्यक्षप्रत्ययात् । न चात्रापरोक्षत्वमारोपितम्; बाधकाभावात् । न च सम्प्लवे भेदाग्रहात् तद्व्यवहारः; कदाचिदपि तत्र धीभेदानुपलम्भात् । अतो वाक्यजातीयस्य क्वचित् प्रत्यक्षज्ञानजनकत्वसिद्धौ क्व विरोधावकाशः?

अन्यदपि वाक्यं किं न जनयतीति चेत् न; गोजातीयत्वे शाक्करः किं न दुग्धे दुग्धमितिवत् उपहास्यत्वात् । अस्ति तत्रावान्तरोपाधिरिति चेत्, अस्त्वत्रापि कश्चित् । न च तदज्ञानं तत्कार्योत्पत्तिप्रतिबन्धि; तज्ज्ञानस्य तत्कारणत्वानभ्युपगमात् । अन्यथा अतिप्रसङ्गात् । यथाऽऽहुः- ''न कारणपरिज्ञानं तत्कार्योत्पत्तिकारणम् । न हि बीजाद्यविज्ञानमङ्कुरोत्पत्तिवारणम्'' इति । न चास्यात्यन्ताज्ञातता, स्वतोऽपरोक्षार्थगोचरत्वस्योपाधेरवधारणात् ।

न च ''तत्त्वमस्या'' दिवाक्यस्य प्रत्यक्षज्ञानजनकत्वे किं प्रमाणमिति वाच्यम्, निवर्त्यमिथ्यात्वान्यथानुपपत्त्यैव तत्सिद्धेः । स्वतःशुद्धेऽपि हि विश्वसाक्षिणि ब्रह्मणि स्फटिकमणिघटितदाडिमीकुसुमरागोपरागवत् अवभासमात्रसिद्धिरियमशुद्धिः । सा च ज्ञानमात्रनिवर्त्येति, ''तरति शोकमात्मवित्'' (मुंड-३-१-१) इत्यादिश्रुतिशतसिद्धम् । मिथ्याभूतस्य च धीमात्रनिवर्त्यत्वं युक्तम् ।

वैजात्यस्याक्लप्तत्वान्नेन्द्रियस्य वाक्यसहकारित्वं सम्भवति । कारणत्वं तु सम्भवति । प्रत्यक्षे चाक्षुषस्पार्शनादिवैजात्यस्य क्लृप्तत्वादिति शङ्कते किन्नामेति । विपरिवर्तापादनेपि किं शब्दकरणकत्वनिर्धारकमिति पृच्छति तथापीति । चक्षुरादेर्व्यापाराभावान्मनसश्च क्वापिकरणत्वानंगीकाराच्छब्दस्यैव करणत्वं वाच्यमित्याह अन्धस्येति । ननु प्रत्यक्षबाधाभावेपि कार्यभेदज्ञापकान्मनोघटितप्रत्यक्षसामग्रीशाब्दसामग्रीभेदात् यौक्तिकभेदोस्त्विति शङ्कते न चेति । मनोमात्रघटिता न धीभेदसामग्री । किन्त्विद्रियादेस्सहकारिणीति न सामग्रीभेदरूपबाधकमित्याह कदाचिदपीति । अन्यथा अयं घट इत्यादावपि धीभेद प्रसङ्गादिति भावः ।

अस्ति स्त्रीत्वं दुग्धजननोपाधिरिति शङ्कते अस्तीति । अन्यथेति । चक्षुरादीनां ज्ञातानां रूपादिज्ञानजनकत्वं न स्यादिति कारणज्ञानमेव न कारणं किं पुनस्तद्विशेषज्ञानमिति भावः । उक्तार्थे सम्मतिं दर्शयति यथाहुरिति । नन्वत्यंताज्ञातत्वे यस्तु सत्ता नास्तीति कथं ज्ञातस्य कारणत्वमित्यत आह न चास्येति । स्वतो परोक्षार्थगोचरत्वेनैव प्रमाणस्यापरोक्षज्ञानजनकत्वा(त्व)निश्चयादित्यर्थः । मिथ्याभूतस्य वस्तुनो मिथ्यात्वं निवर्तकज्ञानापरोक्ष्यनियतमिति ।

तत्वमस्यादिवाक्यजन्यज्ञाननिवर्त्यप्रपञ्चमिथ्यात्वं तद्ज्ञानापरोक्ष्यं विनानुपपन्नमिति तर्केणाप्रयोजकत्वं निराकरोति निवर्त्येति । ननु मिथ्यात्वं प्रपञ्चस्यासिद्धं दूरे ज्ञानमत्र निवर्त्यत्वं चेत्यत्राह स्वत इति । स्फटिकमणौ सन्निहितबीजपूररागप्रतिभासवद्ब्रह्मणि प्रपञ्चावभासः प्रपञ्चस्यमिथ्यात्वेप्युपपन्नं मिथ्यात्वं च ज्ञाननिवर्त्यत्वं । तत्वं च श्रुतिसिद्धमित्यर्थः । ज्ञानमात्रनिवर्त्यत्वे युक्तिमप्याह मिथ्याभूतस्येति ।

न च परोक्षं ज्ञानं निर्वतकं दृश्यते। अतः परिशेषादपरोक्षमेव ज्ञानं निवर्तकमिति स्थिते-न तावत् करण मिन्द्रियम्, बाह्येन्द्रियाणां प्रत्यक्पराङ्मुखत्वात्; मनसोऽपि सोऽहमस्मीत्यस्मिन्नर्थे स्वातन्त्र्येणाप्रवृत्तेः। शब्दसंस्कारादिपुरस्कारे तु तस्यैव करणत्वोपपत्तेः। मनसश्च नित्यशुद्धबुद्धमुक्तस्वभावब्रह्मगोचरसाक्षात्कारकरणत्वस्यादृष्टचरत्वेन शब्दस्य तत्सहकारित्वकल्पना योगात्। तथात्वे च श्रवणादिनैष्फल्यात्। "न चक्षुषा गृह्यते नापि वाचा" (मुंड-३-१-१८), "मनसा तु विशुद्धेन" (मुंड-३-१-१८), "मनसैवेदमाप्तव्यम्" इत्यादिश्रुतीनां चित्तैकाग्र्यस्यान्तरङ्गत्वबोधने तात्पर्यात्। अत एव, "अप्राप्य मनसा सह" (तै-उ-आनन्द) इत्यादेरनधिकृतमनोविषयत्व व्यवस्थापनानुपपत्तिः। न च मानसं प्रत्यक्षमस्ति; आत्मनः स्वप्रकाशत्वात्; सुखादेस्तु साक्षिवेद्यत्वात्, भावनासहकृतमनोजन्यसाक्षात्कारस्यापि पथिकपरिभावितप्रियतमा साक्षात्कारवत् भ्रान्तित्वात्; भ्रान्तिरूपसाक्षात्कारस्यापि साक्षिरूपत्वेनैव मानसत्वाभावात्।

अनुमानादेस्त्वापरोक्ष्यविद्वेषशीलत्वात्। अतो वाक्यपरिशेषे तत्रापि भेदगर्भाणां वाक्यानां भेदभ्रमनिवर्तकत्वायोगात् अद्वैतवाक्यान्येवाविद्यानिवर्तकापरोक्षज्ञानं जनयन्तीति।

किञ्च प्रत्यक्षस्य भेदभ्रमस्य परोक्षात्, ऐन्द्रियकप्रत्यक्षाद्वा न परिभवो युक्तः; न्यूनत्वात्; समत्वाच्च।

मिथ्याभूतस्य ज्ञानमात्र निवर्त्यत्वं युक्त चेत्यन्वयः। ननु परोक्षत्वेपि निवर्तकत्वमस्त्वित्यत्राह न च परोक्षमिति। शुक्तिरजतादौ तथा दर्शनादिति भावः।

मनसोपीति। सहकारि विशेषमनासाद्य मनसा सोऽहिमिति ज्ञानासम्भवादित्यर्थः। तस्यैवेति। यदसाधारणमासाद्य मनो बहिर्गोचरप्रमां जनयति तस्य करणत्वनियमादिति भावः। युक्त्यन्तरमाह मनसश्चेति। यद्यपि शब्दस्यापि तादृशसाक्षात्कारकारणत्वमसिद्धं। तथापि तादृशज्ञानकारणत्वं सिद्धं। मनसस्तु तदुभयं चासिद्धं कल्पनीयमिति लाघवाच्छब्दस्यैव साक्षात्कारजनकत्वकल्पनं युक्तमिति भावः। तथात्वे चेति। मनसस्तादृश साक्षात्कारकरणत्वस्य दृष्टचरत्वे श्रवणादि सापेक्षापरोक्षज्ञानेप्यन्यत्र क्लप्त मनस एव करणत्वेन शब्दस्य करणत्वाभावात्परोक्षज्ञानेतु श्रवणादि नैरपेक्ष्यात्तद्वैयर्थ्यमिति भावः। ननु मनोग्राह्यत्वं श्रुतिसिद्धं न कल्प्यमित्यत्राह न चक्षुषेति। अतएवेति। व्यवस्थानुपपत्तेरित्यनन्तरं मनोग्राह्यत्वं न सम्भवतीति शेषः। मनसः स्वतोऽपरोक्षजनकत्वमेव नास्ति दूरे ब्रह्मगोचरापरोक्षज्ञानजनकत्वमित्याह न चेति। अत्र किं मनोमात्रस्य जनकत्वं उत भावनासहकृतस्य। आद्येपि ब्रह्मगोचरसाक्षात्कारजनकत्वं यद्वा सुखादिगोचरसाक्षात्कारजनकत्वमिति विकल्पमभिप्रेत्याद्ये आह आत्मन इति। न द्वितीय इत्याह सुखादेस्त्विति। प्रथमद्वितीयमाह भावनेति। भावना - संस्कारःभावनासहकृतमनोजन्यत्वेन पराभिमतस्येत्यर्थः। पथिकेति। प्रोषितचिन्तायाः प्रियतमायाः साक्षात्कारवदित्यर्थः। ननु भ्रमरूपत्वेपि साक्षात्कारजनकत्वं सिद्धमित्यत्राह भ्रान्तिरूपेति।

पूर्वपरोक्षज्ञानस्य निवर्तकत्वादर्शनात् अपरोक्षपरिशेषः प्रमाणान्तराणां अप्रवृत्तेः वाक्यपरिशेषश्चोक्तः। इदानीं परोक्षस्यापरोक्षस्य वा निवर्तकत्वासम्भवात् अपरोक्षत्वं शब्दजन्यत्वं च परिशेषयति किं चेति। न्यूनत्वात्परोक्षं न क्षमं समत्वादक्षजं च न क्षममित्यर्थः।

श्रुतिरपि शब्दस्यापरोक्ष ज्ञानजनकत्वं तस्यैव निवर्तकत्वं चाह तत् साक्षात्कारस्य चेति।

शास्त्रमूलं तु प्रत्यक्षं साक्षात्कारत्वाविशेषेऽपि निर्दोषहेतुकत्वात् बाधक्षमम्। तच्चोक्तं ''न्यूनत्वाच्च समत्वाच्च परोक्षं नाक्षजं क्षमं। निर्दोषहेतुजन्यत्वात् प्रत्यक्षं शास्त्रजं क्षमम्'' इति। प्रत्यक्षभेदभ्रमनिवर्तन इति शेषः।

साक्षात्कारस्य चाविद्यानिवर्तकत्वं तस्य च शब्दकरणत्वं शब्दादेव सिध्यति, ''निचाय्य तं मृत्युमुखात् प्रमुच्यते''(कठ.१-३-१५), ''क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे'' (मुंड-२-२-८) इत्यादिभिरपरोक्षज्ञानस्य अविद्यानिवर्तकत्वसिद्धेः। 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमारः' (छां-५-२४-३) ''वेदान्तविज्ञानसुनिश्चितार्थाः'', (तै.महाना १२) 'स्वाध्यायश्चक्षुरुतैकमस्य योगो द्वितीयमभिवीक्षणाय' (?) 'अध्ययनमनननयनोऽस्य द्रष्टा', (?) 'न मांसचक्षुरभिवीक्षते तम्', (?) 'पितृदेवमनुष्याणां वेदश्चक्षुः सनातनम्' (?) इत्यादेस्तस्य शब्दकारणकत्वसिद्धिः।

प्रयोगश्च-विगीतं ज्ञानं साक्षात्कारि, तत्त्वमस्यादिवाक्यजन्यज्ञानत्वात्, तत्स्वरूपगोचरश्रावणज्ञानवत्। न च तत् तदजन्यम्; प्रत्यक्षे विषयस्य कारणत्वस्वीकारात्।तत्रैव प्रतिज्ञायाम्, अपरोक्षज्ञानविषयत्वात् सुखादिज्ञानवदिति वा प्रयोगः। तत्त्वमस्यादिवाक्यं वा स्वप्रतिपाद्यगोचरसाक्षात्कारजनकम्, स्वप्रकाशार्थोपदेशरूपत्वात्, स्वतोऽपरोक्षार्थविषयत्वाद्वा, ''संवित् स्वप्रकाशा'', ''दशमस्त्वमसि'' इत्यादिवाक्यवत्। अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, अपरोक्षज्ञाननिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववदिति। न चात्र परोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, परोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात्, ज्ञानत्ववदिति

निचाय्य-साक्षात्कृत्य, चायृ-दर्शने इति धातुः। मृत्युः-संसारः तस्मै दर्शयति उपदेशेन-साक्षात्कारं जनयतीत्यर्थः। वेदान्तेति विज्ञानं-विशेषज्ञानसाधनं। तेन वेदान्तेन सूपसर्गवशात् साक्षात्पदार्थः इत्यर्थः। स्वाध्यायः चक्षुः। साक्षात्कार साधनमित्यर्थः। न मांसचक्षुरिति मासंचक्षुर्निषिधात् श्रुतिचक्षुरनुमतमिति भावः।

प्रयोगश्चेति। नन्वयमसिद्धो हेतुः। वाक्यार्थज्ञाने वाक्यस्यापि तत्वेनाजनकत्वात्तद्ज्ञानस्यैव जनकत्वादिति चेन्न। प्रयोज्यत्वस्य विवक्षितत्वात्। नच तत्प्रयोज्यनुमित्यादौ व्यभिचारः। तदन्यत्वस्यापि विवक्षणात्। तत्रैव प्रतिज्ञायामिति। विगीतं तत्वमस्यादि वाक्यजन्यज्ञानं पक्ष इत्यर्थः। अपरोक्ष विषयत्वादिति। अपरोक्षविषयकज्ञानत्वादित्यर्थः तेन नेच्छादौ व्यभिचारः। तत्वमस्यादि वाक्यमिति। साक्षात्कारजनकमित्युक्तेः सगोचर श्रावणज्ञानजनकत्वात् सिद्धसाधनं अत उक्तं स्व प्रतिपाद्येति वाक्यस्यापि लक्षणया स्वप्रतिपाद्यत्वं यदि तदा तदन्यत्वेन वा विशेषणं देयं। स्वर्गकामादि वाक्ये व्यभिचारवारणाय हेतौ स्वप्रकाशार्थेति विशेषणं देयं। यदाकदाचिदपरोक्षार्थगोचर गामानयेति वाक्ये व्यभिचारवारणाय स्वत इति। ननु यज्ञदत्तं प्रति मम सुखमस्तीति देवदत्तोदीरित वाक्ये व्यभिचारः। श्रोतुरपरोक्षार्थविषयत्वादित्यर्थस्य विवक्षितत्वात्। नचासिद्धिः। तत्वं पदार्थयोरपि स्व प्रकाशतया तं प्रत्यपरोक्षत्वात्। अपरोक्षत्वमित्यावृत्त्या तत्वमस्यादि वाक्यजन्य ज्ञानवृत्तीत्यर्थः। यद्यप्यत्यंतभावाप्रतियोगित्वमात्रस्यास्य ध्यातद्वारकविशेषणं व्यर्थं। तथापि तादृशप्रतियोगित्वाभावरूप

सत्प्रतिपक्षसाधनता; सिद्धसाधनात्। तेषामेव हि वाक्यानामसम्भावनाविपरीतसम्भावनाप्रतिबद्धचेतसि पुरुषे परोक्षज्ञानजनकत्वमिष्यते। पूर्वोक्तश्रुतिविरुद्धतया कालात्ययापदेशाच्च।

न च वाच्यम्-अग्निहोत्रादिवाक्यजन्यज्ञानेष्वप्येवं प्रयोक्तुं शक्यमित्याभाससमानयोगक्षेमतेति; तत्र विपक्षे बाधविरहात्। न हि तत्र प्रामाण्यस्यानुपपत्तिः; अनुमानादिवदुपपत्तेः। नाप्यनुष्ठानस्य; परोक्षनिश्चयादपि तदुपपत्तेः। नापि फलस्य; तत एव तत्सिद्धेः। नापि च फलकामनायाः; फलसम्बन्धनिश्चयादेव तस्या अप्युपपत्तेः। अत एव पुरुषप्रवृत्तिरपि संगच्छते। इह तु प्रागुक्तार्थानुपपत्तिरेव विपक्षे बाधिका स्यात्। अतो नाऽऽभासतुल्यतेति। एवं पूर्वेष्वपि प्रयोगेष्वाभासतुल्यतोद्धारो द्रष्टव्यः। अतो विपक्षे बाधकस्यैव प्रतिबन्धरहस्यत्वात् उक्तार्थे महाविद्याजातयश्च यथावगाहं प्रयोक्तव्याः। स्वपरपक्षसाधारण्यं हि महाविद्यानां स्वभावः। तत्रानुकूलतर्कसदसद्भावाभ्यामेकत्रार्थासिद्धिः, इतरत्रार्थासिद्धिरिति निर्णयः।

ननु तर्कपराहता इमे हेतवः; शब्दस्य प्रत्यक्षान्तर्भावप्रसङ्गादिति चेत् न; अप्रसङ्गात्। योगिमनसो बाह्यविषयप्रत्यक्षज्ञानजनकत्वेऽपि बाह्यप्रत्यक्षबहिर्भाववदुपपत्तेः। अथ चक्षुरादिपञ्चकान्यतमत्वं योगिमनोन्यत्वे सति बाह्यविषयापरोक्षप्रमितिकारणत्वं वा बाह्यप्रत्यक्षान्तर्भावे प्रयोजकमिष्येत, इहापि तर्हि स्वतोऽपरोक्षार्थब्रह्मात्मविषयशब्दान्यत्वे सति अपरोक्षप्रमितिकारणत्वं प्रत्यक्षान्तर्भावप्रयोजकमिति

विशिष्टाभावेन विशेषणावैयर्थ्यमिति ध्येयं। सप्रतिसाधनता सत्प्रतिपक्षत्वं। किंचिद्ज्ञानवृत्तित्व विवक्षायां सिद्धसाधनमित्याह सिद्धसाधनादिति।। सिद्धसाधनतामुपपादयति तेषामेवेति। अत एव प्रति बन्धनिरासाय श्रवणाद्यपेक्षेति भावः। यावद्ज्ञानविवक्षायां दोषमाह पूर्वोक्तेति । निचाय्य तं इत्यादिनेत्यर्थः।

चरमानुमानस्य आभाससाम्यमाह न चेति। अपरोक्षत्वं अग्निहोत्रादि वाक्यजन्यज्ञानवृत्तीत्यपि प्रयोक्तुं शक्यमित्यर्थः। अपरोक्षत्वाभावे प्रामाण्यं न स्यादित्यत्राह नहीति। चार्वाकव्यतिरिक्तानां तन्नियमाभावादिति भावः। अनुष्ठानानुपत्तिरपि नेत्याह नापीति। अनुष्ठानमत्रक्रिया परोक्षादपि जन्यत इत्यर्थः। तत एव। अनुष्ठितादेव। फलकामनाया इति। अनेन इदं भूयादिति फलकामनाया इत्यर्थः। फलसंबन्धः -फलसाधनत्वं । अत एवेति। प्रवृत्तिः क्रियाजनककृतीत्यपौनरुक्तयमित्याह इहत्विति। स्वोक्तानु माने निवर्त्यमिथ्यात्वान्यथानुपपत्तिरित्यर्थः। एवमिति। अग्निहोत्रादिवाक्यजन्यज्ञानमपरोक्षं तद्वाक्यजन्यत्वात् तद्वाक्यजन्य श्रावणवत्। तथा स्वप्रतिपाद्यापरोक्षजनकं अग्निहोत्रावाक्यं दशमस्त्वमसीति वाक्यन्यतरत्वात्, दशमादि वाक्यवदिति प्रयोगो द्रष्टव्यः। महाविद्याजातय इति।
(१) ''तत्वमस्यादिवाक्यजन्यज्ञानं साक्षात्वातिरिक्तस्ववृत्तिधर्मातिरिक्तधर्माधिकरणं मेयत्वात् घटवत्''।
(२) तत्वमस्यादिवाक्यं साक्षात्कारजनकत्वातिरिक्त स्ववृत्ति धर्मातिरिक्त धर्माधिकरणं मेयत्वात् घटवत्।
(३) साक्षात्वं तत्वमस्यादिवाक्यजन्यज्ञानवृत्तित्वातिरिक्तस्वधर्मातिरिक्तधर्मवत् मेयत्वात् घटवदिति महाविद्याप्रयोगो द्रष्टव्यः। ननु महाविद्यानामेव विशिष्यतर्कापेक्षेति कुतः अनुमानमात्रस्य तर्कापेक्षितत्वादित्यत्राह स्वपरपक्षेति। स्वेनैव प्रति पक्षसंभवाद्विशिष्योक्तिरिति भावः। यत्रानुकूलतर्कवत्त्वं न तत्साध्यसाधने सत्प्रतिपक्षत्वमित्याह तत्रेति।

शब्दस्य पृथक्प्रमाणत्वेन परिगणनविरोधमाशंकते नन्विति। योगिमनोन्यत्वे सतीति। ननूतानप्रत्यासत्या भाग्यगोचरापरोक्षजनकास्मदादिमनसोंतर्भाव प्रसंग इति चेन्मनोन्यत्वस्यैव विवक्षितत्वात्। इहापीति। शब्दन्यत्वेसतीत्येव विवक्षितं। इतरत्स्वरूपकथनार्थमितिद्रष्टव्यं। पूवत्रेति।

समः समाधिः। किञ्च प्रत्यक्षान्तर्भाव इति इन्द्रियान्तर्भावो वा, साक्षात्कारजनकवाक्यान्तर्भावो वा विवक्षितः स्यात्। पूर्वत्र मनसोऽपि बाह्यान्तर्भाववत् उपलम्भविरोधात् अशक्यः। उत्तरत्र त्विष्टप्रसङ्गता। ऐकराश्ये सिद्धे सति अवान्तरभेदाश्रयणाविरोधात्। तदेव तु कथमिति चेत्, न; दशमस्त्वमसीत्यादौ तद्दर्शनस्य समर्थितत्वात्। वाक्यस्यैवापरोक्षधीजनकत्वे मननिदिध्यासनविध्यानार्थक्यम्, श्रुतवेदान्तानां संसारानुवृत्तिदर्शनविरोधश्चेति चेत् न; प्रागुक्तप्रतिबन्धनिरासनद्वारेण तयोः श्रवणं प्रति फलोदयकार्यङ्गतया विधानोपपत्तेः। संसारित्वोपलब्धेश्च प्रतिबन्धकवत्पुरुषविषयत्वात्। अतो बाधकापेतसानुग्राहकश्रुत्यादिसिद्धं तत्त्वमस्यादेः साक्षात्कारजनकत्वमिति।

अत्र ब्रूमः-यत्तावदुक्तं-केषुचिद्वाक्येष्वपरोक्षधीहेतुत्वं दृश्यत इति, तत् नरविषाणाङ्कुरप्रसाधने खरविषाणाङ्कुरनिदर्शनमिति मन्यामहे। तथा हि-संवित् स्वप्रकाशेत्यत्र तावत् सामान्यतः स्वपरसमवेतत्रैकालिकसर्वसंवित्स्वप्रकाशत्वं वाक्यार्थः। तादात्विकी तु तज्जन्या संविदेका तदानीं स्वप्रकाशा; तत्र न सर्वसंविदां स्वप्रकाशत्वमिदानीमपरोक्षम्; यतो वाक्यस्य तदापरोक्ष्यहेतुता स्यात्। न च सर्वसंविदैक्यम्; तस्य दूषयिष्यमाणत्वात्। तदैक्येऽपि तत्तदुपहिताकारेण परोक्षापरोक्षविभागस्य दुरपह्नवत्वात्। वाक्यजन्यसंवित्स्वरूपापरोक्ष्ये तावत् वाक्यमेव कारणम्; विषयप्रकाशांशकारणव्यतिरेकेण

यथा मनसः प्रत्यक्षजनकत्वेपि बाह्यप्रत्यक्ष प्रमाणान्तर्भावो बाधितत्वाद्यथा नास्ति तथेन्द्रियान्तर्भावोऽपि तथा नास्तीत्यर्थः। ननु कथमिष्टप्रसंगः चक्षुरादि विशेषान्तर्भावाभावे सा मानांतर्भावायोगादित्यत्राह ऐकराश्य इति। चक्षुराद्यवान्तर भेदाश्रयण वच्छाब्दरूपावांन्तरभेदाश्रयणसंभवान्नयावद्विशेषान्तर्भावा भाव इति भावः। तदेतत्विति। ऐकराश्यमित्यर्थः। तद्दर्शनस्य-साक्षात्कारजनकत्वदर्शनस्य। प्रागुक्तप्रतिबन्धेति। प्रागुक्तभेदवासना कृतप्रतिबन्धनिवर्तकत्वेनारादुपकारकत्वादन्यथा जातमपि, साक्षात्कारज्ञानं न भ्रमं निवर्तयतीत्यर्थः। यद्वा वाक्यं प्रतिबन्धान्नापरोक्षधीजनकमिति श्रवणादेव प्रतिबन्धनिवर्तकत्वं फलोपकारकत्वं साक्षात्काररूपफलजनने सहकारित्वमित्यर्थः।

तदात्विकेत्विति। संवित्स्वप्रकाशेति वाक्यजन्यसर्वसंवित्स्व प्रकाशविषयिण्यास्संविदस्तदानीं वर्तमानत्वेपि तासां संविदामवर्तमानत्वात् सर्वसंवित्स्वप्रकाशत्वं ना परोक्षमिति तद्विषयिणी संविन्न प्रत्यक्षेत्यर्थः। तत्र हेतुमाह यत इति। अपरोक्षार्थविषयत्वप्रयुक्तत्वात् ज्ञानापरोक्षस्येत्यर्थः। नत्वेतत्संवित्स्वप्रकाशत्वं एव। सर्वसंवित्स्वप्रकाशत्वं एतच्चापरोक्षमेवेति तद्विषयत्वेना परोक्ष्यं स्यादित्याशंक्य निराकरोति नचेति। वस्तुतस्संविदस्स्वप्रकाशत्वं न स्वतो परोक्षं तेन ज्ञानेन अप्रकाशादित्यपि ध्येयं। सर्वसंविदामैक्येपि पारोक्ष्य व्यवहारानुसारेण भेदस्यावश्यकत्वे तद्रीत्या स्वप्रकाशत्वमपि नानेति नैकापरोक्ष्यमात्रेण सर्वापरोक्ष्यमित्याह तदैक्येपीति। ननु संवित्स्वप्रकाशेति स्ववाक्यजन्य ज्ञानस्य स्वप्रकाशत्वेनापरोक्षत्वात्वात् तज्जनकत्वेन अपरोक्षत्वा हेतुत्वं सिद्धमेव। नच प्रत्यक्षांशे जनकत्वमेव साध्यं। अन्यथा सिद्धसाधनात्। वाक्यं च विषयांश एव हेतुः। न स्वजन्य ज्ञानांशेपीति। अतः प्रत्यक्ष जनकत्वं नास्त्येवेति वाच्यं। तदंशेपि वाक्यातिरिक्तकारणादर्शनिन तस्यैव कारणत्वादिति शङ्कते वाक्येति। एवं तर्हि सिद्धसाधनं हेतुविशेषण वैयर्थ्यंचेत्याह तर्हीति। ननु विषयप्रकाशांशात् भिन्नप्रत्यक्षांशजनकत्वं साध्यं। अनुमानादिषु वह्निमानिति

स्वप्रकाशांशे कारणान्तरानुपलम्भादिति चेत्, तर्हि सिद्धमनुमानादेर्वाक्यान्तराणामप्य परोक्षधीजनकत्वम्; तत्तज्जन्यधियामपि स्वप्रकाशांशेऽपि तत्तत्कारणकत्वात्। सत्यम्; तथाऽपि संवित् स्वप्रकाशेत्यादिवाक्येषु विषयप्रकाशांशः स्वप्रकाशांशश्चैक एवेति विशेष इति चेन्न; सामान्यविशेषविषयतया तद्भेदस्य दर्शितत्वात्। एवम्, "दशमस्त्वमसि" इत्यादावपि यदि दशमत्वं स्वात्मनः पश्यत एवेदं वाक्यमुक्तम्; तदा घटं पश्यतः, "अयं घट" इतिवत् सिद्धानुवादपरमिदं वाक्यं स्यात्। तथाच प्रत्यक्षानुवादितामात्रेण प्रत्यक्षताभ्रमः, परोक्षविषयप्रयोग इवापरोक्षविषयप्रयोगेऽपि शब्दशक्तेस्तदवस्थत्वात्। यदा पुनः अविदितस्वात्मदशमत्वं प्रत्युच्येत, तदा तु दशमत्वांशे परोक्षत्वं स्पष्टम्। उद्देश्यांशस्य तु प्रागेव दृष्टत्वात् विशिष्टेऽपि प्रत्यक्षताभ्रमः, प्रतिपत्तिझाटित्यात्। न च तत्प्रत्यक्षत्वेनैव विशिष्टस्य प्रत्यक्षता, अयं पर्वतो बह्निमानित्यनुमानेऽपि तत्प्रसङ्गात्। गुरुत्वादेरतीन्द्रियत्वभङ्गप्रसङ्गाच्च। एवं क्षत्रियस्त्वमसीत्यादिष्वपि विकल्पोऽनुसन्धेयः।

यत्तु प्रत्यक्षे विषये परोक्षप्रकाशव्याघात इति तदप्यसत्। आपरोक्ष्यादेः ज्ञानधर्मत्वे ज्ञानव्यक्तिभेदेन विषयैक्येऽपि परोक्षत्वापरोक्षत्वयोर्विरोधाभावात्। विषयधर्मत्वेऽपीन्द्रियेण तथाविधं ज्ञानं जायताम्, लिङ्गशब्दादिनात्वन्यथाभूतमिति पुरुषभेद इव एकस्मिन् पुरुषेऽपि करणभेदेन च एकस्यैव वस्तुनः प्रत्यक्षता परोक्षता च प्रागेव दर्शिता विपरीतवासनभूयस्त्वेऽपि करणशक्त्या तत्त्वज्ञानोदयस्योपपादनात्। यदि प्रत्यक्षे विषये परोक्षप्रकाशः स्यात्, तदा शुक्तित्वप्रकाशेऽपि रजतावसायाविरोधप्रसङ्ग इति चेत्-किं

जानामीत्यत्र वह्निमानित्यंशो विषयांशः। संवित्स्वप्रकाशेत्यत्र तु तज्जन्यज्ञानस्यापि। संवित्वेन विषयांत्तर्भावात्तत्वप्रकाशेनैव स्वव्यवहारोपपत्तौ जानामीत्यंशांतर कल्पकाभावात्स्वप्रत्यक्षत्वरूपस्वात्म प्रकाशांशो विषयप्रकाशांश्चाभिन्न एवेत्यदोष इति शङ्कते सत्यमिति। संविदित्यतीतानागत स्वपरसाधारण संविन्मात्रगोचरविषयप्रकाशांशमात्रेण जानामिति तदातन व्यक्तिमात्र गोचर तदाश्रयपुरुष विशेष संबन्धित्वादिविशिष्टव्यवहारस्य जानामीत्यंशांतरेण। संभवात् ततश्च दृष्टान्तासिद्धिरिति परिहरति नेति। यद्यपि विषयांशेऽपि स्वस्यान्तर्भावो अत्स्येव तथापि संविदं तरांश इव एतदंशेपि परोक्ष एवेति भावः। यद्यपि विषयांशेऽपि स्वस्यान्तर्भावोऽस्त्येव। तथापि संविदन्तरांश इव एतदंशेऽपि परोक्ष एवेति भावः। दर्शितत्वादिति। दर्शितप्रायत्वादित्यर्थः। दशमस्त्वमसीत्यत्रापि असिद्धिं दर्शयति एवमिति। सिद्धानुवादेति। प्रत्यक्षतो ज्ञातार्थविषयकमित्यर्थः। प्रमैव कुतो स्यादित्यत्राह परोक्षेति। प्रागविदितस्वात्मदशमत्वस्य यदि तस्य चिद्विशिष्टगोचरज्ञानेऽपि प्रत्यक्षता धीः सभ्रान्तिरेवेत्याह उद्देशेति। प्राचीनोद्देशांश प्रत्यक्षभेदभ्रम इति भावः। अयं पर्वतो वह्निमानिति पर्वतस्य प्रत्यक्षत्वात् गुरुत्वाश्रयस्य प्रत्यक्षत्वादिति भावः।

आपरोक्ष्यादिति। परोक्षत्वापरोक्षत्वयोर्ज्ञानधर्मतया तद्भेदेन प्रत्यक्षविषयो परोक्षप्रकाशस्य न व्याघात इति भावः। विषयधर्मत्वेऽपीति। ज्ञाने परोक्ष्यापरोक्ष्येन विषयनिबन्धने। अपितु करणनिबन्धने। इन्द्रियलिंगादिजन्यज्ञानेषु वैलक्षण्यानुभवात्। तथाच विषयधर्मत्वेपि करणद्वयप्रवृत्तौ तन्निबन्धन परोक्षापरोक्षरूपज्ञानद्वयमविरुद्धमिति भावः। कालभेदेनेति। परोक्षे विविधैक्येपि तत्वमस्यादि वाक्यात् श्रवणात्प्राक्परोक्षज्ञानस्याश्रवणाद्यनन्तरं परोक्षज्ञानस्यङ्गीकारादितिभावः। विपरीतवासनासत्वे कथं परोक्षमपि ज्ञनमित्यत्राह। विपरीतेति। प्रत्यक्ष एव विपरीतवासनायाः प्रतिबन्धकत्वं नतु परोक्ष इति श्रवणात्प्राक्परोक्षज्ञानस्य त्वयाङ्गीकारादिति भावः। यदि प्रत्यक्ष इति। शुक्तिप्रकाशोऽपि परोक्ष एव स्यादिति भावः। किं शुक्ताविति। रजतत्वप्रकाशवत् शुक्तित्वप्रकाशोप्यपरोक्ष एवेति भावः। नन्वपरोक्षेपि

शुक्तौ चक्षुर्व्यापारान्वयव्यतिरेकानुविधायी रजतभ्रमः परोक्षः? येनैवं ब्रवीषि। अथ पुनर्भ्रान्तिरेव प्रसञ्जनीया, तदा शुक्तित्वादिलक्षणविशेषग्रहस्य भ्रमोत्पत्तिप्रतिपक्षतया, विशेषाग्रहाख्यसहकारिविरहेण सामग्रीवैकल्याद्वा शुक्तौ रजतभ्रमानुदयः। इह तु अप्रतिबद्धपरोक्षज्ञानसामग्रीसिद्धौ कथं तदनुत्पत्तिः? तथाविधा च तत्सामग्री प्रागेव दर्शिता। अङ्गीक्रियते च भवताऽपि श्रवणदशायाम्। अत एव एवंविधप्रसङ्गस्य निर्मूलता। किञ्च, स्वानिष्टं प्रसञ्जकं परानिष्टं प्रसञ्जनीयमिति तुतर्कतत्त्वव्यवस्था।

उक्तञ्च श्रीपुण्डरीकाक्षाचार्यैः :

"प्रसञ्जकं तु स्वानिष्टं परानिष्टं प्रसज्यते। विपर्यये पराभीष्टं स्वाभीष्टे पर्यवस्यति॥

प्रसञ्जके तु स्वाभीष्टे स्वानिष्टे पर्यवस्यति। स्वाभीष्टस्य त्वसिद्धिः स्यात् परेष्टस्य प्रसञ्जने॥" इति।

उभयमप्यत्र विपरीतम्। स्वतः प्रत्यक्षेऽपि ब्रह्मणि श्रवणदशायां वाक्यतः परोक्षज्ञानजननस्य भवदभिमतत्वात्। तेन मिथ्यैतदिति चेत्, पश्चात्तनप्रत्यक्षज्ञानजननमपि तथैवेति को विशेषः? शुक्तौ रजतत्वस्येवाविरोधापादकं च मिथ्यात्वमिह स्मर्तुमर्हसि।

सत्यं विरोधाच्छुक्तित्वं बाधकत्वेन कथ्यते। मिथ्याभूतं च रजतं बाध्यत्वेनाभिधीयते। तेन

शुक्तित्वेन परोक्षप्रकाशं नापाद यामः। किन्तु विरुद्धयोरविरोधाङ्गीकारे शुक्तित्वेन भासमाने रजतभ्रमस्स्यादिति शङ्कते अथेति। प्रतिबन्धकाभावस्य कारणत्वपक्ष आह विशेषाग्रहेति। इहत्विति विषयगतमपरोक्षत्वं न परोक्षज्ञान प्रतिबन्धकं। नापि तदभावः कारणमिति भावः। तथाविधेति। परोक्षविषयप्रयोग इति वा परोक्षविषयप्रयोगेपि तच्छक्तेस्तदवस्थत्वादिति शब्दरूपसामग्रीदर्शितेत्यर्थः। अत एवेति। परोक्षप्रत्यक्षस्यापरोक्ष विषयेप्यंगीकारेण व्याप्तिरूपांगवैकल्यात्तर्का भासतेत्यर्थः।

विपर्यय इति। यदि वह्निर्नस्यात्तर्हि धूमोपि न स्यादित्यत्र तर्के तस्माद्वह्निमानिति विपर्ययपर्यवसाने धूमस्य पराभीष्टस्य स्वाभीष्ट वह्निसाधकत्वमित्यर्थः। स्वानिष्टं प्रसंजकमित्यत्र हेतुमाह प्रसञ्जकेत्विति। प्रसञ्जिकविपर्यय पर्यवसानात्प्रसंजिकस्येष्टत्वे तदभावस्यानिष्टत्वादनिष्टपर्यवसानमित्यर्थः। परानिष्टमेव प्रसंजनीयमित्यत्र हेतुमाह स्वाभीष्टेति। आपाद्यविपर्ययस्य इष्टसाधनत्वादापाद्यस्य तु पराभीष्टत्वे तदभावासिद्धेर्न स्वेष्टसिद्धिरित्यर्थः।

उभयमिति। प्रसञ्जकं च स्वेष्टप्रसञ्जनीयं परेष्टमित्यर्थः। प्रसञ्जकस्य स्वेष्टत्वमुपपादयति स्वत इति। मिथ्यैतदिति। परोक्षज्ञानस्य मिथ्यात्वेन तदभावस्य परमार्थत्वेनष्टेत्वात् इष्यमाणाभाव प्रतियोगित्वेनानिष्टत्वं युक्तमिति भावः। पश्चात्तनेति। श्रवणाद्यनन्तरभाविप्रत्यक्षस्यापि मिथ्यात्वात्तदप्युक्तगत्यानिष्टमित्यनेन तर्केणानिष्टमेव सिध्यतीत्यर्थः। किंच परोक्षाभवस्तत्र न संभवति येन तस्यानिष्टत्वं स्यादित्याह शुक्ताविति। स्मर्तुमर्हसीत्यनन्तरं तन्न संभवतीति शेषः। असम्भवमेवाह सत्यमिति।

यद्वा शुक्तावित्येत्पूर्वस्य उपपादकतया योज्यं। किं चाभावस्य सत्यत्वादेवहि परोक्षज्ञानस्य प्रतियोगिनोनिष्टत्वं वाच्यं। अभावस्य सत्वं च शुक्तिरजतयोरिव मिथ्यात्वस्याविरोधापादकत्वात् वाच्यं तच्च न सम्भवति। सत्यमिथ्यात्वयोर्विरुद्धत्वादन्यथा बाध्यबाधकभावानुपपत्तेः। तस्मात्परोक्षतद भावयोरविरोधासिद्धेः। परोक्ष प्रतियोगिकाभावासम्भवात्। न प्रसञ्जकस्यानिष्टत्वमित्याह सत्यं विरोधादिति। सत्यं शुक्तित्व मित्यन्वयः। अविरोधापादकं न भवतीति। परोक्षतद भावयोरिति शेषः।

मिथ्यैतदिति वचनं तवाविरोधापादकं न भवति। प्रसञ्जनीयं च क्वचिदस्मदिष्टम्; आप्तोपदेशादिभिः शुक्तित्वप्रकाशेऽपि दुष्टेन्द्रियादिना कस्यचित् क्वचिद्रजतावभासानुवृत्तेः। अन्यथा भवतां वाधितानुवृत्तेर्दृष्टान्तस्याप्यभाव प्रसङ्गात्। तथा प्रत्यक्षसिद्धेऽपि शुक्तेस्तत्त्वे भ्रान्तविप्रलम्भक वाक्यादिभिरपि रजतधीरुदेत्येव। सा च परोक्षैव। शीघ्रं तु बाध्यमानतया केषांचित् तत्र तदनुत्पत्तिभ्रमः। किञ्च यदि प्रत्यक्षे विषये परोक्षप्रकाशो व्याहतः, तदा पर्वतो वह्निमानित्यादिषु विशेषतोदृष्टानुमानेषु तथाविधार्थगोचरवाक्येषु च परोक्षप्रकाशो न स्यात्। योग्यतामात्रं तु तत्र; न तु तदानीं प्रत्यक्षतेति चेन्न; यस्यकस्यचिदारण्यक-योगीश्वरादेस्तद्दर्शनात्। तथाऽपि नानुमातुस्तथेति चेत्; तर्ह्यत्रापि दशमत्वादेर्वाक्यश्रवणात् पूर्वमदर्शनान्न वाक्यतस्साक्षात्कारसम्भवः। यत्पुनः स्वस्यैव द्रष्टुं योग्यतया अनन्तरं दर्शनाद्वा तत्र तत्सम्भव इष्येत, तर्हि सिद्धमनुमानादावपि तदुभयसम्भवात् तथात्वम्। यदा च अयं घट इति मन्यमानं प्रत्येव कश्चित्, अयं घट इति ब्रूयात्, तदा तस्यापि प्रत्यक्षार्थविषयत्वाविशेषात् साक्षात्कारजनकत्वप्रसङ्गः। इष्यत एवेदमपीति चेन्न; स्वतोऽपरोक्षार्थविषयत्वादिति हेतुविशेषणं प्रयुञ्जानस्य तदनिष्टम्। इष्यतां वा; तथाऽपि ज्योतिष्टोमादिवाक्यार्थस्यापि योगिप्रभृतीनां प्रत्यक्षत्वस्याऽऽवयोरविगीतत्वात् तान् प्रति केनचिदविदितमाहात्म्येन तत्प्रयोगे ततः साक्षात्कारसम्भवः स्यात्। तथाच सर्वमपि वाक्यं कस्यचित् साक्षात्कारकारणमिति स्थितौ, केषांचिदेवेति व्यवस्थाभङ्गः। अस्त्वेवमपि; किं नश्छिन्नमिति चेत्, न; अनुमानादिष्वपि तत्प्रसङ्गस्योक्तत्वात्। तथाच तत्त्वमस्यादिवाक्यपरिशेषासिद्धिः। ततश्चापशूद्रनयविरोधादिप्रसङ्गः।

तर्कप्रसञ्जनीयस्य परेष्टत्वं दर्शयति। प्रसञ्जनीयं दर्शयति। प्रसञ्जनीयं चेति। परोक्षज्ञानस्या परोक्षभ्रमानिवर्तकत्वेपि शाब्दज्ञानसचिवेन्द्रियेण जातापरोक्षज्ञानादेव भ्रमनिवृत्तिस्यादित्यत्राह दुष्टेन्द्रियेति। दोषमाहात्म्याप्तोपदेशे सत्यपि क्वचिन्नतत्वापरोक्षमुत्पद्यते किन्तु भ्रम एवेत्यर्थः। अन्यथेति। दोषमात्राद्भ्रमाभाव इत्यर्थः ।एवं विरुद्धयोस्सन्निपाते शुक्तित्वज्ञाने सत्यपि रजत भ्रमस्यादित्यापादनार्थंमभिप्रेत्य तत्र दोष उक्तः। इदानींत्वपरोक्षेपि परोक्ष प्रवेशोस्तिचेच्छुक्तित्वेना परोक्षेऽपि रजतत्वेन परोक्षस्यादित्यापादनार्थमभिप्रेत्य दोषमाह तथेति। अयोग्यताज्ञानं प्रतिबन्धकं नेति भावः। विशेषत इति। प्रत्यक्षयोग्यार्थविषयकं विशेषतोदृष्टं। तदयोग्यार्थ विषयकं सामान्यतोदृष्टमभिप्रेतं। तथाविधेति। प्रत्यक्षार्थगोचरेष्वित्यर्थः। ननु तदानीमपरोक्षे परोक्षप्रकाशोव्याहतः। अग्न्यादिर्नतथा। ब्रह्म तु नित्या परोक्षत्वात्तथैवेति शङ्कते योग्यतेति। तत्र किं तदानीं प्रत्यक्षत्वमात्रं विवक्षितं उत तत्पुरुषस्येति विकल्पमभिप्रेत्याद्या आह यस्य कस्यचिदिति। आरण्यकानां योगिनामिवास्य हिरण्यगर्भादेश्च प्रत्यक्षत्वादित्यर्थः। द्वितीयं शङ्कते तथापीति। प्रतिवक्ति तर्हीति। तत्र परोक्षज्ञानस्य व्याघाताभाव इति भावः। ननु प्रत्यक्षयोग्यताहत्यनन्तरभावि प्रत्यक्षत्वमविवक्षितमिति शङ्कते यत्पुनरिति। ननु तदा प्रत्यक्षत्वमेव विवक्षितं। यदा दशमत्वप्रत्यक्षं तदाहत्यपरोक्षज्ञानसमर्थनमिति स एव दृष्टान्त इत्यत्राह यदाचेति। ननु स्वत इति न विशेषणं। अपितु स्वरूपकथनमात्रं इत्यत्राह इष्यतां वेति। अस्तु योगि प्रभृतीन्प्रति जनकत्वमित्यत्राह तथा चेति। अस्त्वनुमानादेरपि साक्षात्कारजनकत्वमित्यत्राह - तथा

किञ्च विश्वस्यापि ज्ञाततयाऽज्ञाततया वा साक्षिवेद्यत्वस्य भवदभिमतत्वात् सर्वैः प्रमाणैः साक्षात्कारसंभवः सुलभ एव। यदि च स्वतोऽपरोक्षार्थविषयमेव वाक्यं तज्जनकमिति व्यवस्थाप्येत, तदा दशमस्त्वमसीत्यादिदृष्टान्तासिद्धिः ; यद्यपि त्वमंशस्य स्वतोऽपरोक्षता, तथाऽपि संख्यादिविशिष्टाकारेण स्वतोऽपरोक्षत्वाभावात्। अन्यथा वाक्यश्रवणात्पूर्वमेव तद्वैशिष्ट्यप्रकाशप्रसङ्गात्। अतोऽनुमानस्येव वाक्यजातीयस्य क्वचिदपि साक्षात्कारहेतुत्वदर्शनस्यासिद्धेः, अनुग्राहकतर्काभावाच्च स्वाभिमतस्य कस्यचिद्वाक्यस्य तद्धेतुत्वकल्पनं विरुद्धमेव। अत एव स्वतोऽपरोक्षार्थगोचरत्वलक्षणोपाधिरपि निरस्तः।

यत्तु निवर्त्यमिथ्यात्वानुपपत्त्या पारम्पर्येणापरोक्ष्य-तज्जनकविशेषयोः परिशेष इति तदप्यसिद्ध्यन्यथासिद्धिभ्यामाक्रम्यते। सत्यमेव हि संसारमुपासनप्रीणितेश्वरसङ्कल्पविशेषनिवर्त्यं साधयिष्यामः। यत्तु ''तरति शोकमात्मवित्' (मुं-(३-२-३)इत्यादिभिर्ज्ञानमात्रनिवर्त्यत्वं सिद्धमिति, एतदपि वेदनज्ञानादिशब्दानां उपासनाख्यविशेषपर्यवसानस्य प्रागेव दर्शितत्वान्निरस्तम्। यदाहुः

वेदनं ध्यानविश्रान्तं ध्यानं श्रान्तं ध्रुवस्मृतौ।
सा च दृष्टित्वमभ्येति दृष्टिर्भक्तित्वमृच्छति॥ इति।

मिथ्याभूतस्य ज्ञानमात्रनिवर्त्यत्वं युक्तमित्येतच्च मिथ्याभूततया भवदभिमतस्य तिमिरादिदोषस्य प्रतिभटादेश्च भेषजशस्त्रादिनिवर्त्यत्वोदाहरणेन प्रागेव दत्तोतरम्। अस्तु च मिथ्यात्वे धीबाध्यत्वे युक्तिः; न चात्र मिथ्यात्वम्।

''दृश्यत्वात् यदि मिथ्यात्वं प्रपञ्चस्याभिधीयते। ब्रह्मणोऽपि च मिथ्यात्वं तत एवाभिधास्यते॥''

चेति। भवति को दोष इत्यत्राह ततश्चेति। शूद्राणां त्रैवर्णिकत्वेप्यनुमानाधिकारस्य अनपायात् तेषामप्यानुमानिक ब्रह्म गोचरापरोक्षज्ञानत्वाद्ब्रह्म विद्याधिकारादिति भावः।

श्रवणादिवैयर्थ्यमादि शब्दार्थः। किं चेति। सुखदुःखादिष्विव सर्वेष्वपि साक्षिवेद्येषु साक्षात्वाविशेषादिति भावः। ननु दृष्टान्तासिद्धिः स्वतोपरोक्षार्थ विषयत्वं तदस्त्येव आत्मस्वरूपमादायेति चोदयति यद्यपीति। किमयं हेतुः स्वतो आपरोक्षार्थांशे अपरोक्षजनकत्वसाधकः उततदर्थमात्रे। न द्वितीयः। त्वं घटश्चतिष्ठतः इत्यत्र घटांशेप्यपरोक्षापत्तिरिति द्वितीयस्य निरस्तत्वाद्याभिप्रायेण दोषमाह तत्रापीति। संख्याविशिष्ट्य परोक्षज्ञानजनकत्वं न स्यादित्यसिद्धिरिति भावः। अन्यथेति। संख्याविशिष्टाकारेण स्वतोऽपरोक्षत्वे वाक्यवैयर्थ्यमिति भावः। अनुग्राहकतर्काभावादिति। उक्तरीत्या व्याप्त्यभावादिति भावः। विरुद्धत्वादिति वाक्यत्वेन परोक्षजनकत्वादपरोक्षजनकत्वाभावव्याप्ते वाक्यस्येति भावः। अत एवेति। विरुद्धत्वादेव स्वतो परोक्षार्थ विषयत्वं नापरोक्षजनकत्वावच्छेदकमित्यर्थः। असिध्यन्यथासिद्धी उपपादयति सत्यमेवेति। सत्यत्वसाधकं मिथ्यात्वस्यासिद्धिः। सिद्धासत्यत्वेवा मिथ्यात्वेवा भगवत्संकल्प निवर्त्यत्वसाधनादन्यथासिद्धिरिति भावः। वेदनमिति प्रागेव व्याख्यातं।

मिथ्याभूतत्वेपि ज्ञानमात्र निवर्त्यत्वमपि नास्तीत्याह मिथ्याभूतस्यचेति। युक्तिः- युक्तता।

"ब्रह्मणो यदि दृश्यत्वं व्यावहारिकमुच्यते। प्रपञ्चस्यापि दृश्यत्वं तात्त्विकं किं त्वयेष्यते" ॥

अपि च संसारमिथ्यात्वेऽपि, किं निवृत्तिशब्देन प्रतिभासमानमिथ्यार्थप्रध्वंसनमभिप्रेत्य तदर्थमपरोक्षधीगवेषणम्, उत तद्विषयज्ञानप्रध्वंसनम्, आहोस्वित् तत्कारणोच्छेदम्, अथवा तथाविधज्ञानान्तरानुत्पादम्, उत तद्विपरीतविषयावगाहरूपविषयापहारम्, यद्वा तद्विषयसत्यताध्यवसायशैथिल्यम्, अथान्यदेव किंचिदसांव्यवहारिकमिति। नाद्यः; क्वचिदपि मिथ्यार्थस्य प्रध्वंसाभावात्;

प्रध्वंसो हि स्वरूपस्य प्रच्युतिः प्रतिपाद्यते। स्वरूपसत्यताऽभावे कस्य प्रच्युतिरुच्यते? ॥ सत्यपि तस्मिन् तेन तदुच्छेदायोगात्। अन्यथा बाधकज्ञानात्पूर्वं सुषुप्ते द्रष्टरि पुरुषे शुक्तिरजताद्यवस्थितिप्रसङ्गात्। संविदधीनसत्ताकस्य तस्य तन्निवृत्तिरेव हि निवृत्तिः। आहुश्च

"आरोपस्य निवृत्तिः स्यात् आरोप(प्य)स्यापि संक्षयः। तस्य स्वरूपशून्यस्य का निवृत्तिर्हि कथ्यते" ॥ इति।

न द्वितीयः; तस्य बाधकज्ञानाभावेऽपि बाधकज्ञानवदेव स्वरसवाहिविनाशहेतुबलादेवाऽऽशुतर विनाशित्वात्। अन्यथा अनुदितबाधकज्ञानस्य भ्रान्तस्य सुषुप्त्याद्यभावप्रसङ्गात्। तथाऽऽहुः

"न भ्रान्तिर्बाधकज्ञानात् नियमेन विनश्यति। न स्याद्धि भ्रान्तचित्तस्य सुषुप्तौ भ्रान्तिसंक्षयः" इति।

यद्यपि उत्तरज्ञानमात्रमपि संस्कारादिवत् पूर्वज्ञाननिवर्तकमिष्यते, तथाऽपि यत्किञ्चिद विरुद्धविषयात्। परोक्षज्ञानादपि पूर्वज्ञाननिवृत्त्युपपत्तौ विरुद्धविषयप्रत्यक्षज्ञानान्वेषणं निष्फलम्।

न च तृतीयः; भ्रान्तिज्ञानकारणानुच्छेदे यथावस्थितप्रत्यक्षज्ञानानुदयात्। न

यदीत्यन्वयः व्यावहारिकमिति तथा चा हेत्वसिद्धेः न मिथ्यात्वमिति भावः। तर्हि प्रपञ्चस्यापि मिथ्यात्वं न स्यात् हेत्वसिद्धेरित्याह प्रपञ्चस्यापीति।

तद्विपरीतेति तद्ज्ञानविषयविपरीतावगाहनमित्यर्थः। आसां व्यावहारिकं विविच्य वक्तुमावश्यकमित्यर्थः। किं मिथ्यार्थो नास्ति? उतास्ति आद्य आह प्रध्वंसो हीति। द्वितीयेदोषमाह सत्यपीति। मिथ्यार्थस्य सत्वेपि तदुच्छेदं प्रति तत्वसाक्षात्कारस्य अकारणत्वादिति भावः। अकारणत्वे हेतुरन्यथेति। तत्वज्ञानाभावेपि सुषुप्तौ तन्निवृत्तेर्व्यतिरेकव्यभिचारादिति भावः। इदमुपलक्षणं। मुद्गरादिना शुक्तिनिवृत्तौ रजतस्य सत्वप्रसङ्गात्तत्सत्वे निरधिष्ठानाध्यास प्रसङ्ग इति। दूषणान्तरमाह संविधीनेति तत्वज्ञानेनापि तन्निवृत्यभावो दृष्टः द्विचन्द्रादौ। तथापि संविन्निवृत्यावश्यकत्वे तथैवान्यथासिद्धत्वात् न तन्निवर्तकं ज्ञानमिति भावः तन्निवृत्तेरेव हि निवृत्तिरिति। तन्निवृत्यधीना निवृत्तिरित्यर्थः।

आरोपस्येति। पूर्ववदेव विकल्पे द्वितीयपूर्वपक्षे पूर्वार्धं, प्रथमपक्षे द्वितीयार्धं दूषणं योज्यं।

न द्वितीय इति। भ्रान्तिज्ञानं हि प्रध्वंसं प्रत्ययमपि पक्षो नोपपद्यत इत्यर्थः। न भ्रान्तिरिति विरोध ज्ञानत्वेन निवर्तकं न भवतीत्यर्थः।

भ्रान्तिज्ञानेति। दोषस्य तत्वज्ञानप्रतिबंधकतया भ्रान्तिज्ञानकारणरूप दोषोच्छेदे तत्वज्ञानं। तत्वज्ञाने सति तत्कारणदोषोच्छेद इति परस्पराश्रय इति भावः। सम्भवे वेति। तत्वज्ञानोत्पत्त्यर्थं

ह्यङ्गुल्यवष्टम्भतिमिरादिदोषेष्वनुवर्तमानेषु चन्द्रैकत्वसाक्षात्कारसम्भवः। सम्भवे वा किं तदुच्छेदेन। प्रत्यक्षानुवृत्त्यर्थं तदुच्छेद इति चेत्, न; तत्सामग्र्यनुवृत्तिमन्तरेण तदुच्छेदेऽपि तदसिद्धेः, तस्यां चानुवर्तमानायां तदवस्थानेऽपि विरोधाभावात्॥ स्वाभाविकप्रत्यक्षप्रतिबन्धकतया तदुच्छेदकल्पनमिति चेत्; किमत्र स्वाभाविकत्वम्? किं सामग्र्यां सत्यां स्वरसवाहित्वम्, उत नित्यस्वाभाविकत्वम्? आद्ये प्रागपि कथं तदवस्थाने प्रत्यक्षोदयः? अन्योन्याश्रयणात्। द्वितीयेऽपि नित्यस्वाभाविकप्रत्यक्षस्य च किं नाम प्रतिबन्धकम्? अयमत्र संग्रहश्लोकः

''भ्रान्तिकारणसद्भावे प्रत्यक्षस्य ह्यसम्भवः। सम्भवे निष्फलैव स्यात् तदुच्छेदस्य कल्पना''॥
''स्वानुवृत्त्यर्थमुच्छेदः सामग्र्यैवानुवर्तनात्। प्रतिबन्धनिवृत्त्यर्थमुच्छेदे प्रथमं कथम्''॥

प्रत्यक्षं कारणोच्छेदे तदुच्छेदस्ततोऽपि चेत्। अन्योन्याश्रयणं तु स्यात् प्रतिबन्धो न चात्मनि॥ इति।

नापि चतुर्थः; प्रागभावस्यासाध्यत्वात्। तदनुवर्तनस्याप्यन्ततस्तत्प्रतियोगिकारणोच्छेद कोटिनिक्षेपात्, तस्य च निरस्तत्वात्।

न पञ्चमषष्ठौ; परोक्षादपि तत्सिद्धेः। प्रत्यक्षमपि हि द्विचन्द्रादिज्ञानमनुवर्तमानं परोक्षेण चन्द्रैकत्वानुमानादिना बाध्यते। तावतैव चन्द्रद्वित्वाध्यवसायशैथिल्यं जायते। अन्यथा देहात्मभ्रमवता मनुमानेनाऽऽगमेन वा देहातिरिक्तात्मविस्रम्भो न स्यात्। परोक्षबाधे भ्रमोऽनुवर्तत इति चेन्न; तुल्यमेतदित्युक्तत्वात्।

तदुच्छेदकल्पनमिति तत्कल्पनं व्यर्थमिति भावः। प्रत्यक्षानुवृत्त्यर्थं-यथावस्थितप्रत्यक्षानुवृत्त्यर्थं द्वितीयप्रत्यक्षज्ञानोत्पत्तेः प्राक् तत्सामग्र्यनुवर्तते न वा द्वितीय दोषमाह तत्सामग्र्यनुवृत्तीति। साक्षात्कारसामग्र्यभावे भ्रमसामग्र्युच्छेदेपि साक्षात्कारानुत्पत्त्यानुवृत्यनुपपत्तेरित्यर्थः।आद्य (द्वितीये) आह तस्यां चेति। तत्व साक्षात्कारसामग्रीसत्वे भ्रमसामग्रीसत्वेपि प्राथमिकवद्वितीयादेरुत्पत्त्य ुपपत्तेरित्यर्थः

आद्य इति। भ्रमकारणस्य प्रतिबन्धकत्वादिति भावः। न द्वितीय इति। नित्यत्वं हि धारावाहित्वं।

यद्वा ध्वंसप्रागभावाप्रतियोगित्वमितिविकल्पमभिप्रेत्य आद्य आह अन्योन्याश्रयणादिति। भ्रान्तिकारणस्य प्रतिबन्धकतया प्रत्यक्षं प्रति तदुच्छेदापेक्षायां यद्युक्तप्रत्यक्षेण तदुच्छेदस्तदा तदुच्छेदे प्रत्यक्षं प्रत्यक्षेण तदुच्छेद इत्यन्योन्याश्रय इत्यर्थः। द्वितीये दोषमाह नित्येति। नित्यत्वरूपस्वाभाविकत्व इत्यर्थः। केचित्तु आद्ये कथं तदवस्थाने प्रत्यक्षोदय अन्योन्याश्रययादित्येव पाठस्साधुः। अत एव संग्रहकारिकायां प्रतिबन्ध निवृत्त्यर्थमुच्छेदे प्रथमं कथं प्रत्यक्षत्वमित्यादिना प्रथमकोटिदूषण एव अन्योन्याश्रयकथनमित्याहुः। यथाश्रुतपाठे संग्रहोपि तदनुसारेणयोज्यः।

विकल्पे चतुर्थं दूषयति न चतुर्थ इति।सत्या सामग्र्यां कार्ये विलंबायोगात्प्रतियोगिभूत भ्रमसामग्र्युच्छेदमुखेनैव तदनुत्पादरूपप्रागभाव परिपालनं वाच्यं तच्च तृतीयकोटि निरासेनैव निरस्तमित्याह। तदनुवर्तनस्यापीति। चन्द्रैकत्वादिनेति। चन्द्रैकत्वज्ञानेन विषयापहाररूप बाधो भवतीत्यर्थः।

द्वित्वाध्यवसाय शैथिल्यमिति। द्वित्वनिश्चये सत्यतायां प्रामाण्यनिश्चय शैथिल्यं तद्विरुद्धाप्रामाण्यनिश्चय इत्यर्थः। अन्यथेति। देहात्मज्ञाने प्रामाण्यनिश्चयाभावे अतिरिक्तात्मनिश्चये

"सञ्जातेऽप्यपरोक्षेऽपि बाधे कारणसम्भवात्। अङ्गुल्याद्यैर्भवद्भ्रान्तिरुपष्टम्भनहेतुभिः" ॥

नापि सप्तमः; तस्यासांव्यवहारिकत्वेनैतदर्थोपायोपदेशायोगात्, अन्वयव्यतिरेकागोचरत्वेना परोक्षपक्षपातविरहाच्च।

एवं सामान्येनापरोक्षज्ञानानपेक्षायां कुतस्तत्कारणविशेषचिन्तेति अनुत्थानमेव शब्दजन्यप्रत्यक्षवादस्येत्यभिप्रेत्य भाष्यकारैरिह न संरम्भः कृतः-"सत्यां सामग्र्यां ज्ञानानुत्पत्त्यनुपपत्तेः" (श्री भाष्यं-जिज्ञा) इत्यादिना। "द्रष्टव्य" (बृह ६.७.६) इत्यादेर्दर्शनसमानाकारविधिपरत्वोक्तेश्चेदमपि दूषितममंस्त। समन्वयाधिकरणपूर्वपक्षे तु परोक्त्यैव दूषयिष्यति-"न च शब्द एव प्रत्यक्षज्ञानं जनयतीति वक्तुं युक्तं; तस्यानिन्द्रियत्वात्" (श्री भाष्यं १-१-४) इत्यादिना।

अस्तु वा कथंचिदापरोक्ष्यपरिशेषः। तथाऽपि प्रत्यक्पराङ्मुखत्वादिलक्षणविरुद्धव्याप्त्या इन्द्रिय परित्यागे तुल्यन्यायतया वाक्यस्यापि परित्यागप्रसङ्गः। दर्शनादर्शनाभ्यां विशेष इति चेन्न; तदसिद्धेः। तत्सन्देहेऽपि न विरुद्धव्याप्तिरिति चेन्न; इन्द्रियादिष्वपि प्रसङ्गात्। अथ सत्यामेव विरुद्धव्याप्तौ गत्यन्तराभावात् तदनादरेण वाक्यस्यापरोक्षधीहेतुत्वं कल्प्येत, हन्त! तर्हि इन्द्रियादिष्वेव भक्तिरियं प्रयुज्यताम्। तथाच सिद्धे गत्यन्तरे किं वाक्येन? अयं तु निर्णयः-

"विरुद्धव्याप्तिसद्भावो वाक्यस्यापि तथा भवेत्। असद्भावो यदि भवेत्, सम एव द्वयोरपि" ॥

"दशमस्त्वमसीत्यादौ भवेत् वाक्यात् परोक्षधीः। सामग्र्युत्थापनात्पश्चात् प्रत्यक्षादपरोक्षधीः" ॥

प्रामाण्यनिश्चयः। तन्मूलकपारलौकिककर्मानुष्ठानं वा न स्यादित्यर्थः। ननु भ्रमानुवृत्तिरेव सत्यताध्यवसायशैथिल्यं। तच्च न परोक्षज्ञानादिति शङ्कते परोक्षेति। उक्तत्वादिति प्रत्यक्षसिद्धेपि शुक्तेस्तत्वे विप्रलम्भकवाक्याद्रजतधीरुदेतीत्युक्तत्वादित्यर्थः। अपरोक्षे संजातेपि भ्रान्तिरपि संभवति कारणसंभवात्सत्वादित्यर्थः। तत्र दृष्टांतमाह अंगुल्यादेरिति। यथा चन्द्रैकत्वे प्रत्यक्षे सत्यपि अंगुल्यवष्टंभादिकारणैर्द्विचन्द्रभ्रम इत्यर्थः। एतदिति। अपरोक्षज्ञानद्वारा एतदर्थस्य श्रवाणाद्युपायद्वारा परिशेषायोगादित्यर्थः।

तत्र हेतुमाह अन्वयेति। तत्स्वरूपस्यासाधारण धर्मत्वेनाज्ञानादित्यर्थः। ननु तर्हि भाष्ये शब्दप्रत्यक्षनिराकरणं न कृतमित्यत्राह एवं सामान्येनेति। दूषित प्रायत्वाच्च न दूषितमित्याह सत्यामिति। हेत्वंतरमाह समन्वयेति। तु शब्दोवधारणे। दूषयिष्यतीति। भाष्यकारोक्तचपेक्षया द्रष्टव्यं।

प्रत्यक्षपरिशेषमभ्युपेत्य वाक्यपरिशेषं दूषयति अस्तुवेति। प्रत्यगिति। बाह्येन्द्रियत्वस्य प्रत्यग्गोचरज्ञानकत्वाभावव्याप्तिः अनुमानत्वस्यापरोक्षज्ञानजनकत्वाभाव व्याप्तिः। सा शब्दस्याप्यस्तीति वाक्यस्यापि परित्यागस्यादिति भावः। दर्शनेति। दशमस्त्वमसीत्यादौ दृश्यत इत्यर्थः। तदिति। तत्राप्यपरोक्षजनकत्वस्यासिद्धेरित्यर्थः। तदिति दर्शनसंदेहे प्रत्यक्षजनकसंदेहात् विरुद्धव्याप्यताग्रह इति भावः। इन्द्रियादिष्विति। मनसः प्रत्यक्षपराङ्मुखत्वसंन्देह दशायामिद्रियत्वादावपि विरुद्धव्याप्तिग्रहासंभवः तथा शब्द इव अनुमानेपि तत्संशयान्न विरुद्ध व्याप्तिग्रहसंभव इति भावः। हन्तेति। इन्द्रियेप्रत्यक्षजनकत्वस्य क्लप्तत्वादिति भावः

न च प्रत्यक्षादेरद्वैतगोचरत्वविरोधः; तेषामपि त्वदभिमतकृदयुक्तिभिस्तत्त्वमस्यादेरिवाद्वैत गोचरत्वस्थापनस्य शक्यत्वात्।

यत्तु-प्रत्यक्षस्य न परोक्षात्परिभव इति-तदपि ज्वालैक्यबाधकभेदानुमानादिदर्शनेन निरस्तमेव। यदपि ऐन्द्रियकप्रत्यक्षाच्छास्त्रजन्यप्रत्यक्षस्य प्राबल्यमुक्तम् तदप्यसत्, एकदोषप्रसूतत्वादेर्दर्शयिष्यमाणत्वात्।

"प्रत्यक्षं ब्रह्म गृह्णाति यदि च ब्रह्मदृश्यता। अब्रह्मालम्बनत्वे तु कथं नु बलवत्तरम्"॥

यत्पुनः अपरोक्षज्ञानस्य मोक्षहेतुत्वं श्रुतिसिद्धमिति तावन्मात्राभ्युपगमेऽपि न नः काचित् क्षतिः।

यत्तु शब्दादेव शब्दस्यापरोक्षधीहेतुत्वं दर्शितम्, तदपि हास्यम्; अन्यपरत्वस्य आकुमारं प्रसिद्धेः। साक्षात्कारहेतोर्मनसस्सहायतया दृढव्यवसायहेतुतामात्रेण वा तदुपपत्तेः। यथाश्रुतग्रहणे चक्षुष्ट्वादेरपि स्वीकर्तव्यत्वात्। "श्रुतिस्मृती तु विप्राणां नयने द्वे" इति हि श्रूयते। "वेदान्तविज्ञानसुनिश्चितार्थाः" (तै.महा ना-१२) इत्यादिषु परोक्षव्यवसायमात्रमेवोच्यते। यत्तु विज्ञानमिति विशेषणेन विशेष विषयत्व सिद्ध्या निश्चयहेतुत्वे सिद्धेऽपि सुशब्देन विशेषणादपरोक्षनिश्चयहेतुत्वं सिद्धमिति, तदप्यत्यन्तपरिहास्यम्; अकम्पनीयव्यवसायविवक्षया सुशब्दप्रयोगात्।

यःपुनः, "तत्त्वमस्यादिवाक्यजन्यज्ञानत्वात्" इति प्रयोग; स तज्जन्यश्रावणज्ञा नेऽनैकान्तिकः। अतिप्रसङ्गश्च, वाक्यान्तरेष्वप्येवं प्रयोक्तुं शक्यत्वात्। परिहारस्य च समत्वात्। विषयजन्येषु च व्याप्तेः सङ्कोचात्।

"न वाक्यजन्यताहेतुःप्रत्यक्षत्वे तु, किं पुनः। अर्थजन्यत्वमेव स्यात् ततः सोपाधिकस्त्वयम्"॥

दशमोहमिति ज्ञाने साक्षात्कारानु भवो न स्यादित्यत आह सामग्र्युत्थापनादिति। शाब्दज्ञानोपनीतद शमत्वगोचरमानसज्ञाने प्रत्यक्षत्वादिति भावः।

तेषामिति। यथा भेदवासनानिरासे वाक्यस्याप्यपरोक्षज्ञानजनकत्वं कल्प्यते तथेन्द्रियस्यैव कल्प्यतामित्यर्थः। परिभवोहयुक्तयुक्तया नार्थ प्रतीत्योर्निवृत्तित्वप्रामाण्यबुद्धिरिति। ज्वालैक्यप्रत्यक्षस्य तद्भेदानुमानात्परिभवो दृष्ट इत्यर्थः।

एकदोषेति। अविद्यारूपदोषजन्यत्वस्याविशेषादिति शास्त्रप्रत्यक्षबलाबलचिन्तायां वक्ष्यमाणत्वादिति भावः।

कथंत्विति। ब्रह्मणि द्वैतगोचरत्वा भावाद्विरोधाभावाद्बलाबलचिन्तैव कुत इत्यर्थः। ततः काचित्क्षतिरिति। शब्दस्यापरोक्ष हेतुत्वसिद्धेरिति भावः।

ननु लक्षणैव दोष इत्यत्राह यथा श्रुतग्रहणे चेति। दृशेश्चाक्षुषज्ञाने मुख्यत्वादिति भावः। चक्षुष्ट्वादिप्रसंगादित्युपलक्षणं। चाक्षुषत्वप्रसंगोऽपि द्रष्टव्यः। तत्र हेतुमाह श्रुतिस्मृतीति। "श्रुतिस्मृतिपुराणानि धर्मं द्रष्टुं सनातनं। नयने द्वे मनुष्याणां" इति श्रुतिरित्यर्थः। अकम्पनीयेति सुशब्देन शोभनत्वं गमयते। तेन प्रमाणत्वेन तस्याकम्पनीयत्वं। नतु प्रत्यक्षत्वं भ्रमसाधारणादित्याह अकम्पनीयेति। स तज्जन्येति। श्रोतव्य इति विहितं श्रवणं तज्जन्ये श्रावणे प्राथमिकपरोक्षज्ञाने व्यभिचार इत्यर्थः।

वाक्यान्तरेष्विति। अग्निहोत्रादिवाक्यजन्यं ज्ञानं अपरोक्षं तद्वाक्यजन्यत्वात् तद्गोचरप्रत्यक्षवदिति वक्तुं शक्यत्वादित्यर्थः। ननु तस्याप्रयोजकत्वमित्यत्राह परिहारस्य चेति। योगज धर्माद्यजन्य जन्यत्वावच्छिन्न साक्षात्कारित्वरूप पक्ष धर्मावच्छिन्न साध्यव्यापकविषयजन्यत्वमुपाधिस्यादित्याह विषयेति। शक्यस्य विषयतया जनकत्वादिति भावः।

वाक्यविषयप्रत्यक्षेऽपि वाक्यस्यैवार्थत्वादर्थजन्यत्वोपाधेः साध्यव्यापकत्वाविरोधः। यश्च स्वप्रकाशार्थोपदेशरूपत्वात्, स्वतः प्रत्यक्षार्थविषयत्वाद्वेति, सोऽपि पूर्ववदेवानेकान्तः। दृष्टान्तस्य च साध्यविकलत्वं दर्शितमेवेति। प्रतिप्रयोगश्च-विगीतं वाक्यं न स्वार्थविषयप्रत्यक्षज्ञानजनकम्, वाक्यत्वात् ज्योतिष्टोमादिवाक्यवत्। तथा विगीता धीः न स्वविषये प्रत्यक्षा, वाक्यजन्यत्वे सति वाक्येतरविषयत्वात् स्वर्गयागादिसम्बन्धबुद्धिवत्। न चात्र श्रुतिविरुद्धतया कालात्ययापदेशः; श्रुतेरन्यपरत्वस्थापनात्। न च दशमस्त्वमसीत्यादिवाक्येन तज्जन्यज्ञानेन वाऽनैकान्तिकता; तत्र साक्षात्कारप्रसङ्गस्यापि निषिद्धत्वात्। न च पूर्वैरेव हेतुभिः सप्रतिसाधनता, उपलम्भानुरोधेनानतिप्रसञ्जकव्याप्तिमूलतया प्रबलत्वात्, समत्वेऽपि प्रकरणसमत्वापादनदशायामन्योन्यप्रतिरोधस्येष्टत्वेन तत्प्रसङ्गानुपपत्तेश्च।

न च विपक्षे बाधकविरहादप्रयोजकता; अविशेषात्। शब्दान्तराणामपि प्रत्यक्षज्ञानजनकत्वस्य बाधकस्य च सत्त्वात्। न चाप्रत्यक्षार्थविषयतया तेषां तदनुत्पादकत्वमिति वाच्यम्; तथाऽपि अयं घटः, दशमोऽयमित्यादिवाक्यानां तत्प्रसङ्गात्। न चेह भवताऽपि शब्दस्य साक्षात्कारहेतुत्वमिष्यते। इष्यतां वा; तथाऽपि ज्योतिष्टोमादिवाक्यानां तत्प्रसङ्गो दुर्वारः। तत्रापि मनस्सहकृतशब्देनैव प्रत्यक्षज्ञानं जायत इति साहसस्य सुशकत्वात्। तावतैव तेषां प्रत्यक्षार्थविषयत्वस्यापि सिद्धेरवान्तरविशेषानिर्धारणादिति। अस्तु वा विपक्षे बाधकाभावः। स तु पूर्वेषामपि समान इति। तथाऽपि प्रतिरोधमात्रं सिद्धम्।

तत्वमस्यादि वाक्यव्यक्तीनां सर्वासां पक्षत्वे श्रवणात्प्राक्भाविनिषु बाधात्तद्बहिर्भावोपलक्षत्वं वक्तव्यं। तथा च सति तत्र व्यभिचार इत्याह सोऽपीति। व्यभिचारमात्रे दृष्टान्तस्येति। इदमुपलक्षणं। दशमस्यास्वप्रकाशत्वात्स्वतः प्रत्यक्षत्वाभावाच्च साधनवैकल्यमपीति भावः। विगीतमिति। ननु साध्ये स्वपदस्य समभिव्याहृतपरत्वे तत्वमसीति वाक्यार्थविषयप्रत्यक्षस्याप्रसिद्धेः तज्जनकस्याप्रसिद्ध्या तद्भेदसाधनमनुपपन्नं जनकत्वपरत्वे कस्यापि वाक्यस्य स्वार्थगोचर प्रत्यक्षजनकत्वाभावादप्रसिद्धिः। किं च स्वार्थपरत्वं यदि स्वजन्यज्ञानविषयत्वं चेद्बाधः। वाक्यस्यापि वाक्यजन्यज्ञानविषयत्वात्। स्ववृत्ति विषयत्वं चेदप्रसिद्धिः। शब्दो वर्तते इत्यादौ प्रसिद्धिश्चेत्तत्रैव व्यभिचार इति चेदुच्यते। स्वशब्दश्च प्रत्यक्षजनक परः। स्वार्थत्वं च स्वस्य धर्मेतरत्वं। तद्गोचरसाक्षात्कारजनकमिन्द्रियं तदन्यत्वं तस्य साध्यमिति न दोषः। तत्वमस्यादिवाक्यस्य स्ववृत्तितावत्वादिसाक्षात्कारजनकत्वेऽपि न बाधः। यद्वा विषयत्वानच्छिन्नप्रत्यक्षजनकत्वाभावस्साध्यः। शब्दो वर्तत इति ज्ञाने च प्रत्यक्षजनकत्वं विषयत्वेनेति व्यभिचारः। यद्वा प्रत्यक्षजनकतानवच्छेदक विषयतातिरिक्तयावत्स्वधर्मत्वं साध्यं। बाधव्यभिचारवारणाय विषयातिरिक्तेति विशेषणमिति ध्येयं। विगीतेति। तत्वमस्यादिवाक्यगोचरा तज्जन्याधीः पक्षः। तेन न बाधः स्वप्रकाशतया स्वांशे प्रत्यक्षत्वाद्बाधवारणाय साध्ये स्वविषय इति। स्वविषयत्वं च स्ववृत्तिविषयत्वं घटप्रत्यक्षव्यभिचार परिहाराय वाक्यजन्यत्वे सतीति हेतुविशेषणं। वाक्यप्रत्यक्ष व्यभिचारवारणाय विशेष्यं। एवमपि वाक्यजन्यप्रत्यक्षे व्यभिचारः वाक्येतरतारत्वादिविषयत्वादिति चेत्, तत्वं च तन्मात्रविषयत्वं। तेन वाक्याविषयत्वादित्यर्थः पर्यवस्यतीति न दोषः। श्रुतेरन्यपरत्वस्येति। स्वाध्यायश्चक्षुरित्यादेर्दृढाध्य वसाय हेतुपरत्वस्य स्थापनादित्यर्थः। अनतिप्रसञ्जकेति। अग्निहोत्रादिवाक्येषु त्वदुक्त व्याप्त्यादावतिप्रसङ्गवदिति

नन्वस्ति पूर्वेषां विपक्षे बाधकं, आत्मविज्ञानस्य मोक्षसाधनत्वश्रुत्यन्यथानुपपत्तिः। तथा हि श्रुत्युपपत्तिभ्यां वाक्यार्थज्ञानादेव मिथ्याभूतसंसारनिवृत्तिरिति स्थिते, प्रत्यक्षस्य भ्रमस्य परोक्षबाध्यत्वायोगेन प्रत्यक्षपरिशेषे, ब्रह्मणि च सकलकरणागोचरे, अनुमानादिषु च साक्षात्कारवैदेशिकेषु, यदि वाक्यादप्यपरोक्षज्ञानं न स्यात्, अपवर्गोऽपि न स्यादेवेति। इदमपि दण्डघातसूदितदर्वीकरनर्तनम्, अस्याः परिपाटिकायाः आरम्भ एव निरस्तत्वात्।

यः पुनरसावूहः, अपरोक्षत्वं तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्ति, अपरोक्षनिष्ठात्यन्ताभावाप्रतियोगित्वात् ज्ञानत्ववदिति। अत्र तावत् वाक्यस्वरूपजन्यतद्विषयश्रावणसाक्षात्कारेण सिद्धसाधनता, प्रत्यक्षज्ञानहेताविन्द्रियार्थसन्निकर्षे अर्थस्येन्द्रियस्य च तुल्यकक्षयत्वात्। अथ पुनः तत्त्वमस्यादिवाक्यजन्यतदर्थविषयज्ञानवृत्तीति साध्यं विशेष्येत, तथाऽपि परोक्षतद्वाक्यार्थानुभवसंस्कारसहकृतश्रवणजन्यतदर्थप्रतिपादकत्वविशिष्टवाक्यस्वरूपसाक्षात्कारेण सिद्धसाधनतैव। स हि प्रत्यभिज्ञात्मा विशेषणतया अर्थं, विशेष्यतया वाक्यं च विषयीकरोति। अथ तदर्थैकविषयकज्ञानवृत्तीति विशेषयसि, तथाऽपि ब्रह्मेतरविषयत्वधर्मेण हेतोरनैकान्तिकता। तत् खलु सम्प्रतिपन्नेष्वपरोक्षेषु सर्वेष्वपि वर्तते, न पुनः संशयत्वविपर्ययत्वचाक्षुषत्वादिवत् कुतश्चिदपरोक्षान्निवर्तते; तत्त्वमस्यादिवाक्यजन्ये तु ज्ञाने नैव वर्तते। तत्त्वमस्यादिवाक्यव्यतिरिक्तजन्योऽपि ब्रह्मसाक्षात्कारोऽस्तीति चेत्, हन्त! तर्हि वाक्यैकपरिशेषप्रयासं विस्मृतवानसि। तथासति वाक्यजन्यसाक्षात्कारकल्पनावैयर्थ्यं च; तत एव तत्कार्यसिद्धेः। यत्तु परोक्षत्वं

प्रसंगाभावादिति भावः। समत्वेपीति। स्थापनानुमानस्य हि प्रतिरोधो दोषः। न प्रतिरोधानुमानस्य स्थापना प्रतिबन्धफलकस्येति भावः।

अविशेषादिति। ज्योतिष्टोमादिव्यावृत्तौ अवान्तरोपाधेर भावादित्यर्थः। वस्तुतो विपक्षे बाधकमस्तीत्याह शब्दांतरणामपीति। ननु तत्वमस्यादि वाक्ये प्रत्यक्षार्थ विषयत्वं विशेष इत्यत्राह नचेति। ननु कथं ज्योतिष्टोमादिवाक्ये तत्प्रसंगः। अपरोक्षादि विषयत्वरूपप्रयोजकस्य तत्राभावादित्यत्राह तत्रापीति। अपरोक्षाविषयत्वंअपरोक्षार्थज्ञानविषयार्थ विषयत्वमपरोक्षज्ञाने आपाद्यमाने सहैवापरोक्षार्थविषयत्वमप्यापादितं भवतीति नावांतरविशेष इत्यर्थः।

पूर्वेषामनुमानानां प्रागुक्तार्थापत्तिरेव विपक्षे बाधकेत्युपक्षिपति नन्विति। वाक्यार्थज्ञानादिति। वाक्यार्थे ब्रह्म तद्ज्ञानादित्यर्थः। उत्तरत्र ब्रह्मणि चेति करणपरिशेषणकथनादूहः।अनुमानं वाक्येति। विषयतया वाक्यस्वरूपजन्ये श्रोतृजन्यवाक्यप्रत्यक्षे वृत्तितया सिद्धसाधनमित्यर्थः।

नन्विन्द्रियासन्निकर्षो हेतुः अर्थस्तु तत्रान्यथासिद्ध इति न सिद्धसाधनमित्यत्राह। प्रत्यक्षेति। इन्द्रियस्यापि तर्हि हेतुत्वं न स्यादिति भावः। अथेति। तत्वमस्यादिवाक्यस्यापरोक्षज्ञानजनकत्व रूपोद्देश्यसिध्यर्थं ईश्वरयोगिप्रत्यक्षवृत्तितया सिद्धसाधन वारणार्थं च साध्यं तत्वमस्यादित्यादिना विशिष्य निर्दिश्यत इत्यर्थः। प्रत्यभिज्ञात्मेति। पुनः प्रतिसंधानरूपत्वात्प्रत्यभिज्ञात्वमिति भावः। अथेति। तत्वमस्यादिवाक्यजन्यतदर्थमात्रविषयक ज्ञानवृत्तीत्यर्थः। पूर्ववदुद्देश्यसिध्यर्थं तत्वमसीत्यादिविशेषणं अतथापीति। ब्रह्मेतर विषयत्वे तत्वमस्यादिवाक्यजन्यज्ञानवृत्तित्वरूपसाध्याभावस्य निश्चितत्वाद्धेतोस्संदिग्धत्वात् संवित्वादिनैकांत्यमित्यर्थः। तत्वमस्यादिवाक्येति। मानसादिब्रह्मगोचरसाक्षात्कारावृत्तित्वाद्धेत्वभावाद्ब्रह्मेतरविषयत्वेन व्यभिचार इति भावः। हन्तेति।

तत्त्वमस्यादिवाक्यजन्यज्ञानवृत्तीति प्रत्यनुमाने सिद्धसाधनत्वमुक्तम्, तत्र यदि तत्त्वमस्यादिवाक्यजन्यज्ञानाभिन्यापीति प्रयुञ्जीत, तदा किं ब्रूयाः। श्रुतिविरोधात् कालात्ययापदेशमेव ब्रूम इति चेत्-हन्त! अद्यापि त्वया श्रुतिस्तपस्विनी कूटसाक्षिणी कल्प्यते। सा तु यथार्थवादिनी न किंचित् त्वदभिमतं ब्रवीति।

यत्तु अपरोक्षत्वं ज्योतिष्टोमादिवाक्यजन्यज्ञानवृत्तीति प्रतिबन्ध्यनुमाने विपक्षे बाधकाभावात् वैषम्यमुक्तम् तदत्रापि समानमेव। अर्थापत्तेः कल्पकासिद्ध्यादिनिरस्तत्वात्।

परोक्षादपि ज्ञानात् प्रत्यक्षोपमर्दादेः प्रागेव समर्थितत्वात्। प्रत्यक्षापेक्षायामपि तत्त्वमस्यादिवाक्यव्यतिरिक्तजन्येनापि प्रत्यक्षेण बाधोपपत्तावन्यथासिद्धेः। अस्ति च योगिप्रत्यक्षमदृष्टविशेषसहकृतान्तःकरणजन्यम् आगमसमधिगम्यमास्तिकानाम्। श्रूयते हि रामायणे- "रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः। तत् सर्वं धर्मवीर्येण यथावत् संप्रपश्यति" (श्री.रामा.बा-२-३३) इति। यत्तु भाष्ये दर्शनसमानाकारत्वमुच्यते, तत् मोक्षसाधनभूताया ध्रुवानुस्मृतेरेव; न पुनर्धर्मवीर्यफलभूतयोगिप्रत्यक्षं निषिध्यते, तस्यापि श्रुतत्वात्। त्वदभिमतस्य तु श्रुतत्वं प्रतिक्षिप्तमिति तस्यैवासम्भवः। यद्यपि योगिप्रत्यक्षं फलमात्रमित्यस्मन्मतम्, तथाऽपि तदधीनायाःपरिशेषासिद्धेरन्यथा सिद्धेश्चोपन्यासो नानुपपन्नः। "क्लृप्तकल्प्यविरोधे तु युक्तः क्लृप्तपरिग्रहः" इति न्यायात्। यदि च यत्किंचिद्विपक्षे बाधकमित्यभिमानमात्रेण परिगृह्यानुमिनोषि, तदा ज्योतिष्टोमादिवाक्येऽपि भवादृशःकोऽपि तथा तदभिमत्याऽनुमिनुयादेव।

एवं सिद्धसाधनत्वानैकान्तिकत्वातिप्रसञ्जकत्वाऽऽभाससमानयोगक्षेमत्वान्यथासिद्धत्वादि दोषदूषितत्वादनुमानविशेषोत्प्रेक्षणमेव निपुणधियां सिषाधयिषितस्य प्रामाणिकत्वानुमितिमन्तर्गतां सूचयति। अत एवामिस्मन्नर्थे महाविद्यादिप्रयोगान्तरमनोरथोऽपि भग्नः। यत्तु शब्दस्य प्रत्यक्षान्तर्भावप्रसङ्गे

भवन्मते मनसो अप्रमाणत्वात् वाक्यादन्यस्य ब्रह्मगोचरसाक्षात्कारजनकत्वादिति भावः। इदमुपलक्षणं। तत्वमस्यादिवाक्यजन्यज्ञानान्यज्ञानत्वेन व्यभिचारो द्रष्टव्यः। तत्वमस्यादिवाक्यजन्यज्ञनाभिन्यापीति। तज्जन्य सर्वज्ञानवृत्तीत्यर्थः। अद्यापीति श्रुतेरान्यपर्यस्योक्तत्वेपीत्यर्थः।

यत्वपरोक्षमिति। न च वाच्यमग्निहोत्रादित्यादिना पूर्वपक्षोक्तमित्यर्थः।

श्रूयते हीति।

ननु वाक्यस्यापि दर्शयति भगवान् सनत्कुमार इति। परोक्षहेतुत्वं श्रूयत इति चेन्न वाक्यकरणस्य ज्ञानस्य चाक्षुषज्ञानवाचिं दृशिं प्रति मुख्यार्थत्वायोगात् क्लृप्तशब्दप्रमाणशक्त्यनुरोधेन परोक्षज्ञान एव दर्शनवदनेकविशेषणविशिष्टावगाहनरूपगुणयोगाद्वृत्तिरभ्युपगम्यते। इह तु करणांतरासंभवायोगा त्तद्धर्मस्य अस्य च पृथक्करणत्व कल्पने गौरवान्मनस्सहकारित्वेनोपपत्तेः। पश्यतेश्च दर्शनवाचित्वेन न सादृश्यातिशयेन प्रत्यक्षपरत्वमिति भावः। "द्रष्टव्यः श्रोतव्यः" (बृह.६-५-६) "तस्मिन् दृष्टेपरावरे" (मु.२-२-१) इत्यत्र सादृश्यातिशयात् प्रत्यक्ष समानाकारपरत्ववर्णनं विरुध्येत। योगजप्रत्यक्ष परत्वस्य वक्तुं शक्यत्वादित्यत्राह यद्यपीति। मिथ्याभूतबन्धस्यापरोक्षज्ञाननिवृत्त्याद्योगि प्रत्यक्षमादायान्यथासिद्धिस्स्यादेवेति भावः।

अत एवेति। आभाससमानयोगक्षेमत्वादेरित्यर्थः तत्विति। अन्यत्र प्रत्यक्षांतर्भाव प्रयोजकमपरोक्षधीजनकत्वमेव। न तु वाक्यान्यत्वविशेषितमिति तस्य तत्वमस्यादिवाक्येपि सत्वेपि

स्वतोऽपरोक्षब्रह्मात्मविषयशब्दान्यत्वे सति अपरोक्षप्रमितिकारणत्वं प्रत्यक्षान्तर्भावप्रयोजकमित्युक्तम्, तत् तत्त्वमस्यादेरपरोक्षधीजनकत्वे वक्तव्यम्; तत्तु नाद्यापि सिद्ध्यतीति तत्प्रसङ्गो दुर्वारः।

तदेवं वाक्यजन्यसाक्षात्कार सिद्धेः परिशेषात् तज्जन्यपरोक्षज्ञानेनैवाप्रतिबद्धसामग्रीसमुद्भवेन बाध इति स्थितौ श्रवणादिविधिनैरर्थक्यं प्रागुक्तं सुस्थितमेव। ततश्च श्रुतवेदान्तानां संसारानुवृत्तिदर्शनविरोधो दुर्वारः। बाधितानुवृत्तिस्तु बाधिता(वाद-५)। जीवन्मुक्तिं च विस्तरेण दूषयिष्यामः(वाद-३१)। तदेवम् अनुमानाऽऽगमार्थापत्तीनां प्रतिक्षेपात्, प्रत्यक्षोपमानादेश्च तत्रासंभवात्, त्वयाऽप्यनङ्गीकृतत्वाच्च निष्प्रमाणतया तत्त्वमस्यादेः साक्षात्कारजनकत्ववचनं प्राचामाचार्यवन्दकानां प्रलोभनमात्रमित्युत्पश्यामः।

इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां शब्दजन्यप्रत्यक्षभङ्गवादः सप्तमः ॥७॥

तदन्तर्भावस्यात्। नचैतद्वाक्यनिवृत्त्यर्थमेव न तदन्यत्वं विशेषणं युक्तं। प्रत्यक्षजनकत्वस्य संदिग्धतया संदिग्धव्यर्थविशेषणत्वप्रसंगादिति भावः।

ननु परोक्षज्ञानमेव संसारनिवर्तकमस्त्वित्यत्राह श्रुतवेदान्तानामिति। प्राचां आचार्यवन्दनकारणमिति।प्रांचः आचार्याः आचार्यवंदकाः मनुष्याः आचार्यैः शिष्याणां वंचनं कृतमित्यवगम्यत इत्यर्थः। ''उभयप्राप्तौकर्मणी''(अष्टा-२-३-६६) त्यत्र ''शेषेवेति वक्तव्यमि'' (वार्तिक-१७१३) ति वचनात् प्राचामित्यत्रापि षष्ठी। यत्तु ज्ञानस्याप्यपरोक्षार्थविषयतयार्थाधीन मापरोक्ष्यं नतु करणाधीनं विषयस्य च न ज्ञानाधीनमापरोक्ष्यं किन्त्वपरोक्ष ब्रह्मचैतन्याभेदेन। ब्रह्म चैतन्यं च ''यत्साक्षादपरोक्षात् ब्रह्मेति ''(बृह.५-४-२) श्रुत्या स्वतोऽपरोक्षं। तदभेदश्च तत्सत्तातिरिक्त सत्ताकत्वाभावः। नच सर्ववस्त्वापरोक्ष्य प्रसंगः। यं प्रति यदुद्भूतमनावृतचैतन्याभिन्नं तं प्रति तदपरोक्षमिति विवक्षितत्वात्। न चार्थाधीनापरोक्ष्येऽनुमित्यादेरप्यापरोक्ष्य प्रसंगः। इष्टत्वादिति। न विकल्पनं तदतित्वं च अभेदो हि तादात्म्यमेव। विषयाणां चैतन्याद्भेदाभावः एवाध्यासिकसंबन्धो विषयविषयिभाव इति चैतन्यविषयताप्रयुक्तमेवार्थाऽपरोऽक्ष्यं। ननु वृत्यधीनत्वाभाव एव अत्र विवक्षितः। चैतन्याधीनत्वेपि विवक्षितोऽस्त्येवेति चेन्न। घटादीनां सर्वदाऽऽपरोक्ष्यप्रसंगात्। नच घटादीनां चैतन्या ध्यासेन तत्तादात्म्येप्यनावृत्तचैतन्या भावो नास्तीति वाच्यं। तथा सति तदाऽऽपरोक्षमेव न स्यात्। आवरणस्य निवृत्तियोगात्। नच वृत्त्या निवृत्त्यन्तरानावृतचैन्यभेदेनापरोक्ष्यमिति वाच्यं। तथा सत्यपरोक्षेर्थस्य तद्विषयकतया परोक्षवृत्त्याऽविद्यानिवृत्तिः। तन्निवृत्तावर्थाऽऽपरोक्ष्यमितरेतराश्रयात्। न चाऽपरोक्ष्यं विनापि तन्निवृत्तिः तदसत्यमिति प्रसंगात्। न च विषयसंसृष्टवृत्त्याविद्यानिवृत्तौ नातिप्रसंग इति वाच्यं। विषयसंसृष्टत्वमात्रस्य हृदयाद्यनुमितावतिप्रसक्त्या करणाधीन विषयसंसृष्टत्वं वाच्यं। तथा च तदेव वृत्तावाऽऽपरोक्ष्यं। तदतिरिक्तसत्वे मानाभावात्। किं च विषयसंसृष्टत्वमात्रदेव अविद्यानिवृत्तौ शाब्दापरोक्ष्यकल्पनं व्यर्थं। नच विषयसंसृष्ट तत्वमसिवाक्यजन्यज्ञानादविद्यानिवृत्तौ वास्तवमपरोक्षार्थ विषयत्वमस्तीति तदुक्तिः। न तु अविद्यानिवृत्यर्थमिति वाच्यं। यादृच्छिकविषयसंसृष्टवतः तद्ज्ञानस्य करणायत्तविषयसंसृष्टत्वाभावेनाविद्यानिवर्तकत्वायोगात्। किञ्च ज्ञाने चाक्षुषत्वादिकमेव अपरोक्षान्नचाननुगमस्तारत्वादिवदुपपत्तेरिति दिक्।

॥ वत्सजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकयां सप्तमो वादस्समाप्तः ॥

॥अथ साधनचतुष्टयपूर्ववृत्तत्वभङ्गवादः अष्टमः ॥८॥

शास्त्रैक्ये विषयाद्यभेदनियते सङ्गत्यधीन क्रमे
कर्माऽऽलोच्य तदङ्गिकामथ परां विद्यामुपादित्सुभिः।
यस्तद्वेद्यतया स्वयंफलतयाऽप्यारोहति ज्ञेयतां
कुर्वीतैष विभुः श्रिया सह मम स्वान्तं निजान्तः पुरम् ॥

इह तावत् आनन्तर्यार्थे प्रचुरप्रसिद्धिकं अथशब्दमादौ प्रयुञ्जानस्य सूत्रकारस्य तत्सम्भवे तदर्थतैवाभिमतेत्यङ्गीकार्यम्। तत्सम्भवश्च यदि नियतपूर्ववृत्तमसाधारणं तथात्वज्ञापने स प्रयोजनं च किमपि स्यात्, तदा स्यात्। अन्यथा न स्यात्। यथा ''अथ योगानुशासनम्'' (पा.योग.सू.१.१) इत्यादौ। न हि यदृच्छागतं यत्किञ्चिन्निमेषोन्मेषादिकं मक्षिकासंचारादिकं वा पूर्ववृत्ततयाऽत्र वक्तुं युज्यते, तस्य सर्वत्र सम्भवात्; अभिधानप्रयोजनविरहाच्च। अत एव सर्वपुरुषव्यापार-साधारणापेक्षितभोजनादि पूर्ववृत्तत्वोक्तिरपि निरस्ता; विशेषनियमाभावात्। अवधान-आत्ममनस्संयोगादिकमपि न विचारविशेषं प्रति विशेषहेतुः, सर्वशास्त्रसाधारण्यात्। सामग्री तु तथा स्यात्। तदुक्तिरपि यदि सामग्रीत्ववेषेण, तदपि सर्वकार्यसाधारण्यात् तदभिधाननैरर्थक्याच्च निरस्तम्। तेन सामग्रीविशेषविशेषकं विशेषकारणमेव वाच्यम्। अतः सप्रयोजनाभिधानासाधारणनियतपूर्ववृत्तवस्तुगवेषणे- नित्यानित्यवस्तुविवेकादिसाधन चतुष्टयं पूर्ववृत्तम्; तस्यैव ब्रह्मजिज्ञासायां नियमेनापेक्षितत्वात्; तदुक्तेश्चाधिकारिविशेषप्रतिपादनार्थतया सप्रयोजनत्वाच्चेति यदुक्तम्, तत् परामृशामः ॥

अथ शब्दस्यानन्तर्यार्थकत्वे सत्येव शास्त्रयैक्यं निर्वहेदिति प्रासंगिकनिरूपणानन्तरं कर्मानन्तर्यं निरूपयितुं संगतिं दर्शयन्वादार्थं सूचयन् शास्त्रैक्यं सयुक्तिकमनुवदति शास्त्रयैक्य इति। वादार्थं कर्मविचारानन्तर्यमाह । कर्मालोच्येति। केचित्तु अपरोक्षार्थविषयतया आपरोक्षये अनुमानादीनामपि तथात्वप्रसंगेन ब्रह्मगोचरापरोक्षाज्ञानरूपाविद्यायां शूद्रस्याप्यधिकारसंभवेऽपशूद्राधिकरणविरोध : आपादितः। तत्रेष्टप्रसंगे कर्मविचारानन्तर्यप्रतिपादकसूत्रस्थाथशब्दविरोधप्रसंग इति सूचयन् वादार्थं संगृह्णाति। शास्त्रैक्य इत्याहुः।

अथशब्दस्य कर्मविचारानन्तर्य साधयिष्यन् पूर्वपक्षिमुखेनान्तर्यार्थकत्वं प्रथमं साधयति। इह तावदिति। ननु नित्या नित्यविधेयस्यैव पूर्ववृत्तित्वमिति कुतो निर्धायते। अन्यस्यापि संभवादित्यत्राह तत्संभवश्चेति। यत्र सप्रयोजनजनितपूर्ववृत्तस्य असंभवः। तत्राथशब्दो अधिकारार्थत्वेन व्याख्यान इत्याह अथ योग इति। एवमपि कथमन्येषां निरास इत्यत्राह नहीति। तत्र किं पूर्ववृत्तं। यदृच्छासिद्धमक्षिकासंचारादि। यद्वा निमेषोन्मेषादिकं। नाद्य इत्याह सर्वत्रेति। नियतत्वाभावात् यदृच्छासिद्धानां तदानन्तये नाभिधेयमिति भावः। नद्वितीय इत्याह अभिधान इति। अत एवेति। प्रयोजनाभावादेवेत्यर्थः। दूषणान्तरमप्याह विशेषेति। व्यर्थव्यापारं प्रत्यपि पूर्वाभावेन वेदान्तविचारं प्रत्येव असाधरण्याभावादित्यर्थः अवधानेति। इन्द्रियाणां विषयान्तरासंचारोऽवधानं। आदिशब्देन व्युत्पत्यादिकं गृहचते। प्रयोजनाभावमप्याह तदभिधान इति। नियमेनापेक्षितत्वमाह तस्यैवेति। सप्रयोजनत्वं चाह तदुक्तेश्चेति। सिद्धान्तमारभते तत्परामर्श इति। इत्येवमात्मेति। इत्येवं विवरणोक्तनिश्चय

तत्र नित्यानित्यवस्तुविवेकस्तावत् कथंभूत इति। किम् "इदं वस्तु नित्यम्, इदं वस्त्वनित्यम्" इत्येवमात्मा; उत "नित्यानित्ययोर्वसतीति नित्यानित्यवस्तु, तच्च नित्यानित्ययोर्धर्मः, हेयत्वोपादेयत्वे इत्यर्थः" इति वाचस्पतिकल्पितप्रकार इति।

तत्र न प्रथमः; तस्य वेदान्तश्रवणात्पूर्वमसिद्धत्वात्। तत्रैव ह्यात्मादेर्नित्यत्वं वियदादेश्चानित्यत्वं विविच्यते। तथाचान्योन्याश्रयणम्,

"वेदान्तश्रवणे सिद्धे नित्यानित्यविवेकधीः। नित्यानित्यविवेकेन वेदान्तश्रवणं त्विति"॥

अथ यदि शास्त्रान्तरात् तद्विवेक इति मन्यसे, तदा विपरीतविवेकापत्तिः। वियदादयो वैशेषिकादिभिर्नित्या एव परिगृह्यन्ते। आत्मादयश्च सौगतादिभिरनित्याः,असन्तो वा। अथादूरविप्रकृष्ट सांख्ययोगशीलनेन तद्विवेक इति चिन्तयसि, तर्हि तत्रैवाऽऽत्मानात्मविवेकसिद्धेः किं ब्रह्ममीमांसया? अनन्यलभ्यं हि शास्त्रफलम्। विशेषज्ञप्त्यर्थमिति चेन्न; निर्विशेषे तदयोगात्। आत्माद्वैतसिद्ध्यर्थमिति चेन्न; स्वात्मनो नित्यनिर्लेपत्वादिव्यवसायमात्रेण समीहितसिद्धौ स्वव्यतिरिक्तात्मसदसद्भाव चिन्तनस्य ध्वाङ्क्षदन्तपरीक्षायमाणत्वात्। आत्मव्यतिरिक्तमिथ्यात्वावसायार्थमित्येतदपि तत एव दत्तोतरम्। तस्य सौगतसमयेऽपि सुलभत्वाच्च। उक्तं हि योगाचारेण, "अविभागोऽपि वित्त्यात्मा विपर्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते"। इति। अथ वेदविरुद्धतन्त्रत्वात् ततो न निश्चय इत्याशयः; तर्हि सूत्रकारैरेव तद्वन्निराकरिष्यमाणसांख्यादितन्त्रैरपि नाश्वसिहि। "न हि तद्वा तादृग्वेति कश्चिद्विशेषः"

इत्यर्थः। हेयत्वोपादेयत्वे इति। तन्निश्चय (जनकत्वं चाह-तदुक्तय श्चेति) इत्यर्थः।

तत्रैवेति नात्माश्रुतेर्नित्यत्वाच्चताभ्यः (ब्र.सू.२-३-२८) "न वियदश्रुतेः" (ब्र.सू.२-३-२) रित्यादिभिरित्यर्थः। आदिशब्देन स्वमतेन कालादयो गृह्यन्ते।

अन्योन्याश्रयं कारिकयोपपादयति वेदान्तेति।

विरुद्धनिश्चयमेव उपपादयति वियदादय इति। आदिपदेन चार्वाकादयः। सौगताः क्षणिकसंतानमाहुः। चार्वाका आत्मनोऽभावमाहुः। माध्यमिकास्तु मिथ्याभूतमाहुरिति भावः। अदूरेति। सांख्ययोगयोः प्रकृत्यादिपृथिव्यंतसृष्ट्युपवर्णनसाम्याद्वेदान्तादूरविप्रकृष्टत्वं। तर्हीति। आत्मानात्मविवेकार्थेव ब्रह्ममीमांसा। तस्य च तत्रैव सिद्धेर्ब्रह्ममीमांसायां प्रवृत्तिर्नस्यादित्यर्थः। अनयापि तत्सिद्धेरत्रापि प्रवृत्तिस्यादित्यत्राह अनन्यलभ्येति। नियतापेक्षिततेन शास्त्रान्तरेण विवेकसिद्धावेतस्य निष्फलत्वमेवस्यादित्यर्थः। अनन्यलभ्यार्थत्वं शङ्कते विशेषेति। अद्वैतत्वमेवविशेष इति शंकते आत्माद्वैतेति मोक्षोपायाधिगमार्थं हि ब्रह्ममीमांसायां प्रवृत्तिः। सांख्यशास्त्र एवात्मनो निर्लेपादिव्यवसायस्य मोक्षसाधनतया प्रतिपादनात् ब्रह्मणः स्वव्यतिरेकानतिरेंकचिन्तायाः व्यर्थत्वात् ब्रह्ममीमासायां प्रवृत्तिर्नस्यादितीत्याह स्वात्मन इति। नन्वात्मव्यतिरिक्तमिथ्यात्वाध्यवसायस्यैव मोक्षहेतुत्वात्कथं निरस्तेत्यत्राह तस्येति। तथापि सौगतशास्त्रात्तदपि सुलभमिति भावः अविभागोपीति। ग्राह्यग्राहकभेदर हित ज्ञानस्वरूपमेव आत्मा। ततोऽतिरिक्तंवस्तु मिथ्यैव। तर्हि ग्राह्यत्वे ग्राहकत्वेन्न वस्तुप्रतीतिः कथमित्यत्राह विपर्यासितेति। भ्रान्तिज्ञानेन तथा गृह्यत इति न तत्सत्यतेति भावः। तर्हीति। सूत्रकारैर्निराकरिष्यमाणत्वात्। सांख्यादिशास्त्रमपि वेदविरुद्धमेवेति तेनापि नित्यानित्य

इति न्यायात् । अविरुद्धांशं स्वीकुर्म इति चेत्, कस्तर्हि सौगतेषु ते प्रद्वेषः? तेष्वपि भवदुपजीव्या बहवोऽर्थराशयः सन्ति। कथं च, अयमर्थो न विरुद्धः, अयं तु विरुद्ध इति वेदान्तश्रवणात् पूर्वमवगच्छसि? तथाच तत्राप्यन्योन्याश्रयणम् । हितोपदेशिपित्रादिवचनविस्रम्भादिति चेत्, तर्हि तत एव नित्यानित्यवस्तुविवेकोऽपि सिध्यति; किं सांख्यादिकपोलजलकणिकाखादेन? अस्त्वेवमपि, का नो हानिरिति चेत्; वेदान्तश्रवणहानिः। तदुपदेशमात्रेणालसास्तिकवत् समस्तार्थविस्रम्भोपपत्तेः। सर्वस्यापि विवेकस्य आत्मानात्मविवेकार्थतया तत्सिद्धौ ज्ञातव्यान्तरपरिशेषाभावात् । परिशेषे च निर्गुणत्वव्याघाताच्च । ख्यातिलाभपूजार्थप्रवचनादिकौतुकात् स्वयं तत्परीक्षणमिति चेत्; हन्तैवं साधुशमादिसाधनसम्पत् सम्पादिता । कामक्रोधादेरेव वेदान्तश्रवणनिमित्तत्वेनोपादानात् । ख्यातिलाभाद्यर्थश्रवणे च नित्यानित्वस्तुविवेकादेः क्वोपयोगः?

अथ वैधत्वान्मीमांसाश्रवणस्य स्वयं विमर्श इति तदपि न; अर्थनिश्चयसिद्ध्यर्थत्वात् विमर्शस्य। निश्चयो यद्युपदेशात् सिध्यति, किं वृथा प्रयासेन? अन्यथा प्रदक्षिणनमस्कारादिवत् अदृष्टार्थत्वमेव स्यात् मीमांसाश्रवणस्य। न च मीमांसाश्रवणस्य वैधत्वमिति प्रागेव समर्थितम्। अस्तु च वैधत्वम्, तथाऽपि नित्यानित्यवस्तुविवेकस्यापि स्वेतिकर्तव्यताभूतमीमांसाधीनस्यैव विधिना स्वीकारात्, तथाविधस्य च तस्य अविरोधलक्षणसाध्यत्वान्न पूर्वत्वसिद्धिः।

वस्तुनिर्धारणाश्वासः तव न संभवतीति भावः। ननु महर्षिप्रणीतत्वमित्यतिशयोस्तीत्यत्राह नहीति वेदविरोधादेव सौगततन्त्रस्य अप्रामाण्यमुक्तं। तच्च महर्षिप्रणीते सांख्यतन्त्रे समानमित्यर्थः। तेष्वपीति। ततश्च मिथ्यात्वाध्यवसायार्थं सौगतशास्त्रेपि प्रवृत्तिस्यादित्यर्थः कथं चेति। आत्मनित्यत्वमविरुद्धमिति वेदान्तैरात्मनित्यत्व निर्णयात्प्राक्कथं निश्चीयत इति भावः। इदमुपलक्षणं। वेदान्तविचारात्प्राक् सौगततन्त्रस्य वेदविरुद्धत्वमप्यशक्य निर्णयमिति द्रष्टव्यं। तथा चेति। वेदान्त श्रवणानन्तरं वेद विरुद्धांश निर्णयः तन्निर्णये वेदान्तशास्त्र विचाराधिकार इत्यन्योन्याश्रय इत्यर्थः। हितेति । अविरुद्धांशनिर्णयनिर्णयाभावः। तत एवेति। हितैषिवचनादे (ज्ञातत्वं इत्यत्र)व आत्मानात्मविवेकोपि सिध्यतीत्यर्थः। समस्तार्थ विस्रंभः -ज्ञातव्यार्थनिर्णयः।ननु नित्यानित्यवस्तु विचारमात्रं हितैषिचनाज्जातं अर्थांतरनिरूपणार्थं शास्त्रं स्यात्सर्वस्यापि हितैषिवचनात् ज्ञातव्यमित्यत्र नियमाभावादित्यत्राह। सर्वस्यापीति। विवेकविचारस्य सिद्धौ आत्मानात्मविवेकस्येति शेषः। नन्वगत्या ज्ञातव्यांतरमिष्यत इत्यत्राह परिशेषेचेति। मुमुक्षुज्ञातव्यस्य कल्पितत्वाभावात् सत्यत्वं वाच्यमिति विशेषत्वं स्यादिति भावः। प्रवचनादित्यादिशब्देन कल्पशास्त्र प्रवर्तनादि गृह्यते। हन्तेति। शमदमादि पूर्ववृत्तं न स्यादिति भावः। क्रोधादेरित्यादिशब्देन पूजादिग्रहणं।

किमर्थं निश्चयार्थत्वेन विधिरुत अन्यार्थत्वेनेति विकल्प्याद्यं दूषयति अर्थनिश्चयेति। विधिवैयर्थ्यमित्यर्थः। द्वितीये दोषमाह अन्यथेति। दृष्टार्थत्वे संभवत्यदृष्टार्थत्वायोगादिति भावः। फलस्य सिद्धत्वान्न तदर्थं श्रवणमित्युक्तं। इदानीं रागप्राप्तत्वान्न विधिरिति पूर्वोक्तं स्मारयति नचेति। तथापीति। मीमांसायाः विधिः स्वेतिकर्तव्यत्वेनातरंगत्वात् तज्जन्यमेव नित्यानित्यवस्तुविवेकं विचाराधिकारतया स्वीकरोति नतूपदेशसाध्यं। तादृशमीमांसाधीनश्च नित्यानित्यविवेको द्वितीयाध्यायसाध्य इति न तस्य पूर्ववृत्तत्वमित्यर्थः। नन्वस्मादेवासंभवात् वेदान्तशास्त्रबहिष्ठविचारादिसाध्य नित्यानित्यवस्तुविवेक

यदि च वैधं वेदान्तश्रवणमिच्छसि, तदा कर्ममीमांसायां कुतस्ते कोपः। श्रूयते हि "स्थाणुरयं भारवाहः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम्" (यास्कनिरुक्तिः) इति। तेन कर्मभागश्रवणपूर्वकमेव ब्रह्मभाग श्रवणमिति सिध्यति। न तावत् अनधीतवेदस्य वेदान्तश्रवणमुपपद्यते; अनधिकारात्। न चोपनिषन्मात्राध्ययनं कस्यचित् शास्त्रार्थः; "स्वाध्यायोऽध्येतव्यः" (तैत्तरीयारव्यकं) इत्यखण्डग्रहणात्। तन्मात्राध्ययनविध्यश्रवणाच्च। कृत्स्नाध्ययने च कृत्स्नार्थविचारमेव विधिः प्रयुङ्क्ते। तथाच ब्रह्मविचारात्पूर्वं पश्चाद्वा कर्मविचारोऽपि कर्तव्य एवेति पश्य। तथाच सति यदि साधनचतुष्टयसम्पत्तिपूर्वकमश्रूयन्त वेदान्ताः, कथमसौ पुनरनपेक्षितं विरुद्धत्वाभिमतं कर्म जिज्ञासेतेति परिशेषात् कर्मविचारस्य पूर्वत्वसिद्धिः। यदा तु कर्म पूर्वं विचारितम्, तदा, "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्" (मुंड-१-२-१२) इत्यादिश्रुतिसिद्धप्रकारेण ब्रह्मबुभुत्सा संभवतीत्यतोऽपि क्रमनियम इति कर्मविचारस्य पूर्ववृत्तत्वमवश्याश्रयणीयम्।

एवं रागप्राप्तश्रवणपक्षेऽपि क्रमसिद्धिः। रागोऽपि साङ्गाधीतसशिरस्कवेदस्याऽऽपातप्रतीत सर्ववेदभागार्थस्य कर्मब्रह्मभागयोरविशेषेण सातिशयनिरतिशयसमस्तपुरुषार्थप्रतीतौ उभयत्राप्यविशेषेण प्रवर्तने क्रममपेक्षमाणः, स्वाध्यायानां सर्वेषां प्रायशः कर्मोपक्रमत्वात् सारस्वताङ्गवत् मुख्यक्रमानुरोधेन

एवाधिकारस्यात्। न द्वितीयाध्याये तन्निरूपणं व्यर्थं तस्य दाढर्यत्वादिति चेन्मैवं। तद्दाढर्याभावे आपातप्रतीतिरूपतयापि शिष्य पूर्वोक्त्ययोगात्। दृढ तरं तु द्वितीयसाध्यमिति न पूर्ववृत्तत्वमिति भावः।

ननु वेदान्तवाक्यस्य विधिरस्ति कर्मविचारस्येत्यत्राह। श्रूयतेहीति। तस्य कर्मब्रह्मकाण्डसाधारणत्वादिति भावः। अस्तु को दोष इत्यत आह तेनेति। पूर्वोत्तर भागविधिनुष्ठाने क्रममाकांक्षमाणः प्राजापत्यपशुपदार्थानुष्ठानक्रमवद्विचार्यस्य क्रमानुसारेण तदितिकर्तव्यतारूप विचारक्रममंगीकरोतीति पूर्वमीमांसायाः प्राथम्यमित्यर्थः। प्रकारांतरेणापि क्रममुपपादयति न तावदिति। अनधिकारादिति "स्थाणुरयमिति" वाक्येऽधीतवेदस्तद्विचारये दिति विधिपर्यवसाने नाध्ययनस्य तदधिकारत्वादिति भावः नतूपनिषन्मात्राध्ययने विचारो युक्तः अधिकारस्य सत्वादित्यत्राह नचेति। कस्यचिदिति। कस्यापि मते अध्ययनविध्यर्थो न भवतीत्यर्थः। विहिताध्ययनस्यैव (अधिकारत्वाप्येकदेश) विचारविधावधिकारः कृत्स्नस्वाध्यायाध्यमनस्यैव विधानान्नैकदेशाध्यायिनो विचाराधिकार इति भावः। ननु कृत्स्नाध्ययनस्य अधिकारत्वेप्येकदेश विचारः कुतो न स्यादित्यत्राह कृत्स्नेति। "अधीत्य वेदं विचारयेदि"त्यत्राधीतस्वाध्याय मात्रस्यैव विचारविषयतया प्रतीतेरिति भावः। ननु भवतु विचारद्वयकर्तव्यत्वं तथापि कर्मविचारस्य पूर्ववृत्ततमित्यत्राह तथा च सतीति। विचारद्वय कर्तव्य तायां सिद्धायां ब्रह्मविचारानन्तरं ब्रह्मविचारापेक्षित शमदमादिविरुद्धस्य कर्मविचारस्यासंभव एव स्यादिति ब्रह्मविचारात्प्रागेव कर्मविचार इति भावः। विचारद्वय कर्तव्यत्वे सिद्धे किं प्रथमं विचार्यमिति विशये त्रिवर्गे प्रथमप्रावण्यात्कर्मविचारमतिक्रम्य ब्रह्मबुभुत्साविरहात्तदर्थं तद्विचारासंभवात्तद्विविदिषार्थं कर्मविचारः पूर्वं भविष्यतीत्याह यदात्विति।

प्रसंगादाह एवमिति। तदेवोपपादयति रागोपीति। स्वाध्यायेति। कर्तव्यताभूतेति। इदं च पंचमे चिंतितं "मुख्यक्रमेणचांगानां तदर्थत्वा" (जै.मी.सू.५-७-२-१) दित्यधिकरणे "सारस्वतौ होमौ भवतः" (तै.सं.३) इति विहितयोरेतद्वैधव्यमिथुनमिति स्त्रीपुंसदैवत्यत्वं निश्चितं। तत्र च याज्यापुरोनुवाक्य क्रमात स्त्रीदेवत्यं पूर्वं पुंदेवत्यं पश्चादिति प्रधानयोः क्रमे सिद्धे तत्क्रमानुसारेण निर्वापादिक्रम इति निर्णीतं।

स्वाध्यायेतिकर्तव्यताभूतमीमांसाक्रमं प्रयुञ्जानः, "काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः। क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा।" (श्री भ.गीता-४-१२) इति न्यायेन त्रिवर्गे प्रथमप्रावण्यरूपमर्थ क्रमञ्चापेक्षमाणः, "यज्ञेन दानेन" (बृह-६-१०-२२) इत्यादिना यज्ञाद्यङ्गकोपासनविधौ यज्ञादि दृष्टान्तेषु यज्ञादिकल्पने च पदार्थभूतयज्ञादि स्वरूपाधिगमसाकाङ्क्षतया पूर्वमेव कर्मविचारक्षेपं पश्यन्, ब्रह्मविद्याङ्गभूतकर्मसमृद्ध्यर्थतया ब्रह्मदृष्टिरूपतया च शारीरके मुख्यसङ्गतस्योद्गीथविद्यादेश्च कर्माङ्गाश्रयतया तदाश्रयाङ्गकर्मपरिज्ञानज्येष्ठतामालोचयन् कर्मब्रह्ममीमांसयोः क्रमेण पुरुषं प्रवर्तयति।

किंच प्रसङ्गचिन्तितस्याप्यर्थस्य प्रकृते केनचिदुपयोगेन भवितव्यम्। तत्र यद्यपि विद्यारूपत्वाविशेषात् इहोद्गीथविद्यादीनां प्रसङ्गः सम्भवति, तथाऽपि तच्चिन्तनस्यात्र क उपयोगः। कर्मिणां तदनुष्ठानेन कर्मसाद्गुण्यार्थमिह चिन्तेति चेन्न; कर्मनिष्ठस्यात्र शास्त्रे त्वयाऽधिकाराभावकथनात्। अथ यदि कर्मवित् मध्ये समागत्य स्वोपयुक्तांशं कंचिच्चिन्तयत्विति मन्यसे, तदसत्; अनिरूपितब्रह्मस्वरूपस्य ब्रह्मदृष्टिरूपासु तासु चिन्तनानवकाशात्। तदाह "उद्गीथाद्युपासनानि कर्मसमृद्ध्यर्थान्यपि ब्रह्मदृष्टिरूपाणि ब्रह्मज्ञानापेक्षाणि" (श्री भाष्यं -जिज्ञा) इत्यादि। अथ स एव कर्मार्थं ब्रह्मापि चिन्तयेत्, तर्हि तत एवैकशास्त्र्यं तावत् सिद्धम्। प्रागुक्तनयेन क्रमश्च। गुणप्रधानभाववैपरीत्यमेव तु भवता साधितम्।

तद्वत्क्रम इति। कर्तव्यतात्वं च स्वाध्यायं प्रति मीमांसायाः "धर्मे प्रमीयमाणे ही" त्यादिनेति भावः। अर्थ क्रमं चेति। "अग्निहोत्रं जुहोति" (तै.सं.१-७-५-२) "यवागूं पचती" त्यत्रासामर्थ्यरूपोऽर्थः क्रमनियामकत्वेन स्वीकृतं "अर्थाद्वेत" यविधिकरणे इत्यर्थः। अत्रापि त्रिवर्गप्रावण्यनिवृत्तिं विना मोक्षकामना न संभवति। कर्मविचारस्य प्रतिबन्धकनिवृत्तिसंवादकतयापि प्राथम्यमिति भावः। यज्ञाद्यंगकेति। विद्यां प्रति कर्मणामंगत्वविधावित्यर्थः। यज्ञादिदृष्टांतेष्विति "भूम्नः क्रतुवज्यायस्त्वं तथाच दर्शयति" (ब्र.सू.३-३-७७) "पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत्" (ब्र.सू.३-३-४४) "अक्षरधियांत्ववरोधस्सामान्य तद्भावाभ्यामौपसदवत्तदुक्तं" (ब्र.सू.३-३-३३) मित्यादावित्यर्थः। यज्ञादिकल्पनेचेति "तस्यैवं विदुषो यज्ञस्यात्मा यजमानश्श्रद्धापत्नी" (तै.ना.८० अनु) त्यादिनेत्यर्थः। कर्मविचारापेक्षं पश्यन्निति । अनेनार्थक्रमो दर्शितः। कर्मज्ञानस्य विद्याज्ञानार्थमपेक्षितत्वात्। ननु प्रासंगिकोद्गीथविद्यापेक्षत्वमात्रेण न पूर्ववृत्तत्वं युक्तं। सूत्र प्रतिज्ञानपेक्षिततत्वादित्यत आह मुख्यसंगतस्येति। तत्र हेतुः ब्रह्म विद्यांगेति। एवमप्युद्गीथ विद्यायाः कर्मकाण्ड एव विचारोऽस्त्वित्यत्राह ब्रह्मदृष्टिरूपेति। एवं च कर्मविचारस्तृतीयसंगतोपि तत्र बहुतया ब्रह्मविचाराद्बहिःकर्तव्ये पूर्वमेव कर्तव्यमित्यर्थः।

ब्रह्मविद्यांगकर्मसमृध्यर्थतया साक्षात्संगतिरस्तीत्युक्तं। इदानीं प्रसंगसंगतेरभावात् साक्षादेव संगतिरित्याह किञ्चेति। यद्यत्र प्रसंगतश्चिंत्यते तस्य तत्रोपयोगेन भवितव्यं अत इहाप्युपयोगो वाच्य इत्यर्थः। ननु विद्यारूपत्वेन साजात्यमेव प्रसंगः। सतूपयोगाभावेपि विद्यत इत्यर्थः इत्यत्राह यद्यपीति। नहि वयं साम्याभावं ब्रूमः किन्तु तेन न निरूपणमिति ब्रूम इत्यर्थः। ननूपयोगमात्रं विचारप्रयोजकं त्विहोपयोगोपीत्याशंकते कर्मणामिति। नन्वत्र शास्त्रेऽधिकाराभावात्कृत्स्नविचारे मा प्रवर्तिष्ट तन्मात्र विचारे प्रवर्ततामिति शंकते अथेति। परिहरति तदसदित्यादिना। अत्र भाष्यवाक्यं संवादयति तत एवेति। तदाहेति। यदि कर्मार्थमुद्गीथ विद्या निरूपणाय ब्रह्म चिंतयेत् तर्हि ब्रह्मचिंतायाः उद्गीथद्वारा

ब्रह्मविदस्तु तच्चिन्तया क्वोपयोगस्त्वन्मते? कर्मविद्भ्यस्तदुपदेश उपयोग इति चेत्, तर्हि कर्मापि चिन्तयेत् अविशेषात्। अथ विविदिषार्थकर्मसाद्गुण्यसिद्ध्यर्थमिति पश्यसि, तथाऽप्यनुपयोग एव; विविदिषायां जातायामेव श्रवणे प्रवृत्तेः तत्रापि पूर्ववत् परोपदेशार्थत्वायोगात्। कर्मणां च वेदनाङ्गत्वस्य प्रागेव स्थापितत्वात् न विविदिषाङ्गकर्मसिद्धिः। ब्रह्मविद्याभ्यः पृथक्करणमेव प्रयोजनमिति चेन्न; तस्यैकाधिकरणमात्रसाध्यत्वात्। तथाचात्र चिन्तस्यादर्शनात्, प्रकारान्तरैरेव तु बहुशोऽत्र तासां चिन्तनात्। एवं कर्मविन्निरूपणे ब्रह्मवेदनापेक्षणात् ब्रह्मनिरूपणे च कर्मवेदनसापेक्षत्वात् अन्यतरविदोऽशक्यनिरूपणासु उद्गीथविद्यासूभयविद एव चिन्तनावकाश इति फलितम्। शारीरके च ब्रह्मस्वरूपनिरूपणानन्तरमेव तच्चिन्तनं सूत्रितम्। तस्मादत्रैव साक्षात्संगतस्य तच्चिन्तनस्य प्रधानोपयोगापेक्षायामङ्गभूतकर्मसमृद्धिद्वारा अङ्गिनो वेदनस्य शीघ्रनिष्पादनं नाम महान् उपयोगः। तदप्याह "तान्यपि कर्माण्यनभिसंहितफलानि ब्रह्मविद्योत्पादकानीति तत्साद्गुण्यापादकान्येतानि सुतरामिहैव सङ्गतानि" (श्री भाष्यं जिज्ञा) इति।

किंच, "अत्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्। इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्"॥ इति न्यायात् कर्ममात्रेण चेत् अमृतत्वं लभ्येत, कः पुनः कर्माङ्गकात् (मी.शावर भाष्यं) कर्मसमुचिताद्वा

कर्मार्थत्वात्कर्मब्रह्मशास्त्रयोरैकशास्त्र्यं सिध्यतीत्यर्थः। नैतावदेव अनिष्टांतरमपि सिध्यतीत्याह प्रागिति। ऐकशास्त्र्ये सति क्रमाकांक्षायां मुख्यक्रमानुरोधादित्याशयेन क्रमोऽपि सिध्यतीत्यर्थः। अनिष्टांतरमप्याह गुणेति। ब्रह्मोपसर्जनतया हीतरेषां निरूपणमिति सिद्धांतः। त्वया तु ब्रह्मण एव इतरोपसर्जनतया निरूपणं साधितमिति केवलमनिष्टप्राप्तिरेवेत्यर्थः। उपयोगमात्रेण सप्रयोजनत्वमंगीकृत्यैवोक्तं। इदानीमिहोपयोगाभावे एतदधिकारिणस्तत्र प्रवृत्त्यसंभवादिह तन्निरूपणं न स्यादित्याह ब्रह्मविदस्त्विति। कर्मापीति। ब्रह्मवित्कर्मापि चिंतयेदित्यैकशास्त्र्यं स्यात्। यदि च मोक्षसाधनश्रवणादिव्यासक्तस्य मुमुक्षोस्तदसंभवः तदा उद्गीथचिंतापि न स्यादिति भावः। तथापीति। ब्रह्मविद इति। शेषः। तदेवोपपादयति। विविदिषायामपीति। ननु स्वस्य विविदिषायां जातायामपि परस्य विविदिषोत्पादनाय तदर्थकर्मसाद्गुण्यार्थ प्रत्युपदेशायोद्गीथादिचिंतन मित्यत्राह तत्रापीति। कर्मणोऽपि विचारप्रसंगादित्यर्थः। न विविदिषांगेति। प्रासंगिकत्वे ब्रह्मविचारे उद्गीथविद्या न स्यादिति साक्षात्संगतिरेव वाच्येत्यर्थः। नच प्रसंगान्निरूपणोच्छेदः। कर्मविचाराधिकाम्यतयैवोपयोगितयैव विशेषलक्षणे संगतस्याद्योपादानिकशेषत्वस्य "प्रयुक्तध्याये" चिंतनादिति भावः। तथाचात्रेति। उद्गीथविद्याब्रह्मविद्याचोदनेति विचाराभावादित्यर्थः। हेत्वंतरेणापि साक्षात्संगतिं साधयति एवमिति। विचारद्वयसापेक्षतया पृथत्वेन निरूपणीयस्यास्य ब्रह्मचिन्तायां निरूपणं। तत्रैव साक्षात्संगतिं द्योतयतीति भावः। ननु प्रसंगादपि तत्र तन्निरूपणोपपत्तेः कथं साक्षात्संगतिरित्याशंकामात्रं निराकरोति ब्रह्मस्वरूपनिरूपणानन्तरमिति। तथा ब्रह्मविद्यानिरूपणा नन्तरमेव तन्निरूपणं स्यात् न च तथा निरूप्यते। किन्तु ब्रह्मनिरूपणानन्तरमिति। साक्षात्संगतमित्यर्थः। साक्षात्संगता वा कथमुपयोग इत्यत्राह प्रधानेति। अत्र भाष्योक्तिं संवादयति तदाहेति।

अनभिसंहितफलानि विद्यातिरिक्त फलकामनां विना कृतानि। नित्यफलेच्छायामपि कर्मविचारस्यैव पूर्ववृत्तत्वमित्याह किंचेति। सिसित्साविति। अयत्नेनेति शेषः। कर्ममात्रेणेति। आपातप्रतीतिदशायां

ज्ञानादमृतत्वं लिप्सेतेत्येतदप्युक्तं प्रागेव । अतोऽपि कर्मण्येव प्राक्प्रवृत्तिः । कर्मणि तु निरूपिते न्यायपरिश्रान्तचेतस्तया उत्तरोत्तरातिशयितकर्मविधानादिभिः कर्मणामल्पास्थिरफलत्वमवसाय, तत्संवादकानि च, ''परीक्ष्य लोकान्'' (मुं.१-२-१२) इत्यादीनि वाक्यानि प्रागापातधीजनकान्यपि निरूपितसंवादात् यथाश्रुतार्थानि सामान्यतो निश्चित्य, अनन्तस्थिरफलस्य केवलकर्मभिरलभ्यतां मत्वा, प्राचीनकर्मोपस्कृतज्ञानसाध्यानन्तस्थिरफलाऽऽपातप्रतीत्या प्रतिबन्धकरहितया सञ्जातबुभुत्सातिशयः शारीरकशास्त्रमारभेतेति स्थितमेतत् ।

कथंच नित्यानित्यवस्तुविवेकसिद्धये शास्त्रान्तरावकाशः ? प्रागुपनयनात् कामचारवादभक्षितया यथोपलब्धकुक्षिंभरेर्बालस्य शास्त्रान्तरावतारशङ्काऽपि नास्ति । उपनीतस्य वेदाध्ययने नियुक्तत्वात् अधीतवेदस्यापि तदर्थविचारे विधिना रागेण वा प्रेरितत्वात् तयोश्च विंशतिलक्षणीश्रवणमन्तरेणानुपरमात् । अक्रमप्रवृत्तांस्तु न शास्त्राधिकारिण इति स्वीकुर्मः । अन्यथेदानीमेव अकृतव्रतस्य अनधिगताङ्गस्य लिखितपठितस्वाध्यायस्यैव मीमांसाधिकारप्रसङ्गात् । सौगतादीनामप्यस्मन्मतदूषणार्थिनां ब्रह्मविचाराधिकारप्रसङ्गाच्च । अतो हेत्वन्तरान्नित्यानित्यवस्तुविवेकोऽयमाशामोदकायते । तेनान्यस्मात् तदसिद्धौ न तद्वतो ब्रह्मविचारः, तेनैव तद्वतेति तु मिथस्संश्रयः पुनरुन्मज्जति । एतदभिप्रायेण भाष्यम्- ''नित्यानित्यवस्तुविवेकादयश्च मीमांसाश्रवणमन्तरेण न संपत्स्यन्ते'' इत्यादि ।

एतेनैव द्वितीयोऽपि कल्पो दूषित इति भाष्यकाराभिप्रायः । तथा हि-यदि नित्यानित्यौ पदार्थौ प्रमाणेन निश्चित्य तद्गते हेयोपादेयत्वे विविच्येते, तदा पूर्वोक्तमेवोत्तरम्, चक्रकापत्तेः । अथ नित्यमस्ति

तत्राप्यक्षयफलत्व प्रतीतेः । 'सर्वेभ्यः कामेभ्य' (जै.मी.सू.३-३-१) इत्यादिना सर्वान्तर्गतमोक्षफलत्वप्रतीतेश्चेति भावः । प्रागेवेति ऐकशास्त्र्यसमर्थन स्थल इत्यर्थः । न्यायपरिश्रान्तचेतस्तथेति सम्यगभ्यस्तन्यायतयेत्यर्थः उत्तरोत्तरेति प्रयत्नतारतम्यात्फलतारतम्यासिद्धिः । तच्च स्वरूपतःकालतोवा वाच्यं । तथा आवृत्तिविधानादिभिरपि तत्सिद्धिरित्यर्थः । तत्संवादकानीति उत्तरोत्तरातिशयितादिस्थलेष्वनित्यत्वनिरूपकन्यायसंवादित्वाद शांतरेपि यथाश्रुतानिति निश्चित्येत्यर्थः । प्रतिबन्धकरहितयेति । उक्तरीत्याप्रथमभाविन्याः कर्मजिज्ञासायाः निवृत्तेरिति भावः । संजात बुभुत्सातिशय इति । कर्मफलानि नित्यत्वनिश्चयातिशय हेतुः ।

एवमौपदेशिकनित्यानित्यत्व पक्षो दूषितः । शास्त्र जन्यनित्यानित्यत्वपक्षे दोषांतरमाह कथं चेति । कामचारेति (तथानिश्चयातिशय हेतुः) तथा चानुपनीतस्य यथेच्छाचारिणो भोजनमात्रप्रयोजनस्य अलौकिकपुरुषार्थेच्छाविरहेण तदर्थं शास्त्रान्तरे प्रवृत्तिर्न संभवतीत्यर्थः । विधिना रागेणवेति मतभेदेन तयोरिति विधिरागयोरित्यर्थः । नन्वध्ययनानन्तरं अध्यापकाभावादिना ब्रह्मविचारप्रतिबन्धे सति ख्यतिलाभार्थं सांख्यादिशास्त्रे प्रवृत्तिर्युज्यतैवेत्यत्राह अक्रमप्रवृत्ता सत्विति । अध्ययन विधिप्रयुक्तक्रमातिक्रमेणप्रवृत्तावित्यर्थः । मीमांसाधिकारप्रसंगादिति । तथा च ''अथातो धर्मजिज्ञासे'' (जै.मी.१.१.१) त्यत्र वेदाध्ययनानन्तर्यमथ शब्दाऽर्थो न स्यात् । एवं ''अथातश्शेषलक्षण'' (जै.मी.सू.३-१-१) मित्यादावपि पूर्वाध्यायार्थवृत्तत्वमर्थोत्व न स्यादिति भावः । सौगतेति । तथा च साधनचतुष्टय पूर्ववृत्तत्वमसंभवीति भावः । तेनैवेति । वेदान्तशास्त्रादेव तन्निश्चये मिथस्संश्रय इत्यर्थः ।

हेयोपादेयत्वविकल्पो द्वितीयः कल्पः। तं दूषयति । एतेनेति । पूर्वोक्तमिति । अन्योन्याश्रय इत्यर्थः ।

चेत्, तदुपादेयम्; अनित्यं चेत्, अनुपादेयमित्येवमात्मविवेकः-तदपि मन्दम्; अपुरुषार्थत्वे नित्यस्यापि अनुपादेयत्वात्, अनित्यस्यापि पुरुषार्थतायामुपादेयत्वात्। अत एव ह्यनित्यस्वरूपस्य मोक्षसाधनस्य अनुष्ठानम्। अथ पुरुषार्थेषु नित्यमस्ति चेत्, तदेवोपादेयमिति विवेकः एवंविधसंशयात्मकविवेकस्तु शास्त्रान्तरे कर्मविचारेऽपि प्रवर्तयितुमलमिति नासाधारण्यम्। तत्रापि हि, ''अपाम सोमममृता अभूम'' (तै.सं.३-२-५) ''अक्षय्यँ ह वै चातुर्मास्ययाजिनः सुकृतं भवति'' (आप श्रौत-८-२-२) इति नित्यफलापातप्रतीत्या संशय उपपद्यते। वस्तुतस्तत्र नित्यफलं नास्तीति चेत्, किमतः? अधिकुर्वाणस्य तदनिश्चयात्। आप्तवाक्यादेवाऽऽदौ निश्चिनोतीति चेत्; तर्ह्यत्रापि तत एव नित्यमस्तीति निश्चिनुयादिति, ''नित्यमस्ति चेत्'' इत्येवंरूपयद्युपनिबन्धनानुपपत्तेः तथा निश्चये च प्राग्वदेवोत्तरम्। यदि नित्यमस्तीति सामान्यतो विस्रम्भः, तर्हि इदं नित्यम्, इदमनित्यमिति विविच्योपदिष्टेऽपि शक्यं विश्वसितुम्। तथाच वृथा वेदान्तवाक्यविचारः इति।

या च शमदमादिसाधनसम्पत्, सा किं श्रवणौपयिकतादात्विकावधानरूपा विवक्षिता, उत ''शान्तो दान्तः'' (बृह.६-४-२३) इत्याद्युक्तजितेन्द्रियत्वरूपेति। पूर्वस्यास्तावत् हेतुत्वमिच्छामः तस्याः सर्वग्रन्थश्रवणसाधारण्यात् ''नासौ वेदान्तश्रवणे विशेषः'' इति नात्र तद्विवक्षा युक्ता। सांख्यादि श्रविणोऽपि हि तादृग्विधतादात्विकशान्त्यादिसम्पत् युक्तैव। द्वितीया तु न श्रवणं प्रति साधनम्, ''शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येत्'' (बृह.६-४-२३) इति दर्शनसाधनतया तच्छ्रुतेः। न च तद्दर्शनं श्रवणफलमिति दर्शनसाधनभूतश्रवणाङ्गत्वं शमादीनामिति वक्तुं युक्तम्; श्रुतहानाश्रुतक्लृप्त्यादिदोषप्रसङ्गात्। अविधेयज्ञानवाद-शब्दजन्यप्रत्यक्षयोश्च निरस्तत्वात्

चक्रकेति। श्रवणेन नित्यानित्यत्वनिश्चयः तेन हेयोपादेयताज्ञानमनेन श्रवणमिति चक्रकं इत्यर्थः। अपुरुषार्थत्व इति। पुरुषार्थशब्दः सुखादिपरः। उपादेयत्वशब्दः इच्छाविषयत्वपरः। विवेकिनामनित्यं अनुपादेयमेवेत्यत्राह अत एवेति। सामान्यतो वेदान्ते नित्यमस्तीति निश्चये दोषांतरमाह अथेति। कर्मकाण्डेऽपि यथोक्तविवेकसत्वे हेतुमाह तत्रापीति। तत्रापि नित्यमस्तिचेत्तदुपादेयमिति ज्ञानसंभवादिति भावः। वस्तुत इति। सोमचातुर्मास्य फलादेरनित्यत्वादिति भावः। किं तत इति। आपात प्रतीतेरुक्तविवेकस्य सत्वे बाधकाभावादिति भावः। आप्तवाक्यादिति - तथा च पूर्वकाण्डे आपात प्रतीतिरपि नास्तीति भावः। आप्तवाक्यादिति। तथा च पूर्वकाण्डे आपातप्रतीतिरपि नास्तीति भावः। ननु यद्युपबन्धो सो(मा) स्तु निश्चय एवासत्वित्यत्राह तथा निश्चयेचेति। तदेव विवृणोति यदिति। तर्हि तन्नित्यमिति। ननु यस्य सामान्येन वेदान्तवाक्यानि नित्यपुरुषार्थप्रतिपादकानीत्युपदेशो विशिष्यतु नोपदेशः तं प्रति विचारः सार्थक इति चेन्न। नित्यविधि संभावनयापि प्रवृत्युपपत्तेः। तस्याश्च सांगाध्ययनादेव सिद्धत्वादौपदेशिकनित्यत्वावधारणस्य कल्पनानुपपत्तेरिति भावः।

ननु यद्युक्तस्य पूर्ववृत्तत्वमिच्छसि भग्नं तर्हि कर्म विचारस्य पूर्ववृत्तत्वमित्यत्राह तस्याइति। साधारणस्य विशिष्य पूर्ववृत्तत्वं कथं नायोगादिति भावः। साधारण्यमुपपादयति सांख्यादीति। शांतिरंतरिंद्रियजयः। दांतिर्बर्हिरिन्द्रियजयः। दर्शनसाधनतया दर्शनांगतयेत्यर्थः। नच श्रवणद्वारा दर्शनांतरत्वं श्रुत्यर्थ इत्यत्राह नचेति। शांतः पश्येदिति। समभिव्याहारात्साक्षाच्छ्रुतस्यांगत्वस्य त्यागः। अश्रुतस्य श्रवणद्वारकल्पनमिति दोषस्यादित्यत्राह मुख्यांगत्वे संभवति। श्रुतेति। ननु दर्शनस्या विधेयतया(त्वेन)तदंगस्यासंभवेन मनननिधिध्यसनयोश्च श्रवणांगत्वेन मुख्यांगत्वे संभवति

(वादौ - ४-७)। एषां च शमादीनां ब्रह्मविद्याङ्गतयोपादेयत्वं साधनलक्षणे शमदमाधिकरणे(ब्र.सू. ३-४-२१)ऽवगन्तव्यम्। अत एते शमादयः कथं शारीरकश्रवणात्पूर्वमुपात्ताः स्युः? अयमत्र संग्रहः-

''शान्त्यादयो विधास्यन्ते विद्याङ्गत्वेन संयुताः। शास्त्रारम्भे कथं तेषामुपयोगस्त्वयोच्यते''॥

इदं चोक्तं भाष्ये ''नित्यानित्यवस्तुविवेकादयश्च'' इति आदिशब्देन संग्रहात्। तथा शमादीनां साधनत्वावगतेः कर्ममीमांसापेक्षतया कर्मविचारपूर्ववृत्तत्वस्य दुस्त्यजत्वमप्युक्तम्-''एषां साधनत्वंविनियोगावसेयम् विनियोगश्च श्रुतिलिङ्गादिभ्यः। स च तार्तीयः'' इति। यद्यपि शारीरकमीमांसायामेवापेक्षिताः श्रुतिलिंगादयोपि व्युत्पादयितुं शक्यन्ते तथाऽपि संगतिविशेषात् सामान्यतस्तृतीयाध्याय एव तद्व्युत्पादनं प्राप्तमिति सिद्धोपयोगमात्रमत्र कर्तव्यम्; न पुनस्तद्व्युत्पादने प्रयतितव्यम्।

इदं च तार्तीयश्रुत्यादिसापेक्षत्वाभिधानं प्रदर्शनार्थम्; कथं वेदप्रामाण्यस्थापनमन्तरेण तदर्थभूत ब्रह्मविचारोऽपि स्यात्? तत्प्रामाण्यं च प्रथमाध्यायसाध्यम्। कथं च सामान्यतः शास्त्राणां शास्त्रार्थानां वा द्वैतीयभेदाभावे दुरनुष्ठानतादुःस्थं प्रामाण्यं प्रतिष्ठितं भवेत्? कथं वा विद्याख्येषु शास्त्रार्थविशेषेषु भेदाभेदचिन्तावकाशः? तेन शब्दान्तरादयो द्वैतीयाः विशेषतश्चिन्त्याः। तार्तीयोपयोगस्तु दर्शितस्थलान्तरे भाव्यः श्रुतिलिङ्गादेस्सर्वत्रापेक्षणात्। उद्गीथविद्यादेः क्रत्वर्थत्वपुरुषार्थत्वादिविमर्शस्तु तौर्यप्रयुक्तिसापेक्षः।

तदंगत्वकल्पनायोगात् श्रवणं प्रत्येव अंगत्वमित्यत्राह अविधेयेति। मोक्षसाधनीभूत दर्शन समानाकारज्ञानस्य विधेयत्वात् तदंगत्वंयुक्तं। शब्दजन्यप्रत्यक्षस्य निरस्तत्वाच्छ्रवणद्वारापि तदंगत्वं न युक्तं। श्रवणांगत्वेपिन पूर्वभावः फलोपकार्थंग त्वेन सन्निपत्योपकारित्वात् शमादीनामिति भावः। किं च वेदांतश्रवणेनैव ब्रह्मविद्यांगत्वावगमः शमादीनामपि तदनंतरमेव उपादेयानां न श्रवण पूर्वभावित्वमित्याह एषामिति। शमाद्युपेतस्यादि (ब्र.सू.३-४-२१) त्यधिकरणे विधांगतया निर्णयादित्यर्थः। अत एवेति। पूर्वं तदंगतया ज्ञानाभावादिति भावः॥ उक्तमर्थं कारिकया संगृह्णाति। शांत्यादय इति। विधास्यंते ब्रह्मविद्यांगतया निरूपयिष्यंतेत्यर्थः।

संग्रहादिति। संग्रहं कृत्वेत्यर्थः। दुस्त्यजत्वमप्युक्तमिति भाष्य इत्यनुषंगः। भाष्यं चोदाहरति तेषामिति। शमादीनामित्यर्थः। संगतिविशेषादिति। शेषत्वनिरूपणायोपोद्घात रूपसंगति विशेषादित्यर्थः। अत्र कर्तव्यमिति। वेदान्तविचार इत्यर्थः।

भाष्ये सापेक्षत्वाभिधानं पूर्वतंत्रनिरूपितानां सर्वेषां प्रदर्शनार्थमित्याह। इदं चेति। अन्यानपि पूर्वतन्त्रसिद्धानाह कथं वेति। शास्त्राणां शास्त्रर्थानां वेति गुरुमते शास्त्रभेदोद्वैतीयः। भट्टमते शास्त्रार्थ भेदः। तथाच द्वैतीयपूर्वपक्षे न्याये न सर्वशास्त्रर्थस्यैकत्वे तदनुष्ठानस्याशक्यतया अननुष्ठानलक्षणा प्रामाण्यं स्यादिति प्रामाण्यं प्रतिष्ठितं न स्यादिति भावः। उपयोगांतरमप्याह कथं वा विद्याख्येष्विति। विशेषतःश्चिंत्या इति विशेषत उपजीव्यइत्यर्थः- तदधीत इति। एकशास्त्रत्वसमर्थने विशिष्य दर्शितस्तत्र द्रष्टव्य इत्यर्थः। अत्रापि संग्रहेणाह श्रुतिलिंगादेरिति। यज्ञेन दानेनेति। कर्मादीनां श्रुत्यादिभिरेव विद्यांगत्व निर्णयादिति भावः। क्रत्वर्थ पुरुपार्थत्वादिति। आदिशब्देन क्रतुप्रयुक्तत्वादित्यर्थः। तुर्यस्य -चतुर्था ध्यायस्य संबंधितौर्यं षोढाविभक्तेनि श्रुत्यर्थः। पदस्थानमुख्यप्रवृत्तिभेदेन क्रमप्रमाणानां षोढा भेदः। कर्तृलक्षणेति।

षोढाविभक्त-पाश्चमिकक्रमप्रमाणापेक्षिणी च अर्चिराद्यातिवाहिकगणपौर्वापर्यव्यवस्था। कर्तृलक्षणन्यायोपजीविनी च ब्रह्मविद्याधिकारवर्णाश्रमादिधर्मविशेषस्थापना। एवम्, "तेषामेकैक एव तावान् यावानसौ पूर्वः" (१) इत्यादिष्वप्यतिदेशादिसापेक्षत्वमनुसन्धेयम्। सूत्रकारोऽपि तदुक्तमित्यादिना कर्ममीमांसायां सामान्यन्यायान् पृथक्सिद्धानुदाहरति (१) इति भवद्भिरपि व्याख्यातमेव। न चायं शारीरके वक्तव्यमेव तन्द्रालुतया परोपजीवनेन दर्शयतीति वाच्यम्; तत्र तत्रैव तत्सङ्गतेः स्थापितत्वात्। न च प्रसिद्धैर्न्यायैः स्वयमेव वेदप्रामाण्यादिकं विचारयामः, किं जैमिनीयेनेति वाच्यम्; तथाऽपि कर्मविचार पूर्ववृत्तत्वस्य दुष्प्रतिक्षेपत्वात्। तत्र विचारसागरे परिप्लवमानानां यदि जैमिनिना कर्णधारायितम्, स एष क्षम्यतामपराधः। एवं च लोकोत्तरप्रज्ञेन भवता बादरायणीयमपि नादरणीयम्; अविशेषात्। न चायं क्रमनियमोऽर्थस्वाभावादापतन् जैमिनीयो बादरायणीयो वा, येन तत्राभ्यसूयिष्यति। अतः कार्त्स्न्येन कर्ममीमांसासापेक्षत्वप्रदर्शनार्थमेव शमादिसाधनत्वावगतेस्तार्तीयापेक्षाभाषणम्।

यद्यपि इहामुत्रफलभोगविरागमुमुक्षुत्वे पूर्ववृत्तत्वेन भाषिते (यद्यपि इहामुत्रफलभोगविरागो मुमुक्षुत्वं चेत्युभयं नियतपूर्ववृत्तमसाधारणं सप्रयोजनाभिधानं चेत्यभ्युपगच्छामः, तथोक्तं भाष्ये-), "अधिगताल्पास्थिरफलकेवलकर्मज्ञानतया संजातमोक्षाभिलाषस्य अनन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी"ति (श्री-भाष्यं-जिज्ञा) तथाऽपि पुरुषप्रवृत्तिक्रमविशेषसूचनस्वारस्यात् कर्मविचारपूर्ववृत्तत्वोक्त्यैव तयोरप्यर्थलब्धत्वात्, अनन्तस्थिरफलतया प्रथममापातप्रतीत

षाष्ठन्यायोपजीवने च ब्रह्मविद्यायां "तदुपर्यपीत्याद्यधिकरणे" (ब्र.सू. १-३-२५) ष्वधिकारिचिंतेत्यर्थः। तेषामिति। ब्रह्मविद्याभेदानुपदिश्योत्तरेषां विद्याभेदानां पूर्वविद्याधर्म "एतद्‌ब्राह्मणानि"तिवदति दिश्यत इत्यर्थः। अतिदेशादि त्यादिशब्देन ऊहादीनां ग्रहणं। सामान्यन्यायादिति । कर्मब्रह्मसाधारणानित्यर्थः। नचेति। तथाच न कर्मविचारस्य पूर्ववृत्तत्वमिति भावः। तत्र तत्रैवेति । मुख्यक्रमाद्यनुसारेण कर्मविचारस्य पूर्ववृत्तत्वे सिद्धे तत्रापेक्षिततत्वान्यायानां तत्रैव संगत्या निरूपितानामे तदधिकारिणा ज्ञानत्वसंभवान्नात्रनिरूपणं नतु तंद्रालतयेति भावः। ननु न्यायज्ञानार्थं न कर्मविचारापेक्षेति शंकते। नचेति । महर्षिकल्पानामपि तदुत्पादनाय जैमिनीय शास्त्रापेक्षा वाच्या। यथा न्यायानां उत्सर्गापवादस्यातिसूक्ष्मतया दुर्ज्ञानत्वादिति कर्म विचारस्य पूर्ववृत्तत्वं दुष्परिहारमिति भावः । अन्यथा दोषमाह एवंचेति। तादृशबुद्धीनामुत्तरमीमांसापि न स्यादिति येषामुत्तरमीमांसाधिकारः तेषां कर्मविचार आवश्यक इति भावः। नचायमिति। न क्रमो जैमिनिकृतो नापि बादरायणकृतः। पुरुषाधीनत्वाभावादिति भावः। पूर्वकाण्डे व्युत्पादितार्थसापेक्षत्वादपि कर्मविचारस्य पूर्ववृत्तत्वं दुर्निवारमिति वक्तुं भाष्ये तार्तीय शेषिचिन्तानन्तरं शेषचिन्तनवत् न्यायापेक्षणमित्युक्तमित्याह कार्त्स्न्येनेति।

ननु साधनचतुष्टयस्य पूर्ववृत्तत्वनिरसनमयुक्तं युष्मद्भाष्य एव नित्यानित्यवस्तुपूर्वकेहामुत्र फलभोगविरागादेः पूर्ववृत्तत्व कथनादित्याक्षिपति। यद्यपीति। पूर्ववृत्तत्वमिहामुत्रफलभोगविरागादेरस्त्येव न चास्य नित्यानित्य विवेकसापेक्षता आपातप्रतीतिमात्रान्निर्णीता नित्यानित्यफलापेक्षाविरहात्। न चास्य अतश्शब्दार्थत्वमन्यलभ्यत्वात् न तस्य पूर्व वृत्तत्वमपि कथनीयमित्यर्थः। नन्वेवं सति कर्मविचारपूर्ववृत्तत्वं न कथनीयं। मुमुक्षापूर्ववृत्तत्वमात्रादेव तल्लाभसंभवादित्यत आह। अनन्तस्थिर फलतयेति। कर्मनिरूपणपूर्व

कर्माख्यप्रतिबन्धकनिवृत्तिसूचनेन निर्विघातब्रह्मविचारारम्भद्योतनात्, यज्ञादिवाक्यार्थापेक्षितपदार्थ निश्चयवत्त्वव्यञ्जनात् यथावस्थितब्रह्मतदुपासनादितत्त्वावगमहेतुभूतन्यायकलापशीलनोद्भेदात् अपवर्गोपायभूतोपासनापेक्षितानभिसंहितफलसहकारिवर्गस्वरूपनिश्चयांशोपजीवनाभिप्रायाच्च कर्मविचारस्यैव पूर्ववृत्तत्वोक्तिः प्रयोजनवत्तामेतीति तामेवाद्रियामहे। अव्यवहित पूर्ववृत्ततया वक्तव्यमिति चेत्, तर्हि मुमुक्षुत्वमेकमेव त्वयाऽपि वक्तव्यम्। तदर्थतया पूर्वेषामुक्तिरिति चेत् तुल्यम्। प्रयोजनाधिक्यं मिथस्संश्रयाद्यभावश्च विशेषः।

एतेन तापत्रयाभिहतिपूर्ववृत्तत्ववादिनोऽपि प्रत्युक्ताः, तापत्रयाभिहतिमात्रस्य मन्त्रौषधिनीतिशास्त्रादिप्रवृत्तिसाधारण्यात्। दृष्टानुश्रविकविषयवितृष्णापर्यन्तायास्तु तस्याः कर्मविचारसापेक्षत्वस्थापनात्। तथोक्तं सांख्यैरपि,

"दुःखत्रयाभिघाताज्जिज्ञासा तदुपघातके हेतौ।
दृष्टे साऽपार्था चेत्-नैकान्तात्यन्ततोऽभावात्"।।

वृत्तत्वकथनस्य ब्रह्मविचारप्रवृत्त्यौपयिकत्वात्पूर्ववृत्त्वकथनमित्यर्थः। तदेवाह। यज्ञादीति। वेदान्तविचारस्य यज्ञादिस्वरूपत्वात् तत्स्वरूपगत्यादिसूचनेन ब्रह्मविचाराधिकार स्फूर्तिज्ञापनात् कर्मविचार पूर्ववृत्तत्वकथनं सप्रयोजकमित्यर्थः॥ न्यायकलापशिलोद्भेदनादिति। श्रुतिलिंगोपक्रमादिन्यायपरिशोधन सूचनादित्यर्थः। अपवर्गोपायगतेति। अथातश्शेषलक्षणमिति। शेषचिन्तानन्तरं शेषचिन्तनवत् शेषिचिंतेत्यर्थः। ननु कर्मविचारस्याव्यहित पूर्ववृत्तत्वाभावात् कथं तदभिधानमिति शंकते। अव्यवहितेति। तर्हि त्वया नित्यानित्यविवेकादेः पूर्ववृत्तस्योक्तिरसंगतेति प्रतिबंद्या परिहरति। तर्हीति। उभयोः को विशेष इत्यत्र विशेषमाह प्रयोजनेति। अव्यवधानं पूर्ववृत्तत्वकथने, न प्रयोजकं अपितु प्रयोजनवत्वं तच्च उपदर्शितमिति भावः। नित्यानित्यविवेकादिपक्षोक्तदोषाभावश्च विशेषमित्याह मिथः संश्रयेति।

ये तु तापत्रयाभिहतानंतर्य मथातश्शब्दार्थमाहुः। तं मतं प्रत्याचष्टे एतेनेति। एतच्छब्दार्थमाह तापत्रयाभिहतीति। आदि शब्देन स्त्र्यन्नपानादिकं गृहचते। तथाचाध्यात्मिक तापाभिहत औषधे प्रवतति। मंत्रेनेति। शास्त्रे स्त्र्यन्न पानेच प्रवर्तत इति नासाधारण्यमित्यर्थः। ऐहिकामुष्मिकवैराग्य रसदुःखत्रयाभिहतेर्विवक्षितत्वादित्यत्राह दृष्टानुश्रविकेति। कर्मविचारानंतरभावित्वात् तादृशदुःखत्रयाभिहतेरिति भावः।

दुःखत्रयाभिघातादिति। आध्यात्मिकाधि भौतिकाधिदैविक दुःखत्रयानुभवभयात्तदपघातके - तन्निवर्तकि हेतौ जिज्ञासा भवतीत्यर्थः। ननु तथापि आत्मानात्मविवेकादितत्वज्ञानेच्छा न भवति। तन्निवर्तकमंत्रोषधादिदृष्टे वर्तमाने सतीत्याशंकते दृष्टेसापार्था चेदिति। साजिज्ञासा दृष्टोपायमात्रेण जिज्ञासा निवृत्तिर्न भवतीति परिहरति नेति। तत्र हेतुः एकांततोभावात् इति। एकान्तो दुःखनिवृत्तेरवश्यं भावः। निवृत्तस्य दुःखस्य पुनरनुत्पादोत्यंतः दृष्टैरुपायैस्तयोरभावादित्यर्थः। षष्ठ्यर्थे तसिः। ननु माभूतदृष्टोपायः। वैदिकस्तु "ज्योतिष्टोमादिस्तापत्रयमेकांततोत्यंतमपनेष्यति। श्रूयतेहि" ज्योतिष्टोमेन स्वर्गकामोयजेत" (आप.श्रौ.१०.२.१.) "अपामसोममृता अभूमं" (तै.सं.३-२-७) अनंतमपारमक्षय्यं लोकं जयति (तै.ब्रा) "योग्निंनाचिकेतं चिनुते (काठक-३) इति। तथा च वैदिकस्य तापत्रयप्रतीकार हेतोः मुहूर्तयामाहोरात्रमासादि निर्वर्तनीयतया अनेक जन्मपरंपरासंपादनीयात् विवेकज्ञानादि

''दृष्टवदानुश्रविकः स ह्यविशु शुद्धि क्षयातिशययुक्तः। (सांख्यकारिके १-२) इति।

एवं कर्मपरीक्षोपबृंहितैव सा भाष्येऽप्युक्ता, ''तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः'' (श्री भाष्यं जिज्ञा) इति। श्रुतिश्च, ''परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात्'' (मुंड-१-२-१२) इत्यादिका।

अतः, ''अथातो ब्रह्मजिज्ञासा'' (ब्र.सू.१-१-१) इत्यत्र न साधनचतुष्टयाद्यानन्तर्यं सूत्रकृदभिप्रेतम्, अपि तु कर्मविचारानन्तर्यमेव। तथा च वृत्तिकारः ''वृत्तात् कर्माधिगमादनन्तरं ब्रह्मविविदिषा'' (बोधायनवृत्तिः) इति। अयं च पक्षो भास्करैरप्यङ्गीकृतः। निरीश्वरमीमांसकैरपि, ''कृत्स्नाध्येतुर्निश्शेषवेदार्थविज्ञानाय मीमांसारम्भः'' (?) इति वदद्भिः कर्मोपक्रमं शास्त्रमर्थतो ब्रह्मविचारशिरस्कमित्यभ्युपगन्तव्यमेव। न च द्वादशाध्यायमात्रे शास्त्रं पर्यवसितम्; शबरस्वामिप्रभृतिभिः सङ्कर्षकाण्डांशस्थसूत्रोपादानात्। ''शास्त्रान्तत्वादुपनिषद्भागचिन्ता'' इति पक्षस्य च त्वदीयैः कैश्चित् परिग्रहात्' इति॥

इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां साधनचतुष्टयपूर्ववृत्तत्वभङ्गवादः अष्टमः॥८॥

षट्कवत्वात्पुनरपि जिज्ञासा व्यर्थे त्याशंक्याह दृष्टवदानुश्रविक इति। आनुश्रविकमपि कर्म एकांतात्यंतिकदुःखप्रतीकारानु पायत्वात् दृष्टतुल्यः। तत्र हेतुः। सह्यविशुद्धिक्षयातिशययुक्त इति। सोमादियागस्य पशुवधगर्भतयाद्विशुद्धि दुःखहेतुपापत्वमशुद्धिः क्षयातिशयौ तत्फलस्यत्विति। त्वं च स्वगदिकोच्यत्वादनुमितमतिशययुक्तत्वं तु ज्योतिष्टोमादयः। स्वर्गसाधनानि राजसूयादयश्च स्वाराज्यस्यापीति अपामसोममित्यादि च चिरकालावस्थायित्वपरमिति वाचस्पतिना व्याख्यातं। तत्र कर्म विचारानंतरमेव उक्तवैतृष्ण्यं जिज्ञासा चेति भावः।

न तादृशवैतृष्णस्य वृत्तत्वाभिधाने सदुक्त एव पर्यवस्यतीत्याह एवमिति।

अतश्शब्दार्थत्वं कर्मविचारस्यैव तत्ख्यापनस्य सप्रयोजनकत्वादित्युक्तं साधन चतुष्टय पूर्ववृत्तत्वकथनस्य सूत्रकृद्विशिष्टत्वात् वृत्तिकृद्बोधायनात् अवगतमित्याह तथाचेति। निश्शेष वेदार्थेति। पूर्वोत्तरभागयोश्शास्त्रयोरेकत्वं निश्शेषशब्देन सूचितमिति उत्तरभागविचारापेक्षया पूर्वभाग विचारस्य पूर्ववृत्तत्वमभिप्रेत मित्यर्थः न चेति। तथा च न कर्मविचारपूर्ववृत्तत्वमितिभावः। उपादानादिति''॥ ''नाना वा देवतापृथक्त्वात्'' (संकर्षणकाण्ड-१४-२-१४) इति सूत्रोपादानादित्यर्थः॥ द्वितीयैरपि कैश्चिदेक शास्त्र्यमभ्युपगम्यमित्युपसंहरति शास्त्रांतेति॥

॥ वत्सजलधिकौस्तुभनृसिंहगुरु सुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां अष्टमो वादस्समाप्तः॥

॥अथ कथानधिकारवादः नवमः ॥९॥

हयग्रीवसुधासिन्धुहर्षहेपारवोर्मयः।
जयन्ति वादवेलान्तक्षिप्तबाह्यकुदृष्टयः॥

विस्तरेण कुदृष्टिमतमनुभाष्य, ''तदिदम्''इत्यादिना, ''न्यायानुगृहीतवाक्यप्रत्यक्षादिसकल प्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयम्'' (श्रीभाष्यं-जिज्ञा) इत्यन्तेन शिष्यान् प्रत्युपदिशतो भाष्यकारस्यायं भावः, सौगतानामिव प्रच्छन्नसौगतानामपि कथायामनधिकार इति। वेदार्थसंग्रहे च स्पष्टमाह, ''सर्वशून्यवादिनो, ब्रह्मव्यतिरिक्तसर्ववस्तुमिथ्यात्ववादिनश्च स्वपक्षस्थापकप्रमाण पारमार्थ्यानभ्युपगमात् अभियुक्तैर्वादानधिकार एव प्रतिपादितः,

''अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः'' (श्लोकवार्तिके निरालंबनवादः १२९) इति।

अयमाशयः,

''यदि प्रपञ्चमिथ्यात्ववादी वादाधिकारिताम्। भजेन्माध्यमिकस्यापि भवेत् वादाधिकारिता''॥
''तथाच ब्रह्मतत्त्वं ते निर्गुणं निष्प्रमाणकम्। कथं मध्यमबौद्धस्य विवादैर्नापलप्यते''॥

एतच्च विस्तरादुपपादयामः। तत्र यत्तावत्खण्डितम्, कथकयोः प्रमाणादिसत्ताभ्युपगमः कस्य हेतोः? किं तत्सत्ताभ्युपगमसाहित्यनियतस्य व्यवहारस्यान्यथा प्रवर्तयितुमशक्यत्वात्, उत तद्व्यवहारं प्रति तस्य हेतुत्वात्, लोकव्यवहारसिद्धत्वात्, तदनभ्युपगमास्य कथाफलातिप्रसञ्जकत्वाद्वा?

''अथातो ब्रह्मजिज्ञासेति'' (ब्र.सू.१-१-१) सूत्रानुबंध्यर्थाः परेषां प्रथमं दूषिताः। अतः परं प्रमेयदूषणानि वक्तव्यानि। तत्कथनं च न तैस्सहकथायां तेषामधिकाराभावात्किंतु शिष्यान्प्र त्युपदेशरूपेणेति प्रथमं कथानधिकारं तेषां समर्थ्यत इति संगतिमभिप्रेत्य वादार्थं संगृह्णाति। हयग्रीवेति। वादार्थं सूचयति वाद्वेलांतक्षिप्तबाह्यकुदृष्टय इति। बाह्याः बौद्धाः कुदृष्टयो मायिनो वादवेलांतेक्षिप्ताः वादबाह्याः इति यावत्। ''पंचमीति'' (अष्टा-२-१-३७) योगविभागात् तपरवत्समासः। बाह्यग्रहणं दृष्टांतार्थं।

ननूपदेशमात्रेण कथमनधिकार इत्यत्राह अयमाशय इति। सौगतानामिवेति। प्रच्छन्न सौगता मायिनः। तेषामधिकारे सौगतानामप्यधिकारस्यादिति भावः। भाष्यग्रंथस्यायमभिप्राय इत्यत्र किन्निदानमित्यत्राह वेदार्थ संग्रहे चेति। अभियुक्ताःपूर्वतंत्रव्याख्यातारः। अभियुक्तवचनमुदाहरति अधिकार इति। शून्यवादिनामनधिकारवचनस्य कथं प्रकृतसंगतिरित्यत्राह अयमाशय इति। मध्यमो-माध्यमिक स हि कथानधिकारात् निष्कासनीय्य इति मन्यसे तवापि तादृशत्वात् त्वया कथं निष्कासनमिति बंधुत्थापकत्वान्नासंगतिरिति भावः।

नापलिप्यत इति अयमाशय इत्यन्वयः। ननु शून्यवादित्वमात्रात्कथानधिकारित्वोक्तौ अशून्यवादित्वादेव कथानधिकार इति किं न स्यादित्यत्राह एतच्चेति। पूर्वपक्षविस्तरमाश्रित्योपपादयामः इत्यर्थः। पूर्वपक्षमाह तत्रेति। यत्खंडितं तत्र तावदित्यन्वयः। कस्य हेतोःकिमर्थमित्यर्थः। साहित्यनियतस्य साहित्यव्याप्यस्य तद्व्यवहारमिति प्रमाणाधीत वाग्व्यवहारं प्रति सत्ताभ्युपगमस्य हेतुत्वादित्यर्था लोकव्यवहारसिद्धत्वादिति तस्येत्यनुषज्यते। लोके कथकाः प्रमाणादिसत्तामभ्युपगम्य कथायां प्रवर्तत इति कथकानुष्ठानादित्यर्थः। तदनभ्युपगमस्येति। अन्यतरजयादिकथाफलं प्रमाणादिसत्तानभ्युपगमे वादिवाद्यन्यतर विजय नियमोनस्यात् उभयोरविशेषादिति भावः।

न प्रथमः; तमन्तरेण तत्तीर्थकरैस्तदनुसारिभिश्च व्यवहारस्य प्रवर्त्यमानत्वात्। अन्यथा भवतः तन्निरासप्रयासानुपपत्तेः। साधनबाधनक्षमो व्यवहारः प्रमाणादिसत्ताभ्युपगमसाहित्यनियत इति तमन्तरेण तत्क्षमत्वं न स्यादिति चेन्न; साधनबाधनक्षमत्वं प्रति सद्वचनाभासलक्षणयोगित्वस्यैव प्रयोजकत्वात्। सत्त्वाद्यभ्युपगमे सत्यपि आभासे तदक्षमत्वस्य सर्वसंमतेः। अस्मद्वाक्ये चाऽऽभासत्वस्य दुरुपपादत्वात्। सत्तानभ्युपगममात्रेणाऽऽभासत्वोक्तौ सताभ्युपगमेन भवद्यवहार एवाऽऽभास इति विपरिवर्तप्रसङ्गात्। अस्ति च सत्ताभ्युपगमे सत्यपि असिद्धविरुद्धादेरभासत्वम्।

ननु प्रमाणादिसत्ताभ्युपगमाभावेव्यवहारस्यैव धर्मिणोऽसिद्धौ तस्य कथमाभासत्वसाधनम्; कथं वा सद्वचनाभासलक्षणयोगित्वादिप्रयोजकावधारणामुखेन दूषणदूष्यादिव्यवस्थापनम्; सर्वेषां स्थापनबाधनानां प्रमाणाधीनत्वात्। मैवम्; सत्ताभ्युपगममात्रेण प्रसिद्धिसिद्धेः प्रमाणादिभिरस्माकं व्यवहारोपपत्तेः। उक्तञ्च इष्टसिद्धिकारैः, ''सत्यं प्रसिद्धिरस्ति, अत एव व्यवहरामः; किंतु नास्या मूलं पश्यामः'' इति। यथा प्रमाणादीनि सद्रूपाणि स्वीकुर्वता भवता, ''प्रमाणं साधकम्, न तदाभासः'' इत्यादि व्यवह्रियते, तथा व्यवहारिभिरेव सर्वैः प्रमाणादिसत्त्वचिन्तायामुदासीनैःकथा प्रवर्त्यतामिति ह्यादिशामः। यदि चैवं नानुमन्यसे, तिष्ठामस्त्वयाऽस्मास्वारोपिते सत्तानभ्युपगमपक्षे। तथाऽपि मां प्रति त्वदुक्तमाश्रयासिद्ध्यादिदूषणं दुर्वचम्। दूषणं हीदं कथायां प्रवृत्तस्यैव वाच्यम्; न पुनराहरतो विहरतो वा। सा

तत्तीर्थकरा मायिनां गुरवो माध्यमिकाः। तदनु सारिणो मायिनः तदलापे बाधकमाह अन्यथेति। ननु प्रमाणतर्कयोरसत्वे साधन बाधन क्षमता न स्यात्। अर्थ क्रियाकारित्वासंभवात् । तन्निरासप्रयासश्च सिद्धांतिनोधिकाराभ्युपगमादप्युपपद्यत इत्याशंकते साधनबाधनेति। साधनक्षमः साधकः। बाधकक्षमो बाध्य इत्यर्थः। सद्वचनेति। उच्यतेऽने नेति। वचनं सत्प्रमाणलक्षणमित्यर्थः आभासयोगित्वं आभासलक्षणयोगित्वमित्यर्थः। तत्र युक्तिमाह सत्वाभ्युपगम इति। आभासेति। आभासलक्षण इति। अस्मद्वाक्य इति। अस्मद्वाक्यप्रतिपाद्य इत्यर्थः। नियामकाभावेप्युक्तदोषमाह सत्तेति। सतोप्याभासलक्षणयोगं दर्शयति अस्तिचेति। आभासत्वमिति दृश्यत इति शेषः।

ननु प्रमाणादिसत्तामनभ्युपगच्छंतः कथं प्रमाणैर्व्यवहरेयुः। कथं व्यवहारासिद्धौ प्रतिवादिपूर्ववाद्युपन्यस्त प्रमाणादेरा भासत्वं साधयत्कथमेवंत्वात् सल्लक्षणयोगि इदमेवं त्वादसल्लक्षणयोगि अत इदं दूषणेन दूष्यं इदं नेति व्यवस्था स्यात्। स्थापनानां बाधनानां प्रमाणाधीनसिद्धत्वात् प्रमाणस्यैवासत्वे कथं लक्षणयोगादि निर्धारणमिति शंकते प्रमाणादिति। प्रसिद्धिसिद्धेरिति। प्रसिद्धिःव्यवहारः। तत्सिद्धेः व्यावहारिकैरितियावत्। व्यवहारे प्रमाणादीनां सत्व प्रयोजकमित्यभिप्रायेण इष्टसिद्धिग्रन्थं व्याचष्टे यथेति। तथा व्यवहारिभिरेवेति व्यवहर्तृपुरुषैः प्रमाणं प्रमाणाभास इति उपगतैस्तथा प्रवर्त्यतां इत्युदासीनैः इत्यर्थः। यद्वा व्यावहारिकैरेव प्रमाणैः प्रमाणतदाभासाभ्युपगममात्रेण प्रवर्त्यतामित्यर्थः। सत्वासत्वसत्वौदसीनैरित्यनुपपन्नं। भवन्मते सत्वाभावस्य सिद्धत्वादित्यत आह यदि चैवमिति। ननु सत्तानभ्युपगमे आश्रयासिद्धत्वादिदोषैः निग्रहस्यादित्यत्राह तथापीति। दुर्वचत्वमोवोपपादयति दूषणं हीदमिति। कयापि मर्यादया प्रवर्तनीयेति

च कथा कयाऽपि मर्यादया प्रवर्तनीया। तत्र वादिप्रतिवादिभ्यां सत्त्वाभ्युपगमे तादृक्पर्यनुयोगानवकाशः। उभाभ्यामसत्त्वाभ्युपगमे परस्येव स्वस्यापि प्रसङ्गः। एकेन सत्त्वम् इतरेण चासत्त्वमभ्युपगम्य प्रवर्तितायामिदं दूषणमुच्यते चेत्, तद्वदेव कथान्तरस्यापि प्रसक्तिरनिवार्या; कथानियमस्य चोभयाभ्युपगमप्रकारानुरोधित्वात्। अन्यथा कस्य स्वेच्छया त्वदुक्तेऽपि, वाङ्मात्रेणापि दूषणप्रसङ्गेन जयपराजयव्यवस्थाभङ्गप्रसङ्गात्। यश्चैकस्तस्यां कथायां प्रमाणादिसत्त्वमिच्छति, तस्यैवैषा नियमभरयन्त्रणा। अथोभाभ्यामपि प्रमाणादिसत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा प्रारब्धायां कथायां दूषणमिदमुच्यते तदा स्वाभ्युपगमविरोध एव त्वयैवाऽऽपादितः स्यात्।

अथ दुर्वैतण्डिकेन कथां बद्ध्वा तस्यैव दूषणं न ब्रूमः; अपितु शिष्यादीन् प्रति तस्य कथानधिकारं दर्शयाम इति चेन्न; शिष्यादीन् प्रत्यपि चार्वाकसौगतमायावादिनामयं दोष इति वक्तव्यम्; स च दोषो निग्रहस्थानात्मा, तस्य कथाप्रवेशाप्रवेशयोः न तद्बाधक्षमः; न च कथामन्तरेण निग्रहः।

नापि द्वितीयः; सत्ताभ्युपगममन्तरेणापि प्रमाणादीनां व्यवहारहेतुत्वस्य माध्यमिकादिषु प्रदर्शितत्वात्। अथ व्यवहारहेतुत्वादेव प्रमाणादीनां सत्त्वम्, सत्वाच्च तदभ्युपगमः असतोऽभ्युपगमायोगादित्युच्यते, तदपि न; अस्याप्यर्थस्य कयाऽपि नियमस्थित्या प्रवर्तितां कथामन्तरेण दुःसाधत्वात्। ततश्च सिद्धा सत्ताभ्युपगमात्पूर्वं कथाप्रवृत्तिः। न च साऽपि नियमस्थितिः

वादिप्रतिवादिभ्यामुभाभ्यां सत्वाभ्युपगमेन समयबंधं कृत्वा कथाप्रवर्तनीया उतासत्वाभ्युपगमेन अथवा एकेन सत्वमितरेणासत्वमभ्युपगम्य आहोस्विदुभाभ्यामपि प्रमाणादिसत्वाभ्युपगमौदासीन्येनेत्यर्थः। तत्राद्यपक्षेतद्दूषणोद्भावनं न संभवतीत्याह तत्र वादिप्रतिवादिभ्यामिति। आश्रयासिद्ध्यादेरभावादिति भावः। द्वितीये दोषमाह उभाभ्यामिति। स्वव्याघातादिति भावः। तृतीये दोषमाह एतेन सर्वमिति। तद्वदेवेति। यस्यां कथायां दूषणमुद्भाव्यते तद्वदेव कथांतरस्यापि प्रवृत्तिः। अन्यथा आश्रयाभावाद्दूषणमेव नोद्भाव्यं स्यादित्युभयथापि दूषणोद्भावनमयुक्तमिति अर्थः। प्रतिबंदिमुक्त्वा दोषांतरमाह कथनीयस्य चेति। असत्वाभ्युपगंतारं प्रतिवादित्वेनाभ्युपगम्य प्रवृत्तायां कथायां आश्रयासिद्ध्यादिना उद्भाव्यमिति भावः। अन्यथा उभयाभ्युपगमानुरोधाभावे वाङ्मात्रेणापीति दूषणत्वेनानभ्युपगतस्यापि दूषणतयोद्भावन संभवादिति भावः। सत्वाभ्युपगमेऽनिष्टांतरमाह यश्चैक इति। यङ्लुगन्तादिप्रयोगनियमाभ्युपगन्तुरिव तस्यैवाश्रयासिद्ध्यादिर्दोष इति भावः। चतुर्थे दूषणमाह अथोभाभ्यामपीति। तथाचासिद्ध्यादिदोषापादने स्वस्यैव पराजय इति भावः।

ननु कथायां किल स्वव्याघातादिदोषः नात्र कथेति शंकते अथेति। तस्य कथाप्रवेशेति। तथा प्रवेशे आश्रयासिद्ध्यादेरदोषतया न निग्रहः। तदनुप्रवेशे तदुद्भावनमेव नास्तीति भावः। नापि प्रमाणाधीनव्यवहारं प्रति सत्ताभ्युपमस्य हेतुत्व पक्षे इत्यर्थः।

प्रदर्शितत्वादिति। तथा च व्यभिचाराहेतुत्वमित्यर्थः। ननु व्यवहारहेतुत्वं वदता त्वयैव प्रमाणाधीनां सत्वं समर्थितं। हेतुत्वस्य नियतपूर्वसत्वरूपत्वात्तेन सर्वाभ्युपगमस्सिद्धः। असत्वस्य चोक्तासत्वतदभावयोर्व्याघात इति शंकते अथेति। अस्याप्यर्थस्येति। सत्ताभ्युपगमाभावे व्यवहारादिकं नस्यादित्यादिव्याघातोद्भावनस्य तदनभ्युपगमपूर्वककथाव्यवहारप्रवृत्तिपूर्वकतया तद्वदेवेतर व्यवहारस्यापि संभवे व्याधाताभावादिति भावः। ननु प्रमाणादीन्येव समये निबन्ध्य तेन सत्वमिति कुत इति शंकामनुवदति न चेति। तत्वावधारणेति। प्रयोजनवतामेव समयबंधो वाच्योऽन्यथातिप्रसंगादिति

सत्ताभ्युपगमगर्भेति वाच्यम्; तत्त्वावधारणपरपराजयौपयिकोभयसंभावतिव्यवहारनियमसमयबन्धमात्रेण समीहितसिद्धेः। न च समयबन्धेऽपि सत्ताभ्युपगमगन्धः प्रमाणतर्काभ्यां व्यवहर्तव्यम्, परस्परं प्रतिज्ञाहान्याद्यन्यतमनिग्रहस्थानं प्रदर्शनीयम्, तद्व्युत्पादने तद्वतो भङ्गो व्यवहर्तव्यः, अन्यथा तद्व्युत्पादनासमर्थस्य अ(न्य)भग्नस्तु जेतेति व्यवहर्तव्यः, प्रामाणिकतया प्रतीतः पक्षः तत्त्वमिति व्यवहर्तव्य इत्येवमादिस्वरूपे नियमबंधेपि सत्ताभ्युपगमप्रसंगाभावात्। न च समयबंधोऽपि हेतुर्वाच्यः। स च कथाप्रवृत्तिमन्तरेण न वक्तुं शक्यः'' इति सत्ताभ्युपगमहेतुत्वाभिधानविषयप्रत्यवस्थान प्रतिबन्ध्यवतारः; तत्त्वनिर्णयविजयमूलत्वेन लोकसिद्धस्याविचारितरमणीयस्य व्यवहारनियमस्य हेतुमन्तरेण वादिभ्यां द्वाभ्यामपि स्वेच्छयैव ग्रहणात्। न चैवं प्रमाणमूलत्वाभावेन विचारतद्विषय तत्फलविप्लवप्रसङ्गः, अनादि पारम्पर्यागतस्य लोकव्युत्पत्तिसंवादिनस्तस्यासंभवान्यथाभावा भावरूपस्वतश्शुद्धिसिद्धत्वात्। न च प्रमाणादिसत्ताऽपि स्वेच्छयैवाङ्गीकार्या; व्यवहारनियममात्रेणैवान्य व्यतिरेकवता निरपेक्षेण कथप्रवृत्तितत्फलोपपत्तौ तादृशेतरनिरर्थकसत्ताभ्युपगमायोगात्।

नापि तृतीयः लोकव्यवहार इति प्रमाणिकव्यवहारविवक्षायां तस्य विचारप्रवृत्तिमन्तरेण दुर्निरूपतया तदर्थमेव पूर्ववत् नियमस्य गवेषणात्; पामरादिव्यवहारविवक्षायां निर्मूलव्यवहारशरण्यस्य ते शरीरात्मत्वादयोऽपि स्वीकर्तव्यास्स्युः। पश्चात्तनबाधात् तत्परित्यागश्चेत्, प्रमाणादिसत्ताऽपि सामान्यतो विशेषश्चास्मदुक्ताभिर्युक्तिभिर्बाध्यमाना परित्याज्या। अथ बाधाभावात् तत्परिग्रहः, तथाऽपि न लोक व्यवहारस्य तत्परिग्राहकता। बाधाभावविचारे च पुनर्नियमान्वेषणावतारः।

भावः। सत्ताभ्युपगमस्य कथंचिदपि प्रयोजनाभावात् न समयबंधान्तर्भाव इत्याह न चेति। सत्ताभ्युपग स्यान्तभवि हेतुः प्रयोजनाभावः। तमुपपादयति प्रमाणतर्काभ्यामिति। तद्व्युत्पादने-तदुद्भावने। अन्यथा तदुद्भावन इत्यर्थः। ननु प्रमाणतर्कादि समयबंधस्य कथायां हेतुत्वं, तदनभ्युपगमे कथा प्रवृत्तिर्नस्यादित्यापादनेन समर्थनीयं। तदापादनं च कथायां प्रवृत्तायामिति प्रमाणादिनियमं विना प्रवृत्तकथावदन्यापि कथास्यादिति नियमाभ्युपगमस्यापि सत्ताभ्युपगमवद्व्यतिचाराद्धेतुत्वं न स्यादिति शंकते न चेति। प्रयोजनवद्व्यवहारं प्रति हेतुत्वाभावेपि प्रमाणानियमस्य स्वेच्छयैव वादिभ्यां ग्रहरतिं परिहरति तत्वनिर्णयेति। अनादि पारंपर्यगतस्येति। अनादि परंपरया आगते जयादिफलवत्वेन लोकप्रमाणसंवादिनीव्यवहारनियमे च असंभवात्। अन्यथा भावाभावरूपस्वतश्शुद्धया सिद्धे फलविप्लवादिप्रसंगो न संभवतीति भावः। अन्यथा स्वेच्छयैरपूर्वैर्नियमांगीकारे वयमपि स्वेच्छया सत्ताभ्युपगमस्य हेतुत्वमंगीकुर्म इत्यत्राह नचेति। व्यवहारनियममात्रेणेति। अनादिव्यवहारसिद्धनियममात्रेणेत्यर्थः। अन्वयव्यतिरेकवता साधनबाधनैस्सहेति शेषः। निरपेक्षेण सत्ताभ्युपगमनिरपेक्षेणेत्यर्थः। तादृशेतरदन्वयव्यतिरेकवद्भिन्नं पूर्ववदिति। ततश्च तद्विचारे न सत्ताप्रवेश इति भावः।

ननु पामरव्यवहार एव गृह्यते। ननु शरीरात्मप्रति संबंधि शास्त्रश्रवणानंतरं तद्बाधात्परित्यज्य इत्याशंकते पश्चात्तनेति। सामान्यत इति। प्रपंचो मिथ्या दृश्यत्वादिति पक्षे विवक्षितं विशेषत इति खंडनोक्त प्रमाणादिखंडनं विवक्षितं। उद्धवाभिप्रायेण शंकते अथेति। तथा च सामान्यतो विशेषतश्च बोधाबाधित इति भावः। तथापीति। प्रतिज्ञाभंग इति। भावः। दोषांतरमाह। बाधाभावेति। तद्विचारे च न

नापि चतुर्थः; प्रमाणादिसतामभ्युपगच्छता त्वयेव तत्सत्त्वासत्त्वानुसरणोदासीनेन मयाऽपि तथाविधस्यैव व्यवहारनियमस्यवलम्बनात् । तस्य च मां प्रति फलातिप्रसञ्जकत्वे त्वां प्रत्यपि तुल्यप्रसङ्गस्स्यात् । यथा चाभ्यवहारादिव्यापारेष्वपि सत्तामनिच्छतां माध्यमिकादीनां तत्फलनियमः, तथाऽत्रापि ।

ननु व्यवहारनियमसमयबन्ध एव सत्ताभ्युपगमोऽनुप्रविष्टः । व्यवहारोऽपि हि क्रिया । सा च निष्पादनात्मिका; तच्चासतस्सद्रूपताप्रापणम्; प्रमाणादिभिर्व्यवहर्तव्यमित्यत्र प्रमाणादेः करणत्वं नियमान्तर्गतम् । तच्च कारणत्वविशेषः । कारणत्वं तु नियतपूर्वकालसत्त्वम् । दूषणसत्त्वे भङ्गः, साधनाङ्गभूतव्याप्त्यादिसत्त्वे च तद्विषयस्तत्त्वमिति च नियम्यते । अतो व्यवहारनियमसमयबन्धादावेव व्यवहारक्रिया-तत्कारण-दूषण-साधनाङ्गादेः सत्त्वं कण्ठोक्तमिति कथं सत्तामनभ्युपगम्य कथारम्भ इति । मैवम्; एभिरपि सत्तानभ्युपगमबाधकैः कथायां प्रवृत्तायामेव सत्ताभ्युपगमस्य प्रसाधनीयत्वात्; ततश्च पूर्वोक्तबाधाया दुस्तरत्वात् ॥

इति श्री कवितार्किकसिंस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां कथानधिकारवादः नवमः ॥९॥

सत्ताप्रवेशावकाश इति भावः । प्रमाणादिति । तथापि न सत्वाभ्युपगममात्रेणार्थनिर्णयः । किंतु साधुहेतुनैव ततश्च सत्तानभ्युपगमेपि नाति प्रसंगः । एवमप्यति प्रसंगापादने सत्वाभ्युपगमवादेपि तथास्यदित्यर्थः । परिहारांतरमाह यथाचेति ।

सत्ताभ्युपगमस्य अपरिहार्यत्वं शंकते नन्विति । निष्पादनं तच्चेति । निष्पादनमित्यर्थः । तद्विषयः साध्यादिः । एभिरपीति । सत्ताभ्युपगमं विना कथाप्रवृत्तिरावश्यकीति तथैव सर्वकथापीति भावः । स्वरूपव्याक्रियैव निराक्रियेति । न्यायेन पूर्वपक्षोपन्यासादेव सिद्धांतस्सिद्ध इति पृथक्सिद्धांतानभिधानं । तथाहि नहि कथानधिकारः कथा व्यवहारमात्रेण मायिनां कथाधिकारस्सिद्धः तस्याः पूर्वपक्षित्वात् । नहि कथा विषयत्वमात्रे पूर्वपक्षित्वमपशूद्राद्यधिकरणविषयाणां शूद्रादीनां तदभावात् । अपितु सिद्धान्तानुसार्येवात्र पूर्वपक्षे । अन्यथा शून्यवादिनोपि तत्प्रसंगेन त्वया तन्निरासायोगात् । नच प्रयोजनविरहात् न सत्तायाः प्रवेशः । कथाफलमनतिप्रसक्तमभ्युपगतस्तस्या अपि प्रवेशस्यावश्यकत्वात् । नच सल्लक्षणाभासादिभिः तत्संभवः । तेषामपि सत्वभ्युपगमाभावे तथैवातिप्रसंगादारोपितानां तेषां सर्वत्र सुलभत्वात् । नच व्यावहारिक व्यवस्थया व्यवस्थावदुक्तरीत्या तादृश व्यवस्थाया अपि प्रवेशायोगात् । तस्माद्वास्तवानामेव वास्तवजयपराजयहेतुत्वमनतिप्रसंगायाभ्युपगंतव्यमिति प्रमाणादिसत्वशून्यानां कथानधिकार एव । ननु तर्हि प्रपंचमिथ्यात्वादिकथायां का गतिः । तैरेव कथायाः प्रवर्तनीयत्वात्तेषां चानधिकारादिति चेत् तेष्वधिकारमारोप्य प्रमाणादीनां सत्वमभ्युपगमय्य वा प्रवृत्तेः । यद्वा शिष्यान् प्रत्युपदेशमात्रमेवास्तु । तावतापि दोषाभावादिति केचित्तु सिद्धांतग्रंथपातमाहुः ॥

॥ वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां नवमो वादस्समाप्तः ॥

॥ अथ निर्विशेषस्वप्रकाशभङ्गवादः दशमः ॥१०॥

विचित्रं यत् स्वेन स्फुरति विषयाधारभिदुरं। तदेव ब्रह्मैकं विगुणमपि साक्षात्कृतमिति ॥
वदन्तो वैयात्यात् बहुविहतिवात्याहतधियो। विधूयन्ते हन्त श्रुतिशतशिरश्शूलवचसः ॥

य एष मन्त्रवादः-यद्यपि प्रमाणानि सर्वाण्यपि सविशेषमर्थमभिनिविशन्ते, तथाऽपि न स्वप्रकाशाध्यक्षसिद्धनिर्विशेषसंवित्सद्भावेन विमन्तव्यम्, अन्यथा धार्ष्ट्यात् सर्वापह्नवस्यापि दुर्निवारत्वात्। किंच संवित्स्वप्रकाशत्वं तावत् त्रय्यन्तविदां सर्वेषामविगीतम्। तत्र प्रकाशात्मतामात्रेण स्वतस्सिद्धायां संविदि न जडरूपधर्मानुप्रवेशावकाशः; प्रकाशात्मकास्तु न तत्वतो विवेक्तुं शक्यन्ते। अन्यथा तेषां परप्रकाश्यतया प्रकाशात्मत्वासिद्धेः। न च स्वरूपमात्रस्वप्रकाशे अन्यतो धर्मसिद्धिरिति वाच्यम्; अनुपलभ्यमानसाधनात् तद्बाधनस्य लघुत्वात्। निर्विशेषत्वानुभवेन तन्निरासव्याघातात्, सविशेषानुभवानां तदपेक्षया दुर्बलत्वात्। ते हि तद्विषयतयैव लब्धसत्ताकाः प्राथमिकेन सर्वसाक्षिणा

पूर्वं निर्विशेषस्य सौत्री जिज्ञासानिराकृता। इदानीं निर्विशेषमेव वस्तु नास्तीति वादार्थं संगृह्णाति विचित्रमिति। लोकविलक्षणमित्यर्थः। विषयाधाराभ्यामुपाधिभ्यां विधुरं रहितं। भिदुरमिति पाठे कल्पितभेदवदित्यर्थः। यत्स्वेन स्फुरति तदेवैकं ब्रह्म विगुणं-निर्गुणमपि साक्षात्कृतमिति वदन्तो विधूयंत इत्यर्थः। तत्र हेतुः बहुविभूतीति। विभूतयो व्याघाताः सिद्धान्ते वक्ष्यमाणाः। व्याघातमात्रमेव न भवत्यपितु वेदान्तविरोधोपीत्याह श्रुतीति।

स एष मंत्रवाद इति। वक्ष्यमाणो यः पूर्वपक्षः स एष मन्त्र जपवन्नदृष्टमुखेनार्थसाधक इत्यर्थः। ननु पूर्वपक्षोत्थानमेव नास्ति सर्वेषां प्रत्यक्षादिप्रमाणानां सविशेषविषयत्वादिति वदतः प्रत्याह यद्यपीति। अन्यथेति। स्वप्रकारसिद्धेपि विमतौ प्रत्यक्षादिप्रमाणसिद्धेपि अनाश्वासात्सर्वापह्नवस्स्यादित्यर्थः। किंचेति। निर्विशेषविषयत्वे विवाद इत्यर्थः। ततः किमित्यत्राह तत्रेति। किं जडधर्मविषयतया सविशेषत्वमुताजडविषयतयेति विकल्पाभिप्रायेणाद्ये दोषमाह तत्रेति। संवित्स्वावच्छिन्नमेव वस्तुप्रकाशयति। तस्य मिथ्यात्वेन स्वावच्छिन्नत्वाभावं न स्वरूपनिबंधनप्रकाश इति भावः। द्वितीयं प्रतिवक्ति प्रकाशात्मका इति। तेषां तेषां संविदां भेद एव स्यादित्यर्थः अन्यथेति। संविदपेक्षया भेद इत्यर्थः। ननु वादादिप्रकाशस्य सविशेषविषयत्वदर्शनात् स्वप्रकाशतया सिद्धे प्रकाशे विशेषस्यापि विषयत्वमस्त्वित्यत्राह न च स्वरूपमात्रस्वप्रकाश इति। विषयतयेति शेषः। तत्प्रतीतिविषयत्वेनानुपलभ्यमानस्य तत्प्रतीतिविषयत्वसाधनादपि तत्प्रतीत्यविषयत्वाभावांगीकार एव उचितः। प्रतीतेरधिकविषयत्वकल्पने गौरवात्प्रकाशत्वहेतुश्च प्रतिकूलतर्कपराहत इति भावः। नन्वेवमपि स्वप्रकाशत्वं न निर्विशेषसाधने प्रभवति। प्रकाशमानत्वादिना निर्विशेषाभावस्यैव साधनादित्यत्राह निर्विशेषत्वेति। व्याघातादिति। बाधादित्यर्थः। नन्वाश्रयविषयकृता विशेषास्संविदि प्रत्यक्षमेवानुभूयन्त इत्यत्राह सविशेषेति। दौर्बल्यमेवोपपादयति ते हीति। तेहि वृत्यात्मनोऽनुभवा जडतया मिथ्याभूता एवेति सा नसत्ताका। अतः प्राथमिकेनस्वोपजीव्येन स्पर्धितुं नार्हन्तीति भावः। तद्विषयतयैव लब्धसत्ताकत्वमाह सर्वसाक्षिणेति। यद्यप्यनादिनोपि साक्षिणो विषयप्रकाशनांशे दोषापेक्षा तथापि स्वरूपादिभिः निर्विशेष प्रकाशांशे न तदपेक्षा। जन्यप्रत्यक्षे च तदपेक्षैव अतस्सविशेषानु भवः स्वप्रकाशेन बाध्यत इत्यर्थः। ननु साक्षिविषयत्वे पूर्वोक्तविरोध इति चेन्न। अध्यासस्यैव विवक्षिततया न विषयत्वमिति

निरपेक्षेण दुष्टकारणशङ्कादवीयसा स्वानुभवेन सह न स्पर्धितुमर्हन्ति। तादृशस्वप्रकाशस्य तु भ्रान्ति त्वोक्तौ संविदसिद्ध्या सर्वासिद्ध्यापातात्। न च बाधकाभावेन भ्रान्तित्वम्। न चाननुभवेनैव बाध इति वाच्यम्। न चात्र योग्यानुपलम्भः; करणद्वयोग्यत्वेन विशेषणासिद्धेः; स्वयोग्यत्वेऽपि स्वेनानुपलम्भायोगेन विशेष्यासिद्धेः। न च नरविषाणादिसद्भावोऽप्येवं साधयितुं शक्य इति वाच्यम्; तस्य स्वसिद्ध्य। समर्थने तस्यैवानुभूतित्वात्। अन्यतस्तु तदसिद्धेः। साधने च बाधात्। यद्यपि जागरस्वप्नयोः विचित्रबाह्योपलम्भकलुषितधियोर्नतद्विविक्तावभासः, तथाऽपि सुषुप्ति-मद-मूर्च्छा-समाधि-मुक्त्याद्यवस्थासु तस्यैव साम्राज्यम्। न च सुषुप्त्यादिषु तत्प्रकाशस्य प्रतिबुद्धेन प्रतिसन्धानप्रसङ्ग इति वाच्यम्; इष्टप्रसङ्गरूपत्वात्। एतावन्तं कालं न किञ्चिदहमज्ञासिषम्, सुखमहमस्वाप्समिति तादात्विकज्ञानसुखसाक्षितया तत्प्रतिसन्धानात्। तदेवमात्मसाक्षिकनिर्विशेषानुभवस्याऽऽरोपितो परागविनिवारणमुखेन, संवादकतया वाऽनुग्राहकमनुमानागमादिकमप्यद्रियामहे न वेति।

तत्रोच्यते-किमसौ निर्विशेषा संवित् स्वप्रकाशसिद्धेति स्वयं सैव भूत्वा प्रतिपादयति, अथ ततोऽन्य एव तटस्थस्तामुपलभ्य? । न प्रथमः; तस्याः स्वयाथात्म्यप्रतिपादनादिसंरम्भवैमुख्यात्। अन्यथा तस्या एव विषयादिवैशिष्ट्यस्यावर्जनीयत्वेन स्वनिर्विशेषोक्तेरळीकवादत्वप्रसंगात्। विषयादिविशेषणामारोपितत्वान्नालीकवाद इति चेन्न; तदनुल्लेखे तन्निषेधोक्त्ययोगात्। तदुल्लेखे तु विशिष्टप्रकाशावश्यम्भावात् न स्वेन निर्विशेषप्रकाशः। नापि द्वितीयः; स तु तामुपलभमानः ततोऽन्यया

न विरोधः। ननु स्वप्रकाश एव भ्रांतिरित्यत्राह तादृशेति। बाधकमुक्त्वा साधकाभावमप्याह न चेति। ननु निर्विशेषस्वरूपस्य अनुभवाभावेऽनुपलब्ध्या बाध्य इत्यत्राह न चेति। उपपादयति न चात्रेति चेत्यर्थः। न ह्यनुपलंभमात्रेण बाधः किन्तु योग्यानुपलब्ध्या। तत्र किंकरणतज्जन्यज्ञानयोग्यता विवक्षिता उतस्वयोग्यता। आद्येदोषमाह करणेति। द्वितीये दोषमाह स्वयोग्यत्वेपीति। आभासमानयोगक्षेमतामाशंक्य निराचष्टे न च न तेति। अन्यतस्सिद्धिरस्त्विति शंकते अन्यत इति। परिहरति तदसिद्धेरिति। साधकस्यान्यस्यासिद्धेरित्यर्थः। ननु नरविषाणसाधकं पादवत्वादिकमसतीत्यत्राह साधने चेति। ननु लोके संविदः सविशेषत्वोपलंभात्कथं निर्विशेषविषयत्वोक्तिरित्यत्राह यद्यपीति। तद्विविक्तावभासः - विचित्रबाह्यार्थाविधुरावभासः। विमुक्तावस्थामुक्तावस्था। आदिशब्देन प्रळयाद्यवस्था गृह्यते। तस्यैव-निर्विशेषविषयसंविद एव। इष्टप्रसंगमुपपादयति एतावन्तमिति। ननु स्वत एव निर्विशेष विषयसंविदस्सिद्धौ किमनुमानागमयोः बाद्यकैरूपन्यास इत्यत्राह तदेवमिति।

वस्तुतस्तदादर एव नास्तीत्याह स्वयमिति। संविदेव स्वात्मानं प्रतिपादयतीत्यर्थः। ततोन्यस्संविदोन्यः अन्यथेति। तस्यास्तादृश संरंभे प्रतिपाद्यभूतविषयेण प्रतिपादकेन शब्देन प्रतिपादनसंप्रदानभूतप्रतिवादिना च विषयतया वैशिष्ट्यं वाच्यं। अन्यथा प्रतिपादनाऽसंभवात्। ततश्च निर्विशेषोक्ति रळीकवाद एवेत्यर्थः। विशेषाणानामिति। परमार्थतो निर्विशेषात्वादित्यर्थः। विषयादीनामुल्लेखोस्ति वा न वा। आद्ये दोषमाह तदनुल्लेख इति विषयाद्यनुल्लेखाभावे तन्निरासयासो व्यर्थः। तत्संबंधस्याप्रतीतेः द्वितीय आह। तदुल्लेखे त्विति। तथा च स्वप्रकाशेन निर्विशेषसिद्धिः। सविशेषतयैव प्रकाशादित्यर्थः ततोऽन्यायेति। निर्विशेषसंविदन्यायाः तद्गोचरया उत निर्विशेषसंविदैवोपलंभस्यापीत्यर्थः। पूर्वत्रेति। स्वभिन्नसंवित्प्रकाश्यत्वस्यैव वेद्यत्वादित्यर्थः उपलभत

वा तथैव वा स्यात्। पूर्वत्रावेद्यत्वविरोधः, अनुव्यवसायवेद्यत्वपक्षपातात्। उत्तरत्रापि सर्वलोकसम्मतां संविदमेव तथोपलम्भते ततोऽन्यां वा? । आद्ये, भ्रान्तित्वापातः। सा हि विषयाश्रयस्वगतविशेषैर्विशेषितैव सर्वैः संदृश्यते । न च तत्तन्मिथ्यात्वेऽपि संविदस्तत्प्रकाशरूपत्वापह्नवः । न च योगादिप्रभावात् विशुद्धप्रकाशो जात इति वाच्यम्; योगस्यैव भ्रान्तित्वापातात् । न च शुक्तिकारजत प्रकाशमप्यालम्बनमात्ररहितं वदन् योगीश्वरोऽपि न भ्राम्यति। द्वितीयेऽपि, किमसौ महाभागः स्वस्मा एव स्वसुखादिवत् सिद्ध्यन्तीं तां परस्मा उपदिशति, उत प्रतिवादिनोऽपि तथा सिद्धाम्? नाद्यः, अविस्रंभात्। पुलकोद्गमादिवत् लिङ्गाभावाच्च। नेतरः; स्वप्रत्ययसिद्धस्य परोपदेशनैरपेक्ष्यात्। न हि सुखादिसद्भावमात्रं परस्मा उपदिश्यते। न च सहृदयः कश्चित् तथाविधानुभवमपह्नोतुमीहते, नापि योग्यानुपलम्भनिराकृतसद्भावमभ्युपगन्तुम्।

ननु न कस्मैचित् सा सिद्ध्यति। अतः स्वस्मै परस्मै वेति को विकल्पावकाश इति चेत्-सा तर्हि न सिद्ध्येदेव। सिद्ध्यन्ती वा कस्मैचिदेव स्यात्। सिद्धिमात्रमियमिति चेत्-कस्य कं प्रतीति वक्तव्यम्। न कस्यचित् कंचित् प्रतीति चेत्-न तर्हि सा सिद्धिशब्दार्थतया व्युत्पत्तुं शक्या। स्वस्या एव स्वात्मानं प्रतीति चेत् इदं तु दावदहनविवशजरदजगरपरिभ्रमणम्। कथमसौ वराकः स्वस्या एव स्वात्मानं प्रति सिद्धिरूपां तां ततोऽन्यस्तथैवोपलभते। तन्मयीभूतत्वात् तथोपलभत इति चेन्न; प्रागेव दूषणात्। ततो लोकसिद्धा संवित् विषयाश्रयादिविशिष्टैव स्वतः प्रकाशते । तदुत्तीर्णा तु न स्वतो नापि परत इति तस्याः शशविषाणतुल्यतैव।

इति। निर्विशेषतयेति। शेषः। आद्य इतीति। सविशेषायां तस्यां निर्विशेषज्ञानस्य भ्रमत्वादिति भावः। न च विषयादीनां मिथ्यात्वान्न दोष इत्यत्राह। न च तदिति। तत्प्रकाशत्वस्य मिथ्यात्वायोगादिति भावः। ननु यागाद्वा देवताप्रसादाद्वा प्रसिद्धसंविद एव निर्विशेषविषयत्वगोचरा प्रतीतिर्जायत इति तत्संवादान्नास्यास्संविदो भ्रांतित्वप्रसंग इत्याशंक्याह नचेति। योगस्येति। योगजज्ञानस्येत्यर्थः। तत्र हेतुमाह न चेति। ननु तदुक्तावविस्रंभेपि पुळकोद्गमनादिना हर्षादिवच्चेतनवादिलिंगेन हर्षोऽनुमीयतां इत्यत्राह पुळकेति। किमयमुपदेशः स्वानुभवनिह्नुवानं प्रति उत स्वस्मिन् तादृशानुभवाभावमुपलब्धमानं प्रति। नाद्य इत्याह न हीति। वैयर्थ्यादिति भावः। द्वितीय आह नापीति। तदभावनिश्चयवतः कथं वाक्यात्तद्बोधः। अयोग्यताज्ञानेन प्रतिबंधादिति भावः।

अत इति। स्वस्मा एव स्वसुखादिवत्सिध्यति परस्मा उपदिशति। उत प्रतिवादिनोपि सिद्धामित्युक्त विकल्पानवकाश इत्यर्थः। सा तर्हीति। संवित्स्वरूपसिद्धिरेव न स्यादित्यर्थः। व्यवहारानुपपत्त्या सिध्यतीत्यत्राह सिध्यन्तीवेति। ननु सर्वोऽपि वादार्थः कस्यचिदेवेति न नियमोस्ति उत्पन्नविनष्टघटादौ व्यभिचारादिति शंकते सिद्धिमात्रामिति। कस्येति। सिद्धेः कर्मसापेक्षत्वं आश्रयसापेक्षत्वं च नियतमित्यर्थः। उभयमप्यसिद्धमिति शंकते न कस्यचिदिति। न तर्हीति। आश्रयकर्मवत्वेनैव प्रसिद्धेरूपलंभान्न तद्रहितायाः प्रतीतिरिति भावः। स्वस्या एवेति। स्वकर्मिका स्वाश्रया स्वार्था चेत्यर्थः। तथाच (न) नियमभंग इति भावः। इदं त्विति। पूर्वदोषानतिवृत्तिरिति भावः। प्रागुक्तदोषानतिवृत्तिं दर्शयति। कथमसाविति। तन्मयीभूत्वा - अतत्स्वरूपत्वादित्यर्थः। प्रागेवेति। स्वायथात्म्यप्रतिपादनातिसंरंभवैमुख्यादित्युक्तत्वादित्यर्थः।

ननु लोकोत्तीर्णसंवित्स्वरूपं स्वप्रकाशमिति भवद्भिरपीष्यते। तत् कथमस्मदुक्ते विरागः? तर्हि समबुद्धिरसि। वयं हि प्रत्यक्षाद्यगोचरं ब्रह्मस्वरूपम्, तस्य स्वप्रकाशत्वादिधर्मवर्गं च श्रुतिबलात् स्वीकुर्मः। भवतस्तु प्रमाणपोतं परित्यज्य स्वप्रकाशालाबुपरिग्रहेणापारसागरं निस्तर्तुमिच्छतो नेदानीं प्रभूता श्रुतिः पुरस्कार्या। तत्पुरस्कारेऽपि सा सविशेषमेव प्रतिपादयतीति वक्ष्यामः। अतो न साम्यमिति।

यत्पुनरुक्तम् प्रकाशात्मनः स्वस्यैव स्वतः सिद्धत्वात्, जडात्मानां केषांचिदपि धर्माणां तदन्तर्भावानुपपत्तिरिति-तत् असिद्धस्यासिद्धेन साधनम्; कस्यचित् पुरुपस्य कंचित् धर्मविशेषं प्रति प्रकाशविशेषरूपतयैव सर्वेषामनुभवानां स्वतस्सिद्धेः। अतः सविषयत्वसाश्रयत्वधर्माभावे तुल्यन्यायतया स्वतस्सिद्धिरपि न स्यादेव। यत्पुनः प्रकाशात्मकास्तु न ततो विवेक्तुं शक्यन्त इति; तदप्यसत्। साजात्यमात्रेण तादात्म्येऽतिप्रसङ्गात्। ज्ञानरूपो ज्ञानाश्रयश्चाऽऽत्माऽस्माभिरिष्यते। तद्वत् धर्मिभूतज्ञानमपि। यदि ज्ञानस्वरूपधर्मान्तराश्रयतयोपलब्धम्, तदा तदप्यङ्गीकुर्मः। अनुपलम्भात्तु तदनभ्युपगमः। न च विविच्यमानतामात्रेण स्वप्रकाशात्मताभङ्गः; सर्वासामपि संविदां स्वयंप्रकाशानामपि संविदन्तरकर्मत्वस्य समर्थयिष्यमाणत्वात्।

यत्तु स्वरूपमात्रस्वप्रकाशेऽप्यन्यतो धर्मसिद्धिरित्यनुपलभ्यमानसाधनात् तत्साधनस्य लघुत्वमुक्तम्, तदपि चार्वाकसौहार्दम्; अनुमानाद्युच्छेदप्रसङ्गात्। उपलभ्यन्ते धर्मा इत्युक्तम्। यदप्युक्तम्-निर्विशेषस्वानुभवेन तन्निरसनव्याघातः, सविशेषानुभवानां तु तदपेक्षया दुर्बलत्वमिति तत् तदा सुन्दरम्, यदि द्वयोरपि स्वरूपमुपलभ्य बलाबलचिन्ता वर्तेत; इह तु निर्विशेषस्वानुभव एव नोपलभ्यते। यच्च निर्विषस्वानुभवैकविषयतया सविशेषानुभवानां सत्तालाभादिकमुक्तम्, तदपि प्रस्तुतप्रतीपम्

कथमित्यस्य प्रश्नार्थत्वमभिप्रेत्याह तर्हीति। संबुद्धिः-तत्वबुभुत्सुः विशेषमेवेति। सागरतरणे साधनं भवतीत्यर्थः।

किं स्वरूपप्रकाशमात्रेण जपविषयत्वाभावस्साध्यते उतस्वरूपप्रकाशनेतर विषयत्वाभावस्यापि विषयीकरणात्। नाद्यः। स्वरूपप्रकाशेऽपीतरप्रकाशाविरोधात्। नह्येकमेव प्राग्यमितिनियमः क्वापि तद्दर्शनादित्यभिप्रेत्य द्वितीयं दूषयति तदसिद्धस्येति। तदेवोपपादयति कस्यचिदिति। घटमहं जानामीति किंचित्पुरुषाश्रयतया घटत्वाद्याश्रयविषयकतया प्रत्यक्षत्वादिविशेषरूपेण च स्वतस्सिद्धेरित्यर्थः। अत इति। उक्तरीत्या स्वविषत्वादीनां सिद्धानामपह्नव इत्यर्थः। साजात्यमात्रेणेति। ज्ञानात्मक ज्ञातुर्भेदिन संविषदानुभवात् साजात्यमात्रेण अभेदानुमानं बाधितं। तथापि साधने घटादीनामपि भेदो न स्यादित्यर्थः।

यदि ज्ञानस्य ज्ञानाश्रयत्वमिष्यते धर्मभूतज्ञानस्यापि तत्प्रसंग इत्यत्राह तद्वदिति। अन्यथा तेषामपि परप्रकाश्यतया प्रकाशात्मकत्वसिद्धेरित्युक्तं दूषयति नचेति। सर्वासामपीति। ''सत्यं ज्ञानमि'' (तै-उ-आनन्द १) त्यादि श्रुतिजन्य संविद्विषयत्वस्य संवित्स्वप्रकाशेत्याद्यनुमानादि विषयत्वस्यचेत्यर्थः।

यद्यनुपलभ्यमानस्य कल्पनामात्रमेव गुरु तदा दोषमाह तथापीति। चार्वाकसौहार्दमिति अनुमानादीनामनुपलभ्यमान विषयत्वात्तदविषयकत्वकल्पनस्य दोषत्वे अनुमानाद्युच्छेदेन प्रत्यक्षमात्रपरिशेषस्यादिति भावः। नन्वधिक विषयत्वकल्पनं दोष इति चेत्तत्राह उपलभ्यते चेति। तथा च न कल्पनेति भावः।

यदि द्वयोरिति। निर्विशेषानुभवस्य अद्याप्यसिद्धेः क्व तद्धर्मविचार इति भावः।

प्रकाशात्मतामात्रतया स्वतस्सिद्धायां संविदि कथं विषयाश्रयादिविशेषितसविशेषानुभवान्तरप्रकाशः?

करणाद्ययोग्यत्वात् न योग्यानुपलम्भ इत्येतत् अनुभूतेरनुभूत्यन्तरविषयत्वस्य वक्ष्यमाणत्वान्निरस्तम्। यच्च स्वयोग्यत्वेऽपि स्वेनानुपलम्भायोगेन योग्यानुपलब्धेर्विशेष्यासिद्धिरितिं, तत्र कः स्वेनानुपलम्भं ब्रवीति? सविशेषतया तु संविदुपलम्भं ब्रूमः,न तु निर्विशेषतयेति; स्वेन निर्विशेषतयोपलम्भस्य योग्यानुपलम्भं वदामः। तथाहि, किं जागरदशायामेव निर्विशेषं स्वतः प्रकाशत इति मन्यसे, उत स्वापाद्यवस्थायाम्, यद्वा सर्वावस्थानुपलब्धमपि युक्तिबलान्निर्विशेषतया निष्कृष्यत इति, अथोपलम्भयुक्त्यन्यथात्वेऽपि शब्देन तथा निर्दिश्यत इति। न प्रथमः; विषयाश्रयस्वगतविशेषैर्विशिष्ट तयैव तदानीं स्वत एव तद्गोचरानुभवान्तरेण वा संवित्स्वरूपस्य प्रकाशमानत्वात्। तदेतदाहुः- "इदमहमदर्शमिति केनचिद्विशेषेण विशिष्टविषयत्वात् सर्वेषामनुभवानामि" (श्री भाष्यं जिज्ञा) त्यादिना। नापि द्वितीयः; तत्रापि ह्यनुभवोऽस्ति चेत्, संविशेष एव; न चेत्-कस्य निर्विशेषतया प्रकाशः? "स्वापमदमूर्छासु च सविशेष एवानुभव इति स्वावसरे निपुणतरमुपपादयिष्याम" इति भाष्यम्। अयमभिप्रायः-सुषुप्त्यादिदशायामिदमर्थप्रकाशनं तावन्नास्तीति सर्वसंमतम्। अहमर्थप्रकाशस्तु त्वया नेष्यते। इष्यमाणत्वेऽपि न तस्य निर्विशेषतया स्फुरणम्, प्रत्यक्त्वानुकूलत्वादिरूपेण स्फुरणात्। अन्यथा तत्प्रकाश एव नास्तीति। अथ पुनः जानामीति प्रतीयमानोऽर्थस्तदानीं विषयाश्रयशून्यः प्रकाशत इति मन्यसे, तदपि न; तस्य तन्निरूपणीयस्वभावतया तद्विरहेण प्रकाशायोगात्। न हि छेद्यादिविधुरश्छिनत्ति परशुः। वयं तु यद्यपि नित्यां संविदं श्रुतिबलादभ्युपगच्छामः, तथाऽपि तस्या न निर्विशेषायाः प्रकाशमिच्छामः,निराश्रयाया वा स्थितिम्। अतः सुषुप्तावपि सा साश्रयैव। सङ्कोचादिधर्मवती च।

प्रस्तुतप्रतीपमिति विषयाश्रयाविशेषित संविद्विषयकत्वेन प्रकाशात्मातामात्रत्वायोगाद्विषय मिथ्यात्वस्यासिद्धेर्नभेदाध्यासो विषयाणामिति भावः। अनुभूत्यन्तरविषयत्वस्येति तथाच योग्यानुप लंभः संभवतीति भावः।

सविशेषतयेति। कर्त्रादिविशिष्टतयेत्यर्थः। युक्तिबलान्निकृष्यत इति। सविशेषतयोपलभ्यमाना संविदेव संविन्निर्विशेषोपलंभ इति न विशेष्यासिद्धिरिति भावः। उपलंभयुक्त्यन्यथात्वेपीति। उपलंभयुक्त्याऽस्सविशेषविषयत्वेऽपि श्रुत्या तथेति प्रतिपाद्यत इत्यर्थः। स्वगतविशेषैरिति। ज्ञानत्वापरोक्षादिभिरित्यर्थः। अत्र भाष्यमुदाहरति अनुभवोस्तिचेदिति। तत्रापि सविशेषतयैव अनुभव इति भावः। उपपादनप्रकारं दर्शयति अयमभिप्राय इति। अहमर्थप्रकाशस्त्विति। स्वापकाले अहंकारविलयाभ्युपगमादिति भावः। विशेषमेवदर्शयति प्रत्यक्त्वेति। स्वापाधारत्वादिरादि शब्दार्थः। अन्यथेति। सविशेषतयानुभवाभावे संविन्मात्रप्रकाश एव नस्यान्निर्विशेषस्य अस्फुरणादिति भावः। ननु सुषुप्तावहमर्थाभावाद्विषयसंबन्धाभावाच्च संविन्मात्रप्रकाशोऽस्तीति शंकते अथेति। संविन्मात्रप्रकाश सामग्र्यभावान्नसंभवतीत्याह तदपिनेति। प्रकाशाभावेपि निर्विशेषसंविदस्तीत्यत्राह छेद्यादिति। छेद्याद्यभावे छेदनाभाववद्विषयादिप्रकाशाभावे संवित्प्रकाशो नास्तीति भावः। ननु भवद्भिर्ज्ञानस्य नित्यत्वांगीकारात् स्वापादिषु विषयादिभानानभ्युपगमाद्विषयादिविधुरैव संवित्तदाप्रकाशत इति वाच्यं इत्यत्राह यत्विति। ननु सुषुप्तौ कथमित्यत्राह यत इति। आदिशब्देन सुखित्वादि। एकदेशिमते

एकदेशिमतेनाऽऽत्मविषयतया सविषया च। ततश्च सुखमहमस्वाप्समिति परामर्शोऽप्युपपन्नः। तव तु न तथा, अनुपलब्धेः। न हि सुप्त एव तथा परामर्शमर्हति। विषयाश्रयरहितेयं संविद्विवर्तत इति परामर्शे प्रतिसंबन्धितया विषयाश्रयप्रतीत्यवश्यम्भावेन सुषुप्तिव्याघातात्। नापि प्रबुद्धस्तथा प्रतिसन्धत्ते। न हि सुप्तोत्थितः, "एतावन्तं कालं विषयाश्रयरहितज्ञप्तिरूपेणाहमवस्थितः" इति परामृशति; अपि तु, "सुप्तोऽहं नाज्ञासिषम्" इति ज्ञप्तिनिषेधेनैव। अहंकारविगमात् विषयानुभवाभावाच्च न तत्प्रतिसन्धानमिति चेत्, हन्त भवानेव निर्विशेषं हन्ति; तदप्रतिसन्धानस्यैवोपपादनात्। किञ्चान्याभावस्य अन्यानुल्लेखस्य च दृष्टमात्रस्मृतिप्रतिबन्धकत्वायोगात्। अन्यथा अतिप्रसङ्गात्। न चानुभूतस्य स्मरणनियमो नास्तीति वाच्यम्; प्रतिदिवसं चिरकालमन्यवैमुख्येन प्रत्यक्षेणैव प्रकाशमानस्यार्थस्य निखिलसंस्कारतिरस्कारक-मरणवेदनादि-प्रबलतरप्रतिबन्धकाभावेऽपि सावधानेनापि नियमेनास्मरणस्यानुभवाभावपर्यवसानात्। यत्तु एतावन्तं कालं न किंचिदहमज्ञासिषमिति अज्ञानसाक्षित्वेनानुभूतिः प्रकाशत इत्युक्तम् तत् विपरीतफलम्; न हि ज्ञानप्रतिषेध एव ज्ञानप्रकाशे प्रमाणं भवितुमर्हति। ज्ञानाभावातिरिक्तं त्वज्ञानं निरसिष्यते। किंचायं परामर्शोऽहमर्थानुवृत्तिं ज्ञाननिवृत्तिं च परामृशन् अहमर्थनिवृत्तिं ज्ञानानुवृत्तिं च वदतस्ते अत्यन्तप्रतिकूल एव।

स्वविशेषैर्भासत इत्याह एकदेशिमतेनेति। ततश्चेति। सविशेषायाः संविदस्सुषुप्तावनुभवाभावे सुप्तोत्थितस्य सुखत्वविशिष्टतया च स्मृतिरूपपन्नेत्यर्थः। ननु निर्विशेषसंवित्परामर्शोऽपि अस्त्वित्यत्राह तव त्विति। तत्र किं सुषुप्तस्य परामर्शः। किं वा प्रबुद्धस्येति कल्पमभिप्रेत्याद्यं दूषयति।नहीति। परामर्शशब्दौ ज्ञानपरौ।

द्वितीयं प्रतिवक्ति नापीति। प्रत्युत ज्ञाना भावमेव परामृशतीत्याह अपित्विति। नन्वहंकारस्य सुषुप्तौ प्रलीनत्वात् नज्ञप्तिरूपेणाहमवस्थित इति परामर्शः। किं च स्वरूपप्रकाशे सत्यपि विषयानुभवा भावान्न सुप्तोत्थितस्य परामर्श इति शंकते अहंकारविगमादिति। सुप्तोत्थितस्य परामर्शाभावोप (+++) तादृशानुभवे मानाभावस्यैव उपन्यासात् न तदा तादृशानुभवसिद्धिः इति परिहरति हन्तेति। किं च विषयस्याननुभवेऽहमर्थाभावे च माभूत्तयोः परामर्शः तदानीमनुभूतसंविदः प्रतिसंधानं कुतः स्यात्। नह्यन्यस्याभावोननुभवश्च स्पष्टमनुभूतं अत्र स्मृति प्रतिबंधक इत्यत्राह किंचेति। अन्यथेति। अन्याभावस्य - अन्याननु भवस्य च प्रतिबंधकत्वे स्मृतिमात्रोच्छेदः। तयोस्सर्वत्र सुलभत्वादित्यर्थः। नन्वनुभवस्य स्मरणनियमाभावात् नानुभूतावपि संवित्स्मर्यत इत्यत्राह नचानुभूतस्येति। स्मर्तुं योग्यस्मरणाभावे प्रातर्गजाभाववदभाव एव स्यादित्याह प्रतिदिवसमिति। भांवाभावपर्यवसानं भावस्य पदार्थस्य अभावपर्यवसानमभाव एव स्यादित्यर्थः। ननु किंचिदहमवेदिषमिति। न ज्ञानाभावः परामृश्यते। तथा सति प्रागनुभवस्यावश्यकत्वे सुषुप्तिव्याघातप्रसंगाद्विषयप्रतियोग्यादीनामावश्यकत्वात्। तदभावे तु प्रागनुभवाभावात् स्मृतिलक्षणः परामर्श एव न स्यात्। न चानुभवलक्षणः। स तु परामर्शो जाग्रतो विषया भावादेवेति न ज्ञानाभावः परामृश्यते। अपितु भावरूपमज्ञानमित्यत्राह ज्ञानाभावातिरिक्तंत्विति। तस्यापि ज्ञानविरोधित्वरूपेण परामर्शः न स्वरूपेण। तथाच ज्ञानाभावपक्षोक्तदोषानतिक्रमः। किं च ज्ञानाभावपरामर्शो न स्मृतिरूपः अपि तु प्रातर्गजाभावानुमितिवदनुभवरूप इति न कश्चिद्विरोध इति भावः। रूपाज्ञानभङ्गे निरसिष्यत इति भावः। न केवलमानुकूल्याभाव एव अपितु प्रातिकूल्यमपीत्याह किं चेति।

एवं सुखमहस्वाप्समिति परामर्शोऽप्यहमर्थस्यैव सुखतया प्रकाशं प्रदर्शयेत्, न पुनः सुखसाक्षितया संवित्प्रकाशम्। एवं मदमूर्छाद्यवस्थासु च भाव्यम्। ततो न स्वापाद्यवस्थास्वपि निर्विशेषप्रकाश सिद्धिरिति।

नापि तृतीयः; युक्त्याऽपि निरालम्बनतया निष्कर्षस्याशक्यत्वात्, आलम्बनमिथ्यात्वस्य निर्धर्मकत्वस्य च निराकरिष्यमाणत्वात्। किंच संविन्निर्विशेषा एवंत्वादिति हि निष्कर्षप्रकारः; तत्र हेतुसाध्यरूपधर्मान्वये कथं निर्विशेषता? तदनन्वये तु साध्यसमत्वसाध्याभावौ। तन्मिथ्यात्वेऽप्यन्त तस्तथैव। तयोः संवित्स्वरूपैक्ये पक्षहेतुविभागाभावः, सिद्धसाधनता चेत्यादयो दोषा द्रष्टव्या इति। तदेतदभिप्रेत्याह "सविशेषोऽप्यनुभूयमानोऽनुभवः केनचित् युक्त्याभासेन निर्विशेष इति निष्कृष्यमाणःसत्तातिरेकिभिः स्वासाधारणैःस्वभावविशेषैर्निर्विशेष इति निष्क्रष्टव्य "(श्री भाष्यं - जिज्ञा) इत्यादिकम्।

नापि चतुर्थः; निर्गुणवादस्याखण्डवाक्यार्थस्य च विस्तरेण निराकरिष्यमाणत्वात्। सामान्यतोऽपि पश्यामः-शब्दः किं पदरूपेण स्थित्वा निर्विशेषं बोधयति, वाक्यरूपेण वा? नाद्यः; अन्विताभिधानवादे तु केवलपदस्यावाचकत्वात्। यथोक्तम्-"पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम्। न्यायसंपादितव्यक्ति पश्चात् वाक्यार्थबोधकम्" ॥ (प्रकरणपञ्चिका -वाक्यपरिच्छेदः) इति। अभिहितान्वयवादेऽपि प्रत्येकं

सुखमहमस्वाप्सं इति सुखरूपतयापि साक्षिणोपि भानात् कथमसाधकत्वमित्याशंक्याहमर्थ एव सुखित्वावगमात् नातिरिक्तसाक्षिभानमित्याह एवं सुखमहमिति। एवमिति सुषुप्त्यवस्थायामित्यर्थः। किं युक्त्या निरालम्बनतया निष्कृष्यते मिथ्यालंम्बनतया। नाद्य इत्याह युक्त्येति। द्वितीयं प्रतिवक्ति आलम्बनेति। संवित्सविशेषत्वसाधकं न निर्विशेषत्वमित्याह निर्धर्मकत्वस्य चेति। संविन्निर्विशेषत्वसाधकं च व्याहतमित्याह किंचेति। किं हेतुसाध्ययोः पक्षेऽन्वयउच्यते उत न। नाद्य इत्याह तत्रेति। हेतुसाध्यरूप धर्मान्वयाद्व्याघात इत्यर्थः। द्वितीयेपि हेत्वन्वये साध्याविशेषः स्वरूपासिद्धिः। साध्यानन्वये साध्याभाव इत्याह तदन्वयेत्विति। ननु हेतुसाध्यान्वयेपि न दोषः तर्योर्मिथ्यात्वादिति चेत् तत्राह तन्मिथ्यात्वेपीति। साध्याविशेषस्साध्याभावश्चेत्यर्थः। ननु हेतु साध्ययोरन्वयोऽस्तु तयोस्सत्यत्वमस्तु। न च सधर्मकत्वप्रसंगः तयोर्धर्मैक्यादित्यत्राह संवित्यरूपैक्ये चेति। पक्षहेत्वोर्भेदाभावात् आश्रयाश्रया भावात् स्वरूपासिद्धिः। किं च पक्षसाध्ययोरभेदे पक्षस्य सिद्धत्वे सिद्धसाधनं। असिद्धत्वे आश्रयासिद्धिः। पक्षवृत्तित्वाभावाच्च बाध इति भावः। तत्र भाष्यमुदाहरति तदेतदिति। सत्तातिरेकिभिः धर्म्यतिरिक्तैरित्यर्थः।

विस्तरेण वक्ष्यमाणत्वादिति अखंडार्थत्वभंग इत्यर्थः। अन्विताभिधानवाद इति। पदान्तरसहितानामेव अन्विताभिदायकत्वेन वाक्यविधया साधकत्वात्पदजातस्य पदविधया वाचकत्वं नास्तीत्यर्थः। स्मारितानन्वितार्थकमनन्वितया स्मारकमित्यर्थः। पश्चात्पदार्थस्मरणानंतरं उपक्रमोपसंहारादिभिराकांक्षादिविशिष्टैश्च व्यक्तिविशेषतात्पर्यं सद्वाक्यविधयामिढकमित्यर्थः। अभिहितान्वयेति। पदानां पदार्थस्मरणं जनयित्वपर्यवसिततयानुभवरूपज्ञानजनकत्वं नास्तीत्यर्थः। अभ्यधिकावादेनुऽभवजनकत्वभावादित्यर्थः। प्रत्येकपदानामनुभवजनकत्वांगीकारे निर्विशेषबोध

पदानां प्रमाणत्वाभावात्; यथाऽऽहुः-''पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते'' ॥ (श्लोकवार्तिकं-१-१-५)इति। प्रत्येकपदशक्तिचिन्तायामपि प्रकृतिप्रत्ययरूपेण स्थितस्य पदस्य क्वचित् प्रकृत्यर्थविशिष्टः क्वचित्प्रत्ययार्थविशिष्टः प्रतिपाद्य इति कथं निर्विशेषबोधकता? स्वार्थिकप्रत्ययविशिष्टेऽपि पदे पुनः प्रकृत्यर्थविशेषस्य प्रत्ययान्तरेण विशिष्टविषयत्वमेष्टव्यम्। अव्ययान्यपि विशिष्टमर्थमेव द्योतयन्ति अभिदधति वा। निर्विशेषमिति पदेन किं बोध्यत इति चेत्, किं केवलेन, उत वाक्यस्थेन। पूर्वत्र वस्तुतो न किंचित्, अव्युत्पन्नभ्रान्तोक्त्योरर्थविशेषानपेक्षणात्। प्रतीतिमात्रमपि जायमानं मनसा किञ्चिदुल्लिख्य तन्निर्विशेषमिति परामृशेत्। तत्रापि वाक्यच्छायया वैशिष्ट्यमेवोल्लिख्येत। वाक्यस्थेन तु तेन पदान्तरोपस्थापितविशेषाविरोधेन तद्विवक्षितविशेषनिषेध एव क्रियते; यथा नरपतिरद्वितीयः, नगरी निर्विशेषेत्यादिषु। संवित् समस्तविशेषशून्येति भवत्कल्पितवाक्यं तु भ्रान्तिमात्रजनकमिति न ततोऽर्थनिष्कर्षः। नापि द्वितीयः; तत्तत्पदोपस्थापितानेकपदार्थविशेषसंसर्गस्य, संसृष्टस्य वा बोधेन निर्विशेषप्रसङ्गाभावात्। तदेतदखिलमभिसन्धायाह-''शब्दस्य तु विशेषेण सविशेष एव वस्तुन्यभिधानसामर्थ्यमि''त्यादि। अतः प्रतीत्यभावात् निष्कर्षकलिङ्गशब्दाद्ययोगाच्च न निर्विशेषस्वप्रकाशत्वसिद्धिरिति॥

इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां निर्विशेषस्वप्रकाशभङ्गवादः दशमः॥१०॥

इत्यत्राह प्रत्येकपदानामिति। ननु तृतीयमेव तार्तीयीकं इत्यादिस्थले प्रत्ययादेरर्थाभावात् न प्रत्ययार्थ विशिष्टबोधकं इत्यत्राह स्वार्थिकप्रत्ययेति। तत्रापि सुबविभक्त्यर्थान्वयसत्वादितिभावः नन्वव्ययानां विभक्त्यर्थाद्यन्वितार्थाभिधायकत्वाभावात् अविशिष्टाभिधानमित्यत्राह अव्ययानामपीति। तथाव्युत्पत्तेरिति भावः। अभिदधतीति मतभेदेन किंचिदिति किमिदमखंडं उत यौगिकं। नाद्य इत्याह अव्युत्पन्नेति। तादृशवस्तुनोनुपलंभाद् व्युत्पत्तिग्रहायोगादिति भावः। अव्युत्पन्नस्य भ्रांतस्य वा तत्र योगो यदि तदापि न व्युत्पत्तिसिद्धिरिति भावः। द्वितीय आह प्रतीतिरिति। निरित्युपसर्गस्य विशेषस्य च प्रत्येकं व्युत्पन्नत्वात् मनसाज्ञाते वस्तुनि विशेषाभाव बोधकमिति वाक्यविधया सविशेषबोधकमित्यर्थः। वाक्यस्थेन त्विति। विधेयसमर्थत्वादिति भावः। लोकव्युत्पत्तिविरोधश्चेत्याह यथेति। नहि तत्र गजतुरगपदातयो निषेध्यंत इति भावः। संविदस्तीति। विशेषणाद्धर्मित्वावच्छेदकस्यापि निषेध इति भावः। वाक्यरूपेणेति। पक्षं दूषयति। नापि द्वितीय इति। ननु घटो नास्तीत्यत्र प्राधान्येन पदांतरोपस्थापितस्यापि निषेधो दृष्ट इत्यप्रधानतया उपस्थापित विशेषस्यापि निषेधोऽस्त्वित्यत्राह अत इति। युक्तं घटादिपदोपस्थापितानां निषेधः। तत्पदानां प्रतियोग्युपस्थापकत्वात् न वान्वयात्। इहतु भूतलत्वादिवदन्वयप्रतियोगितावच्छेदकतयैव अन्वयादन्यथा धर्मिप्रकाशोपि नस्यादिति प्रतीतिरिव न स्यादिति भावः॥

वत्सजलधिकौस्तुभ नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां दशमो वादस्समाप्तः॥

।।अथ निर्विशेषविषयकनिर्विकल्पकभङ्गवादः एकादशः ।।११।।

संप्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ शान्तावद्यं स्तिमितबहुलानन्दसन्दोहमन्तः ।
यत्तत् ब्रह्म स्फुरति यमिनां पूर्णषाड्गुण्यरूपं सा मे नित्यं हृदि हयमुखी देवता सन्निधत्ताम् ।।

यदेतदाहुः अस्ति तावन्निर्विकल्पकं नाम प्रत्यक्षम्; प्रथमाक्षसन्निपातसमनन्तरमविशिष्ट विषयापरोक्षाभासस्य दुरपह्नवत्वात् । अभ्युपेतं चैतत् सर्वैर्वादिभिः ।

ननु शाब्दास्तत्रापि शब्दानुवेधमिच्छन्ति, यथाऽऽहुः-''न सोऽसि प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ।।'' (वाक्यपदीयं) इति । सत्यम्; तैरपि समाधिदशायां तस्यैव शब्दस्य निरस्तसमस्तकल्पनाजालस्योपलम्भः स्वीकृतः । किंच शब्दानुविद्धत्वं न सर्वत्र ज्ञाने दर्शयितुं शक्यम्; बालादिविज्ञानेषु तदसंभवात् । अन्यथा चैषां व्युत्पत्तिमन्तरेण तत्तद्वाचकपरिज्ञान प्रसंगात् । बालादिविज्ञानान्यपि सूक्ष्मशब्दानुविद्धविषयाणीति चेत्, तथाविधस्य शब्दस्य परैरनभ्युपगमात् । अभ्युपगच्छतामपि तदनुवेधस्य दुःसाधत्वात् । पदज्ञानमेव तावन्न प्रत्यक्षम्; किंपुनस्तदनुविद्धस्तस्य विषयः। न च सूक्ष्मशब्दानुविद्धत्वव्याप्तं किं पुनस्त (दनुविद्ध)स्य विषयः । न च सूक्ष्मशब्दानु विद्धव्याप्तं किंचिल्लिङ्गमस्ति अथ व्युत्पन्नपुरुषबोधदृष्टान्तेन बालादिज्ञानेष्वपि प्रत्ययत्वादि हेतुभिः शब्दानुविद्धविषयत्वं साध्येत तदप्यशक्यम्; पूर्वोक्तप्रसङ्गा(पाता)त् । अस्तु स्थूलशब्दानुवेधस्य बाधः; तत्सहकृतात् पक्षधर्मताबलात् सूक्ष्मशब्दानुवेधः सिद्ध्यतीति चेन्न; वाचकतयाऽनुवेधविवक्षायां

ननु संविन्मात्रस्य विशिष्टवस्तु विषयकत्वं न संभवति निर्विकल्पके व्यभिचारात् । तथा च तद्विषयो निर्विशेषं वस्त्वित्याशंक्य निर्विकल्पकस्यापि विशिष्टविषयकत्वमेवेति वदन् वादार्थं संगृह्णाति संप्रज्ञातेति । संप्रज्ञातसंज्ञितस्यैव निर्विकल्पकशब्दार्थत्वान्न परोक्षनिर्विकल्पकसिद्धिरिति वादार्थ संगृह इति भावः । संप्रज्ञातसमाधिस्वरूपमाह शांन्तावद्येति । तदपि विशिष्टस्वरूपमित्याह पूर्णषाड्गुण्येति । पूर्णाः- अविकलाः षड्गुणाः यस्मिन् तथोक्तं । स्वर्थे ष्वञ् ।

पराभिमतं निर्विकल्पकमनुवदति तदिति । इन्द्रियसंयोगानन्तरमविशिष्टविषयकज्ञानं दुरपह्नवमित्यर्थः ।

सर्ववादाभ्युपगतत्वमसिद्धमिति शंकते नन्विति । शब्दानुगमः शब्दविशिष्टविषयत्वमित्यर्थः । तत्र हेतुमाह अनुविद्धमिति । सर्वमपि ज्ञानं शब्दविशिष्टगोचरत्वेनैवानुभूयत इत्यर्थः । शाब्दा अपि शब्दानुवेधं क्वचिन्नेच्छन्तीत्यत्राह सत्यमिति । स्फोटाख्यं (तत्राह अनुविद्धमिति) शब्दब्रह्म जगदात्मना विवर्तते । तस्यैव स्वरूपस्य समाधिदशायां निरस्तसमस्तजगद्रूपस्य विवर्तस्य समाधौ भानमित्यर्थः । समाध्यतिरिक्तस्थले शब्दानुवेधनियमो नास्तीत्याह । किंचेति । तेषां व्युत्पत्त्यभावादिति भावः । ननु सूक्ष्मशब्दे व्युत्पत्त्यपेक्षा नास्तीति शंकते । बालादिविज्ञान इति । सूक्ष्मत्वं उच्चारणायोग्यत्वं । तथाविधस्येति वर्णपदवाक्यव्यंग्य स्फोटातिरिक्तस्येत्यर्थः। प्रत्यक्षादिविकल्पं मनसिकृत्य प्रत्यक्षं दूषयति पदज्ञानमेवेति । शब्दानुविद्धविषयतया नप्रत्यक्षमित्यर्थः । अनुमानं दूषयति । नचेति । प्रत्ययत्वादिलिंगमस्तीति शंकते तथापीति । पूर्वोक्तेति । व्युत्पत्तिमन्तरेणापि तत्तद्वाचकपरिज्ञान प्रसंगादित्यर्थः । बाध उक्तप्रसंगहेतुरित्यर्थः । शब्दानुवेधःकिं वाचकतया उत रूपादिवत्स्वरूपेण । आद्येआह वाचकतयेति । शब्दत्वाद्वाचकत्वं कल्प्यत इत्यत्राह नहीति । व्यवहारादेव

सूक्ष्माभिमतशब्दस्यावाचकत्वादेव तदनुवेधासम्भवात्। न हि व्युत्पत्तिपदवीदवीयसस्तस्य वाचकत्वमुत्प्रेक्षणीयम्। "अव्युत्पन्नोऽपि शब्दः स्ववाचक" इति तु परिभाषामात्रम्; शब्दवाचकतायामपि शब्दस्य व्युत्पत्तिसापेक्षत्वात्। स्ववाचकत्वसिद्धावपि च न वस्तुनस्तदनुवेधः, तस्य तद्वाचकत्वेनाव्युत्पत्तेः अस्तु रूपादिव दवाचकत्वेनैवानुवेध इति चेत्, न; अतन्निष्ठत्वात्; आरोपासम्भवाच्च। सौगतैरपि शब्दाध्यासो व्युत्पत्ति (कल्पित) बुद्धावेवाऽऽद्रियते, न तु निर्विकल्पके। अतश्चक्षुरादिभिरर्थेषु स्वरूपेणोपलब्धेषु कलुषित व्युत्पत्तिसमयसहानुभूतार्थसंदर्शनादुद्बुद्धसंस्कारवशात् वाचकावगतौ सत्यां वस्तुनस्संज्ञानविकल्प इति न प्रथमाक्षसन्निपातजेषु ज्ञानेषु अव्युत्पन्नबालमूकतिर्यगादिबुद्धिषु च शब्दानुवेधसंभवः।

मा भूच्छब्दानुवेधस्तत्र, तथाऽपि, समानेन्द्रियग्राह्यजातिगुणादिविशिष्टमेव सर्वं द्रव्यं प्रथमाक्षसन्निपातादप्युपलभ्यते इति चेत् तदपि न; अकारणकार्योत्पत्तिप्रसङ्गात्। विशिष्टज्ञानस्य सर्वस्य स्वरूपज्ञानपूर्वकत्वदर्शनात्। प्राथमिकस्वरूपज्ञानाभावे विशिष्टज्ञानस्यानुत्पत्तिप्रसङ्गात्। विगीता बुद्धिः स्वरूपज्ञानपूर्विका, विशिष्टबुद्धित्वात्, संप्रतिपन्नवदित्यनुमानात्।

अस्तु स्वरूपज्ञानम्; तदेव स्वरूपं जातिगुणादिसर्वात्मकमपि निर्विकल्पे न तथा विविच्यते; विकल्पे तु जातिगुणाद्यात्मना तदेव विकल्प्यते इति चेत् तन्न; जातिगुणादीनां परस्परम्, आश्रयाच्च भेदसिद्धेः। अभेदोऽपि तद्वत् सिद्ध्यतीति चेन्न; साधकाभावात्। प्रथमपिण्डग्रहणमस्तीति चेत्, तत्र

व्युत्पत्तेर्ग्राहचत्वादित्यर्थः। ननु शब्दानां अर्थान्तरवाचकत्वमेव व्युत्पत्तिसापेक्षं न स्ववाचकत्वमपीत्याह परिहरति। अव्युत्पन्नइति। स्ववाचकत्वसंभवेपि तदनुवेधासंभवमाह स्ववाचकत्वेति। तस्येति। तदुद्बोधाभावे नानुवेधायोगादिति भावः। द्वितीयं शंकते। अस्त्विति। तदनिष्ठत्वेपि लौहित्यवदारोपोस्त्वित्यत्राह आरोपेति। अस्यैव प्राथमिकज्ञानत्वेन पूर्ववदधिष्ठान ज्ञानाभावाद्बाधका भावाच्च नारोपत्वं संभवतीति भावः सौगतैरपीति। बौद्धसिद्धान्ते- "प्रत्यक्षं न भवेद्विकल्पंमखिलं शब्दात्मनाभासनाद्। अर्थानामिह शंखपीतनयतश्शब्देतिरोधित्सती"॥ ति सविकल्प एव शब्दानुरोधोंगीक्रियत इति भावः। ननु निर्विकल्पकेपि शब्दानुवेधोस्तु तैः प्रतिषेधाभावादित्यत्राह अत इति। संबंधिदर्शनस्य स्मारकत्वात् तद् (द) ज्ञाने शब्दभानेकारणं नास्तीति भावः। संज्ञानं संज्ञितस्य विकल्पः। संज्ञानविद्धप्रत्यये इत्यर्थः।

प्रथमाक्षसन्निपातसमनन्तरमेव विशिष्टज्ञानमस्तु सन्निकर्षाविशेषादिति शंकते माभूदिति। सन्निकर्षमात्रं न कारणमिति परिहरति तदपि नेति। तर्ह्यधिकं किं कारणमित्यत्राह विशिष्टज्ञानस्येति। जंबीरस्य रूपरसौ पर्वतो वह्निमानित्यादौ जंबीरपर्वतादिज्ञानस्य हेतुत्वदर्शनादिति भावः। अन्वयव्यतिरेकाभ्यां कारणत्वमुक्त्वा अनुमानमपि प्रमाणमित्याह विगीतेति।

प्राथमिकज्ञानस्य जात्याद्यविषयकत्व मसहमानः प्रकारान्तरेण निर्विकल्पकमुपपादयन् कौमारिलश शंकते अस्त्विति। जात्यादेर्भेदाभेदांगीकारेण स्वरूपाभिन्नत्वात् स्वरूपविषयकमपि प्राथमिक ज्ञानं जात्यादिविषयकमेव। प्राथमिकज्ञानेतु न विविच्यते न भिन्नतया गृह्यते। द्वितीयादि ज्ञानेतु विविच्यते। यस्मिन्नविविच्यते तन्निर्विकल्पकं इतरस्य विकल्पकं। नतु जात्याद्यगोचरं निर्विकल्पकं तद्गोचरं सविकल्पकमिति विभागमित्यर्थः। जात्यादि स्वरूपाभेदो धर्मिणोऽसिद्ध इति परिहरति नेति। प्रथमपिंडेति। अयं घट इति प्रथमपिंडग्रहणमभेदे प्रमाणमित्यर्थः। प्राथम्यं किं ग्रहणविशेषणं उत पिंडविशेषणमिति

प्रथमपिण्डग्रहणशब्देन किं पिण्डस्य प्रथमं ग्रहणं विवक्षितम्? उत अनुपलब्धचरेष्वेकजातीयेषु कस्यचित् प्रथमस्य पिण्डस्य ग्रहणमिति? न प्रथमः; प्रथमाक्षसन्निपातसमनन्तरं जात्यभिन्नवस्तूपलम्भे तस्यैव विकल्पत्वापातात्। अनुवृत्तत्वाद्याकराग्रहणादविकल्पत्वमिति चेत् न; तथासति जात्यादिस्वरूपस्याग्रहणे तदभिन्नवस्तूपलम्भासिद्धेः जात्यादीन्यपि सदात्मना तदैव गृह्यन्त इति चेन्न; तथा सति सन्मात्रं गृहीतम्, न तु जात्यादिरित्येव पर्यवसानात्। तथाच तदेवास्माकं निर्विशेषमिति। असद्व्यावृत्तिलक्षणो विशेषस्तत्रापि गृहीतस्स्यादिति चेन्न; तस्य तत्स्वरूपानतिरेकात्। अतिरेके वा तद्ग्राहिणः सविकल्पकत्वप्रसङ्गात्। नापि द्वितीयः; तत्रापि प्रथमाक्षसन्निपातजन्यज्ञानस्य उक्तन्यायेन तदभेदग्रहणासिद्धेः। तत्समनन्तरभाविनस्तु विकल्पस्य जातिग्रहणे सत्यपि प्रकारप्रकारिभावेन भेदस्यैव ग्रहणात्। तदानीं तत्सजातीयवस्त्वन्तरग्रहणाभावात्, जातेर्वस्त्वन्तरानुगतत्वलक्षण आश्रयाद्भेदो न गृह्यते। जातिगुणादिविशिष्टेऽपि वस्तुन्येको गौरित्याद्येकशब्दानुविद्धप्रत्ययादैक्यमुपलब्धमिति चेन्न; वसनाभरणादिविशिष्टेऽप्येकोऽयमिति प्रत्ययात्। तत्र पुरुषान्तरव्यवच्छेदार्थमेकशब्दः; न तु विशेषणविशेष्यैक्यार्थमिति चेत्, अत्रापि गवान्तरादिव्यवच्छेदार्थमित्येवास्तु। नन्वभेदरहितेषु विशेषणेषु मत्वर्थीयसापेक्षं सामानाधिकरण्यं दृष्टम्; जातिगुणादिषु मत्वर्थीयनिरपेक्षसामानाधिकरण्याद‌भेदोऽप्यभ्युपगन्तव्य इति चेन्न; अभेदप्रसङ्गरहितेष्वपि शरीरात्मादिषु देवोऽहम्; मनुष्योऽहम्; आत्मा

विकल्पयति तत्रेति ।ज्ञानस्य प्राथम्य मेकव्यक्तिविषयेषु प्रथमोत्पत्तिः। पिंडस्य प्राथम्यं प्रथमगृहीतत्वं। सजातीयेषु प्रथमाक्षेति जातित्वेनोपस्थितजात्यभेदग्रहादिति भावः। अनुवृत्तत्वेति। जातित्वाग्रहणादिति भावः (अर्थः)। असाधारणरूपेण ग्रहणे तदभिन्नत्वेन ग्रहो न संभवतीति भावः। ननु जात्याद्यभिन्नत्वप्रकारेण ग्रहणे हि जात्यादेरसाधरणरूपेण ग्रहणापेक्षा। सन्ति तु धर्मिणि गृह्यमाणे जात्यादिकमपि सदभिन्नं सदात्मना गृह्यत इति शंकते जात्यादीन्यपि। तथा सतीति। स्वरूपापेक्षया जात्यादेरभेदे किं प्रमाणमिति पृष्टे तत्स्वरूपविषयकं ज्ञानं सदभिन्नत्वाज्जात्यादिकमपि सद्रूपेण गृह्णातीत्युक्तं ततश्चान्योन्याश्रयः। अभेदे सिद्धे सदज्ञानस्य सद्रूपेण तदभिन्नजातिविषयत्वसिद्धिः। सद्रूपेण तग्रहे सिद्धे हि भेदसिद्धिरिति। तथा च सन्मात्रमेव गृहीतं। नतु जात्यादिकमित्येव पर्यवसानान्निर्विशेषविषयं निर्विकल्पकं सिद्धमित्यर्थः। नन्वेवमपि निर्विशेषविषयनिर्विकल्पकसिद्धिर्न भवति। असद्व्यावृत्तेरपि ग्रहणादिति शंकते असद्व्यावृत्तीति। अन्योन्याभावो व्यावृत्तिः। सा स्वरूपाद्भिन्नेति पक्षे कथमित्यत्राह अतिरेके वेति। तदानीं तद्ग्रहो नस्यादिति भावः। तदभेदग्रहणासिद्धेरिति। जात्य भेदग्रहणासिद्धेरित्यर्थः। जातिप्रथमाक्षसन्निपातज्ञानेन भेदग्रहण संभवादेकशब्दप्रयोगाच्च अभेदे तत्प्रमाणमिति शंकते तदानीमिति। आश्रयाद्भेदः भेदकः। शब्दानुविद्धः शब्दव्यवहारहेतुः। न तावदभेदग्रहणे भेदग्रहणाभावो मानमिति प्रसंगात्। नाप्येकशब्दानुविद्धत्वं व्यभिचारादिति परिहरति वसनेति। यद्विषय एक शब्दानुवेधः तत्रापि तदभेद इति न व्यभिचार इति भावः। अत्रापीति। विशेषमात्रविषय इत्यर्थः। अभेदे मानान्तरं शंकते नन्वभेदेति। यथा दंडी देवदत्त इत्यत्रेति भावः। मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यस्य व्यभिचारमाह अभेदप्रसंगइति। यद्यपि देवोऽहमित्यादि व्यवहारो भ्रान्तिमूलक इति वक्तुं शक्यं। तथापि विवेकिनां आत्मा देवो जात इति व्यवहारे व्यभिचार इति भावः। लक्षणयेति। देहवाचिना देवादिपदेन तद्विशेष्टे लक्षणा। तथा चा लाक्षणिकमत्वर्थीय

देवो जातः कर्मभिरित्यादिमत्वर्थीयनिरपेक्षसामानाधिकरण्यदर्शनात्। लक्षणया तत्र सामानाधिकरण्यमिति चेन्न; तत्रापि कैश्चितथाऽभ्युपगमात्॥ अपृथक्सिद्धत्वात् अपर्यवसानादिवृत्त्या वा तत्र सामानाधिकरण्यमिति चेन्न; शरीरेऽपि तथा सुवचत्वात् (तत्रापि तथा सुवचत्वात्) अपृथक्सिद्धत्वस्य मत्वर्थीयनैरपेक्ष्यप्रयोजकत्वादिति। अस्तु तर्हि अपृथक्सिद्धत्वादेव जातिगुणादेराश्रयतादात्म्यमिति चेन्न; भेदगर्भेण संबन्धेनाभेदसाधने व्याघातात्। नायमभेदो भेदाभावात्मा, नापि भेदविरुद्धो धर्मः; येन व्याघातः स्यात्; अपि त्वन्यादृश इति चेन्न-तथाविधस्य कस्यचिदभेदस्याप्रसिद्धत्वात्। भेदाविरुद्धस्य कस्यचित् स्वभावान्तरस्य साधनेऽस्माकमनिष्टाभावाच्च। एतेन "सहोपलम्भनियमादभेद" इत्यपि निरस्तम्; सहोपलम्भस्य तन्नियमस्य च तादात्म्यवैरित्वात्। तदेवं भिन्नेष्वभेदसाधकासिद्धौ, "भेदाभेदयोः प्रतीतिबलादविरोधः" इति धार्ष्ट्यमात्रेणोच्यते; अतो जातिगुणाद्यात्मकस्य एकस्यासम्भवादेव तद्विषयं निर्विकल्पमाशाम्बरसगोत्राणामाशामात्र परिकल्पितम्।

अस्तु तर्हि परस्परमत्यन्तभिन्नानां द्रव्यजातिगुणादीनामगृहीतविशेषणविशेष्यभावानां स्वरूपमात्रग्रहणं निर्विकल्पकम्; तत एव च तत्समनन्तरभाविविकल्पोत्पत्तिरपि निर्व्यूढा भवति। "न ह्यगृहीतविशेषणा विशिष्टबुद्धिरुपपद्यते"। न च जात्यादीनां विशेषाणां तत्तदिन्द्रियेण ग्रहणयोग्यानां

प्रत्ययनिरपेक्षसामानाधिकरण्यं अव्यभिचारीति भावः। तत्रापीति। मीमांसकैकदेशिभिः जातिवाचिपदानां व्यक्तिषु लक्षणांगीकारात्सत्वसिद्धिरिति भावः। ननु येतु अपृथक्सिद्धत्वादपर्यवसानवृत्त्या वा सामानाधिकरण्यमिच्छंति तन्मते न दोष इति शंकते अपृथगिति (अन्यथेति)। जातिमात्रशक्तिजन्यज्ञानस्य व्यक्तिविषयत्वं विना जातिविषयत्वासंभवात्पर्यवसान मित्यर्थः। जातिशक्तेरेव व्यक्तिबोधकत्वमादि शब्दार्थः। अपृथक्सिद्ध्यादेशशरीरेपि वक्तुंशक्यत्वान्न तस्योक्तसामानाधिकरण्य प्रयोजकत्वं। यदि शरीरव्यावृत्तमेवतत्तदाविशेष्यवैयर्थ्यमिति भावः। नन्वस्तु शरीर व्यावृत्तमपृथक्सिद्धत्वमभेदहेतुरिति शंकते अस्त्विति। भिन्नेषु घटपटादिष्वपृथक्सिद्धेर दर्शनादितिभावः। ननु कुत्राप्यन्वयादर्शनात् कथं व्याप्तिग्रह इति चेत् व्यतिरेक्यनुमानस्य सुवचत्वात्। भेदगर्भेणेति। ययोर्मध्ये नियमेनैकमपराश्रितमेव तयोरपृथक्सिद्धत्वमिति भेदगर्भत्वं। यद्वा तद्व्याप्यत्वमेव तद्गर्भत्वं। अन्यथा घटस्यैव घटापृथक्सिद्धप्रसंगादिति भावः। व्याधाताविति शंकते नायमिति। स किं भेदशब्दस्य मुख्यार्थः उत न आद्य आह तथाविधस्येति। द्वितीयं दूषयति भेदाविरुद्धस्येति। स्वभावोधर्मः। प्राथमिकस्य स्वरूपविषयत्वस्य ज्ञानस्य जात्याद्यविषयतयाऽस्मदभिमत निर्विकल्पकाविरोधादिति भावः। सहोपलंभस्येति। सहभावस्य भेदगर्भत्वादनियमस्य भेदव्यापकत्वादित्यर्थः। आशांबरेति। भेदा भेदवादिनामनैकान्त्यवादिदिगंबर सगोत्रत्वमिति भावः।

निर्विकल्पकं नैयायिकसिद्धमाशंकते अस्त्विति। एवमपि जात्याद्यविषय निर्विशेषविषयक निर्विकल्पकसिद्धेर्नेति भावः। सविकल्पकव्यावृत्त्यर्थे गृहीतविशेष्यविशेषणभावमित्युक्तिः तत एवेति। निर्विकल्पकरूपविशेषणज्ञाना(असाध्यत्वात् तज्जनक निर्विकल्पकस्य) देरेवेत्यर्थः। नहीति। निष्ठया भूतत्वस्य विवक्षितत्वात्पूर्वं विशेषणज्ञानाभावे विशिष्टबुद्धिर्नस्यादित्यर्थः। जात्यादिविषयज्ञानस्य जात्यादिविशेषणज्ञानसाध्यत्वात् तज्जनक निर्विकल्पकस्य जात्यादिविषयकत्वं (प्रसाध्य सामग्री सत्वाद्य निर्विकलपकस्य जात्यादिविषयकत्वं) साधयति नचेत्यादिना। सत्यां सामग्र्यां

तत्तदिन्द्रियसंप्रयोगादिसामग्र्यां सत्यामग्रहणमुपपद्यते। अतोविशेषण स्वरूपग्रहणरहितं निर्विकल्पकं नास्तीति। तदप्यसारम्; यदि विशेषणविशेष्ययोस्स्वरूपग्रहणम्; कस्तर्हि विकल्पाद्भेदः?

समवायग्रहणमिति चेन्न; अपृथक्सिद्धेषु जात्यादिषु वेदान्तविद्भिः स्वरूपातिरिक्तसमवायानभ्युपगमात्। तथा च वैशेषिकनिराकरणाधिकरणे सूत्रम्-"समवायाभ्युपगमाच्च साम्यादनवस्थितेः" (ब्र.सू.२-२-१२)इति। अस्तु वा समवायाख्यः सम्बन्धः,स किं तदा न गृह्यते?। अयोग्यत्वादिति चेन्न; नित्यं तदग्रहणप्रसङ्गात्। एवमपि कैश्चिदिष्यत इति चेन्न; तथाऽपि विकल्पाविशेषप्रसङ्गः; न हि तदा विकल्पेऽपि समवायग्रहणं संभवति। तथाऽपि विशेषणविशेष्यभावो गृह्यत इति चेन्न, तर्हि तत एव ततःपूर्वं विशिष्टप्रत्ययोत्पत्तिर्वक्तव्या। जाते हि विशिष्टप्रत्यये निष्कर्षकबुद्ध्या विशेषणमिदं विशेष्यमिदमिति विविच्यते। ततश्च प्रथममेव विशिष्टप्रत्यये क्व निर्विकल्पकम्?। मा भूत् स्वरूपायोग्यत्वम्; "सहकारिवैकल्यात्तु निर्विकल्पके समवायाग्रहण"मिति न्यायाचार्या इति चेत्; किं तत् सहकारि?। अवच्छेदकग्रहणमिति चेन्न, अवच्छेदकयोराश्रयाश्रयिणोस्स्वरूपस्य निर्विकल्पेऽपि ग्रहणात्। अवच्छेदकग्रहणस्य संबन्धग्रहणकारणत्वात् पूर्वमवच्छेदकग्रहणमपेक्षितमिति चेन्न; तस्य कारणत्वे प्रमाणाभावात्; सम्बन्धग्रहणदशायां च येन रूपेणावस्थाय तदवच्छेदकमवच्छिन्द्यात्, तद्यदि रूपं युगपद्ग्रहणेऽपि संभवति, किं तस्य पूर्वग्रहणेन, व्यर्थविशेषणत्वात्। सत्यपि पूर्वग्रहणे

कार्यविळंबायोगादिति भावः। कस्तर्हीति। विशेषणविशेष्यग्रहस्याविशेषादिति भावः।

समवायेति -उभयसम्बन्धविषयकज्ञानं सविकल्पकं तदविषयकं निर्विकल्पकमिति भावः। अपृथक्सिद्धेष्विति। पृथक्सिद्धदंडादिष्विव तदुभयातिरिक्तसंबंधाभावात्तदुभयस्वरूपविषयत्वम विशिष्टमिति भावः। समवायाभ्युपगमाच्चेति। रूपरूपिणोस्संबंधितया समवायेऽभ्युपगम्यमाने समवायस्यापि संबंधाभावेऽभ्युपगम्यमाने तस्यापि तथेत्यनवस्था स्यादिति। तत्परिहाराय क्वचित्संबंधं विनाप्याधाराधेयभावे सत्यादावेव तदस्त्विति समवायो निराकृतइत्यर्थः। स किमिति। इच्छादेरिव तस्यापि ग्रहणे सामग्र्याः सत्वादिति भावः। एवमपीति। समवायाग्रहणं कैश्चिदिष्यते तन्मतमङ्गीकुर्म इति भावः। नहीति। नित्यं ग्रहणांगीकारादिति भावः। तथापीति। विशेषणत्वविशेष्यत्वग्रहात् विकल्पकस्य विशेष इति भावः। तर्हीति। विशेषणविशेष्य भावो यत एव विशिष्टप्रतीति निबंधकः तत एव हेतोस्ततः पूर्वं विशिष्टप्रतीतेः पूर्वं विशिष्टप्रतीतौ जायमानायां विशेषणमिदं विशेष्यमिदमिति ज्ञानान्तरेण गृह्यत इत्यर्थः। माभूदिति। सहकारिवशाद्विकल्पे समवायभानाद्विशेष इति भावः। सहकारिपदेन किं प्रयोजकत्वं विवक्षितं उत कारणत्वमिति विकल्पाभिप्रायेणाद्येदोषमाह अवच्छेदकयोरिति। अवच्छेदकग्रहस्य पूर्वं सत्वा भावेपि तद्व्यतिरेकसंबंधग्रहाभावात् प्रयोजकत्वमिति भावः। द्वितीयं शंकते अवच्छेदकग्रहस्येति। अवच्छेदकशब्देन संबंध्यंतरमुच्यते। संबंधिज्ञानाभावे संबंधग्रहो न दृश्यत इत्यत्राह संबंधेति। ज्ञायमानत्वरूपेणावच्छेदकं दंडत्वाद्यवच्छेद्यं संबंधाद्यवच्छिंद्याद्धि विशेषशब्देन संबंध्यत्रोच्यते। संबधिज्ञानाभावे संबंधग्रहो नदृश्यत इत्यत्राह संबंधेति) शेषयत्तादृशं ज्ञायमानत्वं युगपद्ग्रहणेपि संभवतीति किंतस्य पूर्वग्रहणे न संबंधिज्ञानविषयत्वमपेक्षितं। ननु पूर्वं ज्ञानविषयत्वं पूर्वविशेषणस्य व्यर्थत्वादिति भावः। अन्यथासिद्धत्वाच्च पूर्वग्रहणं नापेक्षितमित्याह सत्यपीति। सत्यपि पूर्वग्रहणे

तादात्त्विकावच्छेदकस्वरूपोल्लेख एव हि अवच्छेद्योल्लेखापेक्षितः, पूर्वग्रहणे सत्यपि तादात्त्विकावच्छेदकोल्लेखाभावे तदवच्छिन्नसम्बन्धोल्लेखासम्भवात्।

अस्तु सम्बन्धस्यापि स्वरूपग्रहणम्, तथाऽपि तस्यावच्छिन्नत्वं न गृह्यत इति चेन्न; अवच्छेदकयोराश्रयाश्रयिणोरवच्छेद्यस्य च सम्बन्धस्य स्वरूपग्रहणे कथमवच्छिन्नत्वाग्रहः? अवच्छेदकस्वरूपग्रहणातिरिक्तस्य तदवच्छिन्नत्वग्रहणापेक्षितस्यासंभवात्, अनभ्युपगमाच्च।

एतेन समवायस्य निर्विकल्पकैकविषयत्वं वदन्तो भूषणमतानुसारिणोऽपि प्रत्युक्ताः। अतो यदि विशेषणग्रहणम्, तदा न कथंचिदपि निर्विकल्पकत्वसिद्धिः। विशेषणरहितस्वरूपग्रहणे तु तदेवास्माकं निर्विशेषग्रहणमिति।

भवतु निर्विकल्पके निर्विशेषग्रहणम्, तथाऽपि विशेषा एव स्वलक्षणापरनामानः स्वयमकिञ्चिन्निष्ठाः कैश्चिदनाश्रिताश्च तत्र गृह्यन्ते; नद्वितीयमिति चेन्न प्रमाणभावात्। नीलपीतादिप्रतिनियतविचित्रविकल्पोत्पत्तिरेव प्रतिनियतकारणमन्तरेणानुपपद्यमाना निर्विकल्पकेऽपि स्वानुरूपविशेषोल्लेखं व्यवस्थापयतीति चेन्न; एकस्मिन् अद्वितीये सर्वेषु निर्विकल्पेषु गृह्यमाणे

तादात्त्विकग्रहणमभिप्रेतं ततश्च तादात्त्विकावच्छेदकग्रहणाभावे विशिष्टज्ञानासिद्धेः। यत्र पूर्वग्रहणमस्ति तत्राप्यव्यभिचारात् तादात्त्विकग्रहणमेव प्रयोजनं नतु पूर्वग्रहणमपीत्यर्थः। अवच्छेदकस्वरूपोल्लेखः - प्रतियोगिस्वरूपज्ञानं। अवच्छेदोल्लेखः-संबंध ज्ञानं।

ननु निर्विकल्पकमपि संबंधविषयकमस्तु। नच निर्विकल्पकत्वव्याघातः अवच्छिन्नत्वस्याग्रहान्निर्विकल्पकत्वोक्तिरिति शंकते अस्त्विति। निर्विकल्पकेपि (तद) तद्ग्रहणं स्यादेव सामग्र्यास्सत्व..इति भावः। अवच्छेदकयोरिति। नन्वच्छेदकज्ञानस्य पूर्वमभावात्कथं निर्विकल्पके भानसामग्रीत्याह अवच्छेदक स्वरूपेति। स्वरूपशब्देनावच्छेद्यस्वरूपं गृह्यते। अवच्छेद्यावच्छेदकस्वरूपग्रहणं च समानकालीनतयापेक्षितं न तु पूर्ववृत्तितयेति भावः।

ननु विशेष्यविशेषणानवगाहि स्वरूपविषयकं ज्ञानं निर्विकल्पकमिति हि तल्लक्षणं। तत्र स्वरूपशब्देन विशेषणविशेष्यसंबन्ध उच्यते स एव निर्विकल्पकविषयः। न च तस्य सविकल्पकेऽपि विषयत्वं विशेषणविशेष्यमात्रादेव विशिष्टज्ञानत्वोपपत्तेः। न समवायविषयत्वमिति पक्षं दूषयति एतेनेति। अवच्छेदकभानं विनावच्छेद्यभानायोगादित्यर्थः। नन्वेतावतापि निर्विकल्पकखंडनेन किंसिद्धं भवतीत्यत्राह अत इति। यतो निर्विकल्पकं जात्याद्यविषयकं स्वरूपमात्रविषयकमतइत्यर्थः।

नन्वस्तु निर्विकल्पकं तथापि कथं निर्विशेषवस्तु सिद्धिः निर्विकल्पकस्यैव विशेषविषयत्व संभवेनाद्वैतासिद्धेरिति बौद्धः शंकते तथापीति। स्वलक्षणापरनामानः -स्वलक्षणशब्दवाच्यः। निराधारा-निर्धर्मकाइत्यर्थः। तथाच बहुत्वाद्वितीयवस्तुविषयत्वंनास्तीति भावः। निर्विकल्पकस्य विशेषविषयत्वे प्रमाणं नास्तीत्याह प्रमाणेति। नीलपीतादिस्वलक्षणानां सद्भावे मानं नास्तीत्याशंकते नीलपीतादीति। कंबले नीलोऽयमिति सुवर्णे पीतोऽयमिति पटे शुक्लोऽयमिति विकल्पनियमो दृश्यमानस्वकारणभूततत्तद्गोचरं ज्ञानमाक्षिपन् तद्गोचरं निर्विकल्पकं कल्पयतीत्यर्थः। स्वानुरूपविशेषोल्लेखं -तत्तद्विशेष विषयत्वमित्यर्थः। विशेषणज्ञानं निर्विकल्पकं अपितु विकल्प एवेति परिहरति नैकस्मिन्निति। गृह्यमाणे -अभ्गासमाने।

तत्तद्विचित्रवासनादिरूपभ्रमसामग्रीसामर्थ्यादेव प्रतिनियतविकल्पोपपत्तेः । किमेकस्यामेव रजतौ गृह्यमाणायां विचित्राः सर्पभूदलनाम्बुधारादिविकल्पाः क्रमशो न संदृश्यन्ते? युगपदपि वा किमेकस्मिन् गगने गन्धर्वनगरप्राकारतोरणादि विकल्पाः प्रकल्प्यन्ते? विकल्पानां च भ्रान्तिरूपत्वं भवद्भिरपीष्यते। विशेषाणामेवाभावे कथं विचित्रवासनादिसंभव इति चेन्न; विशेषाणां वासनाहेतुत्वाभावात्, तत्तद्विषयविज्ञप्तिबीजान्येव वासनामङ्कुरयन्ति । अन्यथा शुक्तिरजतादिविषय मिथ्यात्वेन तदनुभवजन्यवासनाभावात् तदनुस्मरणतन्मूल चेलाञ्चलग्रन्थिविघटनादयो न संभवेयुः ॥

नन्वापणादिषु सत्यरजतग्रहणाद्रजतवासना । ततश्च तदेव रजतं वासनावशादेव देशान्तरकालान्तरयोरसदपि प्रतीयते। तत्प्रतीतिमूलश्च पुनस्संस्कारस्मृत्यादिप्रवाह इति युज्यते। यस्य तु क्वचिदपि विशेषा न सन्ति, तस्य कथं विशेषवासना निर्वाह्या? उच्यते, मिथ्यार्थज्ञानस्यापि तावद्वासनाजनकत्वं भवद्भिरपीष्यत एव । ततश्च पूर्वपूर्वभ्रमविशेषजनितसंस्कारविशेषादेव सर्वविकल्पोपपत्तौ किं क्वचिद्विचित्रेणार्थेन, विकल्पवैचित्र्याय प्रत्यक्षतया तदनुमेयतया वा कल्पितेन? अस्य चार्थस्य वैशद्याय समानसमयाचारा योगाचारादय उपास्यन्ताम् । तत्र तु भवन्त एव तेषां बाह्याभेदापह्नवन्यायेन आन्तराभेदापह्नवं परानिष्टमुद्घाटयन्तु । अतो विचित्रविकल्पोदयस्य अन्यथासिद्धेर्निर्विकल्पकेऽपि विचित्रविशेषग्रहणकल्पना न युक्ता; तत्कल्पनेऽपि वा लाघवाय विचित्राद्वैतं विश्वविषयमास्थीयतां। न चैकस्यानेकस्वभावताव्याघातः; "रूपरसगन्धस्पर्शस्वभावाः पार्थिवाः परमाणवः, रूपरसस्पर्शस्वभावा आप्याः, रूपस्पर्शस्वभावास्तैजसा" इति भवद्भिरेकैकस्यानेक स्वभावकल्पनात् । अत एव नैकस्य विरुद्धस्वभावतेत्यपि दत्तोत्तरम्, लोकदृष्ट्या पराद्धान्तिभिश्च रूपत्वरसत्वादेरविरुद्धस्वभावतया स्वीकारात् । भवद्भिस्तु शान्त्या सिद्धाश्रमीभवद्व्याळनकुलादेरिव

उक्तमेवोपपादयति । किमेकस्यामिति । प्राकारतोरणादिविकल्पाः युगपदपिवा किं तेन कल्प्यं इत्यन्वयः । ननु सर्पादि भ्रमाणां वासनावशात्संभवेपि प्रकृते तदसंभव इत्यत्राह विकल्पानामिति । ननु भ्रान्तिज्ञानवैचित्र्यार्थं विचित्रवासना सिद्धये विचित्रविशिष्टविषयज्ञानस्य जनकता वाच्या विचित्रविषयाभावे च विचित्रवासना न स्यादिति शंकते विशेषाणामिति । विज्ञप्तिबीजान्येव विज्ञप्तयो ज्ञानानि । तान्येव बीजानि कारणानीत्यर्थः । अन्यथेति । विशेषाणां वासना हेतुत्वे तत्र विषयीभूतरजतस्य मिथ्यात्वेन जनकत्वादित्यर्थः ।

ननु तत्तद्विषयविज्ञप्तेर्वासनाहेतुत्वेपि भ्रमरूपविज्ञप्तेरपि वासनाजन्यत्वात्तन्मूलज्ञानापेक्षायां क्वचित्प्रमायामेव पर्यवसानं वाच्यं अन्यथावस्थानात् । तथाच विशेषानंगीकारः कथमिति शंकते नन्वापणादिष्विति । आपणस्थरजतानुभवोऽपि भ्रम एव । एवं च न तन्मूलसंस्कारजनकासंभवः । जन्मान्तरीयरजतानुभवस्येव तन्मूलत्वात् । न चानवस्था । प्रवाहानादित्वेनादोषत्वादिति परिहरति । उच्यत इति । ननु प्रत्यक्षादिसिद्धाः विशेषाः कथमपह्नोतुं शक्य इत्यत्राह अस्यार्थस्येति । बाह्यमिथ्यात्वेन समानसमयाचाराः समानव्यवहाराश्च द्वितीयबौद्धा इत्यर्थः । नन्वेवमप्यालयविज्ञानाद्यान्तरभेदांगी कारात्कथं निर्विशेषत्वमित्यत्राह तत्रत्विति । आंतरविकल्पस्यापि वासनामूलत्वेन भ्रमत्वसंभवादित्यर्थः। तत्कल्पनेऽपि क्षितिकर्तूनामिति लाघवान्निर्विकल्पकानामेव विषयत्वे विशेषविषयत्वेपि सविशेषाणामेवैक्यमित्यर्थः । विश्वविषयं विश्वे विषयाः प्रतियोगित्वेन यस्याद्वैतस्येत्यर्थः । रूपरसेति । पृथिव्यादयश्चत्वारः पदार्थाः । तेच परमाणुस्वरूपाः त एव रूपरसगंध स्वभावाः । ननु रूपादयस्तद्धर्माः

नीलधवलादेरपि वैरस्यस्य शमयितुं शक्यत्वात्।

तस्मादस्मदभिमतमद्वैतमेव शुद्धं चित्रं वा निर्विकल्पकपदमिति शत्रुमित्रविभागोदासीनैश्च सौगतैरपि संग्रहणीयम्। ततः प्रमाणज्येष्ठस्य प्रत्यक्षस्य प्रथममेव निर्विशेषोल्लेखित्वात् विकल्पोल्लीढविशेषाणां भ्रान्त्या निर्वाहात् न शक्यम्, ''निर्विशेषवस्तुनीदं प्रमाणमिति न शक्यते वक्तुम्''(श्री.भाष्यं जिज्ञा) इति। अत्रोत्तरमाह, ''निर्विकल्पकमपि सविशेषविषयमेवे''ति। अयमभिप्रायः तत्र यत्तावत् शाब्दकौमारिलादिमतदूषणं तदस्माकमपि सम्मतमेव। तत्र यदुक्तं विशिष्टग्रहणस्य स्वरूपग्रहणं कारणंमिति तन्न सार्वत्रिकम्। भिन्नसामग्रीवेद्येषु सविशेषणविशेष्येष्वेव तथा दर्शनात्, एकसामग्रीवेद्येषु तु समानकालीनविशेष्यग्रहणेनैव विशिष्टग्रहणसिद्धेः। उक्तं च त्वयाऽपि ''तत्कालीनविशेषणग्रहणमेव विशिष्टोल्लेखोपयोगी''ति; तद्वत् विशेष्यस्वरूपस्य पूर्वगृहीतस्यापि तादात्विकोल्लेखाभावे विशिष्टग्रहणासिद्धेः, सति तस्मिंस्तत्सिद्धेः, पूर्वग्रहणस्यानपेक्षितत्वात्। अत एव विशिष्टग्रहणत्वात् स्वरूपग्रहणपूर्वकत्वानुमानं प्रत्युक्तम्। यच्चोक्तम् विशेषणग्रहणे सति न कथिञ्चिदपि निर्विकल्पकसिद्धिरिति तदप्यसत्; निर्विशेषग्रहणरूपनिर्विकल्पके शशविषाणायमाणे यदि विशेषणग्रहणे

इत्यंगीकृतमिति भावः। यद्यपि वैभाषिकस्य तन्मतं। न योगाचारस्यतथापि बौद्धत्वेनैक्याद्भवद्भिरित्युक्तिः। केचित्तु यद्यपि योगाचारस्य बोधकं वस्तु नास्ति तथापि कल्पितं वस्तु तथा कल्प्यत इति न विरोध इत्याहुः। किं प्रतीतिविरोधो वस्तु विरोधो वेति विकल्प्याद्ये लोक दृष्टैरपि लौकिकाः पटादिबोध्यो रूपादीनि विविच्य न पश्यन्ति किन्तु तदात्मनेति रूपत्वादि नानाधर्मवत्वेन प्रतीतिर्नविरुद्ध इति भावः। द्वितीये आह परसिद्धान्तिभिश्चेति बौद्धैरित्यर्थः। सर्वमतेप्यविरोधमाह भवद्भिस्तु शान्त्येति। सिद्धप्रभाववत्प्रतीति -प्रभाव एव शान्तिकारणमिति भावः। सौगतमते क्षणिकत्वान्नकश्चिच्छत्रुर्न कश्चिन्मित्रमिति भागा भावः।

ननु विशेषग्राहकाणामपि सत्वात्कथं निर्विशेषता। न च तेषामप्रामाण्यं बाधकाभावात् न च निर्विकल्पकं बाधकं वैपरीत्यप्रसंगादित्यत्राह प्रमाणजयेष्ठस्येति। निर्विकल्पकस्य निर्विशेषविषयस्य प्रथमभावित्वात् तेन इतरेषामन्यथासिद्धानां बाध इति भावः। इदं प्रमाणमिति वक्तुं न शक्यत इति वक्तुमित्यन्वयः। 'अत्रोत्तर'मिति भाष्यकार इति शेषः। नहि प्रतिज्ञामात्रमर्थसाधकमिति मनसिकृत्य भाष्यं व्याचष्टे अयमभिप्राय इति। अन्वयव्यतिरेकौ भिन्नसामग्रीवेद्यविशेषणविशेष्यविशिष्टबुद्धि विषयावेव। नतु सामान्यतो विशिष्टबुद्धिमात्रविषयौ। अतो न प्रत्यक्षं स्वरूपग्रहणस्य विशिष्टबुद्धिं प्रति कारणत्वे प्रमाणमित्याह भिन्नसामग्रीति। एकसामग्रीवेद्येषु एकेंद्रियनिरूपित लौकिकप्रत्यक्षसामग्रीवेद्येष्वित्यर्थः। उक्तं च त्वयापीति। पूर्वपक्ष इति शेषः। ननु तत्र विशेषणग्रहस्य पूर्ववृत्तत्वमास्त्वित्युक्तं न तु विशेष्यस्वरूपग्रहस्येत्यत्राह तद्वदिति। न्यायस्य तुल्यतयोक्तप्रया सत्वमित्यर्थः अत एवेति। भिन्नसामग्रीवेद्यविशेषणविशेष्यगोचर बुद्धिष्विव स्वरूपग्रहणपूर्वकत्व दर्शनादित्यर्थः। ततश्च सर्वजनकेन्द्रियनिरूपितस्वजनकलौकिक सन्निकर्षवद्विशेषणविशेष्य विषयकत्वरहितविशिष्टबुद्धित्व मुपाधिरिति। यद्वा विशेष्यांशे लौकिकभिन्न बुद्धित्वमुपाधिः सुरभिचन्दनमित्यादौ विशेषणज्ञानजन्यत्वेपि विशेष्यज्ञानजन्यत्वाभावात् न साध्यमिति न साध्यव्यापकत्वं शंकतेति ध्येयं। ननु विशेषग्रहणे सति कथंचिदपि निर्विकल्पकत्वासंभवात् रूपादिग्रहणमेव निर्विकल्पकं वक्तव्यमित्यत्राह यच्चोक्तमिति। निर्विशेषग्रहणेति। निर्विशेषनिर्विकल्पकं तावत् दूषितमेव। विशेषग्रहणात्मकमपि यदि न स्यात्

निर्विकलपकं नाम न किंचित् स्यात्; न स्यादेव; न ह्यप्रामाणिकमवश्यमङ्गीकुर्मः।

योगशास्त्रेषु निर्विकल्पकसमाध्युपदेशान्न तस्याप्रामाणिकत्वमिति चेन्न; तत्रापि निर्विशेष ग्रहणस्यानुपदेशात्। आगमानां च सविशेषपरत्वस्य स्थापयिष्यमाणत्वात्। समाधिलक्षणानुप्रविष्टस्यार्थमात्रावभासत्वपरस्य ''स्वरूपशून्यमिव'' (पा.यो.सू.३-३) इत्यस्य निर्विशेषग्रहणपरत्वाभावात्। ध्यानमेव हि यथावस्थितध्येयार्थवैशद्यातिशयात् तन्निगीर्णस्वरूपमिव भवतीति तत्रोपदिश्यते। प्रह्लादवामदेवादि समाधिषु चानन्तविशेषणविशिष्टब्रह्मानुभव एव श्रूयते। अतो न शास्त्रान्निर्विशेषविषयनिर्विकल्पक सिद्धिरिति।

अतः प्रामाणिके कस्मिंश्चिन्निर्विकल्पके यथोपलम्भङ्गीक्रियमाणे संस्कारानपेक्षप्रथमाक्षसन्निपातमात्रसंभवं प्रत्यक्षं निर्विकल्पकम्। ततस्तत्संस्कारसहकृतेन्द्रियजन्यं तदेकविषयं तज्जातीयपिण्डान्तरविषयं वा प्रत्यक्षं सविकल्पकम्। तच्च येनाऽऽकारेण पूर्वापरानुवृत्तेन स्वविषयं विशिनष्टि, तदाकारविशिष्टस्य

माभूत्किन्नछिन्नमित्यर्थः। ननु निर्विकल्पकं तावन्नाप्रमाणिकं योगशास्त्रसिद्धत्वात् विशेषणग्रहणे च तस्यासंभवान्निर्विशेषस्वरूपग्रहणमेव तदेष्टव्यमिति शंकते । योगीति । ननु वेदान्तानामखंडार्थत्वान्निर्विशेषनिर्विकल्पकसिद्धिरित्यत्राह आगमानां चेति। ननु अर्थमात्रावभासोयं समाधिर्हानोमकः यत्र स्वरूपशून्यमिव भवतीति योगरहस्ये श्रूयते । तेन निर्विशेषनिर्विकल्पकसिद्धिरित्यत्राह अर्थमात्रावभासस्येति। तर्हि तस्य कोर्थ इत्यत्राह ध्यानमेव हीति। ध्येयार्थानां वैशद्ये सति ध्यानं ध्येयार्थैरेकीभूतमिव ध्येयध्यानभूतं विना भासते

''अधराहितचारुवंशनाळा मकुटालंम्बिमयूरपिंछमालाः।
हरिनीलशिलाविभंगनीलाः प्रतिभास्सन्तु ममांतिम प्रयाणे॥

(वेदान्तदेशिककृत गोपालविंशतिः१२)

''दयाशिशिरिताशया मनसि मे जागृयुः। श्रियाध्युपितवक्षसः श्रितमरुद्वृधा सैकताः।
जगद्धुरितघस्मराजलधिडिंभडंभस्पृशः सकृत्प्रणतरक्षणप्रथितसंविदस्संविदः॥''

(वेदान्तदेशिककृत अभीतिस्तवः२)

इत्यादीत्यर्थः। अत एव शून्यमिवेत्युक्तिः। अर्थ निगीर्णत्वं अर्थात्मना भानत्वं। पृथगनवभासनात् शून्यसादृश्यं तैर्द्रष्टव्यं। नन्वेवं व्याख्याने किं मानमित्यत्राह प्रह्लादेति।

अतः प्रामाणिक इति। निर्विशेष निर्विकल्पकस्याप्रामाणिकत्वात्प्रामाणिकनिर्विकल्पकमुपलंभसिद्धेष्वेव किंचिदंगीकर्तव्यं। तत्र संस्कारनिरपेक्षस्य तस्य निर्विकल्पकत्वं सविकल्पकान्यूनविषयकत्वादित्यर्थः। ततः। निर्विकल्पकानन्तरमित्यर्थः। ननु संस्कारसहकृतेंद्रियजन्यं ज्ञानं सविकल्पकं। तन्निरपेक्षेंद्रियजन्यं ज्ञानं निर्विकल्पकमित्यनुपपन्नं। समाधिज्ञाने निर्विकल्पशब्दाभिलप्येतिव्याप्यापत्तेः। तस्य संस्कारजन्यत्वात्। किं च सामान्याकारेण प्रथमं गृहीतमेव पुनरपि किंचिदिति गृहीतं तदनन्तरं प्रथममपि निर्विकल्पकतया गृहीतं पुनरपि निर्विकल्पकतयैव न तु विशिष्येति प्रत्यवमर्शः। तत्राप्यव्याप्तिरिति चेदत्राहुः। संस्कार सहकृतेंद्रियजन्यं ज्ञानं सविकल्पकमित्युपलक्षणं। तत्तत्पुरुषजिज्ञास्यमानतत्तदसाधारण धर्मं विना ग्रहणं तत्तत्पुरुषापेक्षया निर्विकल्पकं तद्विशेषाकारग्रहणं सविकल्पकं तथैव व्यवहारात्! तथाच न क्वाप्यव्यतिव्याप्ती। न च प्राथमिक गौरिति ग्रहणस्यासंग्रहः।

पूर्वमपि ग्रहणावश्यंभावात् प्रथमाक्षसंयोगजस्यापि विशिष्टविषयत्वमेव युक्तम्, तदाह ''सविकल्पके स्वस्मिन्ननुभूतपदार्थविशिष्टप्रतिसन्धानहेतुत्वा''दिति। ''निर्विकल्पकम्'' ''तच्च विशिष्टविषयम्'' इति स्ववचनविरुद्धमिति चेन्न; प्रमाणबलात् शब्दवृत्तिसङ्कोचेऽवश्यंभाविनि परामर्शदशाविषयीक्रियमाण विशेषणनिवृत्तिमात्रेण निर्विकल्पकवाचोयुक्तेरुपपत्तेः। तदाह ''निर्विकल्पकं नाम केनचिद्विशेषेण वियुक्तस्य अर्थान्तरस्य ग्रहणम्; न सर्वविशेषरहितस्य'' इति। यदुक्तं प्रथमाक्षसन्निपातसमनन्तरमविशिष्ट विषयापरोक्षावभासो दुरपह्नव इति, तत्राह ''तथाभूतस्य कदाचिदपि ग्रहणादर्शनात्'' इति। अयमभिप्रायः-न तावत् निर्विशेषवस्तु ग्रहणमिति वयं तदुत्तरकाले व्यक्तं परामृशामः; न च तदानीमेव। यद्यपि निर्विशेषवस्तुग्रहणमपि स्वप्रकाशत्वात् स्वतःसिद्धमिति वक्तुं शक्यम्; तथाऽपि तथाविधा स्वतस्सिद्धिरपि तथाभूततद्गोचरपरामर्शमन्तरेण दुरुपपादेत्युक्तम्; अन्यथा शशविषाणग्रहणमपि स्वप्रकाशसिद्धमिति धृष्टोक्तेरनिस्तारात्, तथा च न किंचित् प्रतिक्षेप्यं स्यात्, सर्वस्यापि तथा तथासिद्धेः सुवचत्वादिति। मा भूत् तथाभूतस्य ग्रहणम्, उपपत्त्या तु कल्प्यत इति यदाहुः, तत्राह ''अनुपपत्तेश्च'' इति। उपपत्त्यभावादित्यर्थः। व्याख्यातमिदं प्रागेव। अदर्शनं विवृणोति ''केनचिद्विशेषणेन इदमित्थमिति हि सर्वा प्रतीतिरुपजायते'' इति। उपपत्त्यभावं विवृणोति ''त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि पदार्थस्य ग्रहणायोगात्'' इति। यद्वा, ''तथाभूतस्य कदाचिदपि ग्रहणादर्शनादनुपपत्तेश्च'' इति योग्यानुपलब्धिबाधमुपपत्तिबाधं चाऽऽह; तदुभयविवरणम्, ''केनचित्'' इत्यादिग्रन्थद्वयम्। यद्वा पूर्वग्रन्थद्वयं साधकाभावपरम्; उत्तरं तु तद्द्वयं बाधकपरमिति विभागः। उक्तप्रकारनिर्विकल्पक सविकल्पकविभागमुदाहरणमुखेन विशेषेण दर्शयति-''अतो निर्विकल्पकमेकजातीयद्रव्येषु

इष्टत्वात्। न च भाष्य विरोधः। एतत्परतया योजयितुं शक्यत्वात्। ननु संस्कारसहकृतेन्द्रियजन्यज्ञानं निर्विकल्पकमिष्यते तेन तदविशिष्टविषयत्वमस्त्वित्यत्राह तच्च येनाकारेणेति। सविकल्पकं हि पूर्वानुभूतः। इदानीमनुभूयमाने च अनुवृत्ततया प्रतीयमानधर्मेण स्वविषयं विशिनष्टि ''अयमपि गौः स एवाय''मिति वा। अतः पूर्वमपि गोत्वानुभवः आवश्यकः इत्यर्थः। ननु सामग्रचभावे कथं विशिष्टविषयत्वमित्यत्राह प्रथमेति। संयोगसंयुक्ताश्रितत्वादिकारणस्यावश्यं भावादित्यर्थः। भाष्य सम्मतिमाह तदाहेति। स्वस्मिन्निर्विकल्पके अनुभूतपदार्थस्य सविकल्पके प्रति संधानंप्रति हेतुर्निर्विकल्पकमित्यर्थः। शंकते निर्विकल्पकमिति। विकल्पशब्दस्य विशेषवाचित्वादिति भावः। परामर्शदशा-संस्कारजन्यविकल्पत्वदशा। तत्र विवक्षयिष्यमाणानुवृत्तत्वस्य निर्विकल्पके विषयत्वाभावमात्रेणेत्यर्थः। अस्मिर्थे भाष्यमाह तदाहेति। केनचिदिति। सविकल्पकानुभूतव्यत्वेत्यर्थः। भाष्ये विप्रतिपत्तिः। तत्राहेति। तथाभूतस्य निर्विशेषवस्तुनो यद्ग्रहणं निर्विकल्पकं तस्यादर्शनादित्यर्थः। ननु कथमदर्शनं। तादृशनिर्विकल्पकस्य स्वप्रकाशविरुद्धत्वादित्यत्राह अयमभिप्राय इति। तद्दुरूपपादेत्युक्तं इति। पूर्ववादे निर्विशेषवस्तुनः स्वतस्सिद्धत्वखण्डनावसरे इत्यर्थः। व्याख्यातमिति विशिष्टबुद्धित्वं सोपाधिकमित्युक्तमित्यर्थः। साधकाभावस्य संशयसहत्वात्तदसहबाधकपरतया व्याचष्टे यद्वेति। व्याख्येयन्याख्यानपरत्वे व्याख्यन मात्रस्यैव वक्तुमुचितत्वात्। तथा क्वचिद्व्याख्यातं च गत्यभावविषयमिति मत्वा आह यद्वेति। तथा भूतस्य कदाचिदपि ग्रहणादर्शनानुपपत्तेश्चेति पूर्वग्रंथद्वयं केनचिद्विशेषणेन इदमित्थमिति

प्रथमपिण्डग्रहणम्; द्वितीयादिपिण्डग्रहणं सविकल्पकमित्युच्यते'' इति । निर्विकल्पक सविकल्पकोदाहरणविशेषभूतयोः प्रथमद्वितीयपिण्डग्रहणयोः केनचिद्विशेषेण वियुक्तिमवियुक्तिं च दर्शयति ''तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता न प्रतीयते । द्वितीयादिपिण्ड ग्रहणेष्वेवानुवृत्तिप्रतीतिः'' इति । ननु यदि कस्यचिदग्रहणान्निर्विकल्पकत्वम्, तर्हि द्वितीयादिपिण्ड ग्रहणमपि यत्किञ्चिद्वस्त्वन्तराग्रहणान्निर्विकल्पकमेव स्यात् । ततश्च सविकल्पक निर्विकल्पकयोर्व्युत्पत्त्यनुसारेण विभाजकं लक्षणं वाच्यमिति; तत्राह ''प्रथमप्रतीत्यनुसंहितवस्तु संस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वं द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादिग्रहणस्य सविकल्पकत्वम् । सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे गृह्यत इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम्; न पुनः संस्थानरूपजात्यादेरग्रहणात्'' इति । अयमभिप्रायः- संस्कारसहकृतेन्द्रियजन्यतया सप्रत्यवमर्शी ज्ञानं सविकल्पकम्, संस्कारनिरपेक्षकेवलेन्द्रियजन्यज्ञानं निर्विकल्पकम्;तदेतद्दृश्यते प्रथमपिण्डग्रहणदशायामिदमित्येव ग्रहणात्, द्वितीयादिपिण्डग्रहणेषु तज्जातीयतया सोऽयमिति परामर्शादिति ।

ननु यदि प्रथमपिण्डग्रहणे जातिग्रहणं स्यात्, तदेवं विभागः स्यात्; तत्रैव तु किं प्रमाणम्? न ह्यनुवृत्ताकारजातिग्रहणमेकपिण्डग्रहणे संभवतीत्यत्राह ''संस्थानरूपजात्यादेरप्यैन्द्रियकत्वाविशेषात् संस्थानेन विना संस्थानिनःप्रतीत्यनुपपत्तेश्च प्रथमपिण्डग्रहणेऽपि संस्थानमेव वस्तु इत्थमिति गृह्यते'' इति । एतेन वैशेषिकाद्युक्तं निर्विकल्पकमपि निराचकार । ननूक्तेन लक्षणप्रकारेण विभागे प्रथमपिण्डग्रहणेऽपि सविकल्पकत्वं संभवति; यथा प्रथमपिण्डस्यैव द्वितीय पिण्ड ग्रहणे सोऽयं गौरिति; द्वितीयदिपिण्डग्रहणेष्वपि निर्विकल्पत्वं स्यात् । यथा विस्मृत प्रथमपिण्डस्य परामर्शाभावात् द्वितीयादि पिण्डेष्वप्ययं गौरिति । अतो लक्षणोदाहरणयोरसामञ्जस्यमिव भाति; अनुवृत्तस्वरूपाया जातेर्ग्रहणमेकपिण्डमात्रग्रहणे न संभवतीति चोद्यं चापरिहृतम्; तत्राह ''ततो द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थानवत् संस्थानिवच्च सर्वदैव गृह्यत इति तेषु सविकल्पकत्वमेव'' इति ।

सर्वाप्रतीतिरूपजायते । त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपिपदार्थस्य ग्रहणायोगादित्युत्तरग्रंथद्वयं द्रष्टव्यं । अतो निर्विकल्पकमिति । प्रकारान्तरासंभवादित्यर्थः । ततश्च सविकल्पकत्वनिर्विकल्पकत्वयोः व्युत्पत्त्यनुसारेणेति सविकल्पकनिर्विकल्पकयोस्संकीर्णार्थत्वे तेनैव लोके व्युत्पन्नत्वादिति भावः । ननु प्रथमप्रतीत्यनुसंहितेत्यादि भाष्येपि पूर्वभाष्यवदनुवृत्ताकार रूपवस्त्वंतरगृहणाग्रहणयोरेव प्रतिपादनाच्छंका तादवस्थ्यमित्यत्राह अयमभिप्राय इति । संस्कारजन्यत्व तदभाववुपपादयति तदेतद्दृश्यत इति ।

सामग्री ग्रहणमित्यत्राह नहयनुवृत्ताकारेति । अनुवृत्तत्वं हि पिंडान्तरवृत्तित्वे सत्येतपिंडवृत्तित्वं । तथाचैकपिंडज्ञानेपि पिंडान्तरवृत्तित्वग्राहका भावान्नसामग्रीति भावः । संस्थानरूपजात्यादेरिति । अनुवृत्तत्वं हि जातिधर्मः । नतु जातिस्वरूपमिति तद्ग्रहाभावेपि जातिग्रहे न किंचिद्बाधकमित्यर्थः । इत्थमिदं प्रकारः संस्थानमेवेत्यर्थः । एतेनेति । प्रथममेव विशिष्टग्रहण सामग्रीसत्वादित्यर्थः । प्रथमपिण्डस्यैवेति । सजातीयेषु प्रथमगृहीतपिंडस्येत्यर्थः । तदेव दर्शयति सेयं गौरिति । द्वितीयादीति । संस्कारजन्यत्वसंभवादित्यर्थः । तदुपपादयति यथेति ।

ननु द्वितीयादिपिंडग्रहणेषु गोत्वादेरनुवृत्तत्वधर्मविशिष्टता सर्वैरेव गृह्यत इत्यनुपपन्नं विस्मृत

अयमाशयः, निर्विकल्पकसविकल्पकविभागस्तावत् उक्तप्रकारमन्तरेण नोपपद्यत इति दर्शितम्। उदाहरणमपि संभवल्लक्षणव्यक्तिविषयम्। अतः प्रथमद्वितीयाद्यनादर एव। येषु तु प्रथमस्यैव पिण्डस्य द्वितीयादिग्रहणेषु प्रतिसन्धानसंभवः, तेषु सविकल्पकत्वमेवास्तु। येषु द्वितीयादिपिण्डग्रहणेषु च,प्रथमस्यैव पिण्डस्य द्वितीयादिग्रहणेषु च प्रमुषितसंस्कारस्य प्रतिसंधानासंभवः, तत्रापि निर्विकल्पकत्व मेव। येषु पुनर्द्वितीयादिपिण्डग्रहणेषु गोत्वादेरनुवृत्तिधर्मविशिष्टता संस्थानिवत् संस्थानवच्च सर्वदैव गृह्यते, तेषु सविकल्पकत्वमेवेति तत् द्वितीयविकल्पोदाहरणम्। योग्यतया संस्थानस्य प्रथममेव स्वरूपग्रहणम्, आश्रयभेदग्रहरूपसहकारिविशेषस्याभावादनुवृत्तिरूपधर्माग्रहणम्, द्वितीयादिपिण्डेषु गृह्यमाणेषु तथाविध सहकारिसद्भावात् संस्थानस्वरूपस्येव तदनुवृत्तेरपि ग्रहणमिति न सङ्कटं किंचिदिति। निगमयति- ''अतःप्रत्यक्षस्य न कदाचिदपि निर्विशेषाविषयत्व''मिति। 'अत' इति साधकाभावात् बाधकसद्भावात् प्रामाणिकस्य निर्विकल्पकसविकल्पकविभागस्य लोकशास्त्राविरोधेन निर्वाहाच्चेत्यर्थः। ''कदाचिदपी''ति सविकल्पकदशायामिव निर्विकल्पकदशायामपीत्यर्थः॥

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां निर्विशेषविषयकनिर्विकल्पकभङ्गवादः एकादशः॥११॥

———————

॥ अथ सन्मात्रग्राहिप्रत्यक्षभङ्गवादः द्वादशः॥१२॥

यस्य सत्त्वेन विश्वस्य सत्ता सदसदात्मनः।
प्रत्यक्षाद्यपरिच्छेद्यं तत्सदैकमुपास्महे॥

यत्तु प्रत्यक्षादिविरुद्धं शास्त्रार्थमुपपाद्य पुनस्सानुशयैरुक्तम् - प्रत्यक्षादिविरोधे सत्येव हि शास्त्रस्य

प्रथमपिंडस्य परामर्शाभावादित्युक्त्वात् तदा द्वितीयादिपिंडग्रहणं सर्वं सविकल्पकमेव। प्रथमपिंडग्रहणमात्रं निर्विकल्पकमिति तदनुपपन्नं। निर्विकल्पकलक्षणस्य संस्कारजन्यद्वितीयपिंडग्रहण साधारणत्वादित्यत्राह अयमाशय इति। तर्हि प्रथमपिंडग्रहणस्य निर्विकल्पकोदाहरणत्वोक्तेः द्वितीयादि पिंडग्रहणस्य सविकल्पकत्वोदाहरणत्वोक्तेरेवा भाव इत्यत्राह द्वितीयादीति। प्रायशः प्रथमपिंडग्रह अनुवृत्तत्व ग्राहकसामग्र्यभावात् द्वितीयादिपिंडग्रहणे तत्सत्वात्तदुक्तिरिति भावः।

वत्सकुलजलधिकौस्तुभानृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां एकादश वादस्समाप्तः॥

———————

पूर्ववादे निर्विशेषविषयं निर्विकल्पकं न संभवतीत्युक्तमयुक्तं। प्रत्यक्षस्य सन्मात्रग्राहितया तस्यैव तथात्वादित्याक्षेपसंगतिमभिप्रेत्य वादार्थं संगृह्णाति यस्येति। सदसदात्मकस्य चेतनाचेतनात्मकस्य विश्वस्य सत्ता यस्य ब्रह्मणः सत्वेन भवति सत्तैव विश्वसत्तेति भावः। तत्र हेतुःप्रत्यक्षाद्यपरिच्छेद्यमिति।

बलीयस्त्वं वक्तव्यम्। विरोधमेव न पश्यामः; प्रत्युतैकरस्यम्; प्रत्यक्षस्यापि शास्त्रस्येव निर्विशेषसन्मात्र ग्राहित्वात्। ननु यदि सन्मात्रं प्रत्यक्षेण गृह्यते, तदा घटोऽस्ति पटोऽस्ति इत्यादिनानाकारवस्तु विषयोपलम्भव्यवहारयोर्विरोधः। न हि सत्सदित्येव प्रतीतिव्यवहाराविति चेत्-मैवम्; यथा इदं रजतमित्यादि रूपेषु शुक्तिरजतादिभ्रमेष्विदमंशस्याबाधितस्य सर्वत्र प्रत्यक्षेण ग्रहणं रजताद्यंशस्य त्वारोपितस्यैव भ्रान्त्यैवेति विविच्यते, तद्वदत्रापि सर्वत्र सन्मात्रप्रकाशव्यवहारयोः प्रत्यक्षोपज्ञत्वम्, घटपटादिभेद विषययोस्तु तयोर्भ्रमोपज्ञत्वमिति विविश्चामः; तथा हि घटोऽःस्तीत्यादावस्तित्वं तद्भेदश्च प्रकाशते; व्यवह्रियते च। तत्र विधिव्यवच्छेदयोर्भावाभावात्मनोरैक्यायोगात् भेदस्तावदङ्गीकार्यः। ततश्च स्वरूपभेदयोः सद्घटयोः किं द्वयोरपि ग्राहकं प्रत्यक्षम्, उत अन्यतरग्राहि इति विचारणीयम्। पूर्वत्रापि किं युगपद्ग्राहकम्, उत क्रमेणेति। न प्रथमः; स्वरूपग्रहणस्य निरपेक्षतया झटित्युत्पत्तेः भेदग्रहणस्य त्वाश्रय-प्रतियोगिग्रहणसापेक्षस्य जघन्यत्वाच्च यौगपद्यासंभवात्। न द्वितीयः; क्षणिकस्य ज्ञानस्य निरपेक्षं स्वरूपमवलम्ब्यास्तमितस्य भेदग्रहणाय क्षणान्तरस्थितेरशक्यत्वात्। अन्यतरग्राहित्वपक्षेऽपि न भेदमात्रग्राहित्वम्, निराश्रयभेदग्रहासंभवात्। ततःपरिशेषात् स्वरूपमात्रग्राहिप्रत्यक्षमिति सिद्ध्यति। एवं प्रत्यक्षस्य भेदग्राहित्वासंभवे तन्मूलानां प्रमाणान्तराणामपि न वस्तुतो भेदसमर्थनसामर्थ्यमिति कुतस्तत्सिद्धिः? सिद्ध्यन्नपि च भेदः इतरव्यवच्छेदरूपतया स्वयभावात्मतया षष्ठप्रमाणवेद्य इत्यतोऽपि न तस्य प्रत्यक्षग्राह्यता। एवं प्रत्यक्षे प्रथमाक्षसन्निपातक्षणभाविनि स्वरूपमात्रमवलम्ब्य विलीनेऽपि,

---

ब्रह्मणः प्रत्यक्षानुमानाद्यगोचरस्य सत्ता कथं प्रत्यक्षभूतविश्वसत्ता स्यात्। न कथंचिदिति अनेन वादार्थः सुगृहीतः

सानुशयैरिति। शास्त्रं शब्दविज्ञानादसन्निकृष्टे विज्ञानं

"असन्निकृष्टवाचा च द्वयमत्र जिहासितं। ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोपि वा॥"

(कुमारिल श्लोकवार्तिकं)

इति न्यायेन प्रत्यक्षबाधितेर्थे शास्त्रस्य अप्रवृत्तिं मन्वानैरित्यर्थः। उपलंभासिद्धिशंकापरिहाराय व्यवहारग्रहणं शुक्तिरजतादि भ्रमेष्विति। भ्रमत्वेन व्यवहारविषयेष्वित्यर्थः। विविंचाम इति। तदियं धातुस्तदादिर्नतैजोहेत्वादिकः। घटोस्तीत्यादिष्विति। अस्तित्वं सत्ता तदवच्छेदो घटत्वादि विधिर्भावात्मा व्यवच्छेदस्त्वभावात्मा। अन्यतरेति। अन्यतरमात्रग्राहीत्यर्थः। पूर्वत्रापीति। द्वयोरपि ग्राहकमित्यस्मिन् पक्षेपीत्यर्थः। स्वरूपग्रहणस्य-सत्स्वरूपग्रहणस्य भेदग्रहणस्य-घटत्वादिभेदग्रहणस्य क्षणिकस्येति। अक्षणिकत्वेपि विषयसंबंधस्यागन्तुकत्वायोगाच्चेति भावः। प्रथमविकल्पे द्वितीयकोटिं दूषयति अन्यतरेति। ननु प्रत्यक्षस्य सन्मात्रविषयत्वेऽप्यनुमानादिना शास्त्रस्य विरोधस्यादित्यत्राह एवमिति। तन्मूलानां-तदनन्तरभाविनामित्यर्थः। पक्षव्याप्त्यादिग्रहणाभावे अनुमान स्याप्यप्रवृत्तेः तद्ग्रहस्य च प्रत्यक्षमूलत्वे वाच्ये तस्य सन्मात्र विषयत्वसमर्थनेन प्रत्यक्षस्य तद्विषयत्वाभावे सिद्धे प्रत्यक्ष स्थलीयव्यवहाराय क्लप्तभ्रममूलत्वमेव वाच्यमिति न तेषां भेदसमर्थनसामर्थ्यं। भेदे प्रामाण्यमिति। तद्विरोधो मोक्ष इत्यर्थः। भेदस्य प्रत्यक्षत्वाभावे हेत्वन्तरमाह सिद्ध्यन्नपीति। षष्ठप्रमाणम् -अभावाख्यं प्रमाणं! तेन चान्यत्वमभावस्य भट्टा वदन्ति। मायिनोऽपि व्यवहारः भाट्टनय इत्यभ्युगन्तारः तथैवांगीकृतवन्त इति भावः। षष्ठ प्रमाणंवेद्यत्वे हेतुरभावात्मतयेति। तत्र हेतुः। इतरव्यवच्छेदरूपतयेति। ननु सन्निकर्षजन्यत्वाद्भेद ज्ञानमपि प्रत्यक्षमेवेत्यत्राह एवमिति।सन्निकृष्टे सत्यारोपितत्वात्प्रत्यक्षत्व भ्रम इत्यर्थः। सन्निकर्षात्।

अविद्यावशात् तदनन्तरभाविनि विकल्पेऽपि सन्निकर्षात् प्रत्यक्षाभिमानमात्रं जायते, न तु साक्षात्प्रत्यक्षतेति भ्रान्तिमूल एव भेदव्यवहार इति ॥

अत्र ब्रूमः-''भेदापह्नवलोभेन भेदं विधिनिषेधयोः । स्वयं समर्थयन् मूर्खः स्ववाग्वज्रेण खण्डितः'' ॥

यदुक्तं स्वरूपभेदयोर्युगपत् क्रमेण वा ग्रहणमिति, तत्र योग्येषु भेदेषु युगपदेवेति ब्रूमः । तदाह- ''एकक्षणवर्तित्वेऽपि प्रत्यक्षज्ञानस्य तस्मिन्नेव क्षणे वस्तुभेदरूपतत्संस्थानगोत्वादेर्गृहीतत्वात् क्षणान्तरग्राह्यं न किंचिदिह तिष्ठति'' इति । स्वरूपवज्जातिगुणादेरपि तत्तदिन्द्रिययोग्यत्वाविशेषात् एकसामग्रीवेद्यत्वं निर्विकल्पकनिरूपणे प्रदर्शितम् । न च जात्याद्यतिरिक्तं भेदमिच्छामः । त्वमपि हि घटोऽस्तीत्यादिषु घटत्वादिकमेवात्र भेदतयोदाहरसि ।घटत्वादेश्च स्वरूपेण गृह्यमाणस्य न प्रतियोगिज्ञानापेक्षा । आश्रयप्रकाशापेक्षायामपि सहोपलम्भादेव नैराकाङ्क्ष्यं समर्थितम् । प्रतियोगिनिरपेक्षस्य कथं भेदत्वमिति चेत् ? यदि तस्य भेदत्वं नास्तीति मन्यसे तर्हि तत एव आश्रयस्येव तद्गतघटत्वादेरपि ग्रहणे न कश्चिद्दोषः । तदाऽपि न सन्मात्रग्राहकत्वसिद्धिः । सौहार्देन तु वदमः; ''जात्यादीनामेव स्वरूपेण गृह्यमाणानां न प्रतियोग्यपेक्षा, तेषामेव तु भेदत्वाख्येन स्वधर्मेण गृह्यमाणानां कदाचित्प्रतियोग्यपेक्षा'' इति सर्वेषां स्वप्रतीतिसाक्षिकमेतत् । भेदत्वं चानन्तरमेव भेदनिरूपणे (वादः १३) शिक्षयिष्यामः । बाधाभावे च (वादाः १३-१५-१६) सेत्स्यति, शुक्तिकारजतादिवद्बाध्याबाध्यांश निष्ठावार्ताऽपि निरस्ता ।

अधिष्ठानसन्निकर्षानन्तरभावित्वाद्भ्रान्तिमूल एवेति सर्वस्यापि प्रमाणसामग्रीविरहाद्भ्रान्तित्वमिति तात्पर्यं । भेदेति ।भेदस्य प्रत्यक्षविषयत्वाभावसमर्थनाय विधिनिषेधयोर्भेदं साधयन् स्ववाग्व्याहत इत्यर्थः ।

तदाहेति । भाष्यकार इति शेषः । वस्तुनः भेदश्चतद्रूपे तच्च संस्थानगोत्वं च ततः आदिशब्देन बहुव्रीहिः। ननु स्वरूपग्रहणदशायामेव कथं गोत्वादिग्रहः तस्य स्वरूपाद्भिन्नत्वादित्याशंक्य एककालीन सामग्रीकत्वाद्युगपद्गृह्यत इत्याह स्वरूपवदिति । नन्वेवमपि जातिग्रहणे किमायातमित्यत्राह न च जातीति । नहि त्वदनिच्छामात्रेण तत्सिद्धिरित्यत्राह त्वमपीति । ततोतिरिक्तकल्पने प्रमाणाभावादिति भावः । ननु प्रतियोगिज्ञानसापेक्षोपलंभस्य कथं सहोपलंभ इत्यत्राह घटत्वादिरिति । ननु स्वरूपतो ग्रहणेप्याश्रयप्रकाशापेक्षास्त्येवेत्यत्राह आश्रयेति । स्वरूपे (स्वकाले) तदपेक्षायाः आवश्यकत्वान्न हेतुत्वे नापि तदपेक्षागौरवादिति समर्थितप्रायं । निर्विशेषनिर्विकल्पक निराकरणवाद इत्यर्थः । प्रतियोगीति । ज्ञाननिरपेक्षवेद्यस्येत्यर्थः । कथंशब्दः क्षेपार्थः । यद्वा प्रश्नार्थ इत्यभिप्रेत्य आद्ये आह यदिति । तत एव भेदत्वाभावादेव प्रतियोगिसापेक्षत्वशंकाया अप्यभावादित्यर्थः । फलितमाह तदापीति । भेदत्वपक्ष इव भेदत्वाभावपक्षेपीत्यर्थः । प्रश्नार्थकत्वे आह सौहार्देनत्विति । सर्वेषामिति । अतिरिक्ताभाववादिभिरपि भेदत्वेन ज्ञाने प्रतियोगिज्ञानापेक्षा नतु प्रमेयत्वाद्याकारान्तरेण गोत्वादिभेदत्वेन ज्ञानेपि तदपेक्षा नाकारान्तरेणेति भावः। उपसंहरति । बाधाभावे चेति । ग्रहणानुपपत्तिर्हि बाधिका उक्तप्रकारेण बाधाभावे संभविष्यति बाध्याबाध्यांश विवेचकमसंगतमितिभावः ।

यच्चोक्तम्-प्रत्यक्षस्य भेदग्राहित्वाभावात् तन्मूलानामन्येषामपि प्रमाणानां न भेदसमर्थनसामर्थ्यमिति, तत्र किं तेषां कस्यचिदप्यग्राहकत्वं विवक्षितम्, उत अभेदग्राहित्वम्, यद्वा भेदग्राहित्वेऽपि तत्र प्रामाण्यं नास्तीति? नाऽऽद्यद्वितीयौ; प्रतीतिबाधापसिद्धान्तादिदोषप्रसङ्गात्। न तृतीयः; भेदबाधकानां निरसिष्यमाणत्वात्। यदि च प्रत्यक्षचर्वितचर्वणेन तदर्थे अप्रामाण्यमनुमानादेः, तदाऽतीन्द्रियस्य कस्यचिदपि कुतश्चित्सिद्धिर्न स्यात्।

यदि च स्वविषयभेदे अनुमानादीनां प्रामाण्यं नाङ्गीकृतम्, कुत्र तर्हि तेषां तत्स्यात्। न कुत्रचिदिति चेत्, तर्हि प्रत्यक्षैकप्रमाणवादी चार्वाकः प्रत्यक्षाप्राप्तविषयप्रामाणान्तरप्रदर्शनेन किं त्वया प्रतिक्षिप्यते। धर्माधर्म परतत्त्वादिगोचरवेदप्रामाण्यप्रत्याशयेति चेत्, चार्वाकवदेव वस्तुतस्तत्र तत्प्रामाण्यमनिच्छतस्ते किमनया स्वैराचारसुखोपरोधिन्या दुराशया। प्रत्यक्षस्य भेदग्राहित्वाभावे लिङ्गलिङ्ग्यादिभेदो विकल्पसिद्ध इति तन्मूलानामनुमानादीनामप्रामाण्यमिति चेत्, तर्ह्यनुमानादिकं प्रमाणमेव न भवतीति चार्वाकवत् ब्रूहि, न पुनर्भेदे न प्रमाणमिति। किंच प्रत्यक्षमूलस्यापि शास्त्रस्य प्रत्यक्षविरुद्धार्थेऽपि प्रामाण्यं संभवतीति मन्यमानस्य तवानुमानादेरपि तथात्वे को विरोधः?

यच्च-अभावरूपस्य भेदस्याभावप्रमाणवेद्यत्वान्न प्रत्यक्षवेद्यत्वं संभवतीति-तत् अभावाख्यं प्रमाणान्तरं प्रमेयान्तरं चानभ्युपगच्छतां गोष्ठीपु नावतिष्ठते। भवतु वा षष्ठं प्रमाणम्, तथाऽपि तत्रैव भेदग्राहकतयाऽभ्युपगते क्रमयौगपद्यविकल्पानुपपत्तिस्तदवस्था। प्रत्यक्षेणाधिकरणग्रहणे संस्कारोन्मेषाच्च प्रतियोगिस्मरणे सति क्षणिकेनाप्यभावजन्यज्ञानेन भेदग्रहणमुपपद्यत इति चेत्, हन्त! तर्हि

अभेदमात्रग्राहित्वमित्यर्थः। अपसिद्धान्तादित्यादि उताभेदेति शब्देन व्यवहारानुपपत्तिर्गृह्यते अनुमानादीनां। तत्र प्रामाण्याभावः किं भेदस्य बाधितत्वात् उत प्रत्यक्षविषयसन्मात्र एव तत्वावेदकतया स्वविषये। भेदे तत्वावेदकत्वाभावात्। यद्वा सन्मात्रविषयप्रत्यक्षसहचरितभ्रान्तिमूलत्वादिति विकल्पाभिप्रायेणाद्ये दोषमाह भेदबाधकानामिति। उपरितनवाद इति शेषः।

द्वितीयं शंकते यदि चेति। किंच स्वातंत्र्येण तत्वावेदकत्वं प्रामाण्यं तच्चावधारणविषयभेद एव वाच्यं। सन्मात्रे प्रत्यक्षचर्विते स्वातंत्र्याभावाद्भेदेपि तत्वावेदकत्वाभावं वदता त्वयोक्तरूपं प्रामाण्यं नांगीकृतमिति कुत्रापि तेषां प्रामाण्यं न स्यादित्याह यदि स्वविषय इति। तर्हीति। अप्रत्यक्षविषये प्रामाण्याभावादित्यर्थः। ननु तत्वावेदकत्वरूप प्रामाण्यसिद्ध्यर्थं न प्रतिक्षिप्यते किन्तु धर्माधर्मादौ शुक्तिरजतादिभ्रमव्यावृत्तविद्यमानार्थ विषयत्वरूपप्रामाण्यसिध्यर्थमिवेत्याशंकते धर्मे चेति। चार्वाकवदिति यद्यपि व्यावहारिकं प्रामाण्य माविशेष्यते तथापि न तदंगीकारेण प्रयोजनमस्ति। वस्तुतः प्रामाण्यस्वाभावादित्यर्थः। तृतीयं शंकते प्रत्यक्षस्येति। भेदग्राहित्वाभावे सिद्धेत्यर्थः। न पुनरिति। विषयविशेषे प्रामाण्यनिरसनं व्यर्थं। प्रामाण्यस्यैवा भावात्। चार्वाकनिरसनं व्यर्थमिति भावः। प्रत्यक्षस्य भेदावगहित्वाभावात् न तन्मूलानां तत्र प्रामाण्यमित्यत्र दोषान्तरमाह किंचेति। प्रत्यक्षविरुद्धं - प्रत्यक्षाविषयत्वं। यथा प्रत्यक्षस्य सन्मात्र विषयत्वेप्यन्वयव्यतिरेकाभ्यां तन्मूलस्य शास्त्रस्य प्रपंच मिथ्यात्वेपि प्रामाण्यमिष्यते तथानुमानादेरपि भेदे प्रामाण्यमिष्यतां इत्यर्थः।

क्रमयौगपद्येति। प्रतियोग्यधिकरणग्रहणे न विना अभावग्रहणासंभवादिति भावः। प्रत्यक्षेणाधिकरणग्रहणे-प्रत्यक्षरूपेऽधिकरणज्ञाने इत्यर्थः। परस्परवार्तानभिज्ञे इति।

पूर्वप्रत्यक्षेणाधिकरणग्रहणे तथैव प्रतियोगिस्मरणे च सति क्षणिकेनापि प्रत्यक्षान्तरेण भेदग्रहणे काऽनुपपत्तिः? पूर्वोत्तरप्रत्यक्षयोः परस्परवार्तानभिज्ञतया वैशिष्ट्यं न सिद्ध्येदिति चेत्, हन्त! किं प्रत्यक्षस्याभावप्रमाणस्य च परस्परवार्ताभिज्ञता शिक्षिता भवता? येन तत्र वैशिष्ट्यं बोद्धव्यमिति मन्यसे। प्रथमोदितप्रत्यक्षसंस्कारात् विशिष्टज्ञानोदयस्तत्रेति चेत्, किं प्रत्यक्षान्तरे तथा निर्वाहो राजशासनवारितः। अत एव प्रत्यक्षाभासेन विकल्पेन भेदग्रहणमित्येतदपि दत्तोतरम्।

एवं प्रत्यक्षस्य भेदग्राहित्वासंभवे तुल्यन्यायतया षष्ठप्रमाणस्य प्रत्यक्षाभासस्य च भेदग्राहित्वा संभवं सिद्धं कृत्वा, ''अपिचे''त्यादिना प्रतीतिविरोधादिकमुदाजहार भाष्यकारः। तत् व्याकुर्मः यदि सन्मात्रं प्रत्यक्षग्राह्यम्, न भेदः तदा तुल्यन्यायतया षष्ठप्रमाण-प्रत्यक्षाभासादेरपि भेदग्राहित्वासंभवात् घटोऽस्ति पटोऽस्तीति विशिष्टविषयाप्रतीतिर्विरुध्येत; अश्वार्थिनश्च महिषदर्शने निवृत्तिर्न स्यात्; भेदग्रहणासंभवस्य त्वयोक्तत्वात्; सदिति ग्रहणस्य चाश्वादिसर्वसाधारणस्य निवर्तकत्वायोगात्। सर्वेषां प्रत्यक्षज्ञानानां सन्मात्रविषयत्वे तत्तत्प्रतिपत्तिविषयप्रतिनियतानां सर्वेषां शब्दानां स्मृतिप्रसङ्गः। ततश्च तत्प्रयोगोऽपि यथाविवक्षमेवेति सर्वेषां शब्दानां पर्यायत्वप्रसङ्गः। सर्वेषां च प्रत्यक्षज्ञानानां पूर्वपूर्वगृहीतमात्रग्राहितया स्मृतिवैलक्षण्यं न स्यात्। न च तदिष्यते; सर्वेन्द्रियजन्यज्ञानानामेकविषयत्वेऽभ्युपगते रूपशब्दाद्य ग्रहणनिबन्धनान्धबधिरादिभेदः, तत्प्रतिनियतविषयबोधजनकत्वहेतुकेन्द्रियभेदक्लृप्तिश्च न स्यात्।

यत्तु शास्त्रस्य प्रत्यक्षविरोधपरिहाराय तयोरेकविषयत्वं साधितम्, तदपि शास्त्रस्य प्रतिपन्न विषयानुवादकत्वापादकम्। ब्रह्मणश्च प्रत्यक्षवेद्यत्वं शास्त्रयोन्यधिकरणार्थविरुद्धम्। ''न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्'', ,(कठ.६-१.१. तै. महाना) ''न चक्षुषा गृह्यते नापि वाचा''

परस्परवाक्यानभिज्ञत्वं -परस्परविषयाविषयकत्वं। अधिकरणग्राहिप्रत्यक्षस्य उत्तरप्रत्यक्षविषय भेदविषयत्वाभावाभेदग्राहिप्रत्यक्षस्याधिकरण विषयत्वाभावाद्भेदाधिकरणयोर्वैशिष्ट्यं न केनापि प्रमाणेन सिद्ध्येदित्यर्थः। समो दोष इति परिहरति हन्त किमिति। प्रथमोदितेति। प्रथमोत्पन्नप्रत्यक्षसहकाराद्वा विशिष्ट ज्ञानं जायमानं युगपदेवाभावप्रमाणेन भेदाधिकरणविषयकं जायत इत्यर्थः। समस्समाधिरेत्याह किं प्रत्यक्षान्तर इति। दत्तोत्तरमिति क्रमयौगपद्यविकल्पानुपपत्तेरेवेत्यर्थः।

ननु भाष्ये सन्मात्रग्राहित्वे घटोस्ति पटोस्तीति विशिष्टविषया प्रतिपत्तिर्विरुध्येत इत्याद्युक्तमयुक्तं स्यात्। विशिष्टविषयविकल्पांगीकारेण प्रतीतिविरोधाद्यभावादिति शंकायां भाष्यं व्याकुर्वन् दूषणान्तराण्याह एवं प्रत्यक्षस्येत्यादि। अश्वार्थिनश्चेति। उक्तन्यायेन विशिष्ट प्रतीतेरसंभवादिति भावः। सर्वेषामिति। त्वदुक्तन्यायेन विशिष्टप्रतीतेरसंभवात्। वस्तुतस्तदर्थानियतानामपि शब्दानां सन्मात्र एव व्युत्पत्ते ग्राह्यतया सर्वेषां शब्दानां सर्वत्र स्मरणं स्यात्। तथा च तत्प्रयोगोऽपि प्रतिनियतो न स्यात्। किं तु यथाविवक्षितं यथेच्छमेवस्यादित्यर्थः। सर्वेषां चेति। अनुमित्याद्यन्यत्वे सति गृहीतमात्रग्राहित्वं स्मृतित्वप्रयोजकं। नच सिद्धान्ते धारावाहिकेऽतिप्रसंगः। तत्तत्काल विषयत्वेन गृहीतमात्रग्राहित्वाभावात् इति भावः। ननु चक्षुराद्यभावनिबन्धन मन्धत्वाद्यास्त्वित्यत्राह तत्तत्प्रतिनियतेति। चक्षुरादीनामप्यभाव प्रसंगादिति भावः।

प्रत्यक्षस्य सन्मात्रग्राहित्वे दूषणमभिधाय तत्फले शास्त्रप्रत्यक्षैकरस्ये दूषणमाह यत्त्विति। शास्त्रयोन्यधिकरणार्थविरुद्धमिति। त्वयापि शास्त्रैकवेद्यत्वस्य योजनाभेदेनाभिधानादिति भावः। श्रुतिस्मृति

(मुण्ड ३-१-८) ''मनसा तु विशुद्धेन'', (श्रुतिः)''न मांसचक्षुरभिवीक्षते तम्'', ''न मांसचक्षुषा द्रष्टुं ब्रह्मभूतः स शक्यते'' इत्यादि श्रुतिस्मृतिविरुद्धं च। किंच प्रत्यक्षजन्यक्षणिकज्ञानेन सन्मात्रस्य ग्रहणमुपपादयता ब्रह्मण एव दृश्यत्वमुक्तं स्यात्; ततश्च तत्प्रयुक्ततया त्वदभिमतानि जडत्व-नाशित्व-मिथ्यात्वादीनि दुर्निवाराणि। अतो जात्यादिलक्षणभेदविशिष्टब्रह्मव्यतिरिक्तघटादिसद्विशेष विषयमेवास्मदादिप्रत्यक्षम्, योगि प्रत्यक्षमपि तत्तद्ग्रहणादिविशिष्टविषयमित्युक्तम्।

अपिच सच्छब्दार्थः स्वरूपं घटादिशब्दार्थस्तु भेद इति केनावधृतं त्वया घटपटादिषु सदनुवृत्ते सति घटादेश्च मिथो व्यावृत्तेरिति चेत्; घटादेस्सदनुवृत्तेः सत्त्वस्य चासतो घटात् व्यावृत्तेर्विपरीतं किं न स्यात्। असतोऽपि किं घटत्वमिति चेत्, मैवम्; ''न हि सन् घटादिः'' इति युष्माभिरेव वर्णनात्। यदा च घटोऽस्ति पटोऽस्तीति सदनुवृत्त्या सतस्स्वरूपत्वमिष्यते, तदा घटो नास्ति पटो नास्तीत्यसदनुवृत्त्या तस्यापि स्वरूपत्वं किं नेष्यते। सति तद्व्यावृत्तेरिति चेत्,असति सतोऽपि व्यावृत्तेस्तस्यापि तन्नेष्यताम्। अतो घटत्वादिवत् सत्त्वमसत्त्वं च तत्तद्वस्तूनां धर्म एव। स्वरूपं तु घटादीनां घटत्वादसत्त्वादेश्चाश्रयतया परस्परासंकीर्णं प्रत्यक्षेण गृह्यते। अतः सच्छब्दार्थः स्वरूपं चेत्, घटशब्दार्थोऽपि स्वरूपमेव। घटत्वादेर्धर्मतया निष्कर्षे सत्त्वादेरपि तथेति न स्वरूपत्वम्। अतो यत् स्वरूपं घटादीनां प्रत्यक्षग्राह्यम्, तत् परस्परं व्यावृत्तं सत्ताघटत्वाद्यनन्तविशेषविशिष्टं चेति न तस्य निर्विशेषैकस्वरूपता। अनुवर्तमानं चैकं सत्त्वं घटादिधर्मभूतमिति न तस्यापि सर्वधर्मिभूतब्रह्मता। यश्च प्रतिवस्तुनियतं प्रामाणिकत्वादिकमेव सत्त्वमिच्छति, तस्य पुरतः सत्त्वमेकमित्यपि दुस्साधम्। अतः प्रत्यक्षस्य सर्वस्य नैकविषयत्वम्; नतरां निर्विशेषविषयत्वम्, नतमां ब्रह्मविषयत्वमिति सिद्धे प्रत्यक्षमूलानां प्रमाणान्तराणामपि प्रत्यक्षगोचरविशिष्टविषयत्वे न कश्चिद्दोषः; प्रत्युत निर्विशेषविषयत्व एव प्रत्यक्षादिबाध इति सिद्धम्।

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां सन्मात्रग्राहिप्रत्यक्षभङ्गवादो द्वादशः॥१२॥

विरोधमप्याह 'न संदृश (तै -महाना) इत्यादिना। ब्रह्मणः रूपं स्वरूपं दृशे दृगर्थं न सन्तिष्ठति दृशा न गृह्यत इत्यर्थः। दुर्निवारा। अन्यथा दृश्यत्वानुमानस्य व्यभिचारप्रसंगादिति भावः।

ननु योगि प्रत्यक्षं सन्मात्रब्रह्मविषयमस्त्वित्यत्राह योगिप्रत्यक्षमपीति। प्रह्लादवामदेवादि समाधिष्वित्यादिनेति भावः।

स्वरूपं -अधिकरणस्वरूपमित्यर्थः। केनावधृतमिति। सच्छब्दार्थे भेदः।घट शब्दार्थस्वरूपमिति वा। किं नस्यादिति भावः। अनुवृत्तिव्यावृत्तिभ्यां च वैशम्यं शंक्य समत्वमाह सदनुवृत्तेरित्यादिना। सत्वस्य व्यावृत्तिर्नास्तीत्याशंकते असतोऽपीति। खंडनोक्त्या परिहरति मैवमिति। ह्यसन्निवृत्तमिति। किं च यदि सत्वं रूपं तर्हि असत्वमेव स्वरूपं किं न स्यादिति प्रतिबंधंतरमाह यथेति। तर्हि किं तत्वमित्याकांक्षायामाह अतो घटत्वादिरिति। परस्परव्यावृत्तमिति वस्तुत इति शेषः। ततः किमित्यत आह। न तस्येति। नानाभूतवस्त्वान्सत्वासंभवादित्यर्थः। अस्त्वेवं तथापि सत्वमेव ब्रह्म भवत्वित्यत्राह। न तस्यापीति। तस्य धर्मत्वायोगादिति भावः। एकत्वाभावाच्च सत्वस्य न ब्रह्मतेत्याह। यश्चेति। उपसंहरति। अत इति। अस्तु प्रत्यक्षस्यापि विशेषविषयत्वं। निर्विशेषविषयत्वमप्यस्त्वित्यत्राह प्रत्युतेति। विशिष्टविषयत्वस्यैवानुभवादिति भावः।

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां द्वादशो वादसमाप्तः॥

॥ अथ भेददूषणनिस्तारवादः त्रयोदशः ॥ १३ ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तेष्वासनिर्गतः।
भेदं बिभित्सतां चित्तं भिन्ते तर्कात्मकः शरः ॥

यदेतत्स्वमर्मघट्टनम्-भेदः स्वरूपं धर्मोवा। न तावत् स्वरूपम् शुक्तिरजतादिभ्रमानुत्पत्तिप्रसङ्गात्। इदमित्यधिष्ठानतया हि शुक्तिस्वरूपमवगम्यते; अन्यथा निरधिष्ठानभ्रमप्रसङ्गात्। अवगते शुक्तिस्वरूपे तस्यैव रजताद्भेदत्वेन कथं शुक्तिरजतयोर्भेदाग्रहः? कथंतरां च तन्मूलः शुक्तौ रजताध्यासः कथंतमां च तदधीनाः कलधौताभिलाषिणः करतलप्रसारण-ग्रहण-चेलाञ्चलनिबन्धन-तद्रक्षणप्रभृतयः?। कथं चाध्यासाभावे, नेदं रजतमिति बाधः? किंच नेदं रजतमिति व्यवहारहेतुर्भेदग्रहः पूर्वमस्ति वा, न वा? अस्ति चेत्, प्रथममेव तथा व्यवहारः स्यात्। न चेत्, भेदस्याग्रहे स्वरूपस्याप्यग्रहात् इदमिति स्वरूपव्यवहारः इदं रजतमित्यध्यासश्च न स्याताम्। यदि च घटस्वरूपमेव पटस्य भेदः, तदा घटो भेद इति पर्यायता प्रसज्येत। घटो भिन्न इति व्यवहारे घटो घटविशिष्ट इत्युक्तं च स्यात्; भिन्नशब्दस्य भेदविशिष्टवाचित्वात्; भेदस्य च घटस्वरूपत्वात्। यद्वा घटो भेद इत्येव व्यवहारस्स्यात्। यदि च घटाद्भेदः पटस्य स्वरूपम्, तदा कुड्ये पटस्वरूपत्वाभावात् कुड्यस्य घटाद्भेदाभावे घटकुड्यतादात्म्यं प्रसज्येतेति तेनैव क्रमेण सर्वस्य जगतस्तादात्म्ये स्वरूपभेदवादः सर्वाभेद एव पर्यवस्यतीति जितमायुष्मता। अथैतद्दोषपरिहाराय घटव्यतिरिक्तानां तत्तद्वस्तूनां तानि तानि स्वरूपाणि प्रत्येकं घटाद्भेद इति अन्वीथाः,

---

ननु पूर्ववादे सन्मात्रग्रहो न संभवति भेदानामपि ग्रहसंभवात् इति यदुक्तं तदयुक्तं। भेदानां दुर्निरूपत्वादित्याक्षेपसंगत्या निरूपयन् वादार्थसंगृह्णाति। श्रीमल्लक्ष्मणेति। भेदं विभत्सतामित्यादिना वादार्थसंग्रहः।

यदेतदिति। एतच्छब्देन वक्ष्यमाणपूर्वपक्षस्संगृह्यते। मर्मपरिघट्टनं- मर्मविधनं स्वव्याघातास्तव वचनमिति यावत्। व्याघातप्रकारस्सिद्धान्ते वक्ष्यते। शुक्तिरजतादीति भेदे भासमाने अध्यस्ताभेदप्रत्यक्षप्रतीत्यसंभवादिति भावः। निवृत्तिः- अभावः। आदि शब्देन वक्ष्यमाणकरतलप्रसाराणि गृह्यते। अस्तु स्वरूपपरिग्रहः तथापि भ्रमसंभव इत्यत्राह अवगतेति। कथं चेति। अध्यासाभावे प्रतिपन्नोपाधौ निषेधरूपबाधो न स्यादिति भावः। न चेदिति। भ्रमात्प्राक् स्वरूपग्रहाभावे तदानीमिदमिति व्यवहारो न स्यात्।न स्याच्चाधिष्ठानसामान्यग्रहलक्षणकारणाभावेन भ्रमोऽपीत्यर्थः। दूषणान्तरमाह घटोभिन्न इति। तत्र हेतुमाह भिन्नशब्दस्येति। दूषणान्तरमाह यदि चेति। यदि पटस्वरूपमेव घटाद्भेदः तदा कुड्यादेः पटान्यस्य सर्वस्य पटे स्वरूपत्वाभावात् घटाभेदस्यात्। एवं घटस्यैव पटभेदत्वात् कुड्यादीनां पटाभेदोपि वक्तव्यः। घटपटयोरुभयोरपि तदितरत्परस्पर तादात्म्यं वक्तव्यमिति सर्वतादात्म्यं प्रसज्येतेति भावः। ननु तत्तद्व्यक्तीनां सर्वासामपि धटभेदत्वावच्छिन्नसर्वतादात्म्यमिति शंकते अथैतद्दोषेति। सर्वासां व्यक्तीनां धटभेदत्वे धटभेद इत्यनुगतव्यवहारनियामकस्यानुगतस्य भेदत्वाख्य धर्मस्यासंभवात् स्वरूपेणैवानुवृत्तत्वाच्चेति सर्वस्यापि घटव्यतिरिक्तस्य तादात्म्यं प्रसज्यते। तथा पटस्यापि वाच्ये सर्वतादात्म्यं प्रसज्यत इति परिहरति। घटव्यतिरिक्तेष्विति। प्रतियोगिस्मृत्य भाव

तदा घटव्यतिरिक्तेष्वखिलेषु वस्तुषु परस्परव्यावृत्तेषु घटाद्भिन्न इत्यनुवृत्तव्यवहारस्यानुवृत्तोपाध्यभावात् निर्विषयव्यवहारायोगाच्च परस्परस्वरूपाण्येव परस्परानुवृत्तानीति पुनरपि तदेव सर्वतादात्म्यं प्रसज्येत। किंच घटादीनां स्वरूपाणि सप्रतियोगिकानि निष्प्रतियोगिकानि वा? पूर्वत्र प्रतियोगिस्मृत्यभावे घटः पट इत्यादि व्यवहारो न स्यात्। उत्तरत्र सप्रतियोगिकभेदस्वरूपं व्याहन्येत।

अथ धर्मो भेदः, तदा धर्मधर्मिणोर्भेदोऽस्ति, न वा? न चेत्, धर्मधर्मिणोरभेदात् धर्मस्यैवाभावेन धर्मभेदाभावात् पुनरपि सर्वतादात्म्यं प्रसज्येत। यद्वा धर्मिण एवाभावात् कस्य भेदो वर्णनीयः? अथ धर्मधर्मिणोर्भेदोऽभ्युपगम्यते, तत्रापि भेदः स्वरूपं धर्मो वेति विकल्पे स्वरूपपक्षस्य दूषितत्वात् धर्मपक्ष एव परिशिष्यते। ततश्च तस्यापि धर्मभेदापेक्षयाऽनवस्था स्यात्। एवंच स्वरूपधर्मयोरन्यतरकोटिबहिर्भावा भावात् अन्योन्याभाव-पृथक्त्व-विशेषाणामपि भेदत्वं पलायितमिति।

किंच धर्मधर्मिणोराश्रयप्रतियोगिनोश्च भेदग्रहस्तदाकारग्रहणमन्तरेण स्वरूपेण गृह्यमाणयोर्न संभवति, धर्मधर्मित्वादितत्तदाकारग्रहश्च तयोर्भेदग्रहे सतीति परस्पराश्रयणम्। वस्त्वन्तरसिद्धौ एकविधिरन्यव्यवच्छेदः व्यवच्छेदसिद्धौ वस्त्वन्तरसिद्धिरिति च।न च भेदग्रहणमन्तरेणापि स्वरूपेण गृह्यमाणयोर्धर्मित्वादिग्रह इति वाच्यम्। भेदग्रहाभावे हि गृह्यमाणयोरेकत्वग्रहे पर्यवसान स्यात्,

---

इति। सप्रतियोगिकपदार्थ ज्ञानस्य प्रतियोगि ज्ञानसाध्यत्वादिति भावः। न चेदिति। भेदा ( ) त्यर्थः।

किं धर्मधर्मिणोरैक्याद्धर्मधर्मि भेदो नास्तीत्युच्यते। किं वान्यतर परिशेषात्। तत्राद्ये स्वरूपपक्षोक्तदोषः। द्वितीये धर्मिपरिशेषो वा धर्म ( ) वेति विकल्पाभिप्रायेणाद्यं दूषयति। धर्मधर्मिणोरिति अभेदादिति। भेदाभावदित्यर्थः। धर्मभेदाभावादिति। धर्मभूतभेदस्याभावादित्यर्थः। द्वितीयं दूषयति यद्वेति। तत्रान्योन्याभावः पृथक्त्वं वा भेदोस्तु सप्रतियोगिकत्वादित्यत आह एवं चेति। तयोरपि स्वरूपं वा धर्मो वेति विकल्पदूषमाक्रान्तत्वात्प्रकारान्तरासंभवात् न तयोर्भेदत्वमिति भावः।

किं च धर्म धर्मिणोरिति। भेदतद्धर्मिणोरित्यर्थः। आश्रयप्रतियोगिनोःभेदाश्रयप्रतियोगिनोरित्यर्थः। तदाकारः तत्तदसाधारणाकारः। एवं च धर्मितया प्रतियोगितया च भेदाद्धर्मिप्रतियोगिनोर्ग्रहण एव भेदग्रहणं। भेदग्रहणे सत्येव च धर्मित्व प्रतियोगित्वग्रहणं ऐक्य ग्रहे, तदसंभवादित्यर्थः। ननु विधेरेव व्यवच्छेदरूपतया तद्ज्ञाने कथमितरेतराश्रयत्वमित्यत्राह वस्त्वन्तरसिद्धाविति। किं विधेः स्वापेक्षयापि व्यवच्छेदरूपत्वं किमितरापेक्षया। नाद्यः विरोधात्। न द्वितीयः एकविधेरेवान्यव्यवच्छेद इति वदता वक्तव्यं-किं धट इत्याकरकोविधिः पटदेर्वव्यवच्छेदः न घटादिति। कुतः धटस्य तदन्यात्वादिति चेत् पटस्यान्यत्वे सिद्धे धट इत्याकारकविधेः तद्व्यवच्छेदसिद्धिः। पटेव्यवच्छेदता सिद्धौ च धटात्पटस्य वस्त्वंतरसिद्धिरित्यन्योन्याश्रयतेत्यर्थः। इति चेत्यनन्तरं परस्पराश्रयतेत्यनुषंगः। उभयथापीति। अनेकत्वेनोपस्थित्या हि धर्मधर्मिभावप्रसंग इति भावः।

अविद्यामाहात्म्यादिति-प्रत्यक्षस्योक्तदोषैर्भेदविषयत्वासंभवात्सन्मात्रविषयत्वं अविद्यामाहात्म्यात्तु सकलदोषतिरस्कारे कोपि भेदभ्रम उत्पद्यत इत्यर्थः। अविचारेति। दोषमूलकज्ञानस्य सिद्धकारणानपेक्षत्वादिति भावः। वस्तुत इति आपाततो विचारसहत्वेन ज्ञानमात्रमिति भावः। तदुपकरणं

अनेकत्वाग्रहे वा। उभयथाऽपि धर्मत्वधर्मित्वलक्षणवैलक्षण्यं कथञ्चिदपि न संभवति।।

कथं तर्हि सार्वलौकिकोऽयं भेदग्रहः? अविद्यामाहत्म्यादिति ब्रूमः। न चाविद्यामूलेऽपि भेदग्रहे विचाराः प्रागुक्ताः प्रक्रमन्ते; अविचारितरमणीयतैकवेषत्वात्। न चैतावता परमार्थत्वसिद्धिः, वस्तुतो विचारासहत्वात्। न च वाच्यं प्रमाण-प्रमेय-तदुपकरण-तदवान्तरभेद-कथक-सिद्धान्त-साधन-दूषणादिभेदव्यवस्थाभङ्गात् स्ववचनविरोध-स्वसाध्यभङ्गादिरिति, साध्यत्वाभिमतविश्वानुप्रविष्टस्ववचन स्वसाध्यादिभङ्गेऽपि स्वाभिमताद्वैतसिद्धेरवर्जनीयत्वात्। किञ्च असिद्धभेदेन केनचिद्भेदसाधनमशक्यम्, अन्यथा त्वनवस्थैवेत्येषा दिक्।

अत्रोच्यते-न तावत् भेदप्रतीत्यपह्नवः शक्यः; स्ववचनविरोध-बाधापसिद्धान्तादिप्रसङ्गात्। तथा सति हि "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोः तमःप्रकाशवत् विरुद्धस्वभावयोः इतरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्ति" (शांकरभाष्यं) रित्यादि भाषणमपि व्याहन्येतेति। न च भेदप्रतीतिकारणापह्नवः शक्यः; कार्यस्य कारणावश्यम्भावात् अन्यथा लोकायतमतापातात्। न च भेदप्रतीतेरकार्यत्वं वक्तुं शक्यम्; नित्यत्वतुच्छत्वयोस्त्यवयैव त्यागात्। न च दुर्निरूपं तत्कारणमिति

तर्कादि तदवान्तर भेदः- प्रमाणप्रमेयतदुपकरणावान्तरभेदः। भेदश्च व्यवस्थाचेति द्वंद्वः। इदमेव प्रमाणं प्रयोक्तव्यं इदमेव कथा प्रवर्तनीयाः एत एव निग्रहाः उद्भावनीयाः इत्यादिसमयबन्धो व्यवस्था। स्ववंचन विरोधे इति। प्रमाणादिभेदवचनस्य भेदो नास्तीति वचनेन विरोधप्रसंगः। स्वसाध्यं भावरूपाज्ञानादि भेदसाधकत्वाभिमतप्रमाणस्य भेददूपकाद्भेदस्सिद्धो नवेति विकल्प्य द्वितीये दोषमाह किंचासिद्धभेदेनेति। आद्य आह अ थेति। नन्वविद्याधीनत्वेपि भेदस्य ज्ञाने नियमो वाच्यं। अन्यथा धट एव पटज्ञन प्रसंगात्। नचेष्टापत्तिः। उक्तदोषादित्यत्राह दिगिति। तदर्थस्तु नियमरूपायाविघ्नकत्वेन तदसंभवस्येष्टत्वात्। नचधटे पटज्ञानप्रसंगः। सत्येव घटज्ञानविषये पटज्ञानस्येष्टत्वात्सर्वाध्या साधिष्ठानत्वात् सत इति।

धर्मधर्म्यादि विकल्पदूषणं पश्चादुद्धरिष्य प्रथमतः प्रतीत्या भेदं साधयति। न तावदित्यादिना। अन्योन्याश्रयदोषानतीतः। कथमिति चेत् किमन्योन्याश्रयणोद्भावनात्प्रतीत्य तद पह्नवोभिप्रेतः। उत प्रतीतिसंभवेऽपि कारणापह्नवेन प्रतीतेर्मिथ्यात्वं। यद्वा अनिर्वचनीय कारणात्वात्प्रतीतेर्मिथ्यात्वं। किं वा निर्विषयत्वं। अथवा बाध्यविषयत्वमिति विकल्पमभिप्रेत्याद्यं दूषयति। नतावदिति। स्ववचन विरोधः। अविद्यामूलो भेदग्रह इति स्ववचन विरोधः। प्रतीत्यभाववचनं। अभावमभ्युपेत्य प्रतीत्यभ्युपगमनं त्वदीयभाष्यविरुद्धं चेत्याह तथा सतीति। भेदप्रतीत्यपह्नवे सतीत्यर्थः। युष्मदस्मत्प्रत्ययावेव युष्मदस्मदर्थभेदप्रत्यये, विषयविषयिणोरित्यादिना भेदश्चाभ्युपगत इत्यर्थः। द्वितीये आह तेन च भेदेति। मिथ्यात्वस्यापि कार्यत्वात्कारणं वाच्यमित्यर्थः। अन्यथेति। चार्वाकमते निर्हेतुकं कार्यमिति भावः। नित्यत्वतुच्छत्वयोरित्यकार्यस्य सत्वे ब्रह्मवत्सत्यत्वं समत्वे शशविषाणवत्तुच्छत्वं स्यादित्यर्थः। तृतीयं प्रतिवक्ति न च दुर्निरूपमिति। ननु विशेषतो निरूपणाभावोऽभिप्रेतइतिचेत्किमस्मन्मते निरूपणाभावः उत त्वन्मतेन। आद्ये इत्याह अन्वयेति। नचाधिकरणग्रहणपक्षयोर्मानाभावादभेदप्रतीतौ साक्षत्वानुभवाच्चेति भावः। द्वितीयेआह भवतापीति। अन्यथेति। अविद्याकारणकत्वाभाव इत्यर्थः। चतुर्थ दूषयति न चास्येति। स्ववचनभवद्भाष्य विरोधादित्यर्थः। स्व बाध्येति। प्रतीतेर्निर्विषयतया

वाच्यम्: एतत्कारणत्वेनैव मुनिरूपत्वात्। अन्वयव्यतिरेकवशादिन्द्रियादि विशेषप्रसिद्धेश्च। भवताऽपि चाविद्या कारणमिति विशेषतो निर्णीतम्; अन्यथा परमार्थत्वप्रसङ्गात्। न चास्य निर्विषयत्वं सुवचम्; प्रतीत्यपह्नवपक्षोक्तदोषावश्यम्भावात्। स्वबाध्यभेदविषयप्रतीत्यभावेन परसिद्धान्तस्थिरीकरणाच्च। अतो बाध्यविषयत्वमवशिष्यते । तदपि दुर्वचम्; बाधकप्रमाणस्य भेदग्राहित्वे, भेदाभावग्राहित्वे, यत्किञ्चिद्ग्राहित्वाभावे च भेदस्य स्थिरीकरणात्। भेदाभावोऽपि सिद्ध्यन् भेदाद्भिन्न एव सिद्ध्यति; अन्यथा तदसिद्धेस्तत्सिद्धेर्वा भेदसिद्ध्यापातात् । एवंच सामान्यतः स्थापिते भेदे न पृथग्जल्पानामुत्तरापेक्षा।

या चात्र भेदतिरस्कारिणी, साऽपि साध्वसाधुविवेकदिव्यचक्षुपि जने न जागर्ति। तथाहि स्वरूपं धर्मो वेति विकल्पयन् किं सामान्यतः स्वरूपधर्मयोः भेदमङ्गीकृत्य विकल्पयति, अनङ्गीकृत्य वा? न प्रथमः; विकल्पस्य निष्फलत्वात्। अन्यथा अभ्युपगमबाधात्। न द्वितीयः; विकल्पस्यानुत्थानात्। न पुनः पर्यायेण विकल्पः। न च निर्मुक्तोपाधिभेदैकवस्तुगोचरयोः शब्दयोरपर्यायता प्रातीतिकभेदमूलोऽयं विकल्पः; परमार्थविमर्शभेदमूलं तद्दूषणमिति चेन्न-विमर्शभेदस्यापि पारमार्थिकत्वानभ्युपगमात्।

भेदगोचरप्रतीतेरभावात्तन्निरासानुपपत्तेरित्यर्थः। पंचममाशंकते अतो बाध्येति। ननु भेदाभावग्राहित्वे कथं भेदस्थिरीकरणं तथा सत्यतिप्रसंगादित्यत्राह भेदाभावोऽपीति। अन्यथा भेदाद्भिन्नत्वेन सिद्ध्यभावे तदसिद्धेःभेदाभावसिद्धेः। तत्सिद्धे र्हेत्विति। यदि भेदाद्भिन्नत्वेन सिद्धावपि भेदाभावसिद्धिः तदा भेदात्मकतयैवा अभेदसिद्धयैवा भेदसिद्धिस्यादित्यर्थः। एवमप्युक्तदोषाणां प्रतिक्षेप इत्यत्राह एवं चेति। सामान्यत इति। धर्मधर्मित्वविशेषानादरेणत्यर्थः।

उत्तरापेक्षायामप्याह या चेति। निष्फलत्वादिति। भेदाभावलक्षणफलासिद्धेरित्यर्थः। अन्यथेति। भेदाभावरूप फलसिद्धावित्यर्थः। इदमुपलक्षणं। उपजीव्य विरोधोऽपीति ध्येयम्। न पुनरिति। स्वरूपधर्मयोरेकत्वादिति भावः। नन्वेकविषयत्वमात्रेण न पर्यायता । नीलमुत्पलमितिवदित्यत्राह न चेति। भेदमात्रनिरासे प्रवृत्तिनिवृत्तिभेदस्यापि निरासाद्धर्मत्व- धर्मित्वयोरुपाध्योर्भेदाभावादित्यर्थः। प्रातीतिकेति। सुप्रसिद्धधर्मधर्मिभेदमुल्लंघ्य प्रवर्तत इत्यर्थः। पूर्वोक्ताभ्युपगमबाधं परिहर्तुमाह पारमार्थिकेति। विमर्शविषयभूतभेदो विमर्शभेदः। तन्मूलं तदवलंबनं तद्विषयं दूषणं प्रवर्तत इत्यर्थः। पारमार्थिको दोषो दूष्यत इति यावत्। तथा वाभ्युपगतस्य प्रतीतिसिद्ध भेदस्वरूपस्या निरासान्नाभ्युपगमबाध इति भावः। किं प्रतीतिसिद्धभेदस्वरूपादन्यस्यैव पारमार्थिकभेदस्य दूष्यत्वं किं वा प्रतीति सिद्धे भेद एव पारमार्थ्यनिरसनमिति विकल्पमभिप्रेत्याद्यं दूषयति विमर्शभेदस्यापीति। तथा चापारमार्थिकभेदस्य दूष्यत्वासंभवान्निर्विषयदूषणं स्यादिति भावः। द्वितीय्य आह स्वमूलघातेति। पारमार्थ्यधर्ममात्रनिरासपारमार्थ्यरूपेण भेदस्यैव निरासेपि दूषणमूलभूतपरमार्थ भेदस्यादित्युपजीव्यबाधोऽभ्युपगमविरोधश्चेति भावः। येन परमते भेदो निश्चीयते तत्किं स्वाघातकासहिष्णुः उत तत्सहिष्णुः आद्ये आह अंगीकृतेति। यद्यनंगीकृतमूलघातकं तदा तेन विरोधाद्दूषणप्रवृत्तेः पारमार्थतयैव भेदस्सिध्येदित्यर्थः। द्वितीयआह अन्यथेति। ननु माभूद्भेदनिश्चयः। परोक्तप्रतीतित्वमात्राद्विकल्पस्यादित्यत्राह तन्मूलेति। निश्चयमूलो हि विकल्पः न प्रतीतिमात्रादित्यर्थः। ननु न वयं विकल्प्य दूषणं ब्रूमः येन मूलघातः किन्तु अनुपलब्धेरेव भेदस्य बाधं ब्रूम इत्यत्राह

स्वमूलघातायोगाच्च। अत एव परमतसिद्धभेदोपजीवनेन विकल्प इति प्रत्युक्तम्; अनङ्गीकृतमूलघातकेन परमतेन तत्सिद्धेः। अन्यथा परमतेनापि तदसिद्धेस्तन्मूलविकल्पासंभवात्। अतो यदि विकल्पयसि, सिद्धो भेदः। यदि न, तथाऽपि सिद्धः विकल्पोपक्रमत्वात् तद्दूषणस्य। न चानुपलब्धेः किं विकल्पेनापीति वाच्यम्, तथा सति तस्यानिर्वचनीयपक्षनिक्षेपासंभवात् संविदनुपलम्भवाचोयुक्तेश्चैवं सुलभत्वात्।

किंच अभेदः स्वरूपं धर्मो वा? स्वरूपं चेत्, भेदभ्रमः क्वचिदपि न स्यात्; भेदविरोधिन्यभेदे दृष्टे तदारोपासंभवात्। अभिन्नो घट इत्यादेः पर्यायतादिप्रसङ्गश्च प्राग्वत्। अथ तु धर्मः, तर्हि सिद्धो भेदः, धर्मधर्मिभावस्य तद्व्याप्तत्वात्। यश्चभेदरूपेणापि धर्मेणाभेदः, स चेत्स्वरूपम्, स एव दोषः। धर्मश्चेदनवस्थेति त्वदुक्तमर्यादाप्रवर्तने का वार्ता। उपलम्भ इति चेत् तुल्यं। न कादाचिदिति चेत् किमर्थस्तर्हि भेदापह्नवः। अनन्यार्थ एवेति चेन्न; अप्रविष्टमाध्यमिकपक्षेण त्वया तथाऽनभ्युप गमात्।। न

(न तन्मूलेति) न चानुपलब्धेरिति। विकल्पेन किमिति। विकल्प्यं दूषणं न ब्रूमः। अपित्वनुपलब्धिवशादेव बाधं दूषणं ब्रूम इत्यर्थः। तथा सतीति। ख्यातिबाधाभ्यां ह्यनिर्वचनीयत्वमनुपलब्धस्य तदसंभवादित्यर्थः। उपलंभस्यैव सत्वेन अनुपलब्धिरसिद्धेत्याह संविदिति ।

भेदः स्वरूपं धर्मो वेति विकल्प्यदूषणं जातिरिति दूषयति किंचेति। तदारोपसंभवादिति। नचाभेदस्य स्वरूपत्वेपि तिरोधानाद्भ्रम इति यदि तदा स्वरूपस्य भेदत्वेपि समानमिति भावपर्यायत्वादिति भिन्नो घट इत्यत्रेवेत्यर्थः। आदिशब्देन घटो घटवदित्युक्तं। स्याद्घटो भेद इति। व्यवहारश्च स्यादिति विवक्षितं। धर्मधर्मिभावस्येति। ननु सिद्धान्ते स्वरूपस्यापि भेदत्वांगीकारात् भिन्न इति धर्मधर्मिभावेन व्यवहारः कथमिति चेन्न। भिन्न इति व्यवहारस्य धर्म धर्मिभावनिबंधनत्वासिद्धेः। तस्य भेदाप्रयोज्य संबन्धमात्राधीनत्वादिति भावः। भेदो धर्म इति। पक्षे भेदस्याप्यधिकरणप्रतियोग्यादिभिर्भेदोऽस्तिनवेति विकल्प्य प्रवृत्तिदूषणमभेदो धर्म इत्यत्रपिस्यादित्यत्राह यश्चभेद इति। स एवेति। भेदभ्रमानुपपत्तिर्दोष इत्यर्थः। त्वदुक्तेति। इतीत्यनेन भेदस्स्वरूपं धर्मोवित्याशंक्योक्तोर्थः परामृश्यते। भेदास्स्वरूपं धर्मोविति विकल्पयता परेण हि प्रकारान्तराभावाद्यद्येकत्र स्वरूपं सर्वत्रापि स्वरूपमेव क्वचिद्धर्मत्वे तु सर्वत्रापि धर्म एवेति मर्यादा विवक्षिता। अभेदेऽपि तादृशमर्यादाकल्पनेन दूषणोक्तौ किमुत्तरमित्यर्थः। उपलंभ इति चेदिति। शुक्त्यादि स्वरूपग्रहेपि भेदभ्रमदर्शनात्तत्राभेदो धर्मः शौक्ल्यादिस्वरूपग्रहे तद्भेदभ्रमदर्शनात्तत्र स्वरूपभेद इति यथोपलंभं स्वीकारेण न दोष इति चेदित्यर्थः। न काचिदिति। नास्माभिरभेद दूषणपरिहारः कार्यः। तथा च तद्दूषणे इष्टापत्तिरिति भावः। किमर्थ इति। जीवब्रह्मणोरभेद समर्थनार्थमेव भेदापन्नपातो नेष्टापत्तिरिति भावः। अन्यार्थ एवेति। भेददूषणमभेदसमर्थनार्थं न भवति। किंतु भेदासिद्ध्य इति भावः। अप्रतिष्ठेति। माध्यमिकवत्सर्वशून्यत्वानंगीकारात् अंगीकृतस्य ब्रह्मणस्स्वात्मकजीवाभेदाभ्युपगमाद भेदनिरासो नेष्ट इति भावः। ननु वयं भेदापह्नवेनाद्वैतं साधयामः । येन भेदवत्तैरेव तर्कैरभेदस्यापह्नवस्यात्। किन्तु तर्कैर्भेदनिरासमात्रं कुर्मः। न चा भेदस्यापि तन्नयायेन निरासः। दृढतरप्रमाणसिद्धेः तर्काणामप्रवृत्तेरित्यभिप्रायेण शंकते न भेदेति। द्वैताभावत्वेनैव सिद्धिरद्वैतसिद्धिः। स्वप्रकाशश्च न तादृश इति नाद्वैतस्य स्वतसिद्धिरित्यभिप्रायेण परिहरति नाद्वैतमिति। स्वरूपेणसिद्धिरद्वैतसिद्धिः कुतो नेत्यत्राह अन्यथेति।

भेदापह्नवसाध्यमद्वैतम्; अपितु स्वतस्सिद्धमिति चेन्न; अद्वैतमित्येव तत्सिद्धेः। अन्यथा स्वरूपमात्रस्य भेदाभेदविकल्पसहस्य तत्त्वायोगात्। तस्मात् भेदस्वरूपमपह्नुवानैरभेदस्वरूपमप्यपह्नुवं स्यात्। न च अस्त्विति वाच्यम्, माध्यमिकमतापातात्। न चानुभयाकारत्वसिद्धिः, उभयाकारत्ववत् व्याघातात्। न च वयमेकस्यैवैकस्माद्भेदमभेदं च स्वीकुर्मः, येनास्मन्मते तत्प्रसङ्गः। न चाभेदमपि सर्वत्र परित्यजामः; येन प्रकारेण भवत इव सर्वाभावः स्यात्; अतः सर्वं वस्तुजातं स्वव्यतिरिक्तात् सर्वस्माद्भिन्नं स्वस्माच्चाभिन्नमिति सांसिद्धिकीयं तत्त्वव्यवस्था।

अथ यावत्संभवं च विकल्पितं देवानांप्रियेण, धर्मान्तराणां स्वाश्रयस्य च स्वरूपधर्मबहिर्भावात् व्यावर्तकत्वेन भेदत्वस्य वक्ष्यमाणत्वाच्च उभयं वेत्यपि विकल्पः किं न विकल्पितः? स एव हि नस्समयः। यथासंभवं स्वरूपधर्मयोर्भेदत्वस्यानुप्रवेशोपलम्भात्। व्यावृत्तव्यवहारहेतुर्हि भेदः। स च व्यवहार; क्वचित् स्वरूपतः क्वचित् धर्मतश्च दृश्यते। शुक्तिरजतभ्रमादेः शुक्तित्वादिधर्मभेदाप्रतीतिनिबन्धनत्व स्यान्वयव्यतिरेकसिद्धत्वान्न भ्रमाद्यनुपपत्तिः। न हि शुक्त्यादीनां स्वरूपमेव रजतादिभ्यो भेदः।

अद्वैतमित्याकारकत्वाभावे स्वरूपमात्रप्रकाशस्य संशयसहस्याद्वैतसिद्धित्वं न स्यादित्यर्थः। भेद स्वरूपस्य दुरपह्नवत्वमाह अस्मादिति। ननु माभूद्भेदवदभेदोऽपि न चैतावता माध्यमिकमतापातः। वस्तुस्वरूपमात्रांगीकारादपि तन्मतनिरासादित्याह न चेति। अन्यतराभावस्यान्यतरसत्वव्याप्तत्वात्। उभयाभावः उभयसत्वप्रसंगात्। अनुभवात्मकत्वं व्याहतमित्यर्थः। ननु भेदवादिनापि त्वया भेदोंगीक्रियते नवा। आद्ये स एव व्याघातः। द्वितीये सर्वस्यापि स्वात्मनाप्यभेदाभावे माध्यमिकमतापात इत्यत्राह न च वयमित्यादिना। तर्हि तस्माद्भेद इत्यत्राह अत इति।

विकल्पन्यूनत्वदोषमाह अथ यावदिति। धर्मान्तराणामिति। चंदनगंधस्य कस्तूरिकागंधाद्भेदो अस्ति स च भेदः गंधाश्रयचंदनाद्येव। न च भेदाश्रयो गंधो न वा तद्धर्म इति तदितिरिक्तकोप्यन्तरं संभवतीति भावः। कोट्यन्तरमाह उभयं वेत्यपीति। क्वचिद्धर्मः क्वचिद्धर्मीति कोटयंन्तरं कुतो नोक्तमित्यर्थः। स एवेति। एवकारेण धर्ममात्र भेदवादः स्वरूपमात्र भेदवादश्च व्यवच्छिद्यते। अंगीकारे हेतुमाह यथा संभवमिति। स्वमतेप्येकजातीय्यस्यैवाभावत्वासंभवादिति भावः। कथमुभयोर्भेदत्वमित्याशंकायां भेदलक्षणसत्वादित्याह व्यावृत्तेरिति। स्वरूपे लक्षणं दर्शयति स चेति। शौक्ल्यादिग्रहे सति काष्ण्यादिभ्यो व्यावृत्तिव्यवहारदर्शनात् शौक्ल्यादिस्वरूपमेव भेद इत्यर्थः। धर्मस्य भेदलक्षणयोगितामाह क्वचिद्धर्मश्चेति। तस्य भेदत्वमुपपादयति शुक्तिरजतभ्रमादेरिति। अत एव स्वरूपपक्षोक्त लक्षणोक्तदोषोपि नास्तीत्याह। न भ्रमाद्यनुपपत्तिरिति। ननु स्वरूपस्यापि भेदत्वात्कथं तद्ग्रहेदभ्रम इत्यत्राह न हीति। धर्म्यपेक्षया स्वरूपं न भेदः।अपितु धर्म एवेत्यर्थः। ननु धटत्वादेर्भेदकत्वे धटो भिन्न इति पर्यायता प्रसंगः। घट इति व्यवहारवत् भिन्न इति व्यवहारोपि प्रतियोगिनिरपेक्षस्यात्।

अन्यतरपद वैयर्थ्यं च स्यादित्यत्राह घटोभिन्न इति। प्रवृत्तिनिमित्तभेदान्नदोष इति भावः। व्यावृत्तेति। यत्संबन्धेन यत्र यद्व्यावृत्ति व्यवहार प्रयोजकं यत् तत्संबंधेन तत्र तद्भेदस्स इति विवक्षितं। तेन शौक्लस्येतरभेदत्वे स्वाश्रयीभूत घटापेक्षयापि भेदतया घटेऽपि घटभेदप्रसंग इति निरस्तं। तस्य स्वाश्रयाद्भेदत्वेपि नाधाराधेय भाव संबन्धेन तत्र तद्व्यवहार प्रयोजकत्वं किन्तु अभेदसंबन्धेनैव व्यवहार प्रयोजकत्वमिति तेन संबन्धेन तद्वति स भेदो न भवतीति धटेऽपि न तद्भेदप्रसंगः। एवं शौक्ल्यस्य धर्मिणि

घटो भिन्न इति व्यवहारगतचोद्यान्यपि घटशब्दप्रवृत्तिनिमित्तविलक्षण-सार्वत्रिकप्रयोगयोग्य-भिन्न शब्दप्रवृत्तिनिमित्तयोगात् परिहृतानि। तच्च निमित्तं घटत्वादिभेदानामेव व्यावृत्तव्यवहारहेतुत्वं भ्रान्ति प्रतिपक्षोपलम्भत्वमित्यादिरूपेण ग्राह्यम्। अत एव व्यावृत्त्यनुवृत्त्यादिप्रयुक्तव्यवहारसाधनतादात्म्य प्रसङ्गोऽपि प्रत्युक्तः; स्वरूपशब्दवत्। घटस्वरूपं पटस्वरूपमिति भेदोल्लेखेनैव हि स्वरूपशब्दः सर्वत्र प्रयुज्यते। तत एव तत्रापि स्वरूपमात्रतादात्म्यर्मिति चेन्न; स्वधीवचनादिविरोधात्। भेदः स्वरूपमित्यनेनाभेदस्वरूपसिद्धिरिति कस्त्वदन्यो मन्येत? सप्रतियोगिकत्वाप्रतियोगिकत्वविकल्पोऽपि, भिन्न इति व्यवहारमात्रस्य प्रतियोगिनिरूपिताकारे व्युत्पन्नत्वात् प्रतियोगिसाकांक्षतेति निरस्तः। स्वरूपधर्मभेदसमर्थनाच्च धर्मधर्मिणोर्भेदोऽनवस्थापरिहारश्च सिद्धः। अयमत्र संग्रहः

तद्‌शौक्ल्यादि भेदत्वेपि शौकल्य भेदप्रसंगोऽपि नास्ति। तस्य धर्मिण्याधाराधेय भावसंबन्धेनैवेतरभेदत्वात्। शौक्ल्यं तादृश संबन्धेनाभावादिति दिक्। भ्रान्तीति। भ्रान्तिप्रतिपक्ष उपलंभो यस्येति बहुव्रीहिः। तथा चायमर्थः। यस्मिन्नधिकरणे यदुपलंभो यदभेदज्ञान विरोधि तदधिकरणक तत्प्रतियोगिकभेदत्वं तस्यैवेत्यर्थः। यदुक्तं पटादिस्वरूपाणां प्रत्येकं घटाद्भेदं घटाद्व्यावृत्त इत्यनुगतव्यवहारस्य निर्विषयत्वेन बाधादनुवृत्तत्वाग्राकारे सर्वतादात्म्यप्रसंग इत्युक्तदोषमुद्धरति अत एवेति। सार्वत्रिकप्रयोगयोग्य प्रवृत्तिनिमित्तयोगाद्भिन्नेष्वप्यनुगत भेदव्यवहारोपपत्तेरित्यर्थः। अनुवृत्त्यादिति। यद्यपि घटभिन्नवस्तुस्वरूपाणां परस्परानुवृत्त्या तेषां परस्पर तादात्म्यसिद्धावपि घटतादात्म्यासिद्धेः न सर्वतादात्म्यं तथापि पटभेद(स्य) व्यवहारविषयाणां पटभिन्नवस्तुस्वरूपाणां परस्परानुवृत्तिरादिशब्देन विवक्षिता। तथाच कुडचादीनां घटपटोभयतादात्म्यात्सर्वतादात्म्यप्रसंग इति भावः। स्वरूपशब्दवदिति। यथा स्वरूपशब्दविषयाणां परस्परनुवृत्त्यभावेऽपि न स्वरूपशब्दस्य निर्विषयत्वं तथेत्यर्थः। दृष्टान्तोऽसिद्धः। तत्रानुवृत्तस्य विषयत्वसंभवादित्यत्राह घटस्वरूपमिति। भेदोल्लेखबलान्नस्वरूप शब्दार्थानुवृत्तिरिति भावः। तत एवेति। अनुगतव्यवहारस्य निर्विषयत्वप्रसंगादेव स्वरूपमात्रं न भिद्यत इति भावः स्वधीति। घटस्वरूपं पटस्वरूपाद्भिन्नं ब्रह्मस्वरूपं जडस्वरूपं न भवतीति स्वधीवचन विरोधः। न चाननुगमः। समभिव्याहृतविशेष्यांशत्वं स्वरूपत्वमिति नानुगतव्यवहारस्य निर्विषयत्वमिति भावः। दूषणांतरमाह तेनेति। भेदस्वरूपमिति। व्यवहारात्तेनापि सर्वतादात्म्यं प्रसज्येत। नच तद्युक्तं विरोधादिति भावः। प्रतियोगिनिरूपिताकारे व्युत्पन्नत्वादिति। दीर्घत्वस्य परिमाणत्वेपि दीर्घत्वाकारव्यवहारस्येव भिन्नत्वाकारव्यवहारस्यापि प्रतियोगिकत्वमिति भावः।

यस्मिन्नेतिद्दर्शन इति। ननु शुक्तित्वदर्शनेऽपि तस्यां रजतसंसर्गारोपात्कथं तस्य रजतभेदत्वं। किं च घटात्यन्ताभावेज्ञाते तत्र घटसंसर्गाध्यासायोगात् घटात्यंताभावे घटभेदस्यात्। तथाच तद्वतो घटस्य घटभिन्नत्वप्रसंगः। किंच घटत्वादेः घटापेक्षया भेदस्तदन्यस्यात् यस्मिन्यद्दर्शन इत्यभावात्। न च यद्दर्शनं यत्र यदध्यास विरोधीति विवक्षितं घटत्वादेर्दर्शनस्य स्वस्मिन् तदन्यथाध्यास विरोधित्वादिति वाच्यं। तथा सति घटेपि घटभेदप्रसंग इति चेन्न। यद्रूपेण ज्ञायमाने यत्र येन संबन्धेन यस्यज्ञानं यद्रूपेण ज्ञानमान यत्तादात्म्यज्ञानविरोधि तेन संबन्धेन तस्य तत्प्रतियोगिको भेदः। एवं च घटत्वं स्वस्मिन् तादात्म्यसंबन्धेन ज्ञातमन्यतादात्म्यज्ञानविरोधीति तंत्रभेदः। घटेतु संसर्गसंबन्धेन ज्ञातमिति तादात्म्यज्ञानविरोधीति पटादिभ्यो घटस्य भेदः। न च घटस्य संसर्ग संबन्धे घटत्व ज्ञानं स्वतादात्म्याध्यासविरोधित्वात्स्वयमेव

"यस्मिन् यद्दर्शने येषामध्यासो नोपपद्यते। तस्य भेदः स तेभ्यः स्यात् तदुक्तिस्तु विवक्षया" ॥ इति ॥

एवं तर्हि धर्मभेदपक्ष एवंगीकृतः स्यात्, न पुनः स्वरूपस्य भेदत्वसिद्धिः; तस्य भ्रमसहत्वात् इति चेत्; सत्यम्; तथाऽपि धर्मविशेषाणां धर्म्यन्तरमनपेक्ष्यैव स्वस्मिन्नन्यतादात्म्याध्यासविरोधित्वात् तेषां स्वरूपमेव स्वेषां स्वधर्मिपर्यन्तेभ्य इतरेभ्यो भेद इत्येष्टव्यम्। तच्च स्वरूपमाश्रयापेक्षया धर्मः भेद इत्यपि व्यपदिश्यते। स्वपरनिर्वाहकसमाधिश्च संवेदनादिषु त्वयाऽपि स्वीकृतः। धर्मिस्वरूपस्य न कदाचित् भेदत्वसिद्धिरिति चेन्न, अगृहीतभेदेषु केषुचित् धर्मेष्वाश्रयभेदात् भेदव्यवहारदर्शनात्। सौरभादिषु हि धर्मत्वमवगम्य कस्येदमिति सन्दिहानाः तदाश्रयविशेषदर्शनादिभिस्ततन्निष्ठतामध्यवस्यन्तः

स्वस्माद्भेदस्यात् इति वाच्यं। इष्टत्वात्। नचैवमस्मिन्नपि भेदव्यवहारप्रसंगः। यत्र भेदज्ञानविरोधि तत्राधिकरणे भेदव्यवहार प्रयोजकत्वादिति दिक्। ननु यदि घटत्वादिकमेव भेदः तस्मिन् गृहीते घट इति व्यवहारवत् भिन्न इति व्यवहारोऽपि स्यादित्यत्राह तदुक्तिस्त्विति। भिन्नशब्दस्य प्रतियोगिनिरूपिताकारे व्युत्पन्नत्वात् तदाकारविवक्षायां तथा व्यवहार इत्यर्थः।

सत्यमिति। अवधारणांशो नांगीकृतः। धर्मविशेषाणामिति। ननु दंडिन्यदंडिभ्यो भेदो दंडो न स्यात्। दंडस्वरूपे ज्ञातस्य दंडितादात्म्याध्यासात् किं चादंडिभ्यो भेदो न स्वरूपस्स्यात्। तन्निष्ठ धर्मदंडदशायामपि दंडिभेदव्यवहारापत्तेः। नच दंडाभावः तस्यातिरिक्तस्याभावात् भावे वा सर्वत्र तथास्तु। किं च जातिगुणादीनां स्वरूपस्याश्रयत्वाद्भेदत्वं न स्यात्। तद्ज्ञानस्य शुक्लोघट इत्याश्रय तादात्म्य सहत्वादिति चेन्न दंडत्वादिकमेव भेदः। परंपरासंबन्धेन तदध्यासविरोधित्वाद्दंडिन्यदि तात्कालिककालापि संबन्ध एव भेदः। तस्याभावाद्दंडिनि भेदव्यवहारायोगात्। नापि जात्यादेराश्रयाद्भेदत्वादभावः। यं धर्ममादाय घटो घटत्वमिति पर्यायत्वाभावः तादृग्धर्मस्यैव भेदत्वात्। तद्दर्शने च अन्यतादात्म्याध्यासाभावादिति दिक्। ननु यदि घटत्वमेव भेदस्तर्हि तद्ज्ञानमात्रात्स्वरूपव्यवहारवत् भेद इति व्यवहारोऽपि स्यादित्यत्राह तच्चेति। यथा घट इति स्वरूपेण व्यवह्रियमाणघटत्वं घटेन सहाश्रयाश्रयिभावविवक्षायां धर्म इति व्यपदिश्यते तदा तत्प्रतियोगित्वविवक्षायां घटाद्भेद इति व्यपदिश्यत इत्यर्थः। स्वरूपनिर्वाहकत्वसमाधिः परैरभ्युपगम्यत इत्याह स्वपरेति। संवेदनं -संवित्। तस्य स्वसिद्धपरसिद्धंस्वव्यवहारपरव्यवहार प्रयोजनस्योक्तत्वादित्यर्थः विकल्पायन्यूनतोद्भावनसमये स्वाश्रयस्य स्वरूपधर्मबहिर्भावादिति धर्मिणोपि भेदत्वमुक्तं तदुपपादयितुं शंकते धर्मिस्वरूपस्येति। अगृहीत भेदेष्विति। स्वरूपतो धर्मतो वेति शेषः। सौरभे गृहीते तदाश्रयानवगतिदशायां तैलघृतगंधयो वैषम्यमगृहीतवतो पटुकरणस्य भवति संशयः किं तैलस्यायं गन्धः उत ततोऽन्य इति। तत्र धृतरूपाश्रय विशेषे निश्चिते सति तैलादिगन्धो नेति भेदव्यवहारात्तत्संशय निवृत्तेश्चाश्रय एव भेदइत्यर्थः। ननु धर्म्यपि किं भिन्नमेव धर्मं भिनत्ति उत निर्भेदमेव द्वितीयेऽतादृशेन न भिन्नत्वसिद्धिः। अनेनापि धर्मस्यैव धर्मि भेदकत्वस्य वाच्यत्वात्तस्य च धर्माधीन भेदत्वेन्योन्याश्रय प्रसंगात्। निर्भेदस्यैव धर्मस्य धर्मिभेदकत्वं वाच्यं। तच्च न संभवतीत्युक्तं। किंच निर्भेदस्यैव भेदकत्वे भिन्नयोरंशयोर्भेदकं तस्यापि तन्निष्ठेन तेन धर्मेण भेदः तत्रापि यदेकं तस्यापि तेन भेद इत्यनवस्था स्यात्। ततश्च परमाणूनामपि भेदे तदंशस्यापि भेदे न चैकस्याऽसिद्धेश्शून्यतापत्तिश्चेत्यत्राह। सोऽपि धर्मीति। धर्मान्तरेत्यनेन अन्योन्याश्रयः परिहृतः। यस्य

तदन्यनिष्ठादन्यतां मन्यन्ते। अतोऽस्ति धर्मिणोऽपि क्वचित् भेदत्वम्। सोऽपि धर्मी स्वधर्ममितरगतधर्मात् भिन्दानो धर्मान्तरेण भिन्न इति, न; "निर्भेदेन भिद्यते" इति शङ्का, येन भेदासिद्धिरनवस्थादिकं वा प्रसज्येत। यस्य च धर्मस्य धर्मी भेदः, सोऽपि कदाचित् तस्यैव धर्मिणो भेदस्स्यात्, यदा ह्याकारादिसादृश्यमात्रेण तस्यैव धर्मिणो धर्म्यन्तराद्व्यवच्छेदासिद्धिः; यथा विलीने घृते तैलसन्देहदशायां गन्धविशेषेण तद्व्यावृत्तिः। अतोऽत्र नान्योन्याश्रयशङ्काऽपि, अपेक्षानियमाभावात्, गन्धजातिभेदस्य धर्मिभेदाप्रतीतावपि प्रत्यक्षेण पटुकरणानां प्रतीतेः। अस्फुटरूपधर्मद्वयभेदाभेदचिन्तायाञ्च तद्भेदकस्याश्रयादिभेदस्य प्रत्यक्षावसिततदाकारान्तरयोगित्वेनैव सिद्धिः। एवं विषयधर्मादिषु विषयादिभ्योऽपि भेद उदाहर्तव्यः।

यच्चोक्तम्-धर्मधर्मित्वादिग्रहो भेदग्रहात् ततश्च स इत्यन्योन्याश्रय इति तदपि न; तयोर्भेदानभ्युपगमात्। धर्मधर्मित्वादिरेव हि भेद इष्यते। तथा आत्माश्रयापात इति चेन्न; तस्यैव तत्र हेतुत्वानभ्युपगमात्। प्रत्यक्षादिसामग्रीवशादेव हि तद्ग्रहः समर्थित एव। स च जात्यादिरूपभेदः प्रत्यक्षादियोग्य इति। यच्च वस्त्वन्तरसिद्धौ एकविधिरन्यव्यवच्छेदः, व्यवच्छेदसिद्धौ वस्त्वन्तरसिद्धिरिति- तदपि न; वस्तुनोर्द्वयोरपि प्रतिनियतधर्मविशिष्टतया प्रत्यक्षादिभिर्ग्रहणात् तावत एव व्यवच्छेदग्रहरूपत्वात्।

धर्मस्य धर्मिभेद्यत्वं ततोऽन्यस्य धर्मिभेदकत्वान्नान्योन्याश्रय इत्यभिप्रायः। येनेति। येन निर्भेदेन भेद्यत्ववचनेनेत्यर्थः। ननु विलीनधृतादौ तैलादितादात्म्यसंदेहस्य सौरभ विशेषोपलंभादेव निवृत्तिः। अत एव धर्मिणो भेदकस्य स एव चेद्धर्मिणो भेद्यते व्यक्त एवान्योन्याश्रय इत्यत्राह यस्यचेति। कदाचिदिति। यदा स्वयं धर्मी भिद्यते न धर्मिण स्वयं भेदक इति तात्पर्यं। ननु तादृशधर्मस्य नियमतो धर्म्येव भेद इव कदाचिदपि कथं तस्य धर्म भेदकत्वमन्योन्याश्रयादित्यत्राह अपेक्षेति। परस्परापेक्षानियमाभावादित्यर्थः। तत्र धर्मस्य धर्म्यपेक्षा नियमाभावमुपपादयति गंधजातीति। धर्मिणो स्वभेदस्य धर्मापेक्षा नियामाभावमुपपादयति। अस्फुटेति। अत्रेदं तत्वं गंधादिस्थले गन्धगतविशेष एव भेदः। स एवाश्रयस्यापि घृतस्य भेदकः। तद्ज्ञानादेव तादात्म्याध्यासनिवृत्तेः। आश्रयोऽपिन भेदकः। निर्भेदस्य भेदत्वायोगात्। भेदसिद्धिश्च धर्मान्तराच्चेत्स एव गंधादेरपि भेदः। तद्ज्ञानादध्यासनिवृत्तेः। न च तन्निष्ठत्वात्कथं स भेद इति शंक्यं। धर्मिणोऽपि तथात्वात्तस्माद्धर्मिभेदवचनं धर्मस्येवेति न नियमः। किन्तु तदन्यस्यापि भेदत्वमस्तीति परमिति प्रागुक्तं। धर्म्यन्तराणां भेदत्वमुदाहरति एवमिति। विषयज्ञानं तद्धर्मे विषयत्वं। आदिशब्देन विषयो गृह्यते। घटज्ञानस्य घटविषयक ज्ञानापेक्षया घटो भेदः घटे विषयत्वस्य पटविषयत्वापेक्षया स एव भेदः। तद्ज्ञानविषयस्य तदविषयापेक्षया तद्ज्ञानं भेद इति क्रमेणोदाहर्तव्यमित्यर्थः।

तयोरिति। धर्मधर्मित्वादेर्भेदस्य च मिथो भेदानभ्युपगमादित्यर्थः। तथेति। तथा सति भेदज्ञानाधीनं धर्मत्वधर्मित्व ज्ञानं भेदज्ञानं च तदेवेत्यात्माश्रय इत्यर्थः। तस्यै वेति। धर्मत्व धर्मित्वयोर्ज्ञानस्य स्वात्मानं प्रति हेतुत्वे आत्माश्रयः। नहि धर्मत्वज्ञानं तत्र हेतुः। धर्मित्वज्ञानं वा स्वस्मिन्नित्यर्थः। धर्मत्व धर्मित्वादेर्भेदत्वमभ्युपेत्युक्तं। वस्तुतो जात्यादेरेव भेदत्वात्तस्य च वस्तुना सहैव ग्रहणान्नाऽन्योन्याश्रयशंकापीत्यत्राह स चेति। वस्तुनोर्द्वयोरिति। विधिरेव व्यवच्छेदः। स च न तस्यैव व्याघातात्। किन्त्वन्यस्यैव। अन्यत्वं च तत्तत्प्रतिनियतो धर्मः। तत्तादात्म्य विरोधी धर्मः। तत्तदपेक्षयान्यत्वमिति यावत्। तद्यथा धटाद्यन्यत्वं पटत्वं तच्च प्रत्यक्षेणेव गृह्यत इति नान्योन्याश्रय

यच्चोक्तम्-अविद्यावशात् भेदग्रहः; तत्र चाविचारितरमणीयतैकवेपत्वात् वस्तुतो विचारासहत्वान्न कश्चिद्दोष इति; तत्र किं प्रत्यक्षस्यैव शिरसि भारोऽयं निक्षिप्यते। तत्प्रामाण्यसिद्ध्यर्थमिति चेत्, तदपि वा किमर्थं न परित्यज्यते। लोकविरोधादिति चेत्, तुल्यं विकल्पेऽपि। तत्सिद्धेः स्वरूपमात्रे बाधकाभावादिति चेन्न, भेदेऽपि बाधकाभावस्योक्तत्वात्। अस्तु तर्हि प्रत्यक्षमप्यप्रमाणमिति चेत्, हन्त! तर्हि तत्सिद्धस्वरूपमात्रस्यापि मिथ्यात्वात् जितं माध्यमिकैः। केनाप्यसिद्धं तत् स्वतस्सिद्धमिति चेत्, तथाभावे तस्य किं त्वया प्रमाणमुपन्यसनीयम्। न किंचिदिति चेत्, साधु सिद्धान्तः समर्थितः। अथ प्रत्यक्षादिकमेव किमप्रमाणमपि प्रमाणतया उपन्यस्तं कार्यकरम्? तथा च सति परपक्षप्रतिक्षेपः कस्यापि न सिद्ध्येत्। परैः प्रमाणतयाऽभ्युपगमात् तदुपन्यास इति चेत्, न तावता निर्णायकत्वम्,

---

इत्यर्थः।

प्रत्यक्षस्यैवेति। अन्योन्याश्रयादिकं प्रत्यक्षस्यैव दोष इति तद्वर्जनभारस्तस्यापेक्षित इति किमर्थमुच्यते भेदज्ञानमात्रशिरसि किमर्थं निक्षिप्यत इत्यर्थः। प्रमाणस्यैव विचारसहत्वं नान्यस्य। तथा च प्रत्यक्षस्य प्रामाण्यसिद्धये अन्योन्याश्रयादिकं प्रत्यक्षस्यैव दोषवर्जनापेक्षेति शंकते। तत्प्रामाण्येति। लोके हि सन् घट इत्यादौ प्रतीत्यैक्यं-प्रतीति स्वरसिद्धं तत्राऽन्योन्याश्रयादिदोषसहं प्रत्यक्षाद्भिन्नं भेद भ्रमरूपमेकं ज्ञानं। अपरं तु प्रत्यक्षप्रमात्मकं सन्मात्रविषयं दोषासहमिति कुतो ज्ञानद्वयं कल्प्यते। लाधवात् एकमेव प्रत्यक्षकरणैर्भ्रमरूपमुत्पन्नमस्त्विवति अतिशयेन परिहरति तदपि वेति। लोकेति। सन्मात्रप्रत्यक्षेन्योन्याश्रयादिदोषाणां लोकविरोधात्परित्यज्यत इत्यर्थः। तुल्य विकल्पेति। लोकविरोधस्य भेदज्ञानमात्रेऽपि तुल्यत्वादित्यर्थः। बाधितं विषयत्वरूप वैषम्यं शंकते तत्सिद्ध इति। सदिति। प्रत्यक्ष बधाभावात्प्रमाणं भेदविषयत्वे चान्योन्याश्रयादिदोषग्रासान्नप्रामाण्यं स्यादतो ज्ञान भेदः कल्प्यत इति भावः। बाधकाभावा ( ) नं तरं न परित्यक्त इत्यनुषंगः। उक्तत्वादिति। अतो बाध्यविषयत्वमेव शिष्यत इत्यारभ्येत्यर्थः। अस्तु तर्हीति। प्रामाण्याप्रामाण्यवैषम्यहेत्वभावात्सत्वरूप भेदोभयविषयकं प्रत्यक्षमेकमस्मत्प्रमाणं चास्त्वित्यर्थः। तेनापीति। ऐन्द्रियकप्रत्यक्षेणेत्यर्थः। तथाभाव इति। तस्य सतस्वतस्सिद्धत्वे किं प्रमाणमित्यर्थः। सिद्धाविति। प्रमाणाभावात्सत्स्वरूपमसिध्येदिति सर्वशून्यतास्यादित्यर्थः। अथेति। प्रमाणतयोपन्यसनीयमितिशेषः। परिहरति किमिति। परपक्षाणामपि तथोपन्याससिद्धप्रमाणप्रतिष्ठितत्वादिति भावः। प्रमाणतयोपन्यासमात्रान्नकार्यकरत्वं येनोक्तदोषस्यात्। किन्तु परैः प्रमाणतयाभ्युपगतं कार्यकरमिति शंकते। परैरिति। तावतेति। तत्तन्मतस्थैरभ्युपगतप्रमाण मात्रात्तदर्थसिद्ध्या तत्वव्यवस्थाया अयोग इत्यर्थः। किं चेति। अत्र सकलतेर व्यावृत्तमित्यनेन व्यावृत्ति वैशिष्ट्यं विवक्षितं स्वरूपातिरिक्त भेद विशिष्टमिति यावत् अन्यथेति। स्वरूपस्य सकलेतरव्यावृत्तिरूपभेद साधकत्वात्प्रमाणान्तरस्य त्वदुक्तरीत्या असंभवाज्जडाद्भेदे मानाभावाज्जडतादात्म्यप्रसंग इति भावः। किं च स्वरूपातिरिक्तजडभेदस्यास्फुरणे प्रत्यग्वस्तुनः सामान्याकारेण स्फुरणं वक्तव्यं। स्वरूपमात्रेण वा तत्र आद्य आह आकारभेदेति। येऽपि किं स्वरूपं जडभेदः उत न द्वितीय्ये जडतादात्म्य प्रसंगः उक्त एवेति प्रथमे दोषमाह तावत इति। प्रत्यग्वस्तुस्वरूपमात्रस्येत्यर्थः। यच्चोक्तं नियमस्याप्याविद्यकत्वेन

तत्त्वव्यवस्थित्यसिद्धेः। किंच स्वयंप्रकाशप्रत्यक्षेणापि सकलेतरव्यावृत्तमेव प्रत्यग्वस्त्ववभासत इत्यतोऽपि भेदः प्रत्यक्ष एष्टव्यः; अन्यथा जडतादात्म्यप्रसङ्गात्, आकारभेदानभ्युपगमेन सामान्यस्फुरणायोगात्, तावतश्च भ्रमसहत्वेन भेदत्वासिद्धेश्चेति।

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां भेददूषणनिस्तारवादः त्रयोदशः ॥१३॥

— — — —

॥अथ वेदप्रामाण्यपरिग्रहानुपपत्तिवादः चतुर्दशः ॥१४॥

यदात्मानो वेदा यदनुगुणवर्णाकृतिजुषः। प्रमाणं यत्रैते नियतमपरिच्छेद्यविभवे।
य एषामाहर्ता दनुजमथनो वाजिवदनः। स मे देवः श्रीमान् विदलयतु संमोहमखिलम्॥

वेदप्रामाण्यवाङ्मात्रकञ्चुकच्छन्नमर्मणाम्। बुद्धसिद्धान्तसुहृदां सन्तः पश्यन्तु बाध्यताम्॥२॥

अतीन्द्रिये हि धर्मादौ वेदाः प्रमाणमिति साधितं प्रथमकाण्डे। तदुपजीवनेन सिद्धेऽपि प्रामाण्यं

तदभावस्येष्टत्वादित्यादितन्निरासाभिप्रायेणेति शब्दः। तदर्थस्तु घटज्ञानात् घटार्थिनो नियतप्रवृत्तिर्नस्यात् व्यावहारिक व्यवस्था यास्त्वाप्येष्टव्यत्वात्। अन्यथा हेयोपादेयविभागानुपपत्तिः। सत्येव धटज्ञान विषये पटज्ञानस्येष्टत्व वचनमपि व्यावहारिकप्रातिभासिकादिव्यवस्था भंगान्निरस्तमिति॥

वत्सकुलजलधिकौस्तुभ नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां त्रयोदशो वादस्समाप्तः॥

— — — —

पूर्ववादे पूर्वपक्षे भेदानां भ्रन्तिसिद्धत्वं प्रत्यक्षस्य सन्मात्रविषयत्वमित्युक्तौ वेदप्रामाण्यसिद्धिर्नस्यादिति बाधकान्तरमस्मिन्वादे निरूपयतीति पूर्ववादशेषत्वान्नपृथक्संगतिः। अत एव पूर्वपक्षानुक्तिः। अप्रामाण्यस्यैव प्रपंचनसमर्थनाद्वादान्तरताचेत्यभिप्रेत्यवदार्थ संगृह्णाति। यदात्मन इति। य आत्मा प्रति पाद्यतयांतरस्थितः यस्मिन्विषये अनुगुणा स्वरसावणकृतानुपूर्वी च तद्युक्ताः यत्र ब्रह्मभूते श्रीनिवासे प्रमाणं भवेत्तदन्यविषयत्वे प्रामाण्यमनुपपन्नमित्यर्थः। तत्र हेतुःअपरिच्छेद्येति। अन्यत्र प्रतिपाद्यविषयाभावादिति भावः। आहर्ता मधुकैटभहृतान्वेदान्पुनरानीतवान्।

पूर्वश्लोके प्रमाणमिति सूचितं वादार्थं श्लोकान्तरेणविस्पष्टयति वेद प्रामाण्येति। कर्मविदबाह्यतारूपापायस्थानं।

ननु प्रपंचमिथ्यात्वमतभेदे प्रतिपादकपूर्वभागस्य प्रामाण्यं नह्यभ्युपगम्यते। किन्त्वद्वैतपर वेदान्तभागस्येत्यत्राह तदुपजीवनेनेति। अपौरुषेयत्वादिना सिद्धवेद प्रामाण्योपजीवनेन तद्विशेषे प्रामाण्यसिद्धिरित्यर्थः। अत इति। तद्विरोधिवेद प्रामाण्यादित्यर्थः। तदेतदिति। सर्वमीमांसकसंप्रतिपन्नप्रामाण्याप्रामाण्यव्यवस्थापनमित्यर्थः। संविन्मात्रेति मिथ्यार्थविषयत्वेन वेदाप्रामाण्यप्रसंगात् अन्यथा बुद्धाद्यागमस्यापि प्रामाण्यप्रसंगादिति भावः।

प्रमाणत्वेति। वेदस्य प्रामाण्यं तद्विरुद्धस्याप्रामाण्यं च प्रथमाध्यायार्थः। वेदप्रामाण्य समर्थनसिद्धं

शारीरके । अतस्तथागताद्यागमस्तत्त्वानुष्ठानयोरप्रमाणमिति, सर्वमीमांसकसम्मतम् । तदेतत् संविन्मात्रव्यतिरिक्तमिथ्यात्ववादे न संगच्छते । तदुक्तमभियुक्तैः-

''प्रमाणत्वाप्रमाणत्वे पुण्यपापादि तत्फलम् । विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना'' ।

''सर्वेषु लक्षणेष्वेव स्वप्रगाणगणे स्थितिः । वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता'' ।

''कर्मभ्यः फलसम्बन्धः पारलौक्यैहलौकिकः । सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु'' ॥

(कुमारिल श्लोकवार्तिकं) इति ।

तदिह किंनाम वैषम्यमाश्रित्य वेदाः प्रमाणम्, बुद्धाद्युपदेशा न प्रमाणमिति निष्कृष्यते! किं शब्दस्वरूपसत्यत्वासत्यत्वाभ्युपगमेन, उत परमार्थभूतप्रामाण्याप्रामाण्याश्रयत्वेन, उत प्रमातृसत्यत्वा सत्यत्वाभ्युपगमभेदेन, यद्वा सत्यभूतप्रमितिहेतुत्वाहेतुत्वाभ्याम्, किं वा नित्यत्वानित्यत्वाभ्याम्, अथानादित्वसादित्वाभ्याम्, उत दोषतदभावाभ्याम्, अथ व्यवहार विसंवादसंवादाभ्याम्, अथवा महाजनपरिग्रहबहिष्काराभ्याम्, आहोस्वित् वेदत्वावेदत्वमात्रेण, अथाविद्याविशेषजनिताभिमानानभि मानमात्रेण, अथ वा इक्षुक्षीरादिवत् स्वात्ममात्रसाक्षिकेणानिर्देश्य रूपभेदेनेति ।

फलमाह पुण्येति आदिपदेन मोक्ष साधनपरिग्रहः । विधीति । प्रथमाध्यायस्य प्रथमपादार्थः । अर्थवादमन्त्रेपि । द्वितीयपादार्थः । नामधेयानीति चतुर्थपादार्थः । आदिपदेन नामधेयापवादग्रहः । सर्वेष्विति । द्वितीयाध्यायादिषु तत्तद्व्युत्पाद्यभूत शब्दान्तरादिभिः भेदादिप्रमाणैर्यव्यस्थितिरित्यर्थः । ननु तर्हि पूर्वपक्षप्रमाणविरोधि व्युत्पादनात् प्रमाणैरितिकथमित्यत्राह वचनेति । पूर्वोत्तरपक्षयोरुभयोरप्येकार्थ व्युत्पादनतात्पर्यान्नदोष इति भावः । सर्वेष्वेव लक्षणेषु परिनिष्पन्न तत्तदधिकरिणंस्तत्तत्परिकर विशिष्टतत्तत्कर्मभ्यस्तत्तत्फलसिद्धिरूपमर्थमाह कर्मभ्य इति । परलोकश्च इहलोकश्च परलोकहलोकौ तत्र भवः पारलौक्येहलौकिकः । आनुश्रविकादिषु परलोकेहशब्दात्तदादिविधिः तदन्तविधिं प्रयोजयत इति भागवृत्तिरित्याहुः । केचितु परलोके भवं पारलोक्यं ''बहिर्देव पंचजनेभ्य'' इत्यस्य योग विभागोपलक्षणार्थत्वस्यांगीकारात् 'इपु' प्रत्ययः मध्यपदलोपीसमास इत्याहुः । अपरेतु परलोकस्येदमिहलोकस्येदमिति विवक्षायां तस्येदमिति संबंधसामान्ये ''र्ण प्रत्ययः'' ततोद्वंद्वः । ततः परं मत्वर्थीय इति अन्येतु परलोकशब्दादरेणेव इहलोकशब्दात् ''कालात् ठञ्'' (पाणि अष्टाध्या ४-३-११) इत्याहुः । इतरेतु परलोकशब्दात्''स्वार्थिकाणं''तास्थलेमत्यर्थी युष्मद्विन्नंपदमिति वदन्ति ।

अर्थस्य मिथ्यात्वाविशेषे वेदबाह्यागमयोः किं वैषम्यमाश्रित्य वेदाः प्रमाणं बाह्यागमो न प्रमाणमिति स्वयमध्यवसीयते परं प्रति च साध्यत इत्यर्थः । किमिति स्वरूपसत्यत्वाभ्युपगमेनेत्यारभ्य निर्देश्यस्वरूपेण भेदेन वैषम्यमाश्रित्य निष्कृष्यते किमिति योजनाव्यवहारविसंवादात्प्राचीनाः विकल्पाः स्सर्वे अभ्युपगमभेदपराः । सत्यभूतप्रमितीत्यत्र प्रमितिशब्दो ज्ञानपरः । अनिर्देश्यस्वरूपेण विशेषतो निर्देष्टुमशक्येनेत्यर्थः । योगाचारादिभिरित्यादिशब्देन माध्यमिकादिसंग्रहः । तैरपीति । संप्रति दोषस्तदधीनसत्वं कल्पितत्वमिति यावत् । एवं चोभाभ्यामेकरूपसत्यत्वस्यांगीकारात् न विशेष इति भावः । अनन्येति संप्रति सत्वपदस्य व्यावहारिक सत्वपदेन सह पर्यायान्तरत्वातदर्थतो विशेषाभावादित्यर्थः । अन्तत इति । वस्तुनो लोकवंचकत्वमुभयोरित्यर्थः ।

नाऽऽद्यः; असिद्धेः न हि योगाचारादिभिः बुद्धप्रणीतोऽक्षरराशिः सत्य इत्यभ्युपगम्यते; नापि भवता वेदरूपः। न वयं वेदस्य शशशृङ्गादिवदसत्यत्वमभ्युपगच्छाम इति चेत्, किं तर्हि सत्यत्वमभ्युपेतम्?। तदपि नेति चेत्, तर्हि को विशेषः?। व्यावहारिकापरपर्यायकाल्पनिकसत्यत्वाभ्युपगम इति चेन्न, तैरपि संवृतिसत्यत्वाभ्युपगमात्। अयमेव तावत् विशेष इति चेन्न; पर्यायमात्रस्य वैषम्यानाधायकत्वात्। अन्ततो वञ्चनार्थत्वस्याप्युभयोरविशेषात् यथाऽऽहुः-

''तुल्यार्थत्वेऽपि चैतेषां मिथ्या संवृतिशब्दयोः।
वञ्चनार्थ उपन्यासो लालावक्त्रासवादिवत्''।।
''नास्तिक्यपरिहारार्थं संवृत्तिः कल्पितेति च''।

(कुमारिल श्लोकवार्तिकं) इति। न च युष्माभिः संवृतिसत्यत्वस्यावाच्यत्वं संकेतितम्। उक्तं च गूढपाषण्डिगोष्ठीगरिष्ठैः ''तदेतत् संवृतिरिति गीयते'' इति। अस्तु वा तदभ्युपगमेन वैषम्यम्; भवता तु निपुणधिया द्वयोरपि व्यावहारिकसत्यत्वमविशिष्टमेष्टव्यम्; व्यवहारानुबन्धित्वमात्रस्य तुल्यत्वात्। अतो भवता परित्यक्तपक्षपातेन न तद्बहिष्कारः कार्यः। यदि चाभ्युपगमसिद्धेन सत्यत्वेन प्रामाण्यसिद्धिः, तर्हि वैभाषिकाद्यागमानां तदभ्युपेतेन तेन तत्सिद्धिरनिवार्या।

एतेन द्वितीयतृतीयचतुर्था निरस्ताः। विशेषतोऽपि ब्रूमः। द्वितीये तावत् प्रामाण्यलक्षणवैषम्यसिद्धिः प्रामाण्याश्रयत्वेनेति वदता साध्यमेव साधनत्वेनोपन्यस्तम्। ननु विशेषणविशिष्टाकारेण साधनत्वम्, स्वरूपतस्तु साध्यत्वमिति चेन्न; विशेष्यासिद्धौ विशिष्टस्याप्यसिद्धेः। भवन्मते विशेषणमप्यसिद्धमेव;

लोकवंचकत्वमेव परोक्त्या दृढयति यथाहुरिति। वंचनार्थ इति। यथा परेण तुच्छत्वमेवाभ्युपेत्य प्रामाणिकजनवंचनार्थं सांवृतिकं सत्यमिति व्यवह्रियते तथा त्वया वैदिकजनवंचनार्थ सांवृतिकशब्दं परित्यज्य तस्यैवार्थस्य मिथ्याशब्देनोपन्यासः। यथा लालेत्युक्ते जुगुप्सा जायेतेति वक्ता सर्वशब्दो पन्यास इत्यर्थः। संवृतिः कल्पितेति च नास्तिक्यपरिहारार्थं नास्तिक इति लोकापवादपरिहारार्थं वंचनार्थमुपन्यासः इत्यन्वयः। एवं वंचनार्थंप्रवृत्तैरपि वंचना न लब्धेत्याह। नच युष्ममाभिरपि। वंचयितु मुद्युक्तैर्युष्माभिस्सर्वैस्संभूय संवृतिसत्यशब्देन न व्यवहरिष्याम किं तु मिथ्याभूत व्यावहारिक सत्यशब्देनैव व्यवहरिष्याम इति न संकेतितमतो चौल्यमेव प्रकटीकृतमिति भावः। असंकेतित्वादेव खंडनकारादिभिस्संवृति शब्देनापि व्यवहृत मित्याह उक्तं चेति। तद्बहिष्कारः बाह्यागमबहिष्कारः। यदि पराभ्युपगमः प्रयोजकस्तदा दूषणान्तरमाह यदि चेति। वैभाषिकेन स्वागमस्य पारमार्थिकसत्यस्यैवांगीकारादिति भावः।

एतेनेति। असिद्धेनेत्यारभ्येत्येत्तावत्पर्यंतं उक्तेनेत्यर्थः। ननु न प्रामाण्यमात्रमेव हेतुः। येनसाध्या विशेष स्यात् किं तदाश्रयत्वमिति शंकते। नन्विति। विशेषस्याकारो विशेषणं तद्विशिष्टतयेत्यर्थः। हेत्वसिद्ध्यादूषयति विशेषस्येति। प्रामाण्यनिरूपिताश्रयत्वरूपविशेषस्यापि मिथ्यात्वमिति भावः। भवन्मते प्रामाण्यरूपविशेषणं चासिद्धमित्याह भवत इति। विशेषणासिद्धिमुपपादयति वेदप्रामाण्यस्येति। ब्रह्मव्यतिरिक्तत्वाद्वेदप्रामाण्यस्य मिथ्यात्वमित्यर्थः। ननु व्यावहारिकप्रामाण्यमभ्युपगतमेवेत्यत्राह तदभिमानेति। वेदवत् परागमेपि सत्वादित्यर्थः। व्याहतिः निर्विशेषपरमात्रपदप्रमातृत्वोक्त्या व्याहतिः निर्विशेषस्य प्रमातृत्वं च सिद्धान्त विरुद्धमित्यर्थः। प्रमातृत्वस्येति। उपाधेरसत्यतवाद्विशिष्टस्याप्य सत्यत्वमित्यर्थः। ननु विशेषसंविन्मात्रस्वरूपसत्यत्वमंगीकृतमिति चेत् तत्राह तत्र स्वरूपेति।

वेदप्रामाण्यस्यापि ब्रह्मव्यतिरिक्तस्य पारमार्थ्यानभ्युपगमात्। तदभिमानमात्रस्य चोभयोरविशेषात्। तृतीयेऽपि, सत्यप्रमातृत्वेन कस्तावदिष्यते भवता? किं संविन्मात्रम्, उत तदेवोपहितम्, उतोपाधिभेद एव? आद्ये व्याहत्यपसिद्धान्तौ। अनन्तरे प्रमातृत्वस्य सत्यतानभ्युपगमात् नेष्टसिद्धिः। तत्र स्वरूपमात्रस्य सत्यता योगाचारैरप्यङ्गीक्रियते। उपाधिमात्रपक्षे तु उपाधिस्वरूपस्य तत्प्रमातृत्वस्याप्यसत्यत्वमेवेति। नापि चतुर्थः; विकल्पासहत्वात्; तत्र किं प्रमितेः स्वरूपतः सत्यत्वं विवक्षितम्, उत विषयतः? न पूर्वः शास्त्रजन्यायाः प्रमितेर्भवता स्वरूपसत्यत्वानभ्युपगमात्। तेन तु तदभ्युपगमेन तदागमस्यैव प्रामाण्यापातः। तुल्यैस्तु तदपि नेष्यत इति त एव भवतोऽत्रान्तरङ्गसंबन्धिनः। नाप्युत्तरः; विषयतः सत्यत्वस्य चिद्व्यतिरिक्तांशे भवता योगाचारेणाप्यनभ्युपगमात्। चिदंशस्य विषयत्वेऽभ्युपगम्यमानेऽपि सत्यत्वमुभयसम्मतम्; तत्र क्षणिकत्वनित्यत्वादिभेदस्तु दुरुपपादः। निर्धूतसमस्तधर्मविप्लवा हि संवित् भवद्भिः तैश्च परिगृह्यते।

नापि पञ्चमः;आविद्यकस्य वेदस्य भवताऽपि नित्यत्वानभ्युपगमात्। अभ्युपगमे वा नित्यसंसारादिप्रसङ्गात्। क्षणिकत्वनित्यत्वादिकल्पनाभेदस्याप्यप्रयोजकत्वात्। नापि षष्ठः; अविद्याकल्पितत्वाभ्युपगमेनानादित्वासिद्धेः। अनादित्वेनैवेयं कल्पनेति चेन्न; बाह्यैरपि

तवागमप्रमातर्यपि विशिष्टे विशेष्यभूत चैतन्यस्य सत्यतायाः अनंगीकारात् तदागमस्यापि प्रामाण्यप्रसंग इत्यर्थः। किमुपाधिस्वरूपस्य सत्यत्वमभिमतं यद्वा तद्गत प्रमात्वस्येति विकल्पमभिप्रेत्याद्ये आह स्वरूपस्येति। द्वितीये आह तत्प्रमातृत्वस्यापि। तेनत्विति। योगाचारेण ज्ञानस्य सत्यत्वमंगीकृतमिति भावः। तुल्यैरिति। माध्यमिकमतस्थैस्सर्वमिथ्यात्वस्यांगीकारादुभयत्रापि तुल्यवदेकप्रामाण्यसिद्धेरिति भावः। विषयः किंचिद्व्यतिरिक्तः उत चिदैवेति विकल्पाभिप्रायेण आद्येआह चिद्व्यतिरिक्तांश इति। द्वितीय्ये आह चिदंशस्येति। ननु नित्यस्यापि चिदंशस्य क्षणिकत्वोक्तेः तदागमजन्य ज्ञानस्य विषयतो सत्यत्वं चिदंशेऽपीत्याह तत्रेति। तत्र हेतुमाह निर्धूतेति। क्षणिकत्वादि धर्मस्य तन्मतेपि वस्तुतोऽभावात्काल्पनिकस्य मतद्वयसाधारण्यादिति भावः।

नित्यसंसारादिप्रसंगादिति। वेदस्य नित्यतया तद्धेतुभूत अविद्याया अपि नित्यत्वस्यावश्यकत्वे तन्निवृत्तिरूपामुक्तिर्नस्यादिति भावः। ननु काल्पनिक क्षणिकत्वनित्यत्वाभ्यां विशेष इत्यत्राह क्षणिकत्वेति। काल्पनिकस्यासत्वादप्रयोजकत्वमिति।

अनादित्वेनेति। कल्पनायाः प्रवाहरूपेणादित्वमित्यर्थः। बाह्यैरपीति। धर्मदेशना - धर्मोपदेशरूपाण्यागमः। सर्वज्ञः-बुद्धः। तयोः क्षणिकतया तत्संतानपरंपरास्ति। सा च एवं। एक एव सर्वज्ञो धर्मदेशनाच। पुनरप्येक एव सर्वज्ञो धर्मदेशनाचेत्येवं क्रमेण प्रदीपतत्प्रभासंतानवत् सर्वज्ञसंतानान्तरित धर्मदेशनासंतानादिरभ्युपगतः। न च तत्प्रवाहानादित्वमप्यसदेवेति वाच्यं। वेदेपि तव तुल्यत्वादिति भावः। ननु बौद्धानां प्रवाहानादित्वं क्षणभंगविशिष्टं। अस्माकं तदभावविशिष्टमिति वैषम्यमाशंक्याह क्षणभंगेति। अर्थयाथात्म्यप्रयोजनकत्वाभिमानेनादित्वादिपरिग्रहः। तथा (अर्थ) बाधक याथात्म्यप्रयोजकविशेषेण प्रक्षोपोनुचित इति भावः। परागमस्य दोषमूलत्वं तन्मतेनोच्यते, उत त्वन्मतेन। नाद्य इत्याह तत्पक्षेणेति। द्वितीये आह भवत्पक्षेणेति। अत इति। असदर्थजनकत्वेनाविद्यादोषः

सर्वज्ञसन्तानान्तरितधर्मदेशनासन्तानस्य अनादित्वाभ्युपगमात् । क्षणभङ्गतदभावादिकं तु वाक्यार्थयाथार्थ्यं प्रति अकिञ्चित्करमेव । नापि सप्तमः; तत्पक्षेण तदागमस्य दोषमूलत्वाभावात्; भवत्पक्षेण तु उभयोरपि दोषमूलत्वाविशेषात् । वक्तृदोषो वेदे नाभ्युपेत इति चेत्, किं दुष्टेन्द्रियादिषु सोऽभ्युपेतः; येन तदप्रमाण्यं सिद्ध्येत । अतो येनकेनापि दोषेणाप्रामाण्यं स्यादित्यनुसन्धत्स्व । अविद्याख्यदोषमूलत्वमपि वेदस्य नेष्टमिति चेत्, आगतोऽसि पन्थानम्; अत एव कल्पितत्वादेरपि प्रतिक्षेपात् । अकल्पितत्वेऽपि प्रतीतिबाधाभ्यां मिथ्यात्वमिति चेन्न; ब्रह्मणोऽप्यकल्पितस्य त्वदभिमतयुक्त्याभासैर्बाधप्रसंगात् । अर्निवचनीयकुसृतेश्च निरसिष्यमाणत्वात् ।

नाप्यष्टमः; कारणदोषाविशेषे विसंवादानुदयस्याकिञ्चित्कत्वात्; दोषज्ञानेनैव बाधसिद्धेः । तथा चाहुः, "दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे । अर्थात् तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत् ॥" (कुमारिल श्लोकवार्तिकं) इति । किञ्च बाह्यागमेषु न विसंवादस्त्वया सुवचः । अदृष्टस्यातीन्द्रियत्वेन तत्र तदयोगात्; दृष्टार्थेषु विषहरणाद्युपदेशेषु तत्राप्यविसंवाददर्शनात् । तत्त्वविषये तु प्रत्यक्षादिविसंवादस्य, तद्विरोध गमनिकाकुसृतेश्चोभयतुल्यत्वात् । वेदाधीनस्य संविन्नित्यत्वादिरूपविसंवादस्य

नत्वसदर्थविषयकज्ञानजनकत्वापादकत्वान्नेति चेन्न । एवमपि प्रमाणस्य मिथ्यात्वे तद्विषय याथात्म्येऽनाश्वासात् । न ह्यारोपित धूमेन वह्निसिद्धिरिति भावः । पंथाः -सत्यत्वमार्गः । अत एव अविद्याख्यदोषमूलत्वाभावादेवेत्यर्थः । ब्रह्मणोऽपीति । प्रकाशमानत्वाच्छून्यवादियुक्तिभिर्बाधाच्च ब्रह्मणोपि बाधो मिथ्यात्वं प्रसज्यत इत्यर्थः । प्रतीति बाधाभ्यामनिर्वाच्यत्व रूपमिथ्यात्वसिद्धिरपि नेति वक्ष्यते इत्याह । अनिर्वचनीयेति । कारणदोषादिविसंवादस्वारसिकबाधः यौक्तिकोबाधः संभवति गगनततिमप्रत्ययवदिति भावः॥

ननु दोषमूलत्वज्ञानेन कथं बाधः भिन्नविषयत्वादित्यत आह तथाचाहुरिति । विसंवादेन साक्षादर्थाभाव एव परिच्छिद्यते। कारण दोषस्तु यद्यपि न साक्षादर्थाभावात्परिच्छिनत्ति । इदं ज्ञानमप्रमाणं दुष्टकारणजन्यत्वादिति साक्षादप्रामाणस्यैव बोधनेन भिन्नविषयत्वात् । तथाप्यर्था भावाधीनतया प्रामाण्यस्य तत्परिच्छेदे अर्थाद्विषयावभास्यापि परिच्छेदाद्विसंवादेन तुल्यकार्यत्वात् अर्थाभावपरिच्छित्तौ विसंवादस्य बाधानपेक्षा भवति। यथा प्रणयनार्थतया अविहितमपि गोदोहनं प्रणयनाश्रिततत्वेन प्रणयनस्य स्वेनावश्यं कर्तव्यत्वात् अर्थाच्चमसेन तुल्यकार्यत्वात् प्रणयनं चमसं नापेक्षत इत्यर्थः । त्वयेति । प्रत्यक्षादिविसंवादोऽस्माभिस्तु सुवच इति भावः । किमदृष्टार्थेषु विसंवादो यद्वा दृष्टार्थेषु । नाद्य इत्याह अदृष्टस्येति । द्वितीय्ये आह दृष्टार्थेष्विति । ननु पृथिव्यादितत्वगोचरस्य क्षणिकत्वादुपदेशस्य स्थायित्वग्राहकप्रत्यक्षादिबाधाद्वैषम्यमित्यत्राह प्रत्यक्षादिति । त्वन्मतेपि प्रपंचमिथ्यात्वावगमस्य सत्वग्राहिप्रत्यक्षादिविसंवादात् । यदि प्रत्यक्षज्ञानं भ्रम इति न तद्विसंवाद इति तदपि समानमित्यर्थः । न च संविन्नित्यत्वप्रतिपादकवेदेन तदागमस्य बाधादप्रामाण्यमित्याशंक्य भवन्मते वेदप्रामाण्यस्यैवासिद्धेर्नतेन बाध इत्याह वेदाधीनस्येति । प्रामाण्यासिद्धावपि तस्य बाधकत्वे बौद्धागमस्य वा बाधकत्वं कुतो न स्यादित्याह अन्यथेति । एतेनेति । कारणदोषविशेषे माहाजनपरिग्रहस्या किंचित्करत्वादिति भावः ।

किं महत्वं संख्यया निपुणत्वेन वा दोषरहितत्वेन वा नाद्य इत्याह । बहुजनेति । द्वितीये आह निपुणेति । वेदतदर्थयागस्वर्गसाध्यसाधनभावादिज्ञानास्य त्वया भ्रमत्वस्याभ्युपगमादिति भावः । तृतीयं

वेदप्रामाण्यसिद्धिसमनन्तराभिधेयत्वात्। अन्यथा विपरिवर्तप्रसङ्गात्।

एतेन नवमोऽपि दत्तोतरः; बहुजनविवक्षायां समानत्वात्। निपुणजनविवक्षायां सर्वेषामप्यज्ञानभ्रमादिकलुषितत्वाभ्युपगमेन त्वत्पक्षे तदसिद्धेः। हेतुदर्शनरहितपुरुषपरिग्रहविवक्षायामपि परमार्थतः कारणदोषे निर्णीते दोषानभिज्ञैः भ्रान्तैरेव परिग्रह इत्यायातम्; ततश्च न विशेषः। नापि दशमः; संज्ञावैषम्यमात्रस्याकिञ्चित्करत्वात्; तद्व्यवहारभेदरूपस्य किञ्चित्कारस्य प्रस्तुतानुपयोगात्। नाप्येकादशः; तथाविधाभिमानस्य पुरुषभेदेनोभयत्रापि सुलभत्वात्। न तत्र वयं प्रामाण्यमभिमन्यमाह इति चेत्, ते वा किं वेदे? अतो यस्यकस्यचिदभिमानसिद्धं प्रामाण्यमिति त्वयैव स्थापनीये त्वमेव कथं तत्प्रामाण्यं नाभिमन्यसे?

द्वादशस्तु परिशिष्यते, तत्र स्वात्मशब्देन किं सर्वेषां प्रमातॄणां स्वात्मा विवक्षितः, उत भवदन्तरात्मा। नाद्यः; इक्षुक्षीरादिरसभेदवत्, ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' (आप.श्रौत ५-६) ''चैत्यं वन्देत स्वर्गकामः'' इत्यनयोः प्रामाण्याप्रामाण्यलक्षणभेदस्यान्यैरनुपलम्भात्। नेतरः; भवत्स्वात्मानमपि हि वयमितरात्मसमानतयैवोन्नयामः। रत्नतत्त्वपरीक्षकवदहमतिशयितप्रज्ञ इति चेत्,

---

दर्शयति हेतुदर्शनेति। हेतोरर्थादिप्रयोजनस्य दर्शनं ज्ञानमपेक्षेति यावत्। दृढि हेतुदर्शनवस्तु तज्जनितेति तताभिमानवत् बुद्धागमः। द्भिः परिगृहीतो बौद्धागमः। वेदस्तु तद्रहितैः परिगृहीत इति वैषम्यमयुक्तमित्यर्थः। तत्र हेतुः परमार्थत इति । दोषमूलस्य परिग्रहे दृष्टलो भाद्वा दोषमूलत्वेन प्रामाण्य भ्रमाद्वा। तत्र प्रथमस्यभावाच्चरमः परिशिष्यते। ततश्च हेतुदर्शनवत्पुरूष संग्रहादविशेष इत्यर्थः। संज्ञेति अन्यथा विपरिवर्तप्रसंगादिति भावः।

ननु वेदशब्दव्यवहारप्रयोजकत्वान्नाकिंचित्करत्वमित्यत्राह तत्तद्व्यवहारेति। एतादृश व्यवहारभेदस्यापि प्रामाण्याप्रामाण्यप्रयोजकत्वाभावादिति भावः। पुरुषभेदेनेति। अविद्याविशेषकनीतो वेदो भवति। बुौद्धागमस्तु तज्जनितेति तवाभिमानवत् बुद्धागमः नैतादृशाविद्या जनितो वेद एव तज्जनित ... न कस्यचिदभिमानसंभवादित्यर्थः। नन्वस्मदभिमानो विवक्षितः नच बुद्धागमं तथाभिमन्यामह इति शंकते। तत्र वयमि[ति] यस्य कस्यचिदभिमानसिद्धं प्रामाण्यमिति । यस्य कस्यचिदविद्याविशेष दोषाजन्यत्वाभिमानरूपवैशम्यात्प्रामाण्यं संभवतीत्यर्थः।

प्रामाण्याप्रामाण्य लक्षणभेदस्येति। प्रामाण्याप्रामाण्ययोर्लक्षणभेदस्य ज्ञापनवैषम्यस्येत्यर्थः। भवदिति। इतरापेक्षया भवतो विशेषाभावादिति भावः। नन्वितरानुपलब्धमपि रत्नतत्वं कस्यचिदुपलभते। नहीतरानुपलंभमात्रेण कस्याप्यनुपलम्भ इत्याशंकते। रत्नतत्वेति। प्रामाण्यप्रयोजको विशेषो बौद्धागम एवोपलभ्यते। वेदे तदभाव इत्युक्तौ उत्तरं न स्यादित्याह नापीति। वादिप्रतिवादिनोः तदुपलंभो न प्रयोजकः किंतु तदन्यस्येति शंकते मध्यस्थेति। अनिर्वचनीयवादित्वादस्माकं प्रामाण्यस्य मिथ्यात्वमिष्टमिति शंकते अस्त्विति। अभिमान इत्यत्र चिद इति लिंगपरिणामेनान्वयः। सरणेत्यनंतरं भंगइत्यनुषंगः। एवं चेति। उक्तरीत्या वेदवत्सुगतामस्यापि प्रामाण्याभ्युपगमभीत्या वेदप्रामाण्यपरित्यागात् चार्वाकमतानुप्रवेश इत्यर्थः। यद्यपि वह्न्याद्यनुमान लौकिकशब्दादेः प्रामाण्यांगीकारात् ततो भेदः।

सौगतेनाप्येवमुक्ते किमुत्तरम्। मध्यस्थदृष्टिरिति चेन्न; तदसिद्धेः। अस्तु वेदप्रामाण्यमप्य विचारितरमणीयम्; किंनश्छिन्नमिति चेत्, प्रथमं तावत् वैषम्योपपादनाभिमानः। ततो वैदिकत्वविडम्बनम्। पश्चात् तत्त्वानुष्ठानव्यवस्थाभङ्गः। ततश्च स्वर्गापवर्गगमनसरणेः। एवंच सौगतसौहार्दभयपलायितेन द्वैवर्गिकमतमहादुर्गमेवानुप्रविष्टमिति। अत्र च प्रामाण्यादेरप्रयोजका एव केचित् कल्पा मन्दमतिसम्मोहशमनायोपन्यस्य निरस्ताः। एतदभिप्रायेण यादवप्रकाशैरुक्तम्,

''वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम्।
बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समान संविदः।।''इति

किंच प्रत्यक्षतोऽनुमानतश्च भवद्भिर्निर्विशेषं प्रसाध्यते। ततश्च प्राप्तार्थतयाऽपि शास्त्राप्रामाण्यम्, द्वित्रावयवानुमानवाक्यपाठमात्रेण ब्रह्मविद्यानिष्पत्तौ क खलु जडः श्रुतिनिकरशिखर परिशीलनप्रयासादिकमारभेत। न ब्रूमस्तर्ह्यनुमानादिकमस्मत्सिद्धान्तसाधनतयेति चेत्, किमिदं श्रुति प्रामाण्यभङ्गभीरुतया, उत अनुमानादेस्तत्र प्रामाण्ययोगात्? नाद्यः; भवद्भिरनुक्तेऽपि तत्सद्भावमात्रेण श्रुतिप्रामाण्यभङ्गस्य दुर्वारत्वात्। संप्लवोदयस्य च शास्त्रयोन्यधिकरणनिरस्तत्वात्। न द्वितीयः; ज्ञानोदयादेवानुत्पत्तिलक्षणस्याप्रामाण्यस्यासिद्धेः; एककोटिनियततया च संशयरूपत्वस्याप्यभावात्। निपुणतरप्रयोगे च प्रयोगदोषाणामभावात्। विपर्यसलक्षणं तु विषयापहारमन्तरेण न सिद्ध्यतीति। तथा

तथापि पारलौकिकार्थांगीकारात्। साम्यमिति भावः। ननु अविसंवादादिप्रामाण्यादिप्रयोजकत्वात् शंकितं योग्यत्वेपि स्वरूपसत्यत्वादिकल्पाः तदप्रयोजकाः कथं शंता इत्यत्राह। अत्र चेति। उक्तार्थंयादवप्रकाशोक्त्या संवादयति एतदभिप्रायेणेति बुद्धिःशास्त्रजन्यज्ञानं। अनुवादकतयापि प्रामाण्यं न स्यादित्याह ज्ञानजनकत्वाभावादप्रामाण्यमित्याह।

नन्वध्ययन विधिबलात्तदर्थ विचारसंभवेन ज्ञानजनकत्वं स्यादित्यत्राह कःखल्विति। अन्यतस्सिद्धौ तदर्थं विधेः विशिष्टप्रवर्तकत्वायोगात्। न च नियमार्थाविधिः अविद्यानिवृत्तेः ज्ञानमात्रसाध्यतया नियमेन प्रयोजनाभावादिति भावः। नन्वनुमानादिकं निर्विशेषसन्मात्र साधकतयाभ्युगम्यते तेन नाधिगतार्थत्वं नवा ज्ञानाजनकत्वंमिति शंकते न ब्रूम इति। भवद्भिरिति। स्वार्थानुमानस्य दुर्निवारत्वात्। न हि प्रमाणं प्रतिज्ञापरतन्त्रं। तथा सति बाधितत्वादि हेतोः को भेद: नन्वस्तु अनुमानादिकमपि संवादार्थतया दोषाभावादित्यत्राह संप्लवेति। संप्लवः- संवादः। शास्त्रैकप्रमाणकत्वकथनं विरोध भावः। द्वितीय्येपि किं ज्ञानजनकतया उत ज्ञानजनकत्वेपि संशयरूपतया यद्वा निर्णयजनकत्वेपि विपर्ययततयेति विकल्पमभिप्रेत्याद्यंदूषयति ज्ञानोदयादेवेति। द्वितीय्ये आह एक कोटीति। तृतीयोपि किं दुष्ट प्रयोगात् उत विषयापहारेण नाद्य इत्याह निपुणेति। सन्निर्विशेषं सत्वाद्यतिरेकेण धटवदिति निर्दुष्टप्रयोगस्य संभवात्। नचाप्रयोजकत्वं श्रुत्यनुग्राहकतर्काणामेव अनुमानग्राहकत्वसंभवात्। अन्यथा भेदश्रुत्यादिषु विरोधश्रुत्यापि तत्सिद्धिर्नस्यादिति भावः। द्वितीय्ये आह विपर्ययलक्षणत्विति। अस्तु विषयापहार इत्यत आह तथा चेति। अनुमान प्रामाण्यसमर्थन धट्टकुट्टि प्रभाततुल्यतामुपपादयति एवमिति। अभिमतविपर्यासो नास्तीति शंकते अन्तत इति। अस्तु वेदाअप्रामाण्यमपि अविचारितरमणीयमित्यनेन पौनरुक्त्यं शंक्यं। असंदिग्धाविपर्ययः। तद्बोधादस्य दुरपह्नवत्वादिति परिहारान्तरकथनार्थतया दोषाभावादविपर्यस्तत्वं बोधस्यासिद्धमित्यत्राह बोधेति। बोधस्य मिथ्यात्वं

च सति तुल्यविषयतया तत एव शास्त्रमप्यप्रमाणमिति घट्टकुट्यां प्रभातम्। एवं च सति अद्वैतवाक्यानां न तत्त्वावेदकत्वं द्वैतवाक्यानामेव तत्त्वावेदकत्वमित्यभिमतविपर्यासश्च। अन्ततः शास्त्राप्रामाण्य मप्यस्माकमिष्टमेवेति चेन्न; पूर्वन्यायेन दत्तोत्तरत्वात्। असन्दिग्धाविपर्यस्तबोधोदयस्य दुरपह्नवत्वात्। बोध्यमिथ्यात्वे च वैदिकव्यपदेशकञ्चुकं मुञ्चतस्ते बाह्यसमयसुरङ्गाप्रवेशमन्तरेण कथासमरसीम्नि संशयापत्तेः। तदेतदखिलमभिसन्धाय भाष्ये सन्मात्रग्राहिप्रत्यक्षप्रतिक्षेपाय, गृहीतमात्रग्राहित्वेन सन्मात्राभिमतब्रह्मस्वरूपपरवेदान्तवाक्यानामप्रामाण्यप्रसङ्ग उदाहृतः। स्थलान्तरेषु विप्रकीर्णं शेषमवघातव्यमिति।

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां वेदप्रामाण्यपरिग्रहानुपपत्तिवादः चतुर्दशः॥१४॥

————

॥अथ दृश्यत्वानुमाननिरासवादः पञ्चदशः॥ १५॥

अबाधादध्यक्षप्रभृतिमितिवर्गेष्ववधृतं शरीरं यस्येदं जगदखिलमन्तर्यमयितुः।
स मे तर्कैरतैर्निजविभवलुण्टाकमथनैः प्रसीदत्वासीदन्निगमशतसीमा हयमुखः॥

बाधितविषयत्वमित्यर्थः। सुरंगा-कृत्रिमबिलविशेषः। संशयापत्तिपराजयरूप मरणापत्तिः। स्थलान्तरेष्विति। शास्त्रप्रबल्यादनिरूपणस्थले दोषमूलस्य अबाधितस्य पारमार्थ्यं नियमादित्याद्यवधारितवशमित्यर्थः। ननु तत्वावेदकत्वमेव प्रामाण्यं। तत्वं च यं यादृशं रूपं तदावेदकत्वं। विशेषाधृत्याप्रकारकत्वं वा तद्वृत्ति तत्प्रकारकत्वं वा एतच्च वेदे संभवति। स्वगदिस्साधनत्वरूपं ब्रह्मणश्च अबाधिततत्वं तद्बोधकत्वं। बौद्धागमे तु न तदस्ति ज्ञानानंदात्मलक्षणजीवस्य पृथिव्यादेःक्षणिकत्वाभावेन तदावेदकस्य तत्वावेदकत्वाभावादिति शंका इति पदनिवृत्त्या-तत्प्रकारस्तु शुक्तिरजतवाक्य वैलक्षण्यं वेदवचसां न स्यात्। यदि शुक्तिरजतं न रूपमिति तदा "यस्सर्वज्ञ" (मुंड-१-१-९) इत्यादि वाक्यानामपि प्रामाण्यं न स्यात्। न हि जगत्कारणत्वं वा सार्वज्ञादिकं वा ब्रह्मणो रूपं। किं च यस्य यद्रूपं तद्बाधकत्वं "चैत्यं वंदेत स्वर्गकाम" इत्यादि वाक्यसाधारणं। यागादिरूपस्वर्गसाधनत्वबोधकत्वात् तद्गततया (तत् बोधकत्वं) च ब्रह्मबोधक विशेषवाक्यव्यावृत्तं। अत एव विशेषावृत्त्या प्रकारत्वं। तद्वति तत्प्रकारकत्वमित्याद्यपि निरस्तं। शुक्तिरजत वाक्य साधारण्यादिति॥

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां चतुर्दशो वादस्समाप्तः॥

निर्विशेषस्य शास्त्रवेद्यत्वे शास्त्रस्याप्रामाण्यमुक्तं। किं च ब्रह्मणो मिथ्यात्वमपि स्यादित्युत्थानात्संगतिरित्यभिप्रेत्य वादार्थं संगृह्णाति अबाधाध्यक्षेति। प्रत्यक्षादिमिति वर्गेषु मध्ये कयापि मिथ्याबोधाभावात् जगदखिलं यस्य शरीरमवगतमित्यर्थः। अनेन वादार्थः सूचितः। जगतो बाधितत्व हिं मिथ्यात्वं। तदभावोक्तेः। शरीरत्वोक्तौ "सर्वं खल्विदं ब्रह्मे (छां.३-१४-१) त्यादेक निर्देशस्य

यदेतत् सन्मात्रग्राहिप्रत्यक्षदूषणान्ते भाष्यम्-''सन्मात्रब्रह्मणः प्रमेयभावश्च । ततो जडत्व नाशित्वादयस्त्वथैवोक्ताः'' इति । अनेन पश्यतोहराणां दृश्यत्वानुमानस्यानैकान्तिकत्वमपि सूचितम् । उत्तरत्रापि कचित् परमतव्याप्त्या प्रसङ्गं प्रायुङ्क्तः ''ब्रह्म मिथ्या ज्ञानविषयत्वात्'' इति । सांख्याधि करणे च व्याघातमसूचयत्-''दृश्यत्वबाध्यत्वाभ्युपगमात् सुतरामसङ्गतम्'' इति । योगाचारोक्त संवेदनहेतुनिरासेन च इदमपि निरस्तं भविष्यतीत्यमंस्त । तदिह वयं विस्तृणीमहे विगीतं मिथ्या दृश्यत्वात्, यद्यपि इत्थं तथा, यथा शुक्तिरजतमित्यादि । तत्र किमिदं मिथ्यात्वमभिप्रेतम्? किं तुच्छत्वम्, उत अन्यथाख्यातिविषयत्वम्, उत सदसद्विलक्षणत्वम्, अत प्रतिपन्नोपाधौ निषेधप्रतियोगित्वरूपं बाध्यत्वम्, अथवा स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वम्, यद्वा सत्यब्रह्मविलक्षणत्वम्, यद्वा अन्यदेव किंचिदिति ।

नाऽऽद्यः; प्रतीतिविरोधात् अपसिद्धान्ताच्च । अत एव न द्वितीयः मिथ्यात्वाध्यासादिविषयतया सिद्धसावधनत्वाच्च । शुक्त्यादिरेव हि रजताद्यात्मनाऽन्यथाख्यातेर्विषय इत्यभ्युपगम्यते । अथाऽऽरोपितत्वेन विषयत्वमिष्येत, तथाऽपि सिद्धसाधनता; सर्वस्यापि वस्तुनो यत्र कचित् येन केनचिदारोप्यमाणत्वात् । न तृतीयः; परं प्रति अप्रसिद्धविशेषणत्वात् । अर्थापत्तिप्रसिद्धं तदिति चेन्न; तस्याः स्वावसरे

शरीरिशररभावनिबंधनत्वसूचनान्न बाधार्थसामानाधिकरण्येन मिथ्यात्वमिति सूच्यते । एतैर्वक्ष्यमाणलक्षणैः निजविभवस्यैश्वर्यस्य लुंटाकास्तस्कराः मिथ्यात्ववादिनः तेषां मथनैः । एतेन परपक्षस्य प्रतिकूलतर्कपराहतिरुक्ता । एतादृश तर्कैः सहासीदन् सन्निधानः निगमशतसीमा-समस्त-श्रुतिप्रतिपाद्यः प्रसीदत्विति प्रार्थना ।

सन्मात्रग्राहिप्रत्यक्षपक्षे प्रतिकूलतर्कप्रदर्शनपरतया अस्य वादस्य तच्छेषत्वमिति सूचयति यदेतदिति । केचित्तु स्वेन वक्ष्यमाणदूषणस्य संप्रदायसिद्धत्वमाह यदेतदित्यादिना इत्याहुः ॥ नाशित्वादयइत्यादिशब्देनमिथ्यात्वं गृह्यते । अनेकान्तत्वं सूचितमिति । दृश्यत्वेपि मिथ्यात्वभाव संप्रतिपत्तेःरिति भावः । उत्तरत्रेति । तेनाप्यनैकान्त्यं सूचितं । प्रसंगाभिप्रायत्वात् । प्रयोगस्येति । सांख्ये दृश्यत्वं बाध्यत्वाभ्युपगमात्सुतरामसंगतमिति भाष्यमित्यर्थः । दृगधीनसिद्धत्वं दृश्यत्वं । दृगधीन बाध्यत्वं मिथ्यात्वं । तथा चास्तीति ज्ञानविषयत्वान्नास्तीति ज्ञानं विषय इति पर्यवसानात् व्याधात् इत्यर्थः । योगाचारेति । ''जागरितप्रत्ययो निरालंबनः संवेदनत्वात् स्वाप्नप्रत्यय''वदिति बौद्धानुमानं ''वैधर्म्याच्च न स्वप्नादिवदि'' (ब्र.सू.२-२-२८) ति सूत्रभाष्ये दूषितं । मायिना ''प्रंपचो मिथ्या दृश्यत्वात् शुक्तिरजतस्वाप्नाद्यर्थवदि''त्युक्तं । एवं च ज्ञातत्वेन मिथ्यात्वविषयत्वसाधनस्य ज्ञानविषयत्वेन मिथ्यात्वसाधनस्य चाविशेषात् ज्ञानत्वदूषणान्येव तद्विषयत्वहेतोरपि भवन्तीत्यर्थः । यद्वेति ब्रह्मविलक्षणत्वमित्यर्थः । वस्तुतो ब्रह्मणस्सत्यत्वात्तद्वैलक्षण्यासिद्धया मिथ्यात्वसिद्धिरिति भावः ।

प्रतीतिविरोधादिति असच्चेन्न प्रतीयेतेति भवद्भिरेवाभिधानादिति भावः । अत एव अपसिद्धान्त इति ध्येयं । मिथ्यात्वेति । सत्यभूतस्य प्रपंचस्य रजतत्वाध्यासविषयस्य शुक्तेरिव मिथ्यात्वप्रकारकज्ञानविषयत्वात् सिद्धसाधनमित्यर्थः । आदिशब्देन क्षणिकत्वादिविवक्षितं । अध्यासादित्यादिशब्देन रजतत्वाध्यासविवक्षा । ननु मिथ्यात्वाध्यास्य मिथ्यात्वाद्येव विषयः न प्रपंचः इति न सिद्धसाधनमित्यत्राह । शुक्त्यादिरिति । अध्यासस्याधिष्ठानविषयत्वनियमात् अन्यथा बाधायोगेन

दूषयिष्यमाणत्वात्।

न चतुर्थः; तद्धि बाध्यत्वम्, बाध्यमबाध्यं वा? पूर्वत्र, सिद्धसाधनत्वम्, तस्य प्रपञ्चसत्यत्वाविरोधित्वात्। उत्तरत्र किं ब्रह्मस्वरूपम्, उत ततो भिन्नम् आद्ये सिद्धसाधनत्वम्, ब्रह्मसम्बन्धस्यास्माभिरिष्यमाणत्वात्। बाध्यत्वधर्मयोगो हि प्रपञ्चस्य साध्यते; बाध्यत्वं च ब्रह्मस्वरूपमित्यभिधत्से। द्वितीये तेनैव दृश्यत्वहेतोरनैकान्त्यम्। तेनैव हेतुना तत्सिद्ध्यसिद्ध्योर्नानैकान्त्यमिति चेन्न; तेनैव तत्सिद्धावनैकान्त्य प्रसङ्गः, तदसिद्धौ हेतोरसाधकत्वमिति प्रसङ्गपर्यवसितत्वात्। तेनैव तत्सिद्धौ तत्साधनस्य सतः कथमनैकान्त्यम्। न हि तत्साधकत्वे तदसाधकत्वप्रसङ्ग इत्युन्मत्तोऽपि ब्रूयादिति चेन्न, अभिप्रायानभिज्ञानात्; न हि तत एव तत्सिद्धिमभ्युपगम्यानैकान्त्यं ब्रूमः, अपितु, अबाधिते बाध्यत्वे दृश्यत्वहेतुर्वर्तत इति भवताऽभ्युपगतत्वेन तथाऽभ्युपगमे अन्यतरानैकान्त्यप्रसङ्ग इति। तर्हि तत्र दृश्यत्वहेतुर्न वर्तत इत्यभ्युपगम्यानैकान्त्यं परिहरिष्याम इति चेत्-तदा दृश्यत्वानुमानेन तत्साधनं न शक्यते; तज्जनितज्ञानविषयत्वे तस्य दृश्यत्वावश्यम्भावात्। अतोऽनुमानमेव परित्यज्यानैकान्त्यं परिहर्तुमर्हसि। ननु बाधितस्याबाधितस्य च

भ्रमत्वायोगादिति भावः। ननु स्वात्यंताभावाधिकरणेऽन्यथाख्याति विषयत्वं विवक्षितं पूर्वोक्तं तु तत्तेथेति न सिद्धसाधनमिति शंकते अथेति। सर्वस्येति इदं रजतमिति शुक्तौ रजतत्वारोपवत् इदं भूतलं रजतवदित्यादि रूपेण धर्मिण एवारोपसंभवादिति भावः। अप्रसिद्धविशेपणत्वमिति। सर्वस्य विशेषणीभूतसाध्यं प्रसिद्धमित्यर्थः। ननु ख्यातिबाधान्यथानुपपत्त्या शुक्तिरजते प्रसिद्धमिति शंकते अर्थापत्तीति।

पूर्वत्रेति मिथ्यात्वस्य च मिथ्यात्वे मिथ्याभूतस्य शंखारोपितपीतिम्नः श्वैत्येनेव पारमार्थिक सत्यत्वे न अविरोधात् अर्थांतरमित्यर्थः। अर्थांतरमोपपादयति तस्येति। बाध्यत्वस्येस्यर्थः। आद्येऽपि किं बाध्यत्वं संबंधस्साध्यते बाध्यत्वं वा। आद्ये दोषमाह अन्ये इति। द्वितीय्ये आह बोध्यत्व इति। बाध्यत्व धर्मयोग इति। साध्यस्य पक्षधर्मताभिहिता न तु योगस्य साध्यत्वं ततश्च स्वमहिम्नि प्रतिष्ठितस्य अनन्याधारत्वात् व्याहतिरित्यर्थः। अत एव सर्वार्थसिद्धौ "सत्यमिथ्यात्वब्रह्मत्वमिति कोटिनिराकरणे ब्रह्मस्वरूपस्य सत्यस्य असत्यवृत्तित्वव्याधाताभिधान मनैकान्त्यमिति" मिथ्यात्वरूपसाध्यस्या बाध्यत्वात्तत्रा हेतोर्वृत्तेरिति भावः। तेनैव हेतु नेति। तेनैव हेतुना मिथ्यात्वसिध्यनन्तर ज्ञातं अनैकान्त्यं मिथ्यात्वसिद्धावप्रतिबन्धकत्वात् न दोषः। असिद्धिदशायान्तु अनुपस्थित्वादेव अदोष इत्यर्थः। अयं चानिष्टप्रसंगः। सिद्धेः प्रागस्तीति सिद्धि प्रतिबन्धक एवेति भावः। शंकते तेनैव तदिति। असाधकत्वमनैकान्त्यं तत्सिद्धावनैकान्त्यमित्यस्या साधकत्वमिति पर्यवसितत्वात्। आपाद्यापादकव्याधातेन प्रसंगानुपपत्तेर्न प्रतिबन्धक इत्याशयः। नहि। तत एवेति। यद्यनेन साध्यं सिध्येत् तदा अनैकान्तिकत्वमिति नापादयामः येन व्याधातस्यात्। हेतुना व्याप्तिग्रहणदशायां उपस्थितसाध्येऽपि हेतुग्रहात् तव तत्र अनैकान्यज्ञानसत्वात् कथं व्याप्तिग्रहमूलकानुमान प्रयोगइत्यर्थः। तदेति। यद्यपि यदि दृश्यत्वाभाव निश्चये सति तस्य तज्जनितानुमितिविषयत्वं न संभवति। नचात्र तदभाव निश्चयः। किन्तु दृश्यत्वाभाव निश्चयएवेति। अस्तु वा दृश्यत्वाभावनिश्चयः। तथापि भिन्न विषयत्वात् व प्रतिबन्धसम्भवः तथापि तत्र हेतुव्यतिरेकग्रहाभावे तन्निश्चयस्यादेव। तन्निश्चये च सति स्वप्रकाशतया तदज्ञानविषयस्यापि भानसंभवेन समानविषयत्वादिति भावः। नन्विति। बाधितार्थस्या बाधितार्थस्य च

साधारणं बाध्यत्वमात्रं साध्यत इति चेन्न; तथाऽपि सिद्धसाधनत्वस्य दुष्परिहरत्वात्; बाधितबाध्यत्वमभ्युपगच्छता साधारणाकारस्याभ्युपगमात्। पक्षधर्मताबलादस्मदभिमतविशेषलाभ इति चेन्न; तस्याः तद्विरुद्धत्वात्। अविरोधेऽपि पूर्वोक्तानैकान्त्यस्य स्थितत्वात्।

न पञ्चमः; प्रत्यक्षाद्यैस्तद्विधायकैस्तदभावग्रहासंभवात्। श्रुतीनामपि निषेधिकानामन्यत्र व्यवस्थापनात्। अत एव योग्यानुपलम्भनिराकृतसद्भावस्य तदभावस्यानुमानेन साधयितुमशक्यत्वात्। कृत्स्नप्रत्यक्षोपरोधे च निर्मूलतयाऽनुमानप्रामाण्यस्यैवासंभवात्। तदभ्युपगमे च स्वोक्तिविरोधात्।

साधारणबाध्यत्वमात्रं साध्यं नत्वबाधित साध्यत्वं। एवं च प्रपंचे सामान्येन रूपेण सिसाधयिषितस्य अबाध्यबाध्यत्वस्य प्रागसिद्धेर्न सिद्धसाधनं। साध्ये च बाधितबाध्यत्वमादाय बाध्यत्वसामान्यस्य सत्वात् नानैकान्त्यमित्यर्थः तथापीति। साध्यतावच्छेदकावच्छिन्नस्य पक्षेसिद्धिः न तु तद्विशेषावच्छिन्नस्य। तथा च तादृशस्य बाधितबाध्यत्वस्य पक्षे सत्वात्सिद्धसाधनमिति भावः। पक्षधर्मताबलादिति पक्षधर्मताबलात् अबाधितबाध्यत्वरूपविशेष एव प्रंपचे सिध्यति। अन्यथा दृशि जडस्याबाधित कल्पितत्वमन्तरेण अपरोक्षत्वानुपपत्तेः। न बाधो विशेषः। साध्यतावच्छेदकवच्छिन्न रूपेण सिध्यतीति भिन्नविषयापि तत्समानाकारसिद्धिः प्रागेवास्तीति सिद्धसाधनमिति वाच्यं। पक्षधर्मताबलादेव अबाधितबाध्यत्वेनैव सिद्धेः। अनुमितिसमानाकारसिद्धेश्च पूर्वमभावान्न सिद्धसाधन मित्यर्थः। तस्या इति। दृगधीनसिद्धिकत्वं दृश्यत्वं। तत्पक्षधर्मतायाः दृगयास्साध्यत्वेन विरुद्धत्वादित्यर्थः। अविरोधेपीति पक्षधर्मताबलात् प्रपञ्चे बाधितत्वं अबाधितत्वरूपेण सिद्ध्यति तत्साध्यत्वे च तादृशबाध्यत्वाभावसंप्रतिपत्तेः। दृश्यत्वास्यापि सत्वादनैकान्त्यमित्यर्थः। ननु बाध्यत्वामात्रं साध्यमित्युक्तं। तच्च पक्षधर्मताबललभ्याबाधित बाध्यत्वेप्यऽस्ति। बाधितबाध्यत्वस्य तत्र संभवात्। तथा च कथमनैकात्यमिति चेत् उच्यते साध्यगतसाध्यत्वं यदि बाध्यं तर्हि प्रंपचासत्यत्वं स्यात्। तत्र व्यभिचारश्च यदि चतुर्थमादाय परिहारः तथा प्रपंचस्य सत्यत्वं स्यात्। एवं च साध्यत्व परंपरायां यद्युयुग्मबाध्यत्वमादाय प्रथमबाध्यत्वस्य अबाध्यत्वेन न सिद्धसाधन परिहारः। तथाहि युग्मबाध्यत्वमादाय प्रपंच सत्यत्वमेव स्यादिति न विवक्षितसाध्यसिद्धिरिति भावः।

प्रत्यक्षाद्यैरिति। स्वात्यन्ताभावसमानाधिकरणतया प्रतीयमानत्वं स्वात्यन्ताभाव समानाधिकरणप्रतीतिविषयत्वं। सा च प्रतीतिर्नसंभवति प्रतियोगिग्राहिकया प्रतीत्या तत्रैव तदभावग्रहसंभवादित्यर्थः। ननु प्रपंचविधायक निषेधश्रुत्या तादृशप्रतीतिस्संभवतीत्यत्राह श्रुतीनामपीति। विहितव्यतिरिक्तविषयत्वेन व्यवस्थापनात न भावाभावसामानाधिकरण्यर्धीरिति भावः। ननु स्वात्यन्ताभावसमानाधिकरणत्वप्रकारक प्रतीतिविपयत्वं साध्यं। तच्च स्वात्यन्ताभाव समानाधिकरण विशेष्यक स्वात्यंताभाव समानाधि करणप्रकारक प्रतीतिविषयत्वं। सा च प्रतीतिः एतदनुमानजन्यानुमितिरेव स्वात्यन्ताभावसमानाधि करणविशेष्यके त्यंशे स्वात्यन्ताभाव समानाधिकरणत्वस्य प्रकारतयावगाहनादित्यत्राह अत एवेति। प्रतियोगि समानाधिकरणतया अभावप्रत्यक्षस्य असंभवनिरस्ततया प्रतियोगिसामानाधिकरण्यावच्छिन्ना भावानुपलंभेन तादृशाभावस्य निरस्ततया तत्साधनस्य अनेन माननासंभवादित्यर्थः। कृत्स्नेति अनेनानुमानेन सर्वस्याप्यभावसाधने कृत्स्नप्रत्यक्षस्यापि अप्रामाण्यात पक्षहेतुव्याप्त्यादीनां असिद्धया अनुमान प्रामाण्यमेव न स्यादित्यर्थः। अनुमानाप्रामाण्य प्रसंग इष्ट एवेत्यत्राह तदभ्युपगम इति। स्वोक्तिः। साध्यसिध्यर्थमनुमानप्रयोगः स न

परसिद्धान्तस्थिरीकरणाच्च। अप्रमाणेन साधितस्यापि सत्यत्वे अस्मदुक्तिमात्रेणापि तद्दूषणस्य दुर्वारत्वात्।

नापि षष्ठः; सिद्धसाधनादेव। सर्वं ब्रह्मात्मकमिति भास्करादिभिरिव त्वयाऽपीष्यत इति चेन्न; तदपृथक्सिद्धिमात्रेणास्माभिस्तदुक्तेः। तथाऽपि सत्यभूतब्रह्मव्यतिरेकसाधनादसत्यत्वं फलतीति चेन्न; स्वयमपि सत्यस्य सत्यान्तरव्यतिरेकमात्रेणासत्यत्वप्रसङ्गाभावात्।स्वयं घटस्य घटान्तरव्यतिरेकेऽपि न ह्यघटत्वम्। ब्रह्मैकमेव सत्यमिति सिद्धे तद्व्यतिरेकसाधनेनैवासत्यत्वं सिद्ध्यतीति चेन्न; आत्माश्रयप्रसङ्गात्। अवधारणेन हि प्रपञ्चासत्यत्वं विवक्षितम्, तत एव च तत्सिद्धिरिति। श्रुतिसिद्धब्रह्ममात्रसत्यत्वोपजीवने अनुमाननैरर्थक्यप्रसङ्गः; अन्ततः श्रुतेरेव पुरस्करणीयत्वात्, तस्याश्च निरपेक्षत्वात्। विप्रतिपन्नं प्रति अनुमानं सप्रयोजनमिति चेन्न; श्रुतिप्रामाण्यमनिच्छतः तदुपजीवनासंभवात्, इच्छतस्तयैव तत्सिद्धेः। श्रुतेश्च प्रत्यक्षाद्यविरोधिविषयत्वे सिद्धे, सा कथं प्रत्यक्षादिबाधकानुमानस्योपजीव्या? ननु सत्यमिति केनचित् सामान्यतो निश्चित्य तद्व्यतिरेकः साध्यत इति चेन्न; प्रत्यक्षादिभिस्तन्निश्चये प्रपञ्चस्यैव सत्यतया तस्य तद्व्यतिरेकसाधनायोगात्। ततश्च शास्त्रनिश्चितसत्यव्यतिरेकसाधनेऽपि तस्य सत्यान्तरत्वमात्रं सिध्येत्। सत्यत्वात्यन्ताभावःसाध्य इति पक्षेऽप्येवमेव दोषो ग्राह्यः।

नापि सप्तमः; तत् किं लोकतः शुक्तिरजतादिषु विधातुम्, आपणिकरजतादिषु निषेद्धुं च शक्यं किंचित्, अथाशक्यमितिं; न प्रथमः, प्रत्यक्षादिभिर्बाधस्य दुर्निवारत्वात्। न द्वितीयः, तस्याप्रसिद्धत्वात्। तथाविधस्य कस्यचिदन्यस्य साधने तेनाप्युपहितस्य प्रपञ्चस्याक्षतत्वेनानिष्टाभावात्। एवं प्रत्यक्षबाधे

स्यादित्यर्थः ।परेति। बाधकाभावात् सत्यत्वस्यैव सिद्धिप्रसंगादित्यर्थः। ननु प्रामाण्य प्रयोजक व्याप्त्याद्याकार हीनापि लिंगेन साधितस्य सत्यतया यादृच्छिकसंवादस्थले दृष्टा तद्वदिहापि स्यादित्याशंक्य तथा सत्यस्मदुक्तिमात्रेण तदभावेऽपि सत्यस्यादिति परिहरति अप्रमाणेनेति।

ननु सिद्धसाधनं। ब्रह्मात्मकत्वपक्षे तदवच्छिन्नस्य प्रपंचस्य तद्भेदासिद्धिरिति शंकते सर्वं ब्रह्मात्मकमिति। ब्रह्मैव स्वाभिन्न सत्योपाधिवशात् चिदचिदीश्वरविभागं भजते। वस्तुतस्सर्वं ब्रह्मात्मकमेवेति भास्करमतमिति भावः। सिद्धान्तस्य भास्करमाताद्वैलक्षण्यमाह तदपृथगिति। शरीरशरीरिभाव निबन्धनत्वात् तदभेदव्यपदेशस्य न शुद्धाभेद इत्यर्थः। ननु ब्रह्मण एव सत्यत्वात् तद्व्यतिरेक सत्वावच्छिन्नव्यातिरेकस्यादिति शंकते तथापीति। ब्रह्मैकमेव सत्यमित्यसिद्धं। अन्यस्यापि सत्वेन प्रतीतेः। तथा च ब्रह्मव्यतिरेकसाधनेपि सत्वावच्छिन्नव्यतिरेको न सिध्यतीति परिहरति स्वयमपीति। ब्रह्मैकमेव सत्यमिति सिद्धं तथा च तद्व्यतिरेकसत्वावच्छिन्नः सिध्यतीति शंकते ब्रह्मैकमिति। अवधारणेनहीति। ब्रह्मैव सत्यमित्यवधारणस्य ब्रह्मसत्यत्वे सति इतरासत्यत्वमर्थः इत्यात्माश्रय इत्यर्थः। अत एवेति। अनेनानुमानेन ब्रह्मेतरासत्यत्वसिद्धिरित्यर्थः। ननु श्रुतिवदनुमानस्यापि प्रमाणत्वात् न अन्यतरेण अन्यत रानार्थ्यक्यमित्यत्राह अन्तत इति। अनुमानात्पूर्वं श्रुतेः पुरस्करणीयत्वात् अनुमाननैरर्थक्यमित्यर्थः। विप्रतिपन्नमिति। श्रुति प्रामाण्ये विप्रतिपन्नं प्रतीत्यर्थः। श्रुतिप्रामाण्यमिति। तथा च ब्रह्मैक सत्वासिद्धेः प्रपंचस्य असत्वं न सिध्यतीत्यर्थः। वस्तुतः श्रुत्या तत्सिद्धिर्नास्तीत्याह श्रुतेश्चेति। ननु ब्रह्मैकमेवेति निश्चित्य न सत्यवैलक्षण्यस्साध्यते। येनमिथ्यात्वश्रुतिरुपतप्येत। किन्तु सत्यमंस्तीति निश्चित्येति शंकते नन्विति। किं सत्यत्वावच्छिन्नव्यतिरेकस्साध्यते। यद्वा ब्रह्मव्यतिरेकः नाद्य इत्याह प्रत्यक्षादिभिरिति। तेषां प्रत्यक्षविषयत्वनियमात् तत्र सत्यत्वग्रहे सत्यत्वावच्छिन्नव्यतिरेकसाधनं

निरूपिते सति अर्थापत्त्यभावयोः पृथक्प्रामाण्यमिच्छतां ताभ्यामपि बाधःसिद्धः । अबाध्यत्वलक्षणव्यवहाराविसंवादान्यथानुपपत्त्या सत्यत्वसिद्धिः । अभावोऽपि प्रपञ्चस्य बाध्यत्वाभावाख्यं सत्यत्वं प्रकाशयन् मिथ्यात्वानुमानं बाधत एव । न चात्र योग्यानुपलब्धिःनास्तीति वाच्यम्; योग्यत्वस्योपपादितत्वात् । न हि लोकसिद्धमिथ्यात्वादन्यत् किमप्ययोग्यं मिथ्यात्वमस्ति । न चानयोः श्रुतिबाधः, तदान्यपर्यस्थापनात् ।

ननु सत्यत्वे सिद्धे बाधः, तदेव न किञ्चित् पश्यामः किं सत्तासामान्यम्, उत स्वरूपसत्त्वम्? अथवा भावत्वम्? यद्वा प्रामाणिकत्वमात्रम्; अथवा किञ्चिदिति। नाद्यः; सामान्यमनिच्छतस्तदयोगात्, इच्छतोऽपि सामान्यादिषु मिथ्यात्वसाधनस्य निरुपद्रवत्वप्रसङ्गात् । न द्वितीयः; तत्रापि किं स्वरूपमेव सत्त्वम्, उत स्वरूपस्य सत्त्वम्? पूर्वत्र मिथ्याभूतस्यापि स्वरूपं स्वरूपमेवेति न किञ्चित् व्यतिरिक्तं भवति । निस्स्वरूपं तदिति चेन्न; तेनैव रूपेण तत्स्वरूपनिर्णयात् । अन्यथा प्रातिस्विकवस्त्वन्तरस्वरूपाभावे सर्वेषां निःस्वरूपत्वप्रसङ्गात् । उतरत्र, तत्सत्त्वस्य सत्त्वान्तराभावे मिथ्यात्वं दुर्वारम् । ततश्च विश्वमिथ्यात्वम् । न तृतीयः; अभावस्य मिथ्यात्वप्रसङ्गात् । इष्टमिदमिति चेन्न; अविशेषात् भावस्यापि तत्प्रसङ्गात् । भावान्तराभाववादे तु भावानामेवाभावत्वात् तत्प्रसङ्गः । न चतुर्थः; दृश्यत्वानुमानमपोह्य तदसिद्धेः । न पञ्चमः; तस्य सर्वत्र प्रमाणबाध्यत्वे शशविषाणवदसिद्धेः । योग्यत्वेऽनुपलम्भबाधादिति ।

तदेतदसारम्; प्रामाणिकत्वमेव हि सर्वत्र सत्त्वमभ्युपगच्छामः । तदुक्तं भाष्ये, ''व्यवहारयोग्यता सत्त्वम्'' इति । न चैतत् बाधकानुमाने जीवति न सिद्ध्यतीति वाच्यम्; कालात्ययापदेशस्य

बाधितमिति भावः । द्वितीय्येआह ततश्चेति । एकमेवेति प्रत्यक्षादिबाधो ग्राह्य इत्यर्थः । तेषां च प्रपञ्चविषयत्व नियमात्तत्र सत्यत्वग्रहे सत्यत्वावभिन्न व्यतिरेक साधनं बाधितमिति भावः । प्रत्यक्षादिभिरिति सत्यत्वग्राहिभिरिति शेषः । तस्येति । तथाच व्याप्तिग्रहायोगात् व्याप्यत्वासिद्धिरिति भावः ।

तथाविधस्येति । विधिनिषेधायोग्यस्य सिद्धसाधनबाधादिविरहात् तस्य साधने प्रपंचमपहर्तुं प्रवृत्तेन अधिकं साधितमिति भावः । अर्थापत्त्या बाधमुपपादयति अबाध्यत्वेति । अभावप्रमाणेन बाधमुपपादयति अभावोऽपीति । योग्यत्वस्येति ।चरमविकल्पदूषणे शुक्तिरजतादिप्रसिद्धातिरिक्तस्य कस्य चिन्मिथ्यत्वरूपतानिरपेक्षान्मिथ्यत्वस्य योग्यतामुपपादितमिति भावः । तदेव स्मारयति नहीति । अनयोरर्थापत्त्यभावयोः ।

ननु सत्यत्वग्राहिप्रत्यक्षेण उक्तो बाधोनुपपन्नः । सत्यस्यस्यैवानिरूपणादिति शंकते नन्विति । इच्छतोपीति । वृक्षे संयोगानुमानवत् पक्षैकदेशे मिथ्यानुमाने क्रमेण सर्वमिथ्यानुमानं स्यादिति भावः । किंचिदिति । मिथ्यावस्तु व्यावृत्तं सत्यत्वं नोक्तं भवतीत्यर्थः । नीरूपं तदिति चेदिति सत्यत्वनंगीकारात् तुच्छत्वपर्यवसानादिति भावः । तेनैवेति । असद्विलक्षणत्वस्याप्यभ्युपगमान्मिथ्यात्वाश्रयस्वरूपेणैव सत्स्वरूपत्वमित्यर्थः । अन्यथेति । यत्किंचित्स्वरूपे सत्यपि यत्किंचित्स्वरूपाभावमात्रेण निस्वरूपत्व इत्यर्थः । वस्त्वंतरस्वरूपाभाव इति सतीति शेषः । प्रातिस्विकरूपाभावस्य सत्वादित्यर्थः । उत्तरत्रेति । स्वरूपस्य सत्यत्वमित्यस्मिन् विकल्पे इत्यर्थः । सत्वांतरांगीकारत्वेऽनवस्थास्यादव्याप्त्यनिरूपणा दात्माश्रयश्चेति भावः । ततश्चेति । सत्यस्यैवाभावादिति भावः । इष्टमिदमिति । अभावत्वादेव

निर्मूलत्वप्रसङ्गात्; यथा वह्न्यनुष्णत्वानुमानं प्रतियोगिभूतोष्णत्वग्राहिणा बाध्यते, तथेहापि सत्यत्वव्यतिरेकानुमानं प्रतियोगिविशेषसत्यत्वग्राहिणा बाध्यते। न च तत्र गृह्यत इति वाच्यम्; तद्व्यतिरेकासिद्धिप्रसङ्गात्। ब्रह्मणि तद्ग्रहात् व्यतिरेकसिद्धिरिति चेन्न; ब्रह्मण्यपि सत्त्वस्य त्वदुक्तयुक्तिभिः खण्डनात्। तत्राखण्डितत्वे तदेव विश्वस्यापि सत्त्वमिति पश्य। स्वतस्सदेव ब्रह्मेति चेत्, किमहेतुकत्वं विवक्षितम्, उत स्वयंप्रकाशत्वम्? यद्वा सत्त्वाभावेऽपि सदिति पूर्वत्र ब्रह्मव्यतिरेकात् प्रपञ्चस्य कार्यत्वमेव साधितं स्यात्। ततश्चांशतस्सिद्धसाध्यता। द्वितीयेऽपि परप्रकाश्यत्वसाधनात् स एव दोषः। तृतीये तु प्रपञ्चस्यापि तद्वत् सत्त्वे को विरोधः? एतेन सत्त्वस्य सत्त्वान्तराभावात् असत्त्वप्रसङ्गोऽपि प्रत्युक्तः। अतः सत्त्वमात्रप्रतिक्षेपे शून्यवादावतारः। क्वचित् तदभ्युपगमे प्रामाणिकेषु सर्वेषु तत्सिद्धिरनिवार्येति। न चैवं मिथ्यात्वासत्त्वादौ; तस्य सामान्यतोऽस्माभिरप्रतिक्षेपात्। सत्यस्यैव हि रजतत्वादेः स्वात्यन्ताभावाश्रयनिष्ठतया प्रतीयमानत्ववेषेण मिथ्यात्वम्; तत्तन्निष्ठात्यन्ताभावप्रतियोगित्वमेव तस्यासत्त्वमिति यथालोकमभ्युपगमात्। किंच य एष विश्वं विचारा सहमलीकमनिर्वचनीयं चेत्यादिरूपं व्याहतप्रतिज्ञानमाद्रियते, स किं स्वपक्षं किंचित् स्थापयति, न वा? स्थापनेऽपि प्रमाणतः, अप्रमाणतोऽपि वा नेति पक्षे परपक्षं दूषयतोऽयमेव विकल्पः। तत्र प्रमाणत इति पक्षे तत् प्रमाणं तथात्वेन विचारसहम्, न

तस्यमिथ्यात्वमिष्टमित्यर्थः। भावस्यापीति। प्रमाणसिद्धत्वाविशेष्य भावस्यमिथ्यात्वे भावस्यापि तत्प्रसंग इत्यर्थः। भावान्तरेति। अभावत्वस्य मिथ्यात्वप्रयोजकत्वपर्यवसानादिति भावः। दृश्यत्वानुमानप्रवृत्तिसमये प्रपंचग्राहिप्रतीतेः प्रामाण्यसंदेहात् प्रामाणिकत्वस्य प्रपंचे सिद्ध्या सिध्यभावादितिभावः प्रामाणिकत्वमिति। सर्वत्रेति। ब्रह्मणि ततोऽन्यत्र प्रपंचेत्यर्थः। अनुपलंभबाधादिति। इदं सदिदंसदित्यपलंभावानुपलंभबाध इति चेत् न तस्याधिष्ठान भूतब्रह्मसत्ताविषयत्वात् ततोऽतिरिक्तायां मानाभावादिति भावः॥

प्रामाणिकत्वमिति। प्रामाणिकविषयत्वं प्रमेयत्वमेवेत्यर्थः। ननु प्रत्यक्षेण सदिति ग्रहणं न स्यात्। प्रमाणस्यातीन्द्रियतया तद्विषयस्यापीतीन्द्रियत्वात्। किं च प्रमाणपदं व्यर्थं विषयत्वमात्रस्यैव लक्षणत्वसंभवात्। किं च तद्विषयत्वं विशेषणं उपलक्षणं वा नाद्यः तदभावदशायां असत्वप्रसंगात्। नद्वितीयः उपलक्ष्यतावच्छेदकाभावात् इत्यत आह तदुक्तमिति। व्यवहारोऽर्थक्तिया तद्योगतावच्छेदकमित्यर्थः। ननु तस्यालंभ इति चेत् न प्रमाणविषयतावच्छेदकस्यैव तदवच्छेदकत्वात्। सच धर्मः कालसंबंधः। न च तस्य प्रत्यक्षासंभवः। अयं घट इति कालिक संबंध प्रतीतेरनुभवसिद्धतया कालतत्संबंधयोः षडिन्द्रियवेद्यत्वात्। यद्वा वर्तमानवस्तुगोचरसामग्रयाः अयं स्वभावः। तत्कालसंबन्धग्राहकत्वमिति। अत एव न व्यर्थविशेषणत्वं। तस्योक्तधर्मोपलक्षणार्थत्वात् इत्याहुः। तत्रगृह्यत इति। तथा च कालात्ययापदेशस्य न निर्मूलत्वमिति भावः। तर्हि व्यतिरेकानुपस्थित्या व्याप्तिग्रहणाभावात् अनुमानमेव नोदयमासादयदित्याह तद्व्यतिरेकेति। त्वदुक्तयुक्तिभिरिति। तर्किंसत्तासामान्यैरिति। विकल्पाभिहितैरित्यर्थः। पूर्वत्रेति। अहेतुकं मायाकार्यपर्यवसानादिभावः। ततश्चेति। प्रकृतिकालात्मव्यतिरिक्तस्य सत्वस्यापि कार्यत्वस्य संप्रतिपन्नत्वादिति भावः। परप्रकाश्यत्वेत्ति तेन सत्वस्यैव सिद्धेः हेतोः विरुद्धत्वं अदोष इत्यर्थः। एतेनेति। स्वरूपेणैव सत्वादित्यर्थः। एवं ब्रह्मणोपि सत्वं परिहार प्रपंचस्य वा सत्वं स्वीकुरु नार्थमुखेन्नेयन्यायाश्रयेत्याह। तत इति। ननु तर्हि मिथ्यात्वादावप्येवं विकल्पस्यात् प्रपंचमिथ्यात्वप्रतिक्षेपे शुक्तिरजतस्यापि मिथ्यात्वं न स्यात्

वा? पूर्वत्र कथं विश्वमिथ्यात्वम्? तस्यापि तदन्तर्भावात्; उत्तरत्र कथं तत् प्रमाणम्। प्रमाणताभ्रमेणेति चेत्, तथाऽपि किं तेन? अन्यथा हेत्वाभासानामप्रतिक्षेपे सर्वसमयसाम्राज्यप्रसङ्गात्। लोकव्यवहारसिद्धमिति चेन्न; तस्य सपरिकरस्य परिग्रहे लोकस्थिरीकरणात्। प्रमाणान्तराविरोधादेश्च तत्परिकरत्वात्। अन्यथा लोकतोऽप्यसिद्धेः। त्रिचतुरकक्ष्या विमर्शावस्थापितमिति चेन्न; तथैव विश्वानुग्राहकप्रमाणानामव्यवस्थापनात्। तत्तद्विमर्शबाधस्य विश्वद्वेषिण्यपि निवारकाभावात्। तस्य तु प्रथमकक्ष्यायामेव स्फुटप्रतीति व्याघातादिभिर्विलय इति विशेष इति।

न चापच्छेदनिमित्तनैमित्तिकशास्त्रयोः प्रामाण्याविशेष इव अप्रामाण्यविशेषेऽपि परत्वात् प्राबल्यम्; न मिथ्येत्यस्मदुक्तेस्ततोऽपि परत्वात्। अविश्रमस्तर्हीति चेन्न; स्वदोषस्य परत्राऽऽरोपात्। परत्वमात्रेण प्राबल्यं ब्रुवतस्तवैवासौ दोषः। किंच यद्यप्रमाणं परं स्वविषयं नावस्थापयेत्, कथं प्रबलम्; स्थापयतो वा कथमप्रामाण्यम्?। ननु प्रमाणत्वे कथं बाध्यत्वम्, तस्मिन् वा कथं तदित्यपच्छेदेऽपि प्रसज्यत इति चेन्न; अनियतविरोधपौर्वापर्यतया अन्यतरोदयसंभावनया च प्रयोगान्तरेषु प्रामाण्योपपत्तेः। किंच त्वदुक्तप्रमाणस्यापि दुष्टकारणप्रसूतत्वं त्वयैवाभ्युपगम्यत इति अदोषप्रसूततयाऽपि न प्राबल्दौर्बल्य विभागः। अन्यथा माध्यमिकयुक्तीनां सर्वसिद्धान्तजीवितास्वादिनीनां सर्वतः परत्वेन प्राबल्यप्रसङ्गात्। तदेवं सिद्धं

शुक्तिरजतस्य मिथ्यात्वांगीकारे प्रपंचोतथास्यात्। एवं शशश्रृंगस्थ असत्वांगीकारे प्रपंचस्याप्यसत्वं स्यात्। प्रपंचे (मिथ्यात्व) तत्प्रतिक्षेपे शशश्रृंगस्यापि तन्नस्यादित्यत्राह न चैवमिति। तस्य सामान्यतो अस्माभिरिति। स्वरूपेण किं चेन्मिथ्या किंचिदसदिति नांगीक्रियते। किन्तु सत्स्वरूपस्यैव अधिकरणविशेषमादाय अंगीक्रियत इति प्रतिचारमिति। विचारसहत्व प्रतिज्ञया अनीकत्वप्रतिज्ञानं व्याहतं विचार्यैव अळीकत्वनिर्णयात्। अळीकत्वेननिर्वचनादेवाळीकत्वप्रतिज्ञानं अनिर्वचनीयत्वप्रतिज्ञया व्याहतं। तथा प्रथमेन वा निर्वचनीयत्वमपि व्याहतं विचार्यैव अनिर्वचनीयत्वस्थापनादित्यर्थः। एवं चोन्मत्त इव व्याहतं वा उपेक्ष्य इति भावः। जाल्पिको वैतण्डिको वेति विकल्पयति। सकिमिति। स्वपक्षसाधनपरपक्षदूषण विकल्पकोटिद्वयमपि युगवदेव निरकरोति तत्र प्रमाणत इति। तथात्वेन-प्रमाणत्वेन। कथं विश्वमिथ्यात्वं। विचारासहत्वं मिथ्यात्वं विवक्षितमिति भावः। तस्यापीति। प्रमाणस्यापि पक्षान्तर्भावविदिति भावः। तथापीति। न भ्रममात्रेण प्रमाणता तथा च न किंचित्प्रयोजनमित्यर्थः। अन्यथेति। तादृशेनापि प्रयोजनसिद्धावित्यर्थः। लोकव्यवहारेति स्वपक्षसाधनत्वेनाभिमतं लोकव्यवहारेण प्रमाणतया सिद्धं न तथा हेत्वाभास इत्यर्थः। ननु। तस्येति। लोकव्यवहारसिद्धस्य सपरिकरस्य प्रमाणस्य परिग्रहे प्रमाणान्तराविरोधानुकूलतत्कालादेस्तत्परिकरतया तादृशप्रमाणेन प्रपंचसत्यत्वमेव सिध्येत्। प्रपंचमिथ्यात्व साधकस्य प्रमाणान्तरविरोधादनुकूलतर्काभावाच्च लोकतस्सिध्यभावात् न तेन विश्वमिथ्यात्वसिद्धिरित्यर्थः। अन्यथेति। सपरिकरस्य साधकत्वं लोकव्यवहारतोप्यसिद्धं। लोके सपरिकरस्यैव प्रमाणत्वव्यवहारादिति भावः। त्रिचतुरकक्ष्या सह प्रमाणतयाविचारे तदेव लोकव्यवहारसिद्धमिति विवभासादि तु प्रमाणतया विचारे न तथेति शंकते त्रिचतुरेति। प्रमाणमिति शेषः। विश्वानुग्राहकाः-विश्वसत्यत्वस्थापकाः। ननु सत्यत्वस्थापकस्य बाधो दृश्यते अपितु मिथ्यात्वस्थापकस्येति वैषम्यमस्तीति चेत्तत्राह तत्तदिति। विश्वद्वेषिप्रपंचमिथ्यात्वसाधकं प्रमाणमित्यर्थः।

न कथंचिदपि विश्वमिथ्यात्वप्रतिज्ञानं शक्यमिति।

दृश्यत्वं च किमभिप्रेतं? किं चाक्षुषत्वम्? उत प्रत्यक्षज्ञानविषयत्वम्, यद्वा ज्ञानविषयत्वमात्रम्, उत दृग्व्यतिरिक्तत्वम्, अथवा अन्यत् किंचिदिति?नाऽऽद्यः; भागासिद्धत्वात्। अत एव न द्वितीयः; व्यर्थविशेषणत्वाच्च। ब्रह्मव्यच्छेदार्थं विशेषणं सार्थकमिति चेन्न; तस्य ज्ञानविषयत्वानभ्युपगमात्। अभ्युपगमे वा योगिप्रत्यक्षादिविषयतया सन्मात्रग्राहिप्रत्यक्षवर्णनाच्च हेतोस्तत्र वृत्तेः। न च तृतीयः; अनैकान्तिकत्वादेव। ज्ञानविषयत्वमात्रमपि ब्रह्मणो नास्तीति चेन्न; ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' (बृ.४-४-५) ''ब्रह्म वेद ब्रह्मैव भवति'' (मुंड-३-२-१) ''अथातो ब्रह्मजिज्ञासा''(ब्र.सू.१-१-१) इत्यादिस्वपराभ्युपगतश्रुतिसूत्रादिविरोधात्। सन्मात्रग्राहि प्रत्यक्षमिति वादस्यापि प्रहाणप्रसङ्गाच्च। व्यावहारिकं ब्रह्मणो दृश्यत्वम्, न तु पारमार्थिकमिति चेत्, हन्त! किं प्रपञ्चदृश्यत्वं पारमार्थिकम्, येन तस्मिन् मिथ्यात्वं सिद्ध्येत्। तथाच सति पारमार्थिकं दृश्यत्वम्। तत एव दृश्यम् अपारमार्थिकमिति भ्रान्तजल्पितायेत। अतः प्रपञ्चस्यापि व्यावहारिकदृश्यत्वमभ्युपेयम्; तच्च ब्रह्मणोऽप्यविशिष्टमिति तस्यापि मिथ्यात्वप्रसङ्गस्याविशेषेऽपि सत्यत्वे, प्रपञ्चस्यापि सत्यत्वप्रसङ्गः। यदि च व्यावहारिकमपि दृश्यत्वं ब्रह्मणो नास्तीत्युच्येत, तदा ब्रह्मविज्ञानान्मोक्ष इति वेदान्तसिद्धान्तविरोधश्च।

किंच, 'ब्रह्मणो दृश्यत्वं नास्ति' इत्यत्र ब्रह्मशब्दः किं कस्यचिदप्यबोधकः उताब्रह्मबोधकः अथवा ब्रह्मबोधक इति? नाद्यः ब्रह्मशब्दप्रयोगनैरर्थक्यप्रसङ्गात्। न द्वितीयः; अब्रह्मणस्तेनाभिधाने तस्यैव दृश्यत्वनिषेधात्; ततः प्रपञ्चे हेतोरसिद्धेश्च। न तृतीयः; ब्रह्मणो दृश्यत्वस्य दुस्त्यजत्वात्। स्वयंप्रकाशस्य ब्रह्मणो यथाकथंचिल्लक्षणया ब्रह्मशब्देन प्रतिपादनमिति चेत्, तथाऽपि लक्षणया वृत्त्या शब्दजन्यप्रतीतिविषयत्वं सिद्धम्। तावतैव दृश्यत्वमवर्जनीयम्। ब्रह्मशब्देन ब्रह्मणो लक्षणा चानुपपन्नेति

उक्तदोषं परिहन्त प्रमाणत्व दूषणं च युगपदनुवदति न चेति। परिहरति न मिथ्येति। अविश्रमस्तर्हीति तदुपरि तन्निषेधस्यापि भावादित्यर्थः। परं किं स्वविषयं ज्ञापयति न वेति कल्पमभिप्रेत्याह किं चेति। अनियतेति। अन्यतरोदयसंभावनया नैकावच्छेदकत्वाभावेनानियतविरोधतया नियतपौर्वापर्यतया च अन्यतर शास्त्रानुष्ठान संभवादित्यर्थः। किं च परस्य प्राबल्यं च तदापि दुष्टकारणजन्यत्वतदभावाभ्यां वैषम्यं वाच्यं। तच्च त्वन्मते न संभवतीत्याह त्वदुक्तेति। अदोषप्रसूततया-दोषाजन्यतयेत्यर्थः। प्राबल्यइत्यर्थः। मिथ्यात्वनिर्वचनसंभवात् पक्षहेत्वादिभिर्व्याधातात् साधनासंभवाच्च न विश्वमिथ्यात्वप्रतिज्ञानं भवतीत्युपसंहरति तदेवमिति।

साध्यं दूषयित्वा हेतुदूषणमाह दृश्यत्वंचेति। भागसिद्धत्वादिति। प्रपंचस्य क्वचिद्वाय्वादौ चाक्षुषत्वाभावादिति भावः। व्यर्थेति। प्रत्यक्षविशेषणस्य व्यर्थत्वादिति भावः। ब्रह्मेति। तत्र व्यभिचारवारकतया सार्थकमित्यर्थः। तस्येति यतो वाचोनिवर्तन्ते अप्राप्यमनसासहेति (तै.आनं) श्रुतेः ज्ञानविषयत्वनिषेधपरस्य भवद्भिः प्रतिपादनादिति भावः। प्रत्यक्षविशेषण व्यावर्तकं चे ( ) स्वपरेति। 'अप्राप्यमनसा सहे' (तै.आनं.) त्यादि श्रुतिस्त्वपरिशुद्ध मनोविषयेति भावः। आदिशब्देन मन्तव्यश्रोपपत्तिभिः ( ) इति श्रुतिग्राहय सिद्धान्तविरोधश्चेत्याह सन्मात्रेति। भ्रान्तिजल्पितायेतिति पारमर्थ्यदृश्यत्व एव व्यभिचारात् तस्य कथं साधनत्वेनोपन्यास इत्यर्थः। प्रपंचस्यापि सत्यत्व प्रसंग इति।

आदावेवोक्तम्। एतेन सर्वशब्दागोचरत्वं ब्रह्मणो वदन् प्रत्युक्तः; ब्रह्म न शब्दप्रतिपाद्यमित्यत्र पूर्ववत् विकल्पदूषणयोरवर्जनीयत्वात्। "यतो वाचो निवर्तन्ते" (तै.आनं.१) इत्यत्रापि यच्छब्देन ब्रह्मानुवादोऽवर्जनीयः उपहितमूनद्यत इति चेत्, तथाऽपि ज्ञानविषयत्वं सिद्धम्। उपहितानुवादेनानुपहिते तन्निषेधश्चाशक्यः। एवमनुभूतिःस्वयंप्रकाशेत्यादिभिरवेद्यत्वप्रतिपादनमपि तन्निरासमये निरस्तं द्रष्टव्यम्।

न चतुर्थः;पारमार्थिकव्यतिरेकस्य शुक्तिकारजतादौ प्रपञ्चेऽप्यनभ्युपगमेन साधनविकलत्व असिद्ध्यादिदोषात्। अपारमार्थिकव्यतिरेकस्य ब्रह्मण्यपि विद्यमानत्वेनानैकान्त्यादेव। अत एव प्रातिभासिकव्यतिरेकपक्षोऽपि निरस्तः। किंच घटोऽस्ति पटोऽस्तीत्यादिषु सत्त्वमनुभूतिविषयतयैव प्रतिभासते।

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां दृश्यत्वानुमाननिरासवादः पञ्चदशः॥१५॥

ननु धर्मसमानसत्ताकदृश्यत्वं विवक्षितं। तच्च ब्रह्मणि नास्त्येव। ब्रह्मणः पारमार्थिकत्वेन दृश्यत्वस्य व्यावहारिकतया च वैषम्यादिति न व्यभिचार इति चेत् न प्रपंचमिथ्यात्वसिद्धेः पूर्वं सत्ताभेदाभावेन दृश्यत्व पारमार्थिकत्वात् तत्संदेहेपि व्यभिचारसंदेहात् प्रपंचे दृश्यत्वस्य मिथ्यात्वे स्वरूपासिद्धिप्रसंगात्। शुक्तिरूपे दृग्विषयत्वस्य प्रातिभासिकत्वाभावेन व्याप्यत्वासिद्धेश्चेति द्रष्टव्यं ब्रह्मविज्ञानादिति। ब्रह्मवेद ब्रह्मैवभवतीति (तै.आनं) सिद्धान्तादिति भावः। नैरर्थक्यप्रसंगात् इत्युपलक्षणं। ब्रह्मणि दृश्यत्वाभाव सिद्धिश्च न स्यादित्यपि द्रष्टव्यं।

दुस्त्यजत्वादिति ब्रह्मशब्दजन्यप्रतीति विषयत्वादित्यर्थः। ननु लक्षणावृत्त्यजन्यज्ञानविषयत्वं दृश्यत्वं विवक्षितमिति न तत्र व्यभिचारइति चेत् तत्राह लक्षणा चेति। पूर्वविकल्पदूषणयोरिति। ब्रह्म शब्दमात्रप्रतिपाद्यमित्यत्र ब्रह्मशब्दे किं कस्यचिदबोधकइत्यादिविकल्पदूषणयोरित्यर्थः। तत्र प्रमाणतयोरप्युक्तश्रुतेरपि विरोधात् न त्वदुक्तार्थ इत्याह यतो वाच इति। किमुपहितस्यैव ज्ञानविषयत्वनिषेधः। किं वानुपहितस्य नाद्य इत्याह तथापीति। उपहितं उपाधिविनिष्टं। तत्र विशेष्यस्यापि तद्विषयत्वमवर्जनीयमित्यर्थः। द्वितीय्ये आह उपहितानुवादेनेति। तत्रैव निषेधान्वयबोधनादिति भावः। ननु ज्ञानान्तरावेदकत्वलक्षणस्वयंप्रकाशत्वसाधनादेव अवेद्यत्वं सिध्यतीत्यत्राह एवमिति। अनुभूतिः स्वयंप्रकाशेत्यनुमानं प्रतिज्ञान्तर्गतानुभूति ( ) जन्यप्रमितिविषयत्वादेरवर्जनीयत्वादिति भावः।

अपारमार्थिकेति। व्यतिरेकस्य पारमार्थिकत्वांगीकारे व्यभिचार इति भावः। किं च पारमार्थिकव्यतिरेको ब्रह्मण्यपि विद्यते। सद्रूपब्रह्मणो दृग्विषयत्वानुभवात् विषयविषयिभावस्य भेदाधीनत्वात् ब्रह्म सत्ताव्यतिरेकेण घटादौ सत्तांतरानुभवादित्यत्राह किं चेति।

वत्सकुलजलधिकौस्तुभ नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी पञ्चदशो वादस्समाप्तः॥

॥अथ व्यावर्तमानत्वानुमानभङ्गवादःषोडशः ॥१६॥

विश्वं व्यावर्तमानत्वान्निवर्तयितुमिच्छतः।
निवर्तयामः कुमतीन् कथासंग्रामसीमतः॥

यत् तावत् घटादयोऽपरमार्थाः; व्यावर्तमानत्वात्; यदुक्तसाधनं तदुक्तसाध्यम्, यथा रज्ज्वाद्यधिष्ठानसर्पभूदलनाम्बुधारादि; यत्सत्, न तद्व्यावर्तते, यथा सर्पाद्यधिष्ठानभूता रज्जुः; यद्वा सर्वाधिष्ठानं ब्रह्म। यदि व्यावर्तमानस्यापि सत्त्वम्, तदा सत्यमिथ्यार्थविभागाभावप्रसङ्ग इति तर्कानुग्रहः इति। तत्र किमिदं व्यावर्तमानत्वम्? किं यतःकुत श्चिदन्यत्वम्? अथ यत्र कुत्रचिद्देशादावसत्त्वम्? यद्वा प्रध्वंसवत्त्वम्? उत प्रतिपन्नोपाधौ निषेधप्रतियोगित्वम्? किं वा कदाचित्क्वचिदेव प्रकाशमानत्वम्? अन्यद्वा किंचित्?।

नाद्यः, युष्मदर्थादन्येन ब्रह्मणैवानैकान्त्यात्। "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्ति"(शांकरभाष्यं) भवतां भाष्यारम्भे भाषिता। यदि ब्रह्मणस्तदन्यत्वं मिथ्या, तर्हि परमार्थतस्तयोरैक्यप्रसक्तिः, यथा घटस्य स्वरूपादन्यत्वे मिथ्याभूते तदैक्यम्। ततश्च मिथ्याभूतप्रपञ्चैक्याद्ब्रह्मणोऽपि मिथ्यात्वं सत्यब्रह्मतादात्म्यात्तस्यापि सत्यत्वं वा स्यात्। किंच ब्रह्मनिष्ठमन्यत्वं मिथ्याभूतमिति वदता किं प्रपञ्चनिष्ठमन्यत्वं सत्यमभिमतम्? तर्हि तेनैवान्यत्वेन परमार्थतो ब्रह्मणोऽन्येनानैकान्तिकत्वसद्वितीयत्वापसिद्धान्ताः। यदि तन्मिथ्या, तथाविधान्यत्वस्य ब्रह्मण्यपि त्वयैवाभ्युपगमाद्दुस्तरमनैकान्त्यम्।

न द्वितीयः, तस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात्। न हि शुक्तिरजतादेर्देशान्तरादावभावान्मिथ्यात्वम्, अपि तर्हि प्रतिपन्नदेशादावभावात्। अन्यथा येनाप्याकारेणासत्त्वात् ब्रह्मणोऽपि मिथ्यात्वं स्यात्। न हि ब्रह्मासद्रूपेण वा सदसद्विलक्षणरूपेण वा सदिति भवन्तोऽप्यभ्युपगच्छन्ति। अथ यत्र देशे काले वा तदभावस्तत्रैव मिथ्यात्वं साध्यं तदा सिद्धसाधनं। न हि वयं क्वाचित्कस्य कादाचित्कस्य च सर्वत्र सर्वदा सत्वं विरोधेन ब्रूमः। तथा सति आपणस्थ रजतस्य सर्वदेशवृत्तिकत्वाविरोधे (न) शुक्तिरूप्यादेरपि सत्यत्वापातात्; कार्यकारणभावविलोपप्रसङ्गाच्च।

पूर्ववादसंगतिरेवास्यापि संगतिरिति अभिप्रेत्यवादार्थं संगृह्णाति विश्वमिति। प्रपंचोमिथ्या व्यावर्तमानत्वात् शुक्तिरूप्यवदित्यनुमानेन प्रपंचमिथ्यात्वं साधयत इत्यर्थः। निर्वतनप्रकारं दर्शयितुं प्रतिजानीते यथेति। उदाहरणान्तरमाह यद्वेति। यथेत्यनुषंगः अधिष्ठानत्वं अधिकरणत्वं यदिति व्यावर्तमानस्य मिथ्यात्वप्रोयजकत्वेन प्रयोजकान्तरांभावात् शुक्तिरूप्यमपि मिथ्या न स्यात् इत्यर्थः।

ननु ब्रह्मणि युष्मदर्थान्यत्वं मिथ्यैव। न हि मिथ्या भूतधूमस्यह्रदवृत्तित्वमात्रेण वह्निव्यभिचार इत्यत्राह यदिति। तदैक्यमिति। पारमार्थकमितिशेषः। उक्तबाधकभयान्मिथ्यात्वपरिग्रहमनूद्य दूषयति यदिति।

तर्हि शुक्तिरजतादेर्मिथ्यात्वं न स्यादित्यत्राह। न हीति। अन्यथेति। यथा कथंचिदसत्वमात्रेण स्वरूपस्यैव मिथ्यात्व इत्यर्थः सदिति। विद्यमानमित्यर्थः। नह्यसद्रूपेण वा सद्विलक्षणरूपेण वा ब्रह्मविद्यत इति अभ्युपगच्छंतीत्यर्थः। सिद्धसाधनमिति। तद्देशतत्काले च मिथ्यात्वस्य सत्यतावादिभिरपि अभ्युपप तत्वादिति भावः। शुक्तिरूप्यादेरपीति। रजतस्य सर्वदेशवृत्तित्वेन शुक्तावपि सत्यस्य आपणस्थ रजतस्यैव विद्यमानस्य रजतप्रतीतिविषयत्वात् मिथ्यारजतं न सिध्येत् इत्यर्थः। कादाचित्कस्य सर्वदा सत्वे दोषमाह

न तृतीयः, दृष्टान्तस्य साधनविकलत्वात्। न ह्यध्यस्तं सर्पादिकं बाधदशायामपि प्रध्वस्तमिति कश्चिद्वदति, बाधविनाशयोर्विविक्ततयैव व्युत्पत्तेः। प्रतिपन्नस्य नेति निषेधो बाधः। विनाशस्तु लब्धसत्ताकस्य स्वरूप प्रच्युतिः। दण्डादिना निहतेषु सत्येषु हि सर्पादिषु प्रध्वस्तबुद्धिः। तत एव चेदं प्रध्वंसप्रतियोगित्वं देशकालसत्यत्वेन व्याप्तमुपलब्धमिति विपरीतसाधकत्वम्।

नापि चतुर्थः, असिद्धेः। नहि स्वदेशादौ घटादयो न सन्तीति बाध्यन्ते। नेदं रजतमितिवन्नायं घट इत्यादिस्वारसिकबाधादर्शनात्। ननु सर्वानुवृत्तस्य सत एव सर्ववस्तुदेशत्वेनाभासात्तत्रैव चास्ति पट इति पटादिविधौ तद्विरोधिघटादेर्निवृत्तिदर्शनान्मिथ्यात्वं स्यादिति चेत्, मैवम्; सतोऽत्र पटादिस्वरूपस्य देशत्वाभावात्, अननुवृत्तेश्च। घटोऽस्ति पटोऽस्तीत्यादिप्रतीतौ सत्त्वं घटादिधर्मत्वेनैव प्रतीयते, नतु घटादीनामाश्रयत्वेन, घटश्चलति पटश्चलति घटो महान् पटो महानित्यादिषु क्रियागुणादिवत्। अतोऽनुवृत्तत्वात्सतो देशत्वमित्यपि निरस्तम्। ब्रह्म तु सर्वानुवृत्तं सदपि न घटोऽस्ति पटोऽस्तीत्यादिधीविषयः।

न पञ्चमः, अप्रयोजकत्वात्, यत्र कुत्र(क)चित्प्रमितत्वमात्रेणैव सत्यत्वसिद्धेः। कालान्तरादौ प्रकाशानुत्पत्तेस्तत्सामग्र्यभावप्रयुक्तत्वात्। नचाप्रकाशमानत्वेन विरुद्धत्वात्प्रमितत्वमेवात्र नास्तीति

कार्यकारणेति। पौर्वापर्याभावादिति भावः। संवादिकमिति संवादोऽर्थसत्वेन व्यवहारः। तदस्यास्तीति ठञ् प्रत्ययः।

ननु विद्यामनस्यापि न व्यवहार नियम इत्यत्राह कश्चिदिति। यस्य कस्यचित् यदा कदाचित् विद्यमानत्वे यदाकदाचिद्व्यवहारस्स्यादिति भावः। ननु बाध्यत्वव्यवहार एव ध्वंस व्यवहार इत्यत आह बाधेति। निषेध इति। अभावबुद्धिरित्यर्थः। तत एवेति। सत्येष्वेव सर्पादिषु प्रध्वस्तबुद्धिरित्यर्थः॥ विपरीतबाधकत्वमिति। तथाच विरुद्धत्वात् न साधनमिति भावः।

किमुपाधिपदेन देशकाल रूपाधिकरणं विवक्षितं उत अध्यस्तधिष्ठितमिति विकल्प्य आद्ये आह नहीति। द्वितीयमाह नेदमिति। द्वितीयकल्पमेवोद्धलयति नन्विति। सन् घटः सन् पटः इति सदेवाधिष्ठानतया प्रतीय्यते। यथा इदं रजतमित्यत्र इदमर्थभूता शुक्तिः। तथा च सन् पटः इति पटविधिदशायां सन्नयं पट एव न तु घट इति निषेध दर्शनात् हेतुसिद्धेर्मिथ्यात्वं स्यादित्यर्थः। मैवमिति देशत्वमात्राधिष्ठानत्वं मिथ्यात्वसिद्धिः प्राक् घटादिस्वरूपातिरिक्तसतो सिद्धत्वादिति भावः। अनुवृत्तेश्चेति। सतो घटादितत्तद्वस्तुरूपस्य पटादावनुवृत्त्यभावादित्यर्थः। ननु सत्ता न घटादिस्वरूपं किन्तु ब्रह्मस्वरूपमेवेत्यनु वृत्तिर्युक्तेत्यत्राह घटोस्तीति। आश्रयत्वमधिष्ठानत्वं न च तन्निष्ठतया भासमानायास्सत्तायाः अधिष्ठानत्वं भवतीति भावः।

ननु त्वन्मते ब्रह्मस्वरूपस्य अनुवर्तमानत्वात्कथं अधिष्ठानं स्यादित्यत्राह ब्रह्मत्विति। अनुवृत्तिमात्रान्नाधिष्ठानत्वं अपितु अध्यस्यमानगोचरप्रतीति विषयत्वेनेति भावः।

नन्वाधारत्वमेवाधिष्ठानत्वं तत्र घटस्सन्निति प्रतीतस्य पटस्सन्निति प्रतीतिदशायां निषेधावगमात् व्यावर्तमानत्वमिति चेन्न। घटसन्निति प्रतीतस्य पटस्सन्निति न निषेधः किन्तु पटस्यापि विधिरेव न चान्यविधिरेव इतर निषेधः घटेरूपरसयोरिव सत्युभयविधिमात्रेण परस्परनिषेधाभावात्। न वात्र घटो न सन्निति प्रतीतिरिस्तिसत्वे वा घट एव सत्तानिषेधो न सति घटस्येति वैपरीत्य प्रसंगादिति दिक्। ननु कालान्तरादौ अप्रकाशमानत्वं शुक्तिरूप्यवत् सद्वैलक्षण्यप्रयुक्तमित्यत्राह कालान्तरादाविति। नचेति।

वक्तुं युक्तम्, देशकालादिभेदेन विरोधपरिहारात्। अन्यथा विपरिवर्तस्यापि दुर्वारत्वात्। यदिचं यथाकथञ्चिदप्रकाश (मानत्वा) नान्मिथ्यात्वम्, तदा ब्रह्मणोऽपि तत्प्रसङ्गः, तस्याप्यामोक्षादविद्यावशेना प्रकाशमानत्वस्य भवद्भिरेव स्वीकारात्। अन्यथा कथमप्रकाशितार्थप्रकाशकत्वादित्यस्य भवदुन्नीतभावरूपाज्ञानानुमानहेतोरत्र सिद्धिः? कथंच ब्रह्माज्ञानसाधनं तिरोधानवाचोयुक्तिश्च? तिरोहितस्वरूपस्यापि तस्य सर्वदा कथञ्चित्प्रकाशमानत्वमप्यस्तीति चेत्; तद्धटादेरप्यस्तीति न कश्चिद्भेदः। स्वकालावच्छिन्नस्य तत्प्रकाशस्य कालान्तरेऽप्यनपायात्। घटादिप्रकाशस्य कादाचित्कत्वादस्ति भेद इति चेन्न; ''नित्यो नित्यानामि (कठ २-७-२३) त्यादिशास्त्रसिद्धनित्येश्वरबुद्धिविषयत्वेन घटादेरपि नित्यं प्रकाशमानत्वात्, भ्रान्तबुद्धिविषयतया शुक्तिरजतादेश्च। वयं तु तथा न जानीम इति चेन्न; अस्माभिरपि तथाऽङ्गीकारात्। (शास्त्रेणा तथा ज्ञायमानत्वात्।) अस्माकं नित्यं घटादिप्रकाशो नास्तीति विवक्षितमिति चेत्; तुल्यम्। न ह्यस्मदर्थनिष्ठो ब्रह्मप्रकाशो नित्य इति त्वयाऽपि स्वीकृतम्। नित्यस्तु ब्रह्मप्रकाशो नास्मत्प्रतिसम्बन्धिकः। किंच किं प्रकाशस्य नित्यत्वं वस्तुसत्यत्वव्यवस्थापकम्? उतावाधितत्वम्? आद्ये निर्दोषत्वादिमात्रेणैव प्रामाण्यसिद्धौ तन्नित्यत्वस्य प्रामाण्यं प्रत्यनङ्गता। दोषे सति च प्रकाशानुवृत्तेरप्रयोजकत्वम्। द्वितीये तु कादाचित्कस्यापि घटादिप्रकाशस्य तदस्तीति घटादिसत्यत्वमकामेनापि स्वीकार्यम्। ततश्च, व्यावृत्तिरनुवृत्तिर्वा न

प्रमायाः प्रकाशमानत्वं प्रमितत्वं। तच्च प्रकाशमानत्वरूप सामान्याभावरूपप्रकाशमानत्वेन विरुद्धमिति भावः। अन्यथेति। देश कालादिभेदेन परिहाराभावे कदाचित्प्रमितत्वेन विरुद्धः। प्रकाशमानत्वाभाव एव न स्यादिति भावः। देशकालभेदेना प्रकाशमानत्व मात्रेण मिथ्यात्वे साध्ये व्यभिचारमाह यथा कथंचिदिति। अन्यथेति। ब्रह्मणो प्रकाशितत्वाभावे अत्र ब्रह्मणि प्रमाणज्ञानस्या प्रकाशितार्थप्रकाशकत्वरूपहेतु सिद्धिः कथमित्यर्थः। माभूदत्र हेतुसिद्धिः। घटादिगोचरप्रमाणज्ञानमादाय भावरूपाज्ञानसिद्धिः अस्तु इत्यत्राह कथं चेति। सर्वदा कथंचिदिति। देशविशेषे कालविशेषे वा कथंचिदपि प्रकाशमानत्वाभावो हेतुरिति भावः। तद्धटदेरपीति। तथा च स्वरूपासिद्धिरिति भावः। ननु घटस्य कादाचित्कत्वात् प्रथमविद्यमानकाले प्रकाश इत्यत्राह। स्वकालावच्छिन्नस्येति। स्वकाले विद्यमानत्वाविषयस्येत्यर्थः। ननु घटादिप्रकाशस्यास्य स्मारकस्य नित्यत्वान्नसिद्धिरित्याशंकते घटादिप्रकाशस्येति। भ्रान्तेति। ईश्वरज्ञानस्य रजतभ्रान्तिविषयस्य तद्विषयरजतविषयत्वावश्यं भावात् सर्वदा प्रकाशमानत्वात् दृष्टान्तस्साधनविकल इति भावः। ननु सर्वदा अस्माभिरीश्वरबुद्धिविषयत्वं नेष्यत एव। ईश्वरस्यानित्यत्वादित्यत्राह वयन्त्विति। अस्माभिरिति। अस्मभिस्सर्वदा तद्बुद्धिविषयत्वांगीकारात् अन्यतरासिद्धिरित्यर्थः। अस्मकमिति। अस्मदीयनित्यप्रकाशविषयत्वाभावो हेतुरिति वयन्त्वितिवाक्ये विवक्षितमिति भावः। तुल्यमिति तथा च ब्रह्मण्यनैकान्त्यमिति भावः। अनैकाविमुपपादयति न ह्यस्मदर्थेति। अनुमानस्य अप्रयोजकत्वमाह किं चेति। आद्येपि किं निर्दोषत्वसहितं तदसहितं वा प्रामाण्यप्रयोजकमिति विकल्पमभिप्रेत्य आद्ये आह निर्दोषत्वादिति। तथा च निर्दोषत्वेनैव प्रामाण्यात् तादृश प्रकाशाभावो प्रयोजको मिथ्यात्वस्येति भावः। द्वितीये आह दोषे सतीति। द्वितीयेत्विति। कादाचित्कस्यापि घटादिप्रकाशस्याबाधितत्वात् यौक्तिकबाधस्य तु सर्वसाधारण्यादिति भावः।

प्रयोजनत्वे अभियुक्तवचन संवादयति। व्यावृत्तिरिति। व्यावृत्तिर्मिथ्यात्वे प्रयोजकं न भवति।

मिथ्यात्वादिसाधिका। न वाधो जगतोऽध्यक्षाद्ब्रह्मणोऽप्यस्ति यौक्तिकः ॥

अयमत्र विभागः -

बाधश्शुक्त्यादिधीरत्र व्यावृत्तिर्भ्रमसंशयः। मिथ्यात्वं रजताद्यर्थस्वरूपाभाव उच्यते ॥

नापि षष्ठः, तस्य बाधपर्यायस्य तत्फलभूतभ्रान्तिविषयत्वनिवृत्तिलक्षणस्य वाऽनुपलम्भादि निरस्तत्वात्। इतरस्य त्वप्रयोजकत्वात्। व्यतिरेकासिद्धिश्च बहुधा द्रष्टव्या। यन्न मिथ्या तन्न व्यावर्तत इति हि व्यतिरेकः। ब्रह्म तु न मिथ्या, सर्वतो व्यावर्तते, सर्वान्यत्वात्, सर्वत्र स्वयमवर्तमानत्वाच्च। एवमनुवृत्त्यनुमानेऽपि द्रष्टव्यम्। एतेन व्यावर्तमानत्वविकल्पदूषणन्यायेन भिन्नत्वात्, क्वाचित्कत्वात्, बाध्यत्वात्, जडत्वात्-इत्यादिप्रपञ्चमिथ्यात्वहेतुजालं समूलोन्मूलितमिति तेषूदासि भाष्यकारैः। तर्कश्च दुष्टः, बाधाबाधादिभिरेव सत्यमिथ्यार्थविभागसिद्धेरिति ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां व्यावर्तमानत्वानुमानभङ्गवादः षोडशः ॥१६॥

तथाचानुवृत्तिरपि मिथ्यात्वे प्रयोजकं न भवति बाधस्योपाधित्वात् इति भावः। तर्हि बाधो मिथ्यात्वमस्त्वित्यत्राह न बाध इति। हेत्वसिद्धिरित्यर्थः। ननु नासिद्धिः यौक्तिकस्य सत्वादित्यत्राह ब्रह्मणोऽपीति। तत्र व्यभिचार इति भावः।

नन्वत्र व्यावृत्तेर्मिथ्यात्वं प्रत्यप्रयोजकत्वं बाधमिथ्यत्वयोस्साध्यसाधन भावश्च प्रतिपाद्यते। कथमेतदुपपद्यते भदाभावादित्यत्राह अयमत्रेति।

अन्यत्किं बाधपर्यायाः तत्फलं वा विवक्षितं। अन्यद्वा नाद्य इत्याह बाधपर्यायस्येति। बाधपर्यायो बाधतुल्यः। बाधनियत इति यावत्। तत्फलमपि भ्रमनिवृत्तिः। व्यवहारनिवृत्तिश्च तेषामनुपलंभादित्यर्थः द्वितीये आह इतरस्त्विति। तस्य मिथ्यात्वं प्रत्यप्रयोजकत्वात् इत्यर्थः। व्यतिरेकव्याप्तिसिद्धिरित्यर्थः। बहुधेति। अन्योन्याभावान्त्यन्ता भाव भेदेनेति भावः। सर्वन्यत्वादित्यन्योन्या भावघटितासिध्युद्भावनं सर्वत्र स्वयमपि अत्यन्ताभाव घटितासिद्ध्युद्भावनमेवमिति। सर्वमिवमिति व्यतिरेकासिद्धिरित्यर्थः। यन्न सत्यं तदनुवर्तत इत्यसिद्धिमेव आनुपूर्व्येण सुश्लिष्टबहुभ्रमेष्वारोपितायां एकस्यां नीलरज्जौ व्यभिचारादिति भावः। एतेनेति। भिन्नत्वं ब्रह्मणि व्यभिचारि। क्वाचित्कत्वकादाचित्कत्वे विरुद्धे। बाध्यत्वमसिद्धं अजडत्वं दृश्यत्वानुमाने दृग्व्यतिरेक कल्पदूषणेन निरस्तं। आदिपदेन परिच्छिन्नत्वादि परिग्रहः। सङ्घातोन्मीलितं- मूलतच्छिन्न संघात मित्यर्थः। आहिताग्नित्वात् निष्ठायाः परनिपातः। तर्कश्चेति। सोपाधिकतया व्याप्तिशून्यत्वादा भासइत्यर्थः ॥

वत्सकुलजलधिकौस्तुभेन नृसिंहगुरुसुतेनसिंहदेवेन कृतायां शतदूषणीटीकायां षोडशो वादस्समाप्तः ॥

॥ अथ दृश्यसम्बन्धानुपपत्तिपरिहारवादः सप्तदशः ॥१७॥

विभ्राणमात्मनि सदा महतीं विभूतिं देहेन तन्मयनिदर्शितभूषणास्त्रम्।
आलिङ्गितं कमलया मम चित्तवृत्तेरालम्बनं भवतु दैवतमद्वितीयम्॥

यत्तु-आत्मख्यातिवादिभिरार्जितं ग्राह्यलक्षणायोगाख्यं तर्कं भिक्षित्वा दृग्दृश्ययोस्सम्बन्धानुपपत्तिरिति नामान्तरेण पठन्ति; तदपि सम्बन्धस्याबाधितप्रत्यक्षसिद्धत्वादेव निरस्तम्। आहुश्च- ''उक्तं तु सौगतैर्ग्राह्यलक्षणाभावलक्षणम्। अन्ये दृग्दृश्यसम्बन्धाभावमाहुर्निरासि तत्'' । इति।

ननु कोऽसौ सम्बन्धः? न तावत्संयोगःदृशेरद्रव्यत्वात्। द्रव्यत्वाभ्युपगमेऽपि गुणादिभिस्सह तत्सम्बन्धस्य संयोगत्वायोगात्। नापि समवायः, आत्मधर्मस्य ज्ञानस्यार्थे तदयोगात्। न चार्थानामेव ज्ञाने समवायः, तेषां बाह्यत्वात्; अतद्धर्मतयैव प्रतीयमानत्वाच। न च रूपरसयोरिवैकार्थसमवायः, उभयाश्रस्यैकस्यानुपलम्भादिनिरस्तत्वात्। नाप्येकान्तः करणसंक्रमः, निर्विकारायाश्चित्तेस्संक्रमाख्य परिणामायोगात्। विवर्तपक्षे तु दृग्दृश्यसम्बन्धस्य मिथ्यात्वावश्यंभावात्। न त्व(चा)र्थस्याप्यन्तःकरणे संक्रमः, बहिरेवोपलभ्यमानत्वात्। अन्तःकरणस्य विषयस(स्व) रूपवृत्तियोगो विषयसंक्रान्तिरिति

ननु दृश्यत्वेन प्रपंचमिथ्यात्वे साध्यमाने अस्य (अ) प्रयोजकत्वं दूषणमुक्तं। तदयुक्तं। दृश्यस्य मिथ्यात्वाभावे दृकसंबन्धानुपपत्त्या दृश्यत्वमेव न स्यादिति तर्कस्य सत्वादित्याक्षेपसंगत्या दृग्दृश्य संबन्धं निरूपयन् वादार्थं संगृह्णाति। विभ्राणमिति। महतीं विभूतिमात्मनि दिव्यात्मस्वरूपे सदा बिभ्राणं तन्मयेति प्रकृत्यादिविभूतिमयत्वेन निदर्शितं अस्त्रभूषणाध्याये प्रतिपादितं भूषणानि चास्त्राणि च ''जातिरप्राणिना'' मित्येकवद्भावः। देहे -दिव्यमंगळविग्रहे सदा बिभ्राणमित्यनुषंगः। कमलया सदालिंगितं सदेत्युक्त्या प्रपंचसत्यन्वमभिप्रेतं। चित्तवृत्तैरालंबनमित्यनेन सत्ययोः दृग्दृश्ययोः संबन्धो वादार्थस्सूचितः।

आत्मख्यातिवादिनो योगाचारमतस्थाः। त एवमाहुः बाह्यार्थस्य सत्ये संबंधाद्ययोगात् ग्राह्यत्वं न संभवति। तस्माद्वाह्यार्थो नास्तीति पठन्तीति मायिन इति शेषः।

उक्तंत्विति। संबन्धानुपपत्त्या ग्राह्यत्वं नास्तीति सौगता आहुः। मायिनस्तु मिथ्यात्वमाहुः।

शब्दभेदमात्रं नार्थभेद इति भावः। प्रत्यक्षस्याबाधितत्वमसिद्धमिति शंकते।नन्विति। गुणादिभिरिति। न च तत्र संयुक्तसमवायादिस्संबन्धः। अननुगमत्वादारोपग्रहणदशायां स्पर्शनस्यापि ग्रहणप्रसंगाच्च। नापि समवाय इति। तत्संभवे प्रमाणाभावादिति भावः। किं च ज्ञानार्थयोरन्यतरस्मिन् समवायः उत एकस्मिनधिकरणे। आद्येपि किं ज्ञानस्य अर्थे समवायः आहोस्विदर्थस्य ज्ञानेन नाद्य इत्याह आत्मधर्मस्येति द्वितीये आह नचार्थानामेवेति। तेषां बाह्यत्वादिति। घटादीनां ज्ञानव्यवहितदेशवृत्तित्वेन ज्ञानवृत्तित्वासंभवादित्यर्थः। प्रथमद्वितीयकोटिं दूषयति। न चेति। संक्रमः किं परिणामः किं वा विवर्तः। आद्ये आह। निर्विकाराया इति। द्वितीय्ये आह विवर्तेति। विवतोहचध्यासः। अध्यस्तायाः दृशो मिथ्यात्वे तत्संबन्धस्यापि मिथ्यात्वमिति भावः। ननु संक्रमो न संबन्धः येन बाहयार्थानां न स्यात्। किन्तु अन्तःकरणवृत्तिरूपपरिणामविशेष इत्याशंकते। अन्तः करणस्येति। विषये वैधर्मिण इति। विषयवैधर्म्यं उत्तर

व्यपदिश्यत इति चेन्न; विषयविधर्मिण्या वृत्तेर्विषयसारूप्यस्यानुपलम्भनिरस्तत्वात् । गौरिति ज्ञानं गौरित्यर्थ इत्यर्थसारूप्यं प्रत्यक्षसिद्धमिति चेन्न; तयोः पृथगर्थत्वात् । गोत्वविशिष्टमर्थं प्रकाशयज्ज्ञानं गौरिति ज्ञानमिति व्यपदिश्यते । गोत्वविशिष्टार्थस्तु गौरित्यर्थ इति । अन्यथा गौरिति शब्द इत्यत्रापि शब्दस्यार्थसारूप्यप्रसङ्गात् । तथा चेदमर्थसारूप्यवादिनो वेतालस्य वैरूप्यायैव जायते । विषयोपरागापरनामकसंभिन्नवृत्तिमदन्तःकरणभेदाग्रहजनितातात्त्विकधर्मयोगाभिमान एवोपलब्धिनामा चितेर्विषयसम्बन्ध इति चेन्न; प्रत्येकं सार्वत्रिकाणां चैतन्यस्वरूपाणामनन्तान्तःकरणसन्निधानाभ्युपगमेन पुरुषबहुत्वस्थापकभोगप्रतिनियमादिभङ्गप्रसङ्गात् । नच प्रत्यात्म समवेतमदृष्टादिकं नियामकं किमपि तैरिष्यते, अन्तःकरण (गत)स्य तु साधारण्यं दुष्परिहरम्, अनादिसामग्रीस्वभावादेव कश्चिद्भोगप्रवाहः कंचित्प्रति भवतीति चेन्न; पूर्वपूर्वसामग्र्या अपि सर्वसम्बन्धित्वेन साधारण्ये तदधीनोत्तरनियमासिद्धेः।

नच तादात्म्यं दृशेर्दृश्यसम्बन्धः, जडत्वाजडत्वादिविरुद्धधर्मप्रतिहतत्वात् । एकस्याश्च संविदोऽनेकविषयत्वदर्शनेन परस्परविरुद्धानेकतादात्म्ये तेषामपि मिथस्तादात्म्यप्रसङ्गात् । ततश्च विरोध एव जगति न स्यात् । इदं सर्वमिति सर्वावलम्बिबुद्धितादात्म्येनानन्ततत्सर्वैक्यप्रसङ्गेन विचित्रव्यवहारविलयप्रसङ्गात् । तथा च पुनरेकस्याप्यर्थस्य नर्तकीभ्रूलतादर्शनादिष्विवैकविषयसंविदैक्य प्रसङ्गेनास्मदिष्टापाताच्च।

प्रत्यक्षसिद्धमित्यर्थः । गौरिति ज्ञानमिति । वृत्तिरत्र ज्ञानं विवक्षितं । तयोरिति । शब्दसारूप्यमेव नार्थसारूप्यं । प्रत्यक्षविषय इत्यर्थः । सारूप्याभावमुपपादयति । गोत्वेति । गौरिति शब्द इति । गकारौकारात्मकशब्दइत्यर्थः । ननु विषयोपलब्धिरेव ज्ञानस्य विषयेण संबन्धः । नः चक्षुरादिद्वारा विषयदेशस्यापि तदाकार प्रसृतिरूपवृत्तिमदन्तःकरणसंबंधात् भेदग्रहाणाभावे तद्वृत्तिमत्वाभिमानःचैतन्ये सौर विषयोपरागविषयविषयिभावाख्यो दृग्दृश्ययोः संबन्धो भवत्विति सांख्यमतं शंकते । विषयोपरागेति । प्रत्येकमिति । चितिस्वरूपत्वात् सर्वात्मनां सर्वविषयसंभिन्नवृत्तिमदन्तकरणाभेदाभिमानरूप विषयोपलब्धिसंभवेन सर्व सुखदुःखाद्यनुभवः सर्वेषामप्यविशिष्ट इति भेदसाधकसुख दुःखानुभवव्यवस्थाविरहात् पुरुषबहुत्वं सिद्धमित्यादिनस्यादि यदित्यर्थः । ननु यदृष्टोपार्जितं सुखदुःखादि तेनैव अनुभूयते संबंधे सत्यपि नान्यैरिति व्यवस्था स्यादित्यत्राह न चऽप्रत्यात्ममिति । सांख्यैरदृष्टसुखादुःखादेरन्तःकरणगतत्वादित्यर्थः । अस्तु तहर्चन्तःकरणगतं नियामक मित्यत्राह अन्तःकरणस्यत्विति । अविशेषादिति भावः । ननु भोगसामग्रयास्तदीयत्वात् भोगस्य तदीयत्वं तस्यास्तदीयत्वं तु पूर्वपूर्वसामग्र्याः तदीयत्वादिति शंकते । अनादिसामग्रीति । पूर्वपूर्वेति सामग्रीप्रवाहभेदा असाधारण्यप्रयुक्त भोग प्रवाह साधारण्यं न संभवतीति भावः ॥

विषयेण ज्ञानस्य तादात्म्यमेव संबन्ध इति जैनमतं शंकते । न च तादात्म्यमिति । परस्परविरुद्धेति । परस्परात्मत्वायोग्य तेजस्तिमिरसुखदुःखशीतोष्णादीनामित्यर्थः । विरोधो भेदः । नत्वेकज्ञानविषयत्वं । नास्ति तत्र विरोधस्सिध्यतीत्यत्राह इदं सर्वमिति । नन्वस्तु विरोधाभावः को दोष इत्यत्राह

न च चित्राद्वैतम्, स्ववचनविरोधात्, नानात्वं चित्रत्वं तत्प्रतिपेधस्त्वद्वैतमिति। चित्ररूपं तु नानारब्ध (मितिस्थ) मेकमिति न विरोध इति निर्वहन्ति। एवं चित्ररसादिष्वपि। नानारूपसमुदाय एव वा। नचात्रारम्भस्समुदायो वा, अनभ्युपगमात्। नच चित्रत्वं मिथ्या, अस्मन्मतप्रसङ्गात्। निराकारमपि ज्ञानं वासनावैचित्र्यादेकाकारमनेकाकारमिव भातीति चेत्; तथाऽपि मिथ्याभूतस्याकारस्य सत्यज्ञानेन तादात्म्यमनुपपन्नमिति ज्ञानाकारस्य बाह्यत्वमेष्टव्यम्। तथाऽपि ज्ञान एवायमाकाराध्यास इत्यान्तरत्वमिति चेन्न; एतावदात्मख्यातेरस्माभिरपीप्यमाणत्वात्। नच स्वजन्यज्ञाने स्वाकारसमर्पकत्वमेव ग्राह्यत्वम्। अन्याकारस्यान्यत्र समर्पयितुमशक्यत्वात्। मृगमदवासनासंक्रमेऽपि हि द्रव्यसंक्रम एव। अनेनैव न्यायेन ''यस्मिन्नेव हि सन्तान'' इत्यादिकमपि निरस्तम्। कार्पासरक्ततादिषु पाकजगुणान्तरारम्भः। कथंच विनश्यताऽर्थेनानुत्पन्ने ज्ञाने स्वाकारसमर्पणम्? न चाकारः

विचित्रव्यवहारेति। भेदव्यवहार इत्यर्थः। पूर्वं ज्ञानैक्यविषयैक्यमासादितं। इदानीं विषयैक्येन ज्ञानैक्यमापादयति तथाचेति। नर्तकी भ्रूलतायां अनेकज्ञानवत् ज्ञानेषु एकस्यार्थस्य विषयत्वसंभवात् तद्गोचरज्ञानात् ऐक्यं स्यात् एकार्थतादात्म्यादित्यर्थः। केचित्तु नर्तकी भ्रूलतादिष्विवेति पठन्ति। तदा अनेकज्ञानविषयत्वसंभवात् इत्याध्याहृत्ययोज्यं। नन्वर्थानां स्वतस्सिद्धत्ववैचित्र्यानुरोधेनैव एकज्ञानतादात्म्य प्रयुक्तवैचित्र्यमस्तु। एक ज्ञानानामप्यर्थैक्यमस्तु। यथा नीलत्वपीतत्वादिवैचित्र्ये सत्येव चित्ररूपस्यैक्यमिति शंकांनिराकरोति।

न च चित्राद्वैतमिति। रूपदेर्व्याप्यवृत्तित्वाभावमतेनाह चित्ररूपंत्विति। तथा च नैकस्य रूपस्य नीलत्वादि वैचित्र्यमिति भावः। अतिरिक्तरूपांगीकारेपि वैचित्र्यप्रतीत्यर्थं रूपसमुदायस्यावश्यकत्वात् नरूपांतरकल्पनेति व्याप्यवृत्तित्वाभाव मतेनाह नानारूपेति। भिन्नावच्छेदनैकाधिकरणे नीलादीनां वृत्तिसंभवात् समुदायभाव इति भावः। ननु विजातीय रूपैः चित्ररूपांतरवत् अत्राप्यर्थभेदज्ञानैकत्वाभ्यां ज्ञानभेदार्थैकत्वाभ्यां वा चित्राद्वैतमिति किंचिदारभ्यतां तत्समुदाय एवं वा चित्राद्वैतमस्तु इत्यत्राह नचात्रेति। भेदाभेदारब्धः कश्चिद्धर्मोनभ्युपगत एव। भेदाभेदयोरवच्छेदकभेदेनापि एकत्रवृत्त्यभावादेकाधिकरण संबंधप्रयुक्त समुदायिभावोपि अनभ्युपगत इति भावः। अस्मिन्मतेति। अर्थानां भेदस्य दृश्यत्वंहि न वस्तुतो दृशितादात्म्यात्। सत्यमिथ्याभूतयोः तदयोगात् अतस्तत्राध्यासिक एव संबन्धे वाच्य इति सर्वत्रापि तथैव स्यादित्यर्थः। ज्ञानस्वरूपात्मैवार्थाकारेण ख्यायते। अतः सर्वोप्यान्तर इति न तद्ज्ञानानुपपत्तिरिति योगाचारमतमाशंकते निराकारमेवेति। बाह्यत्वंभेदः। एतावदिति। अस्मभिरपि ज्ञानाभेदोऽर्थस्य नेष्यते ज्ञाने अध्यासस्तु इष्यत इति अर्थाध्यास एव ज्ञानार्थयोस्संबंध इति मदिष्ट सिद्धिरिति भावः। ''भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः। हेतुत्वमेवं युक्ति ज्ञानाकारार्पणक्षमं'' । इति सौत्रांतिकमतमाशंक्य निराकरोति। नचेति। नन्वंकुरादिपरंपराया लाक्षारसात्ततत्कार्पास बीज जन्यकार्पासल्लाक्षारसिम्नः संक्रमो दृश्यत इत्यत्राह अनेनैवेति। ''यस्मिन्नेवहि संतानेनाहिता कर्मवासना। फलं तत्रैव बध्नाति कार्पासेरक्तता यथा'' इत्येतदपि गुणमात्रस्य संक्रमो दृष्ट इत्यनेनेत्यर्थः। तर्हि कार्पासतूलस्य कथं रक्तिमेत्यत्राह कार्पासेति। लाक्षारसजन्यसंस्कारपरिपाकाद्रक्तिमांतरं जायते। न तु लाक्षारक्तिम्नस्संक्रम इत्यर्थः। कथं चेति।

स्थिरस्त्वयेष्यते, येनाकारिण्यतीतेऽपि परस्मिन्वर्तेत। तत्स्वरूपमिथ्याकारयोग एव तत्संक्रम इत्युच्यत इति चेन्न; मिथ्याकारेण सह सत्यस्य सम्बन्धायोगात्। एवमालम्बनस्य स्वाकारसमर्पकत्वायोगात्तद्धेतुत्व मात्रेण ग्राह्यत्वेऽधिपतिप्रभृतीनामपि ग्राह्यत्वप्रसङ्गः।

नच ज्ञानस्वरूपमेवार्थस्य तत्सम्बन्धः। सम्बन्धसम्बन्धित्वलक्षणविरुद्धधर्माध्यासप्रसङ्गात्, विषयविशेषनियामकाभावाच्च। न हि तत्कंचित्प्रत्यज्ञानमस्वरूपं वा। न हि नीलं कंचित्प्रत्यनीलम्। नच हेतुत्वमात्रमेव नियामकम्; इन्द्रियादेरपि विषयत्वप्रसङ्गात्; अतीतादेरविषयत्वप्रसङ्गाच्च। अदृष्टादिवशात्कर्मकारकं विषय इति चेन्न; नित्यतया कारकशून्यस्येश्वरज्ञानस्य निर्विषयत्वप्रसङ्गात्, अस्मदादिज्ञानस्याप्यतीतानागतेरसत्त्वादकारकैरसम्बन्धप्रसङ्गात्, भ्रान्तिविषयस्यासत्त्वादकारकत्वेन भ्रान्तेर्नित्यनिर्विषयत्वप्रसङ्गाच्च। मुक्तस्य च विधूतपुण्यपापस्याज्ञानमिच्छतोऽदृष्टादेर्नियामकस्यासम्भवात्। नचार्थगतप्राकटयजननमेवार्थसंबन्ध इति युक्तम्; ज्ञानातिरिक्तस्यार्थप्रकाशस्यानुपलम्भादिबाधात्, तज्जनने च ज्ञानस्यार्थसम्बन्धान्तरमन्तरेणासामर्थ्यात्, अन्यथाऽन्यत्रापि तदारम्भप्रसङ्गात्, अतीतादिषु निराधारप्राकटयजननायोगाच्च।

अर्थस्य क्षणिकत्वात् विनश्यतात्वेन समर्पणं वक्तव्यं तत्कालेनानुवृत्तेरनुत्पन्ने ज्ञानेनाकार समर्पणं संभवति आश्रयाभावादिति भावः।

नन्वर्थाकारस्य ज्ञाने वर्तनमेव समर्पणं। तच्चार्थे नष्टेपि संभवतीत्यत्राह नचाकार इति। संबन्धायोगादिति। सत्यभूत संबन्धायोगादित्यर्थः। मिथ्याभूतसंबन्धस्याभ्युपगमे स्वाकारसमर्पकत्वरूपं ग्राहचत्वं। तस्य मिथ्याभूताकारस्य नास्तीति तस्याग्रहात् बाहयार्थस्यानुमानं नस्यात्। अतो न स्वाकार समर्पकत्वं त्वमिति भावः। आलंबनं-विषयः अधिपतिरिन्द्रियमिति बौद्धपरिभाषा॥

संबंधसंबन्धित्वेति। "संबंधिभ्यां भिन्नस्तौ आश्रितौ एकश्चेति" तल्लक्षणात्। संबन्ध्यभिन्नस्य संबन्धत्वं विरुद्धमित्यर्थः। तमेवोपपादयति तर्हीति। नहि नीलमिति ज्ञानस्य किंचित्प्रतिज्ञानत्व स्वरूपत्वयोरभावः। तथा सति नीलस्यापि किंचित्प्रतिशुक्लत्वप्रसंग इत्यर्थः। ननु ज्ञानस्य स्वजनकापेक्षया संबन्धत्वं अतो घटज्ञानस्याहेतु पटापेक्षया न संबन्धत्वमिति शंकां निराकरोति न च हेतुत्वमात्रमेवेति। हेतुत्वरूपधर्मसंबंधित्व नियामकमित्यर्थः। अतीतादेरिति। हेतुत्वाभावादेरिति भावः। नन्वदृष्टादिवशात् कर्मकारकेणैव ज्ञानसंबन्धः। इन्द्रियादि च कर्मकारकं अतीतादिकमपि कर्मैव। अतीतं जानामीत्यादि व्यवहारादतोऽस्यविषयत्वमिति शंकते अदृष्टादीति। अदृष्टशब्दः पुण्यपरः आदिशब्देन दुरदृष्टपरिग्रहः। ननु जन्यज्ञान एवायं नियमः। ईश्वरज्ञानस्य नियामकाभावात् सर्वविषयत्वमित्यत्राह। अस्मदादीति। अतीतं जानामीति व्यवहारस्तु गौण इति भावः। भ्रान्तीति। भ्रान्तिज्ञानस्य जन्यत्वे कर्मकारकेणैव संबन्धनियमाद् अकर्मकारकेण रजतादिना संबन्धाभावात् निर्विषयतापत्तिः। अकर्मकारकेणापि संबंधे तु ईश्वरज्ञानवन्नित्यत्वं स्यादित्यर्थः। अन्यज्ञानस्योक्तं अदृष्टादिवशात् विषयनियमव्यभिचारेण दूषयति मुक्तस्य चेति। कौमारिलमतमाशंकते न च विषयेति। अन्यथेति। संबंधांतरमंतरेणापि प्राकटचजननियमाकारे, प्राकटच विनापि नियमस्यादित्यर्थः।

नच विषयविषयिभावाख्योऽयमपरस्सम्बन्धः, तस्यापि नियामकान्तराभावे सार्वत्रिकत्वप्रसङ्गाच्च। तस्यापि द्रव्यादिषट्कान्तर्भावे सामान्यादिभिस्सह तत्संवेदनस्यासम्बन्धप्रसङ्गात् । बहिर्भावे त्वभावत्वादिप्रसङ्गात् । भूषणकारव्यतिरिक्तानामपसिद्धान्तापाताच्च।

एव प्रकारान्तरेष्वपि दूषणमविनाभूतम् । सर्वथाऽप्यतीतानागतयोर्वर्तमानज्ञानसम्बन्धस्य दुर्निर्वहत्वात् । नहि निराधारस्सम्बन्धस्सम्भवति । अन्यथा भविष्यद्वृष्ट्यादिभिरिदानीमपि सस्यादिपोषणप्रसङ्गात् । यश्चासौ विषयविषयिभावात्मा दृग्दृश्ययोस्सम्बन्ध इष्यते, किं ताभ्यामसम्बद्ध? उत सम्बद्धः? उतोभयात्मा? आहोस्विदनुभयात्मा? अन्यो(न्यात्माकारो)वा? पूर्वत्र तयोस्सम्बन्धो न स्यात् । तदसम्बन्धस्यापि तत्सम्बन्धत्वे सर्वस्यापि सम्बन्धस्य सर्वसम्बन्धत्वप्रसङ्गात् । उत्तरत्रापि सम्बन्धान्तरेण, न वा? आद्येऽनवस्था । द्वितीये त्वसम्बद्धत्वम् । न हि सम्बन्धरहितमपि सम्बद्धमिति समस्ति । स्वतो मिलितोऽयं सम्बन्ध इति चेन्न; सम्बन्धिनोरेव स्वतो मेलनस्य लघुत्वात् । नामान्तरेण च मेलनमेव नास्तीत्युक्तिः स्यात् । संबन्धिन एव स्वसंबन्धात्मकत्वे व्याघातस्य पूर्वोक्तत्वाच्च । उभयानुभयादि पक्षास्तु व्याघातादिनिरस्ता एव । अनुभयपक्षे चास्मदिष्टानिर्वचनी (यतावादः) यापातः स्यात् । किंच विषयविषयिभावाख्यसंबन्धो द्विष्ठः, एकनिष्ठो वा? नाद्यः, अन्योन्यस्मिन्नन्योन्यत्वाभावेन द्वयोरपि तस्यासिद्धेः । सिद्धौ वा द्वयोरपि विषयत्वविषयित्वयोः प्रसङ्गात् । अत एव न द्वितीयः, संबन्ध रूपताव्याघाताच्च । येनात्मनाऽसौ संबन्धः क्वचिद्वर्तते किं तेनैववात्मनाऽन्यत्रापि? उत ततोऽन्येन? आद्ये

विषयविषयिभावः पदार्थांतरमिति पक्षमाशंकते । न च विषयेति । तस्यापीति । संबन्धांतररूप नियामकान्तरस्वीकारे अनवस्थेति भावः । सामान्येति । सामान्यविशेष समवायानां धर्मांतरानाधारत्वात् सुतरां जन्यधर्माधारत्वाच्चेति भावः । अभावत्वादित्यादिशब्देन प्रागभावादिप्रयुक्तानादित्वादिग्रहः । पदार्थ सप्तकातिरिक्तत्वादित्यत्राह । भूषणेति । भूषणकारस्त्वतिरिक्तमंधकारादिस्वीकृतवानिति भावः । नन्वस्तु भूषणपक्षवदतिरिक्तपक्षवदित्यत्राह एवमिति अदृष्टं विशदयति सर्वथेति । अन्यायेति । जलाभावेपि जलसंबंधरूपसेकसंभवादिति भावः । उभयात्मा संबंधात्मेत्यर्थः । अन्यात्मेति । संबंधादिचतुष्कादिविनिर्मुक्त इत्यर्थः । तयोरिति । विषयविषयिणोस्संबंधो न स्यादित्यर्थः । द्वितीयेत्वसंबंधत्वमिति । विषयविषयिणोस्संबन्धत्वमित्यर्थः । संबंधरहितमपीति । तत्संबंधरहितस्य संबन्धस्य तत्संबन्धत्वं नास्ति यथा मेरुगतसंबंधस्य न विंध्यसंबन्धत्वमित्यर्थः । मिळितस्संबन्ध इत्यर्थः । नामांतरेणेति । स्वतो मिलितमिति मिळितशब्देन मेळकरूपसंबन्धो नास्तीत्युक्तमित्यर्थः । व्याघातस्येति । संबंधसंबंधित्वलक्षणविरुद्ध धर्माध्यासस्येति भावः । संबंधत्वासंबंधत्वयोस्सबंधि भिन्नत्वात् संबंधभिन्नयोः परसार विरोधात् स्याद्व्याघात इत्याह उभयेति । अनुभयेति । संबंधासंबंधवैलक्षण्यवत् सदसद्वैलक्षण्यस्यापि व्याघाताभावात् तदपि सिध्येदित्यर्थः । अन्योन्यस्मिन्निति विषयत्वविशिष्टं विशिष्टत्वं विषयविषयिभावः । विषये विषयित्वाभावात् विषयिणि ज्ञानविषयत्वाभावात् द्वयोरपि न स्यादित्यर्थः । अत एवेति । यत्रैकस्मिन् वर्तते तत्र विषयत्वविषयित्वयोः द्वयोरपि प्रसंगादित्यर्थः । संबंधरूपेति ॥ द्विनिष्ठत्वाभावादिति भावः । येनात्मनेति । विषयविषयिणोर्यः स्संबंधः विषयविषयिणोर्मध्ये

द्वयोरपि विषयत्वादिप्रसङ्गः। द्वितीये कथमेकस्य व्यात्मकता? द्वयो (तयो) रप्यात्मनोर्द्विष्ठत्वा भावात्। सम्बन्धरूपतात्यागे तदात्मनोऽपि सम्बन्धस्य तत्त्वं न स्यात्। एवमन्यान्यपि सम्बन्धसामान्यविकल्प दूषणान्यत्रानुसन्धेयानि।

ननु किं सम्बन्धान्तरगवेषणेन? स्वत एव किंचिज्ज्ञानं कस्यचिदेवेति नियतस्वभावमुप लम्भसिद्धमिति चेन्न; नियामकमन्तरेण नियमेऽतिप्रसंगात्। कस्यचिदिति सम्बन्धविभक्तेर्मिथ्या विषयत्वप्रसंगाच्च। तन्निरूप्यस्वभावतया स्वसामग्र्या जन्यत इति चेन्न; ईश्वरज्ञानस्य तदभावेन निर्विषयत्वप्रसंगात्। सामग्र्या हि स्वरूपमुत्पादयितुं शक्यम्, न तु (त्व) सम्बन्धिनिरूप्यत्वापादनम्, सर्वाकारैस्सर्वनिरूपणापादनप्रसंगात्। सम्बन्धरहितयोरपि भावाभावयोरिव विषयविषयिणोर्निरूप्य निरूपकभाव इति चेन्न; सम्बधरहितयोर्भावाभावयोरपि तात्त्विकस्य निरूपणस्यास्माभिरभ्युपगमात्। तथाऽपि दोषादिसामग्रीवैचित्र्यादेवासम्बन्धविषयनिरूप्यत्वं शुक्तिरजतादिज्ञानोत्पत्तौ दृष्टमिति सर्वत्रापि तथाऽभ्युपगम्यत इति चेत्; आगतोऽसि पन्थानम्। विषयमिथ्यात्वादेव हि तत्र विषयसम्बन्धाभावः, तथाऽत्रापि स्वीकर्तव्यमिति। अत एकस्यैव संविदात्मनोऽनाद्यविद्यादोषवैभवादविचारितरमणीयसंबन्धे तदाकारावभासोऽभ्युपगन्तव्य इति।

अत्रोच्यते-किं दृग्दृश्ययोस्संबन्धानुपपत्त्या तदुपपादनार्थं दृश्यमिथ्यात्वकल्पनमित्यर्थापत्ति

अन्यतरस्मिन् येनात्मना विषयत्वात्मना विषयित्वात्मनावा वर्तते तत्र अन्यस्मिन्नपि तेनैवात्मना वर्तते उतान्यात्मनेति विकल्पार्थः। कथमेकस्येति। विषये विषयात्मना विषयिणि विषयत्वात्मना ज्ञानार्थसंबंधस्य वृत्त्या भावो विषयत्वविषयित्वयोर्भेदादेव वाच्यः। तथाच ज्ञानार्थसंबंधस्य तादृशोभयात्मकत्वसंभवात् विषयेपि विषयत्वात्मना विषयिण्यपि विषयित्वात्मनां वृत्तिर्न संभवतीत्यर्थः तयोरपीति। विषयत्वस्य विषयित्वस्य च एकैकमात्रवृत्तित्वात् संबंधलक्षणाभावात् तदभिन्नस्यापि विषयविषयिभावाख्यस्य दृग्दृश्य संबंधस्य संबंधत्वं न स्यादित्यर्थः। एवमन्यान्यपीति। सामान्यं साधारण धर्माः। संबंधि भेदतदुभयाश्रयत्वैकत्वानि। तथा चदृग्दृश्य संबंधसंबधिभ्यां भिन्नः उत न। द्वितीये संबन्धत्वमेव हीयेत। आद्येपि किमनाश्रितः उतान्यमाश्रितः उभयाश्रितो वा। आद्ययोर संबंधत्वं। अंत्ये किमयं नाना उतैकः। आद्ये न संबंधता। अंत्ये अतीतानागतयोः संबंधत्व प्रसंग इति भावः।

कस्यचिदिति। ज्ञानस्वरूपस्य संबंधितया संबंधित्वाभावात् षष्ठ्यर्थानुपपत्तिरिति भावः। सामग्र्य सामगचवन्नियामिकेत्याशंकते, तन्निरूप्येति। दोषांतरमाह सामग्र्या हीति। न हि संबंधाधीनस्य तन्निरूप्यत्वस्य संबंधाभावेप्यापादने सामग्रीसमत्वादपितु कार्यस्वरूपस्योत्पादन इत्यर्थः। सर्वाकारैरिति। अविद्यमानधर्ममादाय निरूपणे विशेषाभावात् अभावत्व प्रतियोगित्वाधाराधेयभावकार्यकारण भावत्वादिना निरूपणस्यादित्यर्थः। अस्माभिरनभ्युपगमादिति। दृष्टांतासिद्धिरितिभावः। रजतादि ज्ञानस्यासद्विषयत्ववादिस्वमतावष्टंभेन शंकते तथापीति। असता संबंधाभावादिति भावः। अविचारितरमणीयसंबंध इति। सतीति शेषः। तत्र ज्ञाने अध्यस्तानां तत्तत्पदार्थाकाराणां भानमिति भावः।

विवक्षा? यद्वा विकल्पासहत्वेन सम्बन्धाभावं सिद्धं कृत्वा तेनैव सम्बन्धिनोऽप्यभावसाधनम्? उत दृश्यसत्यत्वे तस्य संवेदनसंबन्धाभाव प्रसङ्ग इति प्रपञ्चमिथ्यात्वसाधकानुमाने श्रुत्याद्यनुग्राहकतर्क विवक्षा? इति।

नाद्यः, अन्यथैवोपपत्तेः, परिदृश्यमानार्थस्यानुपपत्तौ प्रसज्यमानायामुपपादककल्पनं ह्यर्थापत्तिः। न च दृग्दृश्यसम्बन्धस्योपपादकं दृश्यमिथ्यात्वम्, अपि तु तत्प्रतिक्षेपकमेव। अत उपपादककल्पनाप देशेनानुपपत्तिकल्पनमेवेत्यायातम्। मिथ्याभूतसम्बन्धस्योपपादकमेवेति चेन्न; तथाविधस्य तस्यादर्शनेन तदुपपादकान्वेषणायोगात्।

नापि द्वितीयः, सम्बन्धाभावेऽपि मेरुमन्दरयोश्शशविषाणयोश्शाखाचन्द्रयोरिव च सम्बन्धित्वाभिमतयोस्सत्त्वाविघातात्। अन्यथा दृश्यवद्दृशोऽपि, तस्या एव वा मिथ्यात्वं किं न कल्प्यते? दृगधीनसिद्धेर्दृश्यस्य दृगभाव इव तत्सम्बन्धाभावे च मिथ्यात्वं सिध्यति, दृशेस्तु स्वसंवेदनसिद्धतया दृश्य सम्बन्धाभावेनासत्यत्वमिति चेन्न; यथा दृशो दृशिकर्मत्वाभावेऽपि स्वसंवेदनेन सिद्धिस्तद्वद्विश्वस्यापीति वदतः कः प्रतीकारः? स्वात्मनि क्रियाविरोध इति चेत्, तुल्यम्। संवेदनेऽपि स्वव्यवहारे स्वगोचरसंविन्नैरपेक्ष्यमात्रविवक्षायां न वाध इति चेत्, घटादावपि तथाऽस्तु। संविद्विषयत्वं घटादेः प्रतीयत इति चेत्; किमतः? स्वव्यवहारेऽन्यसापेक्षत्वमिति चेन्न; संवित्सम्बन्धस्य त्वयैव प्रतिक्षिप्तत्वेन तदधीनव्यवहारत्वायोगात्। ततश्च परिशेषात् घटादेरन्य निरपेक्षव्यवहारत्वसिद्धेस्तावन्मात्ररूपं स्वसंवेदनं फलितमेव। घटादिस्वरूपवत्तस्य स्वसंवेदनमपि नोपलभ्यत इति चेत्; संविदो वा किं स्वतस्स्वयंप्रकाशत्वमुपलभ्यते? अनुभूतित्वाद्यनुमानादिभिस्साध्यत इति चेन्न; घटत्वाद्यनुमानैरपि विश्वस्वप्रकाशत्वसाधनप्रसङ्गस्याप्यवेद्यत्वनिराकरणे स्थापनात्। किंच अनुमानविषयत्वाङ्गीकारे कथं

अथ सिद्धान्तः अन्यथैवेति। तथा च नार्थापत्तिरिति भावः। (प्रथमपक्ष निरासः) अर्थापत्तिरपि भवत्प्रतिकूलेत्याह परिदृश्यमानेति। तथाविधस्य मिथ्याभूतस्य (द्वितीयपक्ष निरासः) दृगभाव इति दृष्टांतयोक्तं। यथोक्तं यथा प्रमाणज्ञानाभावे मिथ्यात्वं तथा तत्संबंधाभावेपीत्यर्थः। स्वयंवेदिनं स्वप्रकाशः।

दृशिकर्मत्वाभावेपीति। दृशिकर्मत्वं सिद्धाव प्रयोजकमिति भावः। विश्वस्यापीति। स्वप्रकाशत्वमस्त्विति भावः स्वत्मनीति। साधकत्वं साध्यत्वं च भिन्नाश्रयमिति भावः घटादावपीति। स्वव्यवहारे स्वगोचरसंविन्नैरपेक्ष्यमस्त्वित्यर्थः। ननु घटादेस्संविदंतराधीनव्यवहारः प्रत्यक्षादिसिद्ध इत्याशंक्य निराकरोति। संविद्विषयत्वमित्यादिना। तावन्मात्ररूपमिति। स्वव्यवहारे अन्यनिरपेक्षत्वमित्यर्थः। घटादिस्वरूपवदिति। व्यतिरेकदृष्टांतः अनुभूतित्वाद्यनुमानादिभिरिति। अनुभूतिः स्वयंप्रकाशा अनुभूतित्वात् व्यतिरेकेण घटवदित्यनुमानादिभिरित्यर्थः। घटत्वादीति। घटः स्वयं प्रकाशः घटत्वात् व्यतिरेकेण पटवत् इत्यनुमानादिभिरित्यर्थः। सर्वदा प्रकाशादिसंगस्तूपरिष्टात् परिहरिष्यते। किं चेति। नचाध्यासिक संबंधः शक्यः। अनुमितावध्यासाभावादिति भावः। उपसंहरति। अत इति। मिथ्यात्वं प्रसंगो दुस्तर इति संबंधित्वविशेषादिति भावः। ननु दृश्यस्य सिद्धिः दृश्यध्यादध्यः तस्यहि मिथ्यात्वं न तु दृश इति प्रतिवंद्युद्भावनायोक्तं प्रसंजयति स्वत इति। तत एव स्वतस्सिद्धेत्यर्थः।

विषयविषयिभावसम्बन्धं विघटयसि? तद्विघटने वा कथं स्वप्रकाशत्वमेव साधयसि? अतो दृग्दृश्ययोस्सम्बन्धानुपपत्त्या दृश्यमिथ्यात्वेदृशोऽपि मिथ्यात्वप्रसङ्गो दुर्वारः। स्वतस्सिद्धतया तत्सत्यत्वे विश्वस्यापि तत एव सत्यत्वमवर्जनीयम्, अविशेषात्।

ननु भवतोऽपि संविदस्स्वयंप्रकाशत्वं घटादेर्दृगधीनसिद्धित्वं चाभिमतम्; अतः कथं प्रतिबन्ध्यवतारः? इत्थम् अस्माभिस्संवित्स्वयंप्रकाशकत्वस्य संविदन्तरवेद्यताभ्युपगमात्। यदि त्वयाऽपि तथेष्यते, ततस्तत्रैव विषयविषयिभावस्सिद्धः। यदि तत्रापि विषयमिथ्यात्वम्, ततस्स्वयंप्रकाशत्वमेव न स्यात्। धर्मरूपत्वात्तदाऽपि माभूदिति चेन्न; तत्परित्यागे स्वसंवेदनेन संवित्सत्यत्वस्थापनानुपपत्तेः। धर्मतामपहाय संवित्स्वरूपतया तदेव तिष्ठतीति चेत्; तर्हि स्वरूपमेव स्वप्रकाशत्वसाधकसंविदन्तरविषय इत्यायातम्। तथा सति विषयभूतायास्संविदोऽपि त्वदुक्तानुपपत्त्यैव घटादिवन्मिथ्यात्वमवर्जनीयम्। तन्मिथ्यात्वेऽपि तद्विषया संविदन्या स्वसंवेदनगुप्ता तिष्ठतीति चेन्न; तत्संवेदनेऽप्युक्तदोषानतिलङ्घनात्। अतस्संविदन्तरकर्मतागन्धरहितसंवित्स्वयंप्रकाशत्वे विश्वस्यापि तथात्वेन सत्यत्वप्रसङ्गो दुर्वारः। संविदोऽपि यथाकथञ्चिद्दृश्यत्वाभ्युपगमेऽपि तन्मिथ्यात्वप्रमङ्गेन दृश्यमिथ्यात्वकल्पनमशक्यमि (क्यं स्यादि) ति।

किंच यदि परिदृश्यमानस्सम्बन्धोऽनुपपन्नस्तदा सम्बन्धान्तरमेव दृष्टबाधेन कल्प्यताम्। न पुनस्सम्प्रतिपन्नस्वारसिकबाधरहितदृश्यबाधो युक्तः। सम्बन्धान्तरमपि कल्प्यमानमनुपपन्नमिव भातीति चेत्, किं दृश्यमिथ्यात्वं कल्प्यमानुपपन्नमिव भाति? यत्ते स्ववचनव्याघातादिकमापादयति। अनुपपन्नमपि गत्यभावादवलम्ब्यत इति चेत्, सम्बन्धसत्यत्वमप्यनुपपन्नमपि किं नावलम्ब्यते? अनुपपन्नत्वमेव

अस्माभिरिति। स्वसिद्धत्वं हि प्रमाणबलादभ्युपेत्यं प्रमाणं च संविदि वर्तति न तु घटादावित्यंगी क्रियते। भवद्भिस्तु प्रमाणाभावेप्यंगीकारे कथं व्यवस्थास्यादित्यर्थः। धर्मरूपत्वादिति। यद्यपि स्वप्रकाशस्यापि विषयत्वादेव मिथ्यात्वं वक्तुं शक्यं। तथापि दृशोपिमिथ्यात्वं वक्तुं तथोक्तमिति भावः। तर्हीति। यद्यपि पूर्वोक्तं संविन्मिथ्यात्वमभ्युपगम्य धर्ममिथ्यात्वापादकस्य परिहारकथनात् संविन्मिथ्यात्वं नापादनीयं तथाप्यत्यंताज्ञानस्फोरणाय पुनरापादनमिति भावः। तद्विषयेति संविद्विषयेति। संविद्विषयीभूता स्वयं वेदनमात्रसिद्धेरित्यर्थः। अत इति। स्वप्रकाशत्वस्य संविदन्तरवेद्यत्वे दोषस्योक्तत्वात् प्रमाणाभावेपि स्वप्रकाशत्वांगीकारे विश्वस्यापि स्वप्रकाशत्वं स्यादित्यर्थः। वदित्वमपि तथेष्यत इत्युक्तं अनूद्य दोषांतरमाह संविदोऽपीपीति। यथाकथंचित् स्वप्रकाशत्वादिविशिष्टरूपेण दृश्यत्वाभ्युपगम इत्यर्थः।

किं च यदि परिदृश्यमान इति। संयोगस्समवायश्चेत्यर्थः। अनुपपन्नमिव भातीति। तथा च संबंधांतरस्य कल्पयितुमशक्यत्वात् संबंधाभावे मिथ्यात्वमेव कल्प्यत इत्यर्थः। दृश्यमिथ्यात्वमिति। मिथ्यात्वकल्पनमेवानुपपन्नमित्यर्थः। स्ववचनेति। विश्वमिथ्येत्यत्र हि मिथ्यात्वस्यापि मिथ्यात्वस्यावश्यकतया प्रपंचसत्यत्वसिद्धेः विश्वमिथ्यात्ववचनं व्याघातमावहदित्यर्थः। आदिशब्देन प्रत्यक्षादि विरोधग्रहः। संबंधसत्यत्वमेवेति। स्वमतव्याघाताद्यभावादिदमेवयुक्तमित्यर्थः। अनुपपन्नत्वमेवेति। तथा च सत्यत्वस्याभावात् संबंधस्य मिथ्यात्वं पर्यवस्यतीत्यर्थः। मिथ्यात्व इति। दृश्यस्येति शेषः।

सत्यत्वाभाव इति चेत्; मिथ्यात्वेऽनुपपन्ने तदभावस्यावर्जनीयत्वात् । यथा सम्यग्रजतस्य मिथ्यारूपत्वानुपपत्तौ सत्यत्वम् । अतस्सम्बन्धोऽपि तथाभूतः कश्चिदिति नित्यमुपलम्भानुरोधेन तत्सत्यत्वस्थापने दृश्यस्याप्युपलब्धसत्यत्वाबाधोपपत्तेः, मिथ्यात्वस्य च स्वयमेवानुपपन्नत्वाभ्युपगमा दस्माकमनायासेनेष्टसिद्धिप्रसङ्गात्। अनुपपन्नत्वाभिमतपरपक्षाणामपि प्रतिषेधायोगाच्च। यथारुचि परिग्रह इति तु स्यात्। तथा च कृतं वैदिकत्वकञ्चुकवहनवृथाप्रयासेन।

न च तृतीयः, असत्यत्वपक्षेऽपि सम्बन्धानुपपत्तिप्रसङ्गेन प्रतितर्कपराहतत्वात्। असत्यत्वेऽपि शुक्तिरजतादिष्वारोपितसम्बन्धेन व्यवहारः प्रतीयत इति चेत्; सत्यत्वेऽप्यनुभूतेस्तद्विषय ज्ञानान्तरस्यारोपितसम्बन्धे व्यवहार इति तुल्यम् । अतस्सम्बन्धमात्रस्य विकल्पासहत्वाभिमतस्या रोपितत्वमिष्यताम्। किं ततो दृश्यमिथ्यात्वकल्पनप्रयासेन? किंच प्रसङ्गस्य विपर्यये पर्यवसानमप्यङ्गम्। अत्र च दृश्यस्य सत्यत्वे सम्बन्धानुपपत्ति प्रसङ्ग इत्यस्य विपर्यय उपपद्यते चायं सम्बन्ध इत्येवं रूपस्स्यात्। तथा च सम्बन्धोपपत्त्या दृश्यमिथ्यात्वकल्पनमिति स्यात् । ततश्च सम्बन्धिपरित्यागेन सम्बन्धस्वीकारप्रसङ्गः । न ह्यस्ति सम्भवस्सम्बन्धिनमन्तरेण सम्बन्धस्येति । अनुपपन्न (विशेषेण) वेषेणोपपन्नं विपर्यय इति तत्स्वीकार इति चेन्न; प्रसङ्गतद्विपर्यययोरविशेषप्रसङ्गात् । तथा च प्रसङ्गविपर्ययासिद्धिः। अन्यथेष्टप्रसङ्ग इति स्यात्। उपलभ्यते चायं सम्बन्ध इत्येव विपर्यये न दोष इति

अत इति । यतो मिथ्यात्वेनानुपपन्ने तदभावोऽवर्जनीयः अतः संबंधस्यमिथ्यात्वानुपपत्तेस्सत्यत्वं स्यादित्यर्थः । ननु सत्यरजतस्य सत्यत्वं न मिथ्यारजतत्वानुपपत्त्या किं तु अनृतमेवेत्याशंक्य निराकरोति नित्यमित्यादिना । सत्यरजतस्य नित्युमपलंभात् सत्यत्वं शुक्तिरजतस्य तदभावात् मिथ्यात्वमित्युक्तौ विश्वस्यापि नित्यमुपलंभानुसारेण सत्यत्वप्रसक्त्या नोक्तव्यवस्थेति भावः। उक्तदूषणं निष्कृष्यदर्शयन्नुपसंहरति मिथ्यात्वस्य वेति। अनुपपन्नस्याभावनियमात् मिथ्यात्वस्याप्यभावः। तथापि स्वरुचिमात्रेण मिथ्यात्वं गृह्यत इत्यगतिकस्य शंकां निराकरोति यथारुचीति। तथा सति प्रमाणस्यान पेक्षणमिति भावः।

तृतीयपक्ष निरासः असत्यत्वेपीतिं। मिथ्याभूत संबंधस्य च नानुपत्तिरिति भावः। सत्यत्वेपीति। यथा मिथ्याभूतस्य आरोपित संबंधेन व्यवहारस्तथा सत्यस्याप्यारोपितसंबंधेन् व्यवहारोदृश्यत इत्यर्थः। ततः किमित्यत्राह तत इति । अनुपपत्त्यभावादिति भावः । विकल्पासहत्वाभिमतस्य विकल्पासहत्वेनाभिमतस्या। न ह्यस्तीति । संबंधिनमंतरेण संबंध इत्यस्य संभवोनास्तीत्यन्वयः। संबंधोपपत्तेः। संबंधिसत्वव्याप्तेः व्याप्तिशून्यतया तर्काभास इत्यर्थः। प्रसंगतद्विपर्यययोरिति अनुपपन्नत्ववेषेणोपपन्नत्वं हि अनुपपत्ति विशिष्टरूपेणानुपपन्नत्वं वा अनुपपत्ति रूपोपत्तिमत्वं वा उभयथाप्यनुपपन्नत्व एव पर्यवसानादित्यर्थः। तथाचेत्यादिप्रसंग तद्विपर्ययोः रविशेषप्रसंगस्यासिद्धतया तद्विपर्ययोप्यसिद्धस्यात् । तथा च विपर्यये पर्यवसानरूपांगाभावादाभास इति भावः । अन्यथेति । विपर्ययसिद्धौ तदभिन्नस्य प्रसञ्जनीयस्यापि सिद्धतया इष्ट प्रसंगस्स्यादिति अनिष्टापादनरूपांगहान्याभास इति भावः। अंगहानिर्नास्तीति शंकते उपलभ्यत इति एतद्विपर्ययेण एतद्रूपविपर्यय इत्यर्थः। तर्हि न पूर्वतर्कस्याभासता न परिहृतेत्याह तर्हीति। तर्कांतरमेतदित्यर्थः। अस्तु

चेत्; तर्हि दृश्यसत्यत्वे सम्बन्धोपलम्भभङ्गप्रसङ्ग इति (प्रति) तर्कः स्यात्। अहो! सम्बन्धिसत्यत्वे सम्बन्धोपलम्भ भङ्ग इति कुत्रेयं व्याप्तिर्गृह्यते? तथाऽप्यारोपितस्सम्बन्धो दृश्यसत्यत्वे न स्यादिति प्रसङ्ग इति चेत्? तर्ह्यनारोपितोऽयं सम्बन्ध इत्यास्थीयताम्। अनारोपितस्तु विकल्पासहत्वान्न सिध्यतीति चेत्; तथाऽप्येकस्यारोपितत्वे तदनुबन्धिनोऽन्यस्याप्यारोपितत्वमिति वृथानिर्बन्धः। तथा हि सति सम्बन्धिनो ब्रह्मणोऽपि विलयप्रसङ्गात्। अनारोपितयोरेवारोपितसम्बन्धस्य परकीयस्वकीयत्वभ्रमादौ दृष्टत्वाच्च। एतेन दृश्यसत्यत्वे सम्बन्ध उपपद्यतेति विवक्षाऽपि निरस्ता, इष्टप्रसङ्गात्। विषय विषयिभावस्य भ्रान्त्यविशेषेण सर्ववादिसंमतत्वात्। अत एव विपर्ययापर्यवसानं च॥

यत्त्वतीतानागतादिभिस्सह सम्बन्धो न सम्भवतीति। तत्र पृच्छामः, वर्तमानैर्वा कथं सम्भवतीति। स्वरूपस्य विद्यमानत्वादिति चेन्न; विद्यमानयोरेव शशविषाणयोरसम्बन्धदर्शनात्। तथाऽपि क्वचिद्दर्शनादभ्युपगम्यत इति चेत्; अत्रापि तथाऽभ्युपगम्यताम्। संयोगादिलक्षणस्सम्बन्धोऽतीतादिभिर्न दृष्ट इति चेत्, अयं तु दृष्टत्वादङ्गीक्रियताम्। दृष्टत्वेऽपि निराधारत्वेन प्रतिक्षिप्यत इति चेन्न; वर्तमानयोरिवातीतादेरपि स्वकालवृत्तित्वेनाधारत्वोपपत्तेः। यथा चाभिन्नदेशयोरिव भिन्नदेशयोरपि

तर्ह्ययंतर्क इत्याशंक्यास्यापि व्याप्त्यभावादाभासत्वमाह अहो संबंधीति। ननु संबंधिसत्यत्वे संबंधस्याप्यारोपितत्वं न स्यादिति तर्कतात्पर्यमिति शंकते। तथाप्यारोपितेति। तर्हीति। यदि पर्वतो निर्वह्निः स्यात् निर्धूमस्यादित्यादावपि निर्धूमत्वमेवास्त्विति तर्कमात्रोच्छेद इतिचेन्न। धूमवत्वं हि पर्वतस्य निर्णीतं। अत्रतु संबंधस्यारोपितत्वं संदिग्धं। प्रत्युत संबंधिसत्यत्वमेव निश्चितमिति महद्वैषम्यमिति भावः। तथाप्येकस्येति। दृश्यसत्यत्वे आरोपितसंबंधो न स्यादिति प्रसंगो हि एकस्य मिथ्यात्वे तदनुसंबंधिनोन्यस्य मिथ्यात्वमिति नियमावलंबनेन वाचः। स चाप्रयोजक इत्यर्थः। तथेति। निर्बंधोवा दृश्यवत्संबंधित्वाविशेषात् ब्रह्मरूपदृशोपि मिथ्यात्वं स्यात् अविशेषादिति भावः। स्वकीयत्वभ्रमादाविति। तत्र व्यभिचार इति भावः। आदिशब्देन दूरस्थवनस्पत्योः संयोगभ्रमादिगृह्यते एतेनेति। स्वकीयता भ्रमस्थले सत्ययोरपारोपित संबंधदर्शनादित्यर्थः। उपपद्यतेति। मिथ्यानस्यादित्यर्थः। प्रशिथिलमूलत्वमुत्कृष्ट प्रसंगत्वमाह इष्टेति। तदुपपादयति विषयेति। भ्रांतिस्थले विषयासत्यत्वेप्यबाधात् संबंधः उपपन्न इति सर्ववादिभिर्वाच्यं किमुताभ्रांतिस्थल इत्यर्थः। अत एवेति। इतोऽपि तर्काभासत्वमित्यर्थः॥

विद्यमानयोरिति। सम्बन्धाक्षेप समाधानानि विद्यमानत्वस्य प्रयोजकत्वविवक्षायां इदं दूषणं। तथापीति। प्रयोजकत्वाभावेऽपीत्यर्थः। अतीतादेरपीति। बाधं विना प्रत्यक्षसिद्धो नापह्नवमर्हति तथाचाखंड एव विषयविषयिभावः। स यदा कदाचित्सन्तं विषयमाश्रित्य उपपन्न इति भावः। ननु भाविज्ञानजन्यः संबंधः पूर्वकालीनं विषयं कथमाश्रयेत् तत्काले ज्ञानाभावादित्यत्राह अभिन्नदेशयोरिति। अयं भावः। संबंधस्याध्यस्तत्वेपि कथं ज्ञानस्यातीतेन संबंधः तस्याभावात् न च संबंधाभावेपि विषयत्वमतिप्रसंगात्। तथा च कल्पितोपि संबंधे निरूपकत्वात् तन्निष्ठ इति वाच्यं। तथा च सत्यत्वेपि तुल्यं यदि च सामग्रीविशेषप्रभवत्वात् ज्ञानमात्रनिष्ठ एव तन्निरूप्यत्वमात्रात् तन्निष्ठ इव तदपि समानमिति। वा शब्दो व्यवस्थित विकल्पार्थः। ननु भिन्नदेशस्थलेपि घटयोरप्यवधानात् संयोग उपपद्यते।

मूर्तयोस्संयोग इष्यते, तथा भिन्नकालयोरपि प्रतिनियतसामग्रीसामर्थ्याद्वा नित्यज्ञाने नित्यं तत्प्रवणस्वभावत्वाद्वा विषयविषयिभाव इति किं नोपपद्यते? व्यवधानाव्यवधानाभ्यां विशेष इति चेन्न; तद्विशेषमात्रस्याकिञ्चित्करत्वात्, अन्यथाऽतिप्रसंगात्; तथाऽप्यव्यवहितत्वलक्षणसम्बन्धस्तत्र न सम्भवतीति चेन्न; तद्विशेषमात्रस्याकिञ्चित्करत्वात्, अन्यथाऽतिप्रसंगात्, तथाऽप्यव्यवहितत्वलक्षण सम्बन्धस्तत्र न सम्भवतीति चेन्न, सम्बन्धमात्रस्याव्यवहितत्वलक्षणाभावात् । गोमानित्यादौ तद्दर्शनाभावात् । तल्लक्षणस्यात्रानिष्यमाणत्वात् ।

ननु ज्ञानमपि हि द्रव्यमेव, सम्बन्धश्च संयोगलक्षणः इति भाष्यं वः (ष्यवचः) कथमिति चेन्न; सम्भवद्विषयस्य तस्य संयुक्ताश्रितत्वादेरप्युपलक्षणपरत्वात् । सर्वत्र संग्रहः कथमिति चेत् तत्तत्स्वभावविशेषादेव । तेषामनुवृत्तादिव्यपदेशः कथमिति चेत्, न; आधाराधेयभावादिवदुपपत्तेः । तथाऽपि विविक्तव्यवहारेऽभिव्याप्तमाकारान्तरमन्तरेण कथमिति चेन्न; व्यवहारानुगुण्यापादन रूपत्वस्य

भिन्नकालयोः स्वभिन्नकालयोरिवा व्यवधानाभावात् न संबंधस्संभवतीति शंकते व्यवधानेति । अन्यथेति । किंचिद्विशेषमात्रात् संबंधासंभवे भिन्नदेशत्वविशेषात् घटयोरपि संयोगसंबंधो नस्यादित्यर्थः । तथापीति । अव्यवहितत्वं लक्षणं नियामकं । यथा व्यवहितत्वप्रयोज्य इत्यर्थः । किं संबंधमात्रं तल्लक्षणं उत तद्विशेषः । नाद्य इत्याह संबंधमात्रस्येति । तल्लक्षणत्वाभावे हेतुमाह गोमानिति । व्यभिचारादिति भावः । द्वितीये आह तल्लक्षणस्येति । यस्तल्लक्षणस्संयोगादिर्न ज्ञानार्थयोः संबंधतया नेष्यत इत्यर्थः ।

नन्विदमनुपपन्नं । भाष्ये ज्ञानार्थसंबधमात्रस्य संयोगरूपताभिधानादिति शंकते । नन्विति । संभवद्विषयस्येति । अन्यथारूपादिना संबंधाभावप्रसंगादिति भावः । ननु ज्ञानार्थयोः कोयं संबंध इति प्रश्ने सर्वव्यक्तिसंग्राहक धर्म पुरस्कारेणोत्तरं वक्तव्यं यथा गविपृष्टे सास्नाद्याश्रय इति इह च तथा नोक्तमिति शंकते । सर्वत्रेति । माभूदेकेन सर्वसंग्रहः । किं नः छिन्नं । जिज्ञासानिवृत्तिर्हि उत्तरस्य प्रयोजनं । सामान्येनोत्पन्नसर्वव्यक्तिजिज्ञासा च सर्वव्यक्त्युपस्थापकैकधर्मपुरस्कारेण वा तत्तत्कतिपय व्यक्तिसंग्राहकानेकधर्मपुरस्कारेण वा सर्वव्यक्त्युपस्थापनेन निवर्तत इति क्वचित्संयोगः क्वचित्संयुक्ताश्रितत्वमित्याद्युक्त्या जिज्ञासानिवृत्तौ कथं नोत्तरमित्यभिप्रायेणाह तत्तदिति । संयोगत्वादि स्वभावविशेषादेव संग्रह इत्यर्थः । ननु घटमात्रानुगतस्यैव घटत्वस्याघटव्यवच्छेदकत्वदर्शनात् । इह ज्ञानार्थसंबंधमात्राननुगतस्य घटमात्रानुगतस्यैव घटत्वस्य अघटव्यवच्छेदकत्व दर्शनात् इह ज्ञानार्थ संबन्धमात्रानु ननु गतस्य तदन्यव्यवच्छेदकत्वं । तथा चान्यस्यापि विषयत्वं स्यादिति शंकते तेषामिति । नेति । तद्वयवच्छेदकत्वे तदवृत्तित्वमेव प्रयोजकं न तु तदितरयावद्वयक्तिवृत्तित्वं । तथा च (अन्यस्यापि विषयत्वं स्यादि शङ्कते तेषामिति नेति) सत्याधारधेयभावस्य संबंधमात्रानुगतस्य असंबंधाद्वयावर्तकत्वप्रसंगात् नीलघटत्वस्या घटव्यावर्तकत्वाभाव प्रसंगाच्चेति भावः । विविक्तः- अन्यूनानतिप्रसक्तः । अभिव्याप्तः-अन्यूनानतिप्रसक्तः । व्यवहारेति । ज्ञाने सत्यर्थो व्यवहारानुगुणो भवति तथानुगुण्यं च तत्र तत्र संभावित ज्ञानार्थ संबंधादित्यौपपत्तिकप्रतीति सिद्धत्वादित्यर्थः । न चव्यवहारे व्यवहारानुगुण्यापादनरूपत्वेन प्रयोजकत्वेन आत्माश्रयः । सजातीय साक्षात्कार प्रतिबंधकतावच्छेदक धर्मत्वरूपतादरत्वादिवतत्स्वरूपसत एव प्रयोजकत्वात् अन्यथेति । एतदनंगीकारे संबिद्यवेद्यत्वे

प्रतीतिसिद्धत्वात्। अन्यथा भवतामप्यवेद्यत्वे सत्यपरोक्षव्यवहारानुगुण्यादिकथनम (सं) बद्धप्रलाप एव स्यात्। एतेन भविष्यद्वृष्ट्यादिना सस्यादिपोषणप्रसंगोऽपि प्रत्युक्तः, सम्बन्धस्वभावविशेषाणां प्रतिनियतसामर्थ्यात्। सामग्रीवैचित्र्यादेव च वर्तमानतत्प्रतिनियतविषयत्वोपपत्तेः।

तथाऽपि कोऽसौ सम्बन्ध इति सौहार्देन पृच्छाम इति चेत्; वयमपि परमसौहार्देन प्रतिब्रूमः। कोऽसाविति किं संज्ञाविशेषः पृच्छ्यते? उत स्वरूपविशेषः? यद्वा लक्षणम्? उत प्रकारान्तरम्? अथवा संयोगादिषु कुत्रान्तर्भाव इति? उतान्यः कश्चित्? आद्ये तमन्तरेणापि सामान्यत एव व्यवहारनिष्पत्तेः किं तद्विचारक्लेशेन? विषयविषयिभाव इत्येव वा विशेषनाम निर्दिश्यताम्। सङ्केत्यतां वा यथारुचि नामान्तरम्। द्वितीयेऽपि स एव सः न त्वसः, अन्यथा व्याघातादिप्रसङ्गात्। तृतीयेऽपि लक्षण मन्तरेणापीक्षुक्षीरादिरसवैषम्यवत्स्फुट प्रतीतिसिद्धं दुरपह्नवतरम्। अतिपीडायां तु व्यवहा (रविशेषा) रानुगुण्यापादनम्। अत एव चतुर्थेऽपि दत्तमुत्तरम्। पञ्चमे तु न कुत्रचिदिति वा क्वचिदन्तर्भावदर्शने तत्रैवेति वा वक्तव्यम्। बहिर्भावेऽपि नाभावत्वप्रसङ्गः, स्वेच्छापरिसंख्यातद्वित्रादिबहिर्भावेऽन्येषामभावत्व प्रसङ्गात्। अन्यस्तु व्यवहाराङ्गतया प्रतीयमानत्वे स्वयमेवावगम्यताम्; अनङ्गत्वे तु किं तन्निरूपणेनेति।

यत्तु- सम्बन्धपरिग्रहे सम्बन्धान्तरानवस्था, अन्यथा तत्सम्बन्धत्वपरित्याग इति। तदपि किं सम्बन्ध

सत्यप्यपरोक्ष व्यवहारानुगुण्यकथनंविषये ज्ञानविषयत्वापादितव्यवहारानु गुण्यकथनं चानुपपन्नं स्यादित्यर्थः। वेद्यत्वेन ह्यपरोक्षव्यवहारानुगुण्यं दृश्यस्येष्यते। वेद्यत्वं च वृत्तिसंबंध एव। एतेनेति। अव्यवधानलक्षणसंबंधस्य क्वचिदेवांगीकारात् अन्यत्रान्यस्यचांगीकाराच्चेत्यर्थः। तदेव विवृणोति संबंधेति। संबंधोहि संबंधः। भावेनिष्ठा संयोगस्यहि स्वभावः। संबंधिनि सत्येव संयोगित्वापादन समर्थः। विषयविषयिभावस्य स्वभावो विषयभावेपि विषयिणि सति विषयत्वापादन समर्थः। नन्विदं सामर्थ्यं किन्निबंधनमित्यत्राह सामग्रीति। संयोगस्यह्युभयं अपृक्सिद्धाश्रयतया सामग्रीत्येकाश्रयाभावेपि संयोगो न संभवति। विषयित्वेहि ज्ञानमेवाश्रयः। विषयस्तु निरूपक एवेति विषयाभावेपिज्ञाने विषयिता संभवः। वर्तमान तत्प्रतिनियतेति। संयोगसामर्थ्यस्य वर्तमान मात्र विषयत्वमिति नियमादिति भावः।

तत्व बुभुत्सयापृच्छामीत्याह तथापीति। प्रकारान्तरं लक्षणातिरिक्तस्तद्धर्मः। अन्यः निरुक्तसर्वकोटिबहिर्भूतः। ननु नामविशेषाभावे कथं तद्विशेष व्यवहार इत्यत आह। विषयविषयिभावेति। यथारुचिनामान्तरं संकेत्यतामित्यन्वयः। स एव सः। तत्स्वरूपं तत्स्वरूपमेवेत्यर्थः॥ न त्वसः॥ न तदन्यस्वरूपमित्यर्थः अन्यथेति। तस्य तद्भिन्नस्वरूपत्वे भेदाभेदयोर्विरोधो भवेत्। गवादेर्गर्दभादि स्वरूपताप्रसंगेन विधिनिषेधशास्त्रार्थादिति कुतः सम्बन्धान्तराभावादसम्बन्धस्य। वैय्याकुलीप्रसंगश्चेत्यर्थः। व्यवहारानुगुण्यापादनमिति। ज्ञानतद्व्यवहारजनकत्वयोग्यतेत्यर्थः। ननु सापि कथं घटं प्रत्येव योग्यता नाघटं प्रतीति कुतः। संबंधांतराभावादसंबंधस्य साधारण्यादिति चेन्मिथ्यासंबंधस्यापि तुल्यत्वादिति भावः। दत्तमुत्तरमिति। प्रतीतिसिद्धदुरपह्नवमित्यनेनेत्यर्थः। क्वचिदन्तर्भावदर्शन इति। प्रौढोक्तिः। अप्रयोजकत्वमाह। स्वेच्छापरिसंख्यातेति। व्यवहाराङ्गतयेति। किं व्यवहारांगात्वमविज्ञाततया वा अज्ञाततया वोभयथापि तत एव

मात्रापह्नवार्थमुच्यते? ज्ञानार्थनिरूपितसम्बन्धविशेषापह्नवार्थं वा? आद्ये स्वव्याघातः, दूष्यदूषणवाच्यवाचकादिसम्बन्ध प्रतिक्षेपे त्वदुक्तदूषणस्यैवाकिंचित्करत्वप्रसङ्गात्। तदभ्युपगमे चस्माकं प्रतिक्षेपासिद्धेः। स्वपरप्रतिक्षेपसामर्थ्यस्याप्यन्यत्र प्रतिक्षेपात्। द्वितीये त्वनङ्गाङ्गीकारः, सम्बन्धस्य सतोऽपि विशिष्टव्यवहारे सम्बन्धान्तरमपेक्षितमित्यनङ्गस्यैव स्वीकृतत्वात्। यु(उ) क्ताङ्गत्यागो वा, अङ्गस्यापि स्वपरपरित्राणस्य परित्यागात्। अन्यसम्बन्धस्य चाङ्गत्वे दूष्यदूषणसम्बन्धादावपि प्रसङ्गात्। सम्बन्धान्तराभावे सम्बन्धत्वहानिरित्यपि तत एव दत्तोतरम्। अन्यथा स्वपरनिर्वाहकमात्रभङ्गे स्वयंप्रकाशस्यापि निरासप्रसङ्गात्। स्वव्यवहारस्य नैरपेक्ष्यमन्यत्रादृष्टं तत्र हि स्वीक्रियते, तद्वदत्रापि स्वप्रतिसम्बन्धिव्यवहारे सम्बन्धान्तनैरपेक्ष्यमिति समाधिस्सम एव।

यत्तु सम्बन्धस्य स्वतो मेलने सम्बन्धिनोरेव स्वतो मेलनप्रसङ्ग इति, तदपि दृश्यमाने सम्बन्धे नावतरति; कल्प्यमाने तु वयमपि तथाऽभ्युपगच्छाम इति क्वानिष्टप्रसङ्गः? इदमप्यसूत्रयत्- "समवायाभ्युपगमाच्च साम्यादनवस्थितेे(ब्र.सू. २-२-१२)रिति। नच तत्र मेलनमेव नास्तीति प्रसङ्गो दोषः, तदभावेऽपि विशिष्टव्यवहारजननस्वभावतयैव तत्तत्स्वरूपसिद्धेः। न च स्वयमेव सम्बन्धात्मकं

तन्न कथनीयमित्यर्थः।

दूष्यमाणेति। मिथ्याभूतसंबंधांगीकारेपि दूष्यादीनां मिथ्यात्वं तत्र तेषामध्यासाभावादिति भावः। तदनभ्युपगमे-अकिंचित्करत्वाभ्युपगमे। नन्विदं संबंधदूषणं स्वसंबंधस्यापि प्रतिक्षेपात् स्वप्रतिक्षेपकं तथापि स्वपरनिर्वाहकसमाधिना परमपि प्रतिक्षेपतीति नाकिंचित्करत्वमिति शंकायामाह स्वपरेति। अयं भावः। स्वनिर्वाहकत्वपरनिर्वाहकत्वयोर्नविरोधः। स्वपरप्रतिक्षेपकत्वे तु मिथोविरुद्धे। स्वप्रतिक्षेपे स्वयं परं प्रतिक्षेप्तुं न शक्नोतीति प्रतिज्ञाहेत्वो र्व्याघात इत्यर्थः। ज्ञानार्थ संबंधमात्रमनंगीकुर्वता स्वीकृतसंबंधांतराणावनवस्थाभिया स्वपरनिर्वाहकत्वस्वीकारात् तन्यायेन ज्ञानार्थसंबंधस्यापि संबंधांतरं विना स्वकार्यकारित्वसिद्धौ संबंधांतरापादनमनंगीकारदोषावहमित्याह द्वितीयेत्विति। विशिष्टव्यवहारानंगस्य तदंगतया स्वीकारोनंगीकार इत्यर्थः। संबंधस्येति। विशिष्टव्यवहारविषयत्वेपि व्यवहाराविषयभूतं यदि संबंधस्यापि संबंधांतरं स्वीक्रियते तदानंगस्वीकार इत्यर्थः। युक्तेति। वाशब्दश्चार्थः। स्वपरनिर्वाहकत्वं संबंधस्यांगं। अन्यसंबंधस्य चेति। संबधसंबंधस्यचेत्यर्थः॥ संबंधांतरपरिग्रहे अनवस्थेत्येतत्परिहृत्यान्यथा तत्सबंधसत्वपरित्याग इत्येतद्दूषयति संबंधांतराभाव इति। तत एव दत्तोतरमिति दूषणादिसंबंधवत् संबंधांतराभावेपि संबंधत्वसंभवादित्यर्थः। अन्यथेति। संबंधातराभावे दृग्दृश्य संबंधस्य संबंधत्वाभावो यदित्यर्थः। तद्वदिति। यथा प्रकाशस्य, स्वगोचरस्य व्यवहारे प्रकाशांतरनैरपेक्षयं तथा संबंधिनि स्वविशिष्टव्यवहारेपि दृक्संबंधस्य न संबंधांतरापेक्षेत्यर्थः। स एव त्वदुक्त एवेत्यर्थः।

दृश्यनुमानेनावतरतीति। संयोगस्य प्रत्यक्षसिद्धतया तन्निरासा योगादित्यर्थःतथाप्युपगम इति। गुणगुणिनोस्तथाभ्युपगमादित्यर्थः। असूत्रयदिति बादरायण इति शेषः समवायेति। समवायाभ्युपगमाच्चासामंजस्यं (ब्र.सू. २-२.१२) कुतः साम्यात् समवायस्य समवायोऽङ्गीक्रियते न वा। द्वितीये समवायो व्यर्थः। समवायवदेव गुणादीनां स्वरूपेणापृथक्सिद्धिसंभवात्। प्रथमं तस्यपि

स्वसम्बन्धयात्मकं चेति स्वरूपभेदमङ्गीकुर्मः, येन व्याघातादिप्रसङ्गस्स्यात् । अतो यत्र वस्तुनोर्विशिष्टव्यवहारजननस्वभावत्वं दृष्टं तत्र तत्तत्स्वरूपमेव विशिष्टव्यवहारजनकत्वमात्रेण सम्बन्ध इति व्यपदिश्यते; यत्र तु सम्बन्ध एव स्फुटस्तत्र तदभ्युपगमेन तदुपरि सम्बन्धान्तरनैरपेक्ष्यमङ्गीक्रियत इति सर्वत्र विशिष्टव्यवहारे निरुह्यमाणे स्ववचनविरोधादि नरकपातमनुमत्य किं विश्वमिथ्यात्ववृथाग्रहेण?

यत्तु विषयविषयिभावो द्विष्ठ एकनिष्ठो वेति, तत्र विषयत्वं विषयित्वं चैकैकनिष्ठमितरेतर प्रतियोगिकमिति निष्कर्षः । ताभ्यामेव च विषयविषयिणोर्विशिष्टव्यवहारसिद्धेः । तदुभयसमाहाराद्विषय विषयिभावाख्य सम्बन्ध इत्युच्यते । अत एव येनात्मनाऽसौ क्वचिद्वर्तत इत्यादिकमपि दत्तोतरम्; यानि चान्यानि सम्बन्धसामान्यदूषणानि तान्यपि दूष्यदूषणादिसम्बन्धसत्त्वा सत्त्वयोस्स्वव्याघातकानीति न ततोऽपि दृग्दृश्यसम्बन्धभङ्गः । तदेतत्सर्वं योगाचारोक्तग्राह्यलक्षणा योगनिरासे फलिष्यतीति मत्वाऽत्रोदास्ते । इहाप्यसूचयत्-* ''अनुभूतिसद्विषययोश्च विषयविषयिभावेन भेदस्य प्रत्यक्ष सिद्धत्वादित्यादिना सदनुभूतिभेदस्य प्रत्यक्षसिद्धत्वात् इत्यादिना सदनुभूति भेदभाष्येण॥ ।

इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य । श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्यकृतिषु शतदूषण्यां दृक्दृश्य सम्बन्धानुपपत्ति परिहारवादः सप्तदश स्समाप्तः । ॥१७॥

समवायांगीकारेऽनवस्थित रित्यर्थः । नचात्रेति । स्वरूपातिरिक्तसंबंधाभावस्थले मेळन ाभावप्रसंगदोषोऽस्तीत्यर्थः । विशिष्टेति । संबंधोऽपि विशिष्टव्यवहारजनकोभवति तथा तत्तत्स्वरूपमपि विशिष्टव्यवहारजनकतया दृष्टमिति तत्तत्स्वरूपमपि संबंध इत्यर्थः । नन्वेकस्य संबंधसंबंधित्वांगीकारे स्वरूपभेदप्रसंगः । संबंधस्य संबंधिभिन्नत्वाद्व्याघात इत्यत्राह । नच स्वयमिति । संबंधस्संबंधिश्चेत्येतावता स्वरूपभेदो प्रयोजकत्वदिति भावः । विशिष्टव्यवहारजनकत्वमात्रेति । एतावदेवसंबंधत्वे निमित्तं न तु संबंधिभिन्नत्वमपि गौरवादिति भावः । संबंध एवेति । संबंधभिन्नसंबंध एवेत्यर्थः । स्ववचनेति संबंधदूषणस्य दूष्यासंस्पर्शात्संबंधस्य स्थिरीकरणात् स्ववचनविरोध इत्यर्थः । इतरेतरप्रतियोगिकमिति । तत्र विषयत्वे ज्ञानं निरूपकं अर्थः आश्रयः । विषयित्वे अर्थो निरूपकः ज्ञानं आश्रय इत्यर्थः । नचातीतस्य विषयताश्रयत्वं न स्यादितिवाच्यं । परंपरासंबंधवदाधारत्वेपि दोषाभावादिति भावः । तदुभयस्य संबंधत्वे हेतुमाह ताभ्यामेवेति । विशिष्टव्यवहारप्रयोजकत्वमेवसंबंधत्वं नत्वेकत्वमपि तत्र प्रविष्टमिति भावः । ननु तर्हि विषयत्वमात्रेण संबंधव्यवहारस्यादित्यत्राह तदुभयेति । द्वित्वमिव मिळिते संबंधत्वमिति भावः । अत एवेति । प्रत्येकमेव वृत्तिमत्वादेकस्योभय वृत्तित्वाभावस्योक्तत्वादित्यर्थः । दूष्यदूषणादि संबंधत्वेति । किमयं दूष्यदूषणादिसंबंधसंबंधिभ्यां भिन्नः उत न । द्वितीये संबंधत्वमेवाभिधीयेत । प्रथमे तस्यां संबंधोस्ति न वा । आद्येऽनवस्था । द्वितीये दूष्येण संबंधो न स्यादित्यादि विकल्पदूषणत्वे दुष्टत्वात्संबंधखंडनमेव न स्यात् । दूषणरहितत्वे दुष्टत्वाभावात् तत्संबंधस्येव संबंधांतरस्यापि सिद्धत्वात् व्याघात इत्यर्थः । ननु दृग्दृश्य संबंधानुपपत्तिं भाष्यकारः किमर्थं परिहृतवानित्यत्राह तदेतदिति । इहापीति । सदनुभूतिभेदस्य विषयविषयिभावेन समर्थनादनुपपत्तिनिरासोप्यर्थादुक्तो भवति । न चात्र सच्छब्देन घटाद्यभिधीयते अपितु ब्रह्मैव तस्य तद्विषयत्वं न तत्राध्यास्यो मिथ्या सो मिथ्यात्वप्रसंगादित्यर्थः । संबंधोवाच्य इति भावः ॥

वत्सकुलजलधिकौस्तुभनृसिंह गुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां सप्तदशो वादस्सप्तदश समाप्तः ॥

।।अथ बाह्यप्रकाशानुपपत्तिवादः अष्टादशः।।१८।।

अज्ञानसन्तमसमाश्रयणोन्मुखानां संवित्प्रदीपमहसा सहसा निरुन्धन्।
विद्यास्वयंवरपतिर्व्यपहन्त्वविद्यां सर्वानुभूस्स भगवान्पुरुषोत्तमो नः ।।

यत्तद्भावरूपाज्ञानदूषणसमये ''नित्यमुक्तस्वप्रकाशचैतन्यैकस्वरूपस्य ब्रह्मणोऽज्ञानानुभवश्च न संभवतीत्या''दिभाष्यम्, तत्र बाह्यप्रकाश एव सर्वः परपक्षे न संभवतीत्यभिप्रेतम्। तद्व्याकुर्मः। यदुच्यते- ''नित्यमुक्तं ब्रह्मैव स्वगतानाद्यविद्यामनुभवती''ति, कथमिदमुपपद्यते? बन्ध (न) स्यानाद्यविद्यातत्कार्यानुभवात्मकत्वान्मोक्षस्य च तन्निवृत्तिरूपत्वात् ।-''नित्यमुक्तस्य बन्धश्चेन्नित्यमुक्तिर्न संभवेत्। वन्धस्यापि च नित्यत्वाद्धन्धाभावे त्वमुक्तता''।

ननु भवन्मतेऽप्य ज्ञानमस्त्येव, तच्च सर्वज्ञेनानुभूयते, स च नित्यमुक्त इति को विशेष इति चेन्न; पराज्ञानादिदर्शनस्य बन्धरूपत्वानभ्युपगमात्। ब्रह्माज्ञानमेव परगतं ब्रह्मणाऽनुभूयत इति चेन्न; तथाऽपि परगतत्वादेव तस्य बन्धरूपत्वप्रसङ्गाभावात्। तर्ह्यस्माकमप्यहंकारापरपर्यायान्तः करणगतमज्ञानं भवतु,

---

सत्यत्वपक्षे दृग्दृश्यसंबंधस्संभवतीत्युक्तुं इदानीं मिथ्यावादिमत एव दृग्दृश्यसंबंधो न संभवतीति संगत्या वादार्थ संगृह्णाति अज्ञानजसंतमसमिति। ''अहमज्ञानजं तमः'', ''नाशयाम्यात्मभावस्थोज्ञान दीपेन भास्वते''(श्री.भग.गी.१०-११) त्येतन्मनसिकृत्वाह संवित्प्रदीपमिति । विद्याया स्वयंवरेणपतिरित्यनेन स्वरसतः सकल विद्यावेद्यत्वं भगवतएवेत्युक्तं । सर्वमनुभवतीति । सर्वानुभवः यस्सर्वज्ञस्सर्ववित् (मुण्ड १-१-३) इत्यादिश्रुतेः। एवं च ब्रह्मणो बाह्यार्थप्रकाशकत्वमेव वक्तव्यं तत्परमते न संभवतीति वादार्थस्सूचितः। तत्र हेतुमाह स भगवानिति ज्ञानादिमत्वं तस्यार्थः।

ब्रह्मणोऽज्ञानानुभव इति। ''राहोश्शिर'' इतिवदभिप्रेतमिति अविशेषादिति भावः। अनुभवति - विषयीकरोति। वृत्तिरूपत्वादिति। ततश्च ब्रह्मणः विनाशप्रसंग इति भावः। नित्यमुक्तेत्यादि भाष्यानूदितविशेषविरोधं क्रमेण वक्ष्यन् प्रथमविशेषणविरोधमाह नित्यमुक्तेति। किं ब्रह्मणो ज्ञानानुभवरूपसबंधोस्ति न वा। आद्योपि कादाचित्को वा नित्यो वा आद्ये आह बंधश्चेदिति। तथा च मुक्तेर्नित्यत्वं न स्यादित्यर्थः। द्वितीये आह बंधास्यापि चेति। तथा सति विशेषमेव न स्यादिति भावः। आद्ये द्वितीये आह बंधाभाव इति। तथाचात्यंताभाव एव बंधनिवृत्तिरूपमुक्तिरिति भावः।

नन्विति ''अहमज्ञानजं तमः'' (श्री भग.गी.१०-११) इत्यादि प्रतिपाद्यमस्त्येव। अज्ञानानुभवस्तु स्वयं वा भवतु अन्यो क बंधस्स इति तात्पर्यं। परेति। स्वगताज्ञानु भवोहि बंधः। न चास्मिन् मते ब्रह्मण्यज्ञानमिति भावः। सत्यं अद्यानुभवो बंधः। स च ब्रह्मस्वरूपमेव तथाप्यज्ञानस्य परगतत्वात् तदाश्रयस्यैवायमज्ञानानुभवो बंधः न ब्रह्मण इति शंकते ब्रह्माज्ञानमेवेति। ब्रह्मविषयकमज्ञानं ब्रह्माज्ञानमित्यर्थः। ब्रह्मणोऽन्यस्य जडत्वात् जडे आवरणकृत्यभावात्तद्गतत्वेन ज्ञानस्य बंधकृत्वं नोपपद्यत इति परिहरति तथापीति। नन्वस्त्वन्तः करणगतमज्ञानं। नचान्तःकरणस्यापि जडत्वात् बंधाभावप्रसंगः। अहमित्येकन्तः करणो भिन्नेन ब्रह्मणो स्वगतत्वेनाज्ञानानु भवात् ततः तदन्तःकरणावच्छिन्ने बंधः।

तच्च संविदधीनसिद्धित्वात्तदात्मकब्रह्मणाऽनुभूयत इति को दोष इति चेन्न; सुषुप्तिमरणमूर्च्छाद्यहंकारविलय दशायामज्ञानानुभवभङ्गप्रसङ्गात्। न हि तदानीं निराश्रयाज्ञानस्थितिसंभवः, निरधिष्ठानभ्रमानुज्ञान प्रसङ्गात्; ब्रह्माश्रयत्वे तु स्वगताज्ञानानुभवावश्यम्भावः। भवत्वज्ञानानुभवः, स तु मिथ्याभूतानुभव इति न नित्यमुक्तत्वविरोध इति चेन्न; मिथ्याभूतस्यैव तस्य बन्धतयोपपादनात्। अन्यथा तन्निवृत्त्यर्थं शास्त्रारम्भानुपपत्तिप्रसंगात्। ततश्च तथाविधनिवृत्तिरूपे मोक्षे नित्ये कथं तत्प्रतियोगिनस्तस्य संभवः? ततश्च नित्यं ब्रह्मण्यविद्याविमुखे स्वयमेव विलीयमाना सा कथमहंकारादीन्यपत्यानि प्रसूताम्? कथं वा तेषु ब्रह्मणो दृष्टिपात इति न बाह्यानुभवसम्भवः। स एष प्रथमो हेतुर्ब्रह्माश्रयाज्ञानानुपपत्तिकथनेन व्याख्यातप्रायः; तृतीयश्च साक्षित्वशोधने प्रदर्शित एवेति कृत्वा मध्यमं हेतु विवव्रे - "स्वानुभवस्वरूपत्वादित्यादिना"॥

अनुभूतिस्वरूपमपि ब्रह्म स्वानुभवैकतानमिति ह्यभ्युपगम्यते। तस्य स्वरूपातिरिक्ताविद्यानुभवः किं स्वतः? उतान्यतः? नाद्यः; स्वानुभवैकतानत्वव्याघातात्; अनिर्मोक्षप्रसंगाच्च। मोक्षे वा स्वाभाविकरूपव्याघातप्रसंगात्। किंच यत्र शुक्तिरजतादौ विषयमिथ्यात्वम्, तत्र विषयिणोऽपि मिथ्यात्वावश्यम्भावात् निवर्तकज्ञानेन सविषयवृत्तिस्वरूपबाध इति हि त्वन्मतम्। ततश्च यदि मिथ्याभूताविद्यानुभव (स्वभावता) स्वभावतो ब्रह्मणस्तदा तस्यापि मिथ्यात्वेन बाधकज्ञानेन

तदनवच्छिन्नेतु नित्यमुक्तेति शंकते। तर्ह्य स्माकमिति। तत्र हेतुः नहीति। अज्ञानस्याभावादिति भावः। ननु निराश्रयमज्ञानमस्तीत्यत्राह निरधिष्ठानेति। अध्यासाधिष्ठानतया ब्रह्मसिद्धिर्न स्यादिति भावः। ननु निरधिष्ठानभ्रम प्रसंगः। ब्रह्मण एवाधिष्ठानत्व संभवात् इत्यत्राह ब्रह्माश्रयत्वेति। तथा च स्वगताज्ञानानुभवात् ब्रह्मण एव बंधो दुर्वार इति भावः अज्ञानानुभवमात्रं न बंधः अपितु तात्विकस्या ज्ञानस्यानुभवः। अज्ञानं चातात्विकमिति नित्यमुक्तत्वमिति शंकते भवत्विति। मिथ्याभूत इति। मिथ्याविषयक इत्यर्थः। मिथ्याभूतस्यैवेति। सत्यस्याज्ञानस्याभावाज्जीवस्यापि बंधो न स्यादिति भावः। अन्यथेति। मिथ्याभूतस्य बंधस्याभावे बंधस्याभावात् बंधनिवृत्यर्थं शास्त्रं व्यर्थं स्यादिति भावः। ब्रह्मणो नित्यमुक्त्वे चाज्ञानप्रकाशो वान्यप्रकाशश्चायुक्तंमित्याह ततश्च तथाविधेति। मिथ्याभूताज्ञानानुभवात्मक बंधनिवृत्तिः किंरूपेत्यर्थः। यद्यप्यविद्यानुभवो ब्रह्मरूपत्वान्नित्यः तथाप्यविद्यानिवृत्त्या विशिष्टरूपेण निवृत्तिरिति भावः। अविद्यामुखे अविद्याया अध्यासाभावे साधकमित्यविद्यामूलत्वादहंकाराद्यध्यासस्य तस्याभावादिति भावः। दृष्टिपातः -अनुभवः। स एष इति। "नित्यमुक्त स्वप्रकाशचैतन्यैकस्वरूपस्ये"ति भाष्ये नित्यमुक्तपदेनविवक्षित इति भावः। तृतीयश्चेति। चैतन्यैकस्वरूपपदेन विवक्षितः। मध्यम इति। स्वप्रकाशपदविवक्षितः विवव्रे भाष्यकृदितिशेषः। "स्वानुभवस्वरूपत्वा"दिति भाष्यं विवृणोति।

अनुभूतिरूपमपीति। स्वानुभवेति। स्वानुभवैकतानत्वं हि स्वमात्रानुभवस्वरूपत्वं। तदतिरिक्तप्रकाशे व्याघात इत्यर्थः। अनिर्मोक्षेति अध्यस्तानामध्यासे सति निवृत्त्यभावादविद्याध्यासरूपब्रह्मणि सति अध्यस्ताविद्यानिवृत्तिः न संभवतीत्यर्थः। मोक्षेवेति। अध्यासे वर्तमानेऽध्यस्त निवृत्तौ मोक्षेऽध्यासरूपास्वाभाविकाकारसत्वप्रसंगेन स्वाभाविके चैतन्यमात्रत्वव्याघात इत्यर्थः। वृत्तिस्वरूपबाधः- वृत्तिस्वरूपनिवृत्तिः त्वन्मतमिति। ज्ञानार्थ (धीन) स्वरूपस्य ज्ञानवत्वे

निवृत्तिरेव स्यात् । नापि द्वितीयः, अविद्याब्रह्मातिरिक्तस्यान्यस्यानभ्युपगमात् ।अभ्युपगमे वा तत्सत्यत्वमिथ्यात्वविकल्पेन सद्वितीयत्वानवस्थयोरन्यतरप्रसंगात् । माभूदविद्या ब्रह्मस्वरूपातिरिक्तमन्यत्, अविद्यैव तु ब्रह्मस्वरूपं तिरोधत्ते, तन्निबन्धनोऽयमविद्यानुभव इति चेन्न; प्रकाशमात्रस्य ब्रह्मणस्तिरोधाने तत्स्वरूपनाशप्रसङ्गादेरन्यत्र प्रपञ्चनात् ।

किंच तिरोहिते ब्रह्मणि तस्याविद्यानुभवः, अनुभूतायां चाविद्यायां लब्धस्वरूपया तया तिरोधानमित्यन्योन्याश्रयणम् । अनुभवनिरपेक्षं तिरोधानमिति चेत्; तथा सति तदज्ञानं काचादिवत्स्वसत्तया ब्रह्म तिरस्करोतीति संविद्धीनसत्ताकत्वाभावेन स्वतस्सिद्धतया संविद्रूपज्ञानबाध्यत्वं न स्यात् । तेन च तदुपात्तः प्रपञ्चोऽपि तथाविध एवेति सत्यस्स्यात् । आहुश्च- "काचादिवत्तिरस्कारे दोषो वाचामगोचरः । ज्ञानबाध्यत्वहानिस्स्यात्स्यात्प्रपञ्चस्य सत्यता" । इति ।

अस्तुतर्ह्यविद्यानुभवाधीनं तिरोधानम्, अनुभवस्तु निरपेक्ष इति नान्योन्याश्रयणमिति चेन्न; अनिर्मोक्षप्रसङ्गादेरुक्तत्वात् । किंच अतिरोहितस्वरूपस्यैव लाघवेनाभ्युपगन्तुमुचितत्वात् । ननु भवतामपि ब्रह्मस्वरूपं स्वानुभवैकतानम्, तदेव च सर्वज्ञमित्यभ्युपगतमिति को विशेष इति चेन्न; अस्माकं ब्रह्मस्वरूपस्य स्वानुभवैकतानत्वेऽपि गुणभूतेन ज्ञानेन सविषयत्वस्वभावेन स्वेतरसमस्तविषयीकरणात् । एतेन मुक्तोऽपि व्याख्यातः। बद्धस्य तु सर्वविषयीकरणस्वभावमपि ज्ञानमौपाधिकान् संकोचविकासान्

निवृत्त्ययोगादिति भावः । निवृत्तिरेव स्यादिति । निवृत्तौमिथ्यत्वसत्वमेव प्रयोजकं । न निवृत्तित्वमिति भावः । अनवस्थयोरिति । अविद्यानुभवोपाधेरपि मिथ्यात्वेन अनुभवाधीनसत्ताकत्वे सत्यनुभवांतरनभ्युपगमेन ब्रह्मण एव तदनुभवत्वात्तदनुभवेप्युपाध्यंतरांगीकारे तत्राप्येवं प्रसंगादनवस्थेत्यर्थः । तिरोधत्त इति । ततश्चस्वयंप्रकाशेप्यध्यास उपपद्यत इति । अन्यत्रेति । तिरोधानं नहि प्रकाशनिवृत्तिरिति तिरोधानानुपपत्तौ प्रपंच्यत इत्यर्थः ।

अनुभव नैरपेक्ष्यमेवाविद्याया ब्रह्म तिरोधानमिति नान्योन्याश्रय इत्याशंकते अनुभव इति । ज्ञानबाध्यत्वं न स्यादिति । सत्यत्वंस्यादित्यर्थः । तथाविधःज्ञानाबाध्यः । वाचामगोचर इति । दोषाः बहव इत्यर्थः । स्थालीपुलाकनीत्या प्रधानदोषोदाहरणं दर्शयति ज्ञानेति ।

अनुभव इति । अविद्यानुभवइत्यर्थः । अनिर्मोक्ष इति । अविद्यानुभवस्य नैरपेक्ष्यं किमनादित्वात् आदिमत्वेपि निर्हेतुकत्वात् सहेतुकत्वेपि तिरोधाननैरपेक्ष्याद्वा । आद्येपि ब्रह्मस्वरूपमेवानुभवः उत तदन्यः । पूर्वत्र नित्यत्वात् तन्निवृत्तिरूपमोक्षासिद्धिः । उत्तरत्रादि सत्यो असत्योवा । सत्यत्वे अद्वैत हानिः अनिर्मोक्षश्च । मिथ्यात्वे तदध्यासो न स्यात् दोषांन्तराच्च । तस्य सत्यतादिप्रसंगेन अनिर्मोक्षः । नापि प्रथम द्वितीयः निर्हेतुकत्वानभ्युपगमात् । अभ्युपगमे मोक्षेपि प्रसंगेनानिर्मोक्षः । नापि तृतीयः ॥ अविद्यातिरिक्तदोषसत्यतादिप्रसंगेनानिर्मोक्ष इत्युक्तप्रायत्वादित्यर्थः । किं चाविद्यानुभवस्य तिरोधाननिरपेक्षत्वेतीति तिरोधानमेव न कल्प्यं व्यर्थत्वादित्याह किं चेति सिद्धान्तेऽपि ब्रह्मणः सर्वज्ञत्वं । सर्वानुभवरूपत्वमेवेति मत्वा शंकते । ननु भवतामिति । स्वस्वेतर वस्त्विति । स्वयं च स्वेतरवच्चेति द्वंदः ॥ मुक्तोऽपीति । ब्रह्मज्ञानवन्मुक्तज्ञानमपि सर्वविषयकमित्यर्थः । ननु संबंधज्ञानस्यापि स्वभावतः

भजतीति न विरोधः। उपाधयश्च प्रवाहानादिरूपेणोपस्थिताः कर्मादय इति नानवस्थादयो दोषाः। अतो यदि बाह्यानुभवमिच्छसि तदा स्वरूपमात्र प्रकाशस्वभावादात्म स्वरूपादतिरिक्तं तद्धर्मभूतं ज्ञानमभ्युपगच्छकृत्यजवा बाह्यानुभवव्यसनमिति। त्यजामस्तर्हि बाह्यानुभवम्, न ह्यत्र वस्तु बाह्यं किंचिदनुभूयत इति चेन्न; विकल्पासहत्वात्। किमत्र बाह्यतया प्रतीयमानानामनुभूति स्वरूपत्वमभिमतम्? उत स्वरूपातिरिक्तानामवस्तुत्वम्? अथ वस्तूनामवस्तूनां वा बाह्यानामनुल्लेखः? उत बाह्यानुभवस्यैवा वस्तुत्वमिति। नाद्यः, आत्मख्यातिवादस्य त्वयैव दूषणात्, तदभ्युपगमस्य चान्यत्र दत्तोत्तरत्वात्। न द्वितीयः, प्रपञ्चापह्नवनिर्मूलनात्। अवस्तुत्वेऽपि तदुल्लेखस्य दुरपह्नवतया बाह्यप्रकाशावश्यंभावात्। न तृतीयः, सर्वलौकिकपरीक्षकहृदयविसंवादात्, सर्वसंरम्भविलयप्रसङ्गाच्च। न चतुर्थः, माध्यमिक वादावतारात्। अस्तु बाह्यानुभवस्यैवावस्तुत्वमिति चेन्न; तस्यैव विशोधितस्य त्वया ब्रह्मत्वाभ्युपगमात् तदतिरिक्तस्य तु त्वदभिमतस्य कुतश्चिदप्यसिद्धेः। सिद्धावपि तस्यैव बाह्यानुभवाभावे तद्व्यतिरिक्तानामपि बाह्यानुभवभेदानामसम्भवे पुनरनुल्लेखपक्षपरिशेषात्। अतो बाह्योल्लेखस्ते हातुमुपादातुं वा न शक्य (त इति) मिति दुरन्तमिति।

इति श्री कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां बाह्यप्रकाशानुपपत्तिवादः अष्टादशस्समाप्तः॥

सर्वविषयत्वे संसार एव नस्यादित्यत आह बंधेति॥ सर्वविषयीकरणयोग्यतायास्सत्वेपि न सर्वविषयत्वं तद्ज्ञानस्येत्यर्थः। कर्मादिरित्यादि शब्देन अविद्यादयोगृह्यन्ते। नानवस्थादय इति। अविद्यया कर्म ततो वासना-ततो रुचिःततः प्रकृतिसंबंधः। ततश्चाविद्येति आत्माश्रयान्योन्याश्रय चक्रकाश्रयाः। यद्यविद्या प्रकृति संबंधांतरमूलं तदानवस्थादिदोषा न भवन्ति प्रवाहानादित्वांगीकारादिति भावः। त्यजवेति। धर्मभूतज्ञानं विना स्वरूपेणानुभवायोगादिति भावः। बाह्यवस्त्वनुभव। भावरूपविशिष्टाभावो बाह्यत्व वस्तुत्व तद्विषयत्वरूपविशेषणाभावेनुभवरूप विशेष्याभावेन च भवतीति क्रमेण तान्विकल्पयति किमत्रेति। त्वयैवदूषणादिति। तथाचापसिद्धान्त इति भावः। आत्मख्यातिवादोऽभ्युपगम्यत इत्यत्राह अभ्युपगमस्येति। तस्य सूत्रकृद्विशिष्टत्वादित्यर्थः। प्रपंचापह्नवेति। प्रपंचमिथ्यात्वस्य दूषितत्वादित्यर्थः। अवस्तुत्वेऽपीति। सत्यत्वाभावेपि मिथ्यात्वमेव त्वयाभ्युपगतं न तुच्छत्वं। तथाच तत्प्रकाश आवश्यक इति भावः। विसंवादादिति। सर्वस्याप्यनुभवस्य सविषयतयैवानुभवादित्यर्थः। सर्वसंरंभेति। स्वपरसिद्धान्ताद्यस्फुरणातत्स्थापनदूषणादिप्रवृत्तिर्न स्यात्। किं बहुना प्रवृत्तिमात्रमपि न स्यात्। तस्यास्तद्विषय स्फुरणसाध्यत्वादित्यर्थः। अवस्तुत्वेपीति-सत्यत्वाभावेपि। माध्यमिकेति। प्रकाशस्वरूपसत्यत्वं त्वन्मतस्य तन्मताद्विशेषः। तदवस्तुत्वे सोऽपि नस्यादित्यर्थः। ननु प्रकाशमात्रं नावस्तु। अपि तु बाह्यप्रकाश एव तथा च ब्रह्मस्वरूपप्रकाशस्य सत्यत्वाद्विशेष इति शंकते। अस्त्विति। तस्यैवेति। परागर्थः। प्रमेयेष्विति। सूत्रस्थवचनादिति भावः। विषयो परागभेदनिवृत्तिः शोधितत्वं। तदतिरिक्तस्यत्विति। बाह्यप्रकाशातिरिक्तप्रकाशो ज्ञात्रात्मक एव प्रमाणसिद्धः। न तु तद्विशिष्टज्ञानमात्र रूप इत्यर्थः॥ सिद्धावपीति। अ (+++)रिकोपि सत्यः कश्चित्प्रकाशः। तथापि तस्य पूर्वोक्त स्वतस्त्वौपाधिकत्वविकल्पासहत्वाद्बाह्यानु भवायोगः। तदभावे च प्रतिभादीनसत्ताकानां बाह्यानुभव भेदानामभावादनुल्लेखपक्षः परिशिष्यते। स च दूषित इत्यर्थः। दुरुक्तमिति। व्यसनमिति शेषः॥

इति वत्सकुलजलधिकौस्तुभेन नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां अष्टादशो वादस्समाप्तः॥

।। अथ ब्रह्माश्रयाज्ञाननिरासवादः एकोनविंशः ।।१९।।

अनन्यचेतसां पुंसामज्ञानमवधुन्वते।
निरस्ताज्ञानगन्धाय नित्यं सर्वविदे नमः ।।

अहङ्काराभिव्यङ्ग्यत्वं दूषयद्भिर्भाष्यकारैरज्ञानाश्रयत्वमपि संविदो निरस्तम् ''न च संविदाश्रयत्वमज्ञानस्ये''त्यादिना । अविद्याश्रयविकल्पे चोक्तम्- ''नापि ब्रह्माश्रित्य, तस्य स्वप्रकाशज्ञानरूपत्वेनाविद्याविरोधित्वात् इत्यादिना'' । प्रदेशान्तरेषु च सर्वज्ञत्वनिर्दोषत्वादि श्रुतिशतैर्विरोधो दर्शितः तत्सर्वं सङ्कलय्य व्याकुर्मः । यद्यसौ परमात्मा त्वदुक्तप्रकारेण संविन्मात्रस्वरूपः, यदि वा यथाश्रुति सर्वज्ञः, नोभयथाऽपि तस्याज्ञानाश्रयत्वं संभवति । तथा हि-न तावद्घटादिवत् ज्ञातृत्वात्यन्ताभावलक्षणमज्ञानमिह विवक्षितम्, तस्य त्वदभिमते ब्रह्मण्यपि घटादाविव यावत्स्वरूपभावितया स्वरूपे सति निवर्तयितुमशक्यत्वात् । नापि ज्ञान प्रागभावद्ध्वंसौ । ब्रह्मणि धर्मभूतज्ञानस्य कदाचिदपि अनभ्युपगमात् । नापि ज्ञानान्योन्याभावः, ज्ञानान्तरानभ्युपगमात्; स्वप्रतियोगिकभेदायोगाच्च । वृत्तिज्ञानादध्यस्तज्ञानाद्वा भेदस्य स(नि)त्यत्वेन तस्यापि निवर्त्यतयाऽभिमता ज्ञानत्वायोगात् । भावरूपाज्ञानत्वाभ्युपगमादेव च नाभावान्तरमपि । अतो यत्तदज्ञानं ज्ञाननिवर्त्यमभिमतम्, तज्ज्ञातर्येव भवितुमर्हति; ज्ञानस्य स्वाश्रय एवाज्ञाननिवर्तकत्वव्याप्तेः । न हि देवदत्तगतेन ज्ञानेन यज्ञदत्तगतमज्ञानं निर्वतते । ननु ईश्वरादिगतेन ज्ञानेन कथं

अज्ञानानुभवश्च न संभवतीति भाष्यतात्पर्यं पूर्वत्रवर्णितं । तत्रोपस्थितमज्ञानमाश्रयानुपपत्त्या दूषयति अनन्येति । यद्वा पूर्वत्र अज्ञानाधीनो बाह्य प्रकाश इत्युक्तं (सूचयति निरस्ता ज्ञानगंधायेति) । इदानीं अज्ञानमेवश्रयाभावान्न संभवतीति वादार्थं संगृह्णाति अनन्येति । अन्यस्मिन् श्चेतो येषां ते अन्यश्चेतसः ''कंठेकाला''दिवत्समासः वादार्थं सूचयति निरस्ता ज्ञानगंधायेति ।

गंधो लेशः वक्ष्यमाण परपक्ष निरासस्य भाष्यकृत्संमतत्वमाह अहंकारेत्यादिना-त्वदुक्तेति । सर्वगोचरत्व हि ब्रह्मणस्सर्वज्ञत्वमिति त्वदुक्तप्रकारः । ननु संविन्मात्ररूपत्वे कथमज्ञानाश्रयत्वासंभवः अज्ञानंहि ज्ञान विरोधि अतस्संविदनाश्रयत्वं तद्विरोध्यज्ञानाश्रयत्वोपपादकमेवेत्यत्राह तथाहीति । अत्र किमज्ञानशब्देन ज्ञानात्यंताभावः यद्वा ज्ञानप्रागभावप्रध्वंसौ उतान्योन्याभावः । यद्वा उत्पाद विनाश शाली ततश्च नाघरोभावः । आहोस्वित् भावरूपमिति विकल्पमभिप्रेत्य आद्ये दोषमाह न तावदिति । ज्ञानात्यंताभावलक्षणमित्यर्थः । त्वदभिमते ब्रह्मणि संविदनाश्रय इत्यर्थः । यावत्स्वरूपभावितयेति । व्यावहारिकतदभावांगीकारेऽपि तस्य न साक्षात् ज्ञाननिवर्त्यत्वमिति भावः । द्वितीयं दूषयति नापीति । विवक्षिताविति शेषः । कस्यचिदिति । निवर्त्यवदनित्यस्य अभ्युपगमात् प्रागभावप्रध्वंसायोः प्रतियोगिसदेशतानियमात् प्रतियोग्यनाश्रये ब्रह्मणि न संभवत इत्यर्थः । तृतीयं दूषयति नापीति । (विवक्षिताविति शेषः) वृत्तिज्ञानादिति । यद्यपि वृत्तिज्ञानमप्यध्यस्त ज्ञानमेव तथापि व्यावहारिकं हि वृत्ति ज्ञानमिति विवक्षत (+++) प्रातिभासिकस्याध्यस्त पदेन विवक्षितमिति विवेकः । चतुर्थं पक्ष दूषयति भावरूपेति । पंचममनुवदति । अत इति । यत एवाभावरूपमज्ञानं विवक्षितमतो भावरूपमेवाज्ञानं विवक्षार्हं पर्यवस्यतीत्यर्थः । यदिति । यत्तद्भावरूपतया ज्ञाननिवर्त्यत्वेन वाभिमतं विवक्षार्हं तदज्ञानमेवेत्यर्थः । यथा सिद्धान्ते ईश्वरयोगिगतेनानुग्रहरूपेण ज्ञानेन तदनुग्राह्यजीवगताज्ञानं त्वदभिमतं निवर्तते

तदनुग्रहविषयजीवगताज्ञाननिवृत्तिस्तवेति चेन्न; तत्र शक्तिविशेषोपबृंहितत्वेन तदुपपत्तेः। न हि प्रकाशाकारतामात्रेण तत्र परगताज्ञाननिवर्तकत्वम्, तथा सति नित्यं तन्निवृत्तिप्रसङ्गात्। अतो जीवगतेनान्तःकरणगतेन वा तत्त्वज्ञानेन ब्रह्माज्ञाननिवृत्तिरिति प्रत्युक्तम्। ततश्च यत् ज्ञाननिवर्त्यमज्ञानम्, न तत् ज्ञातृत्वप्रसक्तिशून्ये ब्रह्मणि भवितुमर्हति। तदेतद्भावरूपाज्ञानदूषणे प्रसङ्गाभिप्रायेण प्रायुङ्क्ते- ''विवादाध्यासितमज्ञानं न ज्ञानमात्रब्रह्माश्रयम्, अज्ञानत्वात्;'' शुक्तिकाद्यज्ञानवत्; ज्ञात्राश्रयं हि तत् इति। ''ब्रह्म नाज्ञानास्पदम्, ज्ञातृत्वविरहात्, घटवत्'' इति च। ननु कल्पितं ज्ञातृत्वं ब्रह्मणोऽप्य (स्ति, तेनास्या) स्तीति तस्याज्ञानाश्रयत्वोपपत्तिरिति चेन्न; अहङ्कारोपहितवेषेणैव तस्य ज्ञातृत्वकल्पनाभ्युपगमात्, सुषुप्तिमरणादिष्वहङ्कारप्रलयेऽपि संविदात्मन एवाज्ञानाश्रयत्वाभ्युपगमाच्च। ततश्च शुक्तिकाज्ञानवद्ब्रह्माज्ञानमप्यहमर्थनिष्ठमिति वा कल्पय, त्यज वा सर्वत्र ब्रह्माज्ञानम्। उभयथाऽपि न त्वामुपद्रवामः। यश्च वस्तुतो ज्ञातृत्वं परिगृह्याज्ञानमपि ब्रह्मणि स्थापयेत्, सोऽपि नित्यसर्वज्ञत्वानुपपत्त्या निरसिष्यते।

तद्वन्ममापि जीवगतेन वान्तःकरणगतेन वा ज्ञानेन ब्रह्मगताज्ञानं मदभिमतं निवर्ततामिति शंकते नन्विति। नेति। शक्तिविशेषसंकल्परूपताप्रकाशाकारतामात्रेणेति समान विषयकज्ञानत्वेनेत्यर्थः तथा सतीति। ईश्वरस्य नित्यस्य सर्वज्ञत्वादित्यर्थः। व्यधिकरणज्ञानस्य अज्ञान अनिवर्तकत्वं आपादितुंमुपसंहरति अत इति। एतेन विवादाध्यासितमित्यादिना भाष्योक्तस्तर्कोऽपि समर्थित इत्याह तदेतदिति। प्रसंगाभिप्राणेमेति। अज्ञानत्वंहि ज्ञानत्वेन ज्ञाननिवर्त्यत्वं पराभिमतं। तच्चासिद्धमिति नानुमानत्वमिति भावः। पराभिमतं भावरूपाज्ञानं ज्ञानमात्रब्रह्म स्वरूपंचाभ्युपगम्य तर्कः प्रयुज्यते। विवादाध्यासितमिति। ब्रह्माश्रयं न वेति विवादविषय इत्यर्थः। यदज्ञानं न तद्ब्रह्माश्रयमिति शुक्तिकाद्यज्ञानादौ व्याप्तेर्दर्शनात् ब्रह्मविषयाज्ञानं न ब्रह्माश्रयं। तथात्वे जीवज्ञानव्यधिकरणस्य तस्य ज्ञानत्वेन ज्ञाननिवर्त्यत्वरूपाज्ञानस्यैवासिद्धिप्रसंगात्। न च व्याप्त्यपि अज्ञानस्य ज्ञानमात्राश्रयत्वव्याप्तेः। शुक्तिकाद्यज्ञानमपि ज्ञात्राश्रयमेव एतदभिप्रायेणोक्तं। ज्ञानमात्रेति। ज्ञात्राश्रयं हि तदिति। न च ज्ञात्राश्रयत्वनियमोप्यसिद्ध इति वाच्यं। देवदत्तज्ञानेन यज्ञदत्ताज्ञाननिवृत्तिप्रसंगेन ज्ञानसामानाधिकरण्यं निवर्त्यस्याज्ञानस्येति ज्ञात्राश्रयत्वनियमसिद्धिरिति। ब्रह्मज्ञानेनेति। ब्रह्मायद्यज्ञानाश्रयस्यात् ज्ञातृस्यादिति तर्कोभिप्रेतः। अहंकारेति। अन्तः करणावच्छिन्न एव ज्ञातृत्वाध्यासत्। न चिन्मात्राश्रयमज्ञानमित्यर्थः ननु मास्तु शुद्धं ज्ञानमाश्रयं ज्ञातृत्वाद्याश्रये अहंकारोपहित वाज्ञानं मस्त्वित्यत्राह सुषुप्तीति। ततश्च शुद्धस्यैव ज्ञातृत्वमभ्युपेयं ततश्च ज्ञातृत्वं कल्पितं न स्यादिति भावः। उपसंहरति। तत इति। सर्वत्र जीवे ब्रह्मणि च यथा जीवे त्यजसि तथा ब्रह्म - ण्यपि त्यजेत्यर्थः। ननु ब्रह्मणो वस्तुतो ज्ञातृत्वमंगीक्रियते तस्यैवेश्वरत्वात्। तथा च ना ज्ञानाश्रयत्वानुपपत्तिरिति ब्रह्मदत्तमतं निराकरोति यश्चेत्यादिना। ''स्वाभाविकी ज्ञानबलक्रिया च'' (श्वेता- ६-८) इति श्रुत्यादिविरोध इति भावः।

आधारविरोधाधेयं न संभवतीत्याह स्वप्रकाशत्वाच्चेति। तेजसि वेति। यथा ग्रहादौ तमोविरोधिनि तेजसि सति तमो न संभवति तथा स्वप्रकाशतया स्वेनैव भासमाने ब्रह्मण्यज्ञानं न स्यादित्यर्थः। ननु स्वरूपज्ञानस्य अधिष्ठानज्ञानतया ज्ञानाध्यासहेतुत्वान्न तस्य तद्विरोधित्वमित्याह। तच्चेदिति। कस्तस्वेति।

स्वप्रकाशत्वाच्च। ब्रह्मप्रकाशबाध्यं हि ब्रह्माज्ञानमभिमतम्, ब्रह्म च नित्यस्वप्रकाशरूपम्, ततस्तेजसीवतिमिरं कथं तत्र तत्स्यात्? तच्चेत्स्वस्मिन्नज्ञानं सहेत, कस्तस्य निवर्तकः? ब्रह्मविषयं वृत्तिज्ञानं निवर्तकमिति चेत् अनुभाव्यत्वे घटादिवदननुभूतित्वप्रसंग इति त्वदुक्तं किं न स्मरसि? प्रस्मर वा। तथाऽपि विशेषाभावान्न तस्यापि निवर्तकत्वम्। निवर्तकानुपपत्तौ चास्य विस्तरो ग्राह्यः। ननु भवतोऽपि जीवस्वरूपं स्वप्रकाशम्, तदेव चाज्ञानाश्रयतयाऽभिमतमिति चेत् सत्यम्, तथाऽपि न तत्र विरोधः। नहि स्वप्रकाशांश प्रत्यनीकमप्रका (शां) शं प्रत्यगात्मनो ब्रूमः, अपि तु तस्यैव देहेन्द्रियादिविधर्मिणः स्वप्रकाशत्वनित्यत्वस्वादुतमत्वादिधर्मविशिष्टरूपाज्ञानम्। तच्च तदात्मगतेन विशिष्टविषयेण ज्ञानेन निवर्तते। यथा च शबरसंवर्धितस्य राजकुमारस्य शबरतयाऽऽत्मानमभिमन्यमानस्य प्रकाशमान एव स्वात्मनि क्षत्रियत्वाज्ञानम्, तच्चोपदेशादिजन्यराजत्वज्ञानेन निवर्तते; तद्वदत्रापीति स्वयमेव परिभावय।

नित्यमुक्तत्वाभ्युपगमाच्च। न ह्यज्ञानाश्रयत्वमनन्तर्भाव्य कश्चिद्बन्धो नाम न च बन्धाभावादन्या मुक्तिः। येच मुक्तिदशायां पाषाणादिवदज्ञत्वमिच्छन्ति, न तेऽपि तदानीं संसारबीजभूतमज्ञानमनुमन्यन्ते। अस्मन्मते तु यद्यपि सार्वज्ञ्यमात्मनां स्वरूपप्रयुक्तं, तथाऽपि तदुपाधिवशान्निरुद्धमिदानीं न विद्यत इति बन्धमोक्षयोः कालभेदान्न विरोधः। अस्माकमप्यविद्यातन्निवृत्त्योः पौर्वापर्यान्न विरोध इति चेत्; तर्हि

ज्ञानांतरानंगीकारादिति भावः। निवृत्तिरेवनिवर्तकेति शंकते ब्रह्मेति। अनुभाव्यत्व इति। घटादेरनुभाव्यत्वं हि वृत्ति विषयत्वं वा वृत्तिप्रतिबिंबितचैतन्य प्रकाश्यत्वं वा स्यात् ब्रह्मण्यपि तत्सत्वे घटादिवदननुभूतित्वं दुर्वारमित्यर्थः। प्रस्मरचेति। प्रस्मरणंस्मृतिः। संस्कृत्य वा स्वातिरिक्तानुभवप्रकाश्यत्वमेव अनुभाव्यत्वमिति कल्पयेत्यर्थः। विशेषाभावादिति। प्रकाश्यवैलक्षण्यस्या परोक्षवैलक्षण्यस्य वा विशेषाभावाद्ब्रह्मस्वरूप ज्ञानवद्वृत्तेरप्यज्ञाननिवर्तकत्वं न स्यादिति भावः। निवर्तकानु पपत्ताविति। स्वेन वक्ष्यमाणायामिति शेषः। अज्ञानाश्रयतयेति। ज्ञानविरोध्याश्रयतयेत्यर्थः। न हीति। स्वरूपमात्रस्यैव स्वप्रकाशत्वांगीकाराच्चेति भावः। ननु तर्हि किमंशे ज्ञानमित्यत्राह अपित्विति। ननु कथं स्वरूपेभासमाने विशिष्टविषयं ज्ञानं। कथं वा विशिष्टज्ञानेन निवृत्तिरित्यत्राह यथा शबरेति।

नित्यमुक्ते वा ज्ञानमयुक्तमित्याह नित्यमुक्तत्वाभ्युपगमाच्चेति। ननु ब्रह्मणो ज्ञानाश्रयत्वेपि न नित्यमुक्तत्वविरोधः। तत्कार्यसंस्काररूप बंधस्य जीवनिष्ठत्वादित्यत्राह नहीति। ज्ञानं हि स्वाश्रय एव भ्रान्त्यादिहेतुर्दृष्टः। ततश्च तस्यापि तत्प्रतिहेतुत्वात्सोऽपि बंधशब्दार्थ एवेति ब्रह्मणो ज्ञानाश्रयत्वे तेन तत्कार्य भ्रांत्यादिना नित्य मुक्तत्वं विरुद्धमित्यर्थः। तत्कार्यबंधेनाश्रयत्वेपि मुक्तत्वं विरुद्धमित्यर्थः। तत्कार्य बंधानाश्रयत्वेपि मुक्तत्वायोगान्नित्यमुक्तत्वं विरुद्धमित्याह न बंधाभावादिति। ननु पाषाणकल्पमुक्तवादि गौतममते यथात्मत्व मुक्तेः स्समानकालत्वेपि न विरोधः तथा नित्यमुक्तौ इत्याशंक्याह यद्यपीति। यद्यपि ज्ञानाभावलक्षणमज्ञानं तेन तदानीमिच्छन्ति तथापि संसारबीजभूततया अन्याभ्युपगतं मिथ्याज्ञान लक्षणं नेच्छन्ति त्वन्मते चाज्ञानस्यैव बंधबीजत्वात् तदाश्रयत्वे सति कथं तत्कार्यभ्रान्त्याद्यभावः। तत्सद्भावे च कथं नित्यमुक्तत्वमित्यर्थः। ननु सिद्धान्ते जीवसार्वज्ञस्य स्वाभाविकत्वमिष्यते तस्य संसाराभावस्य व्यापकत्वं च तथा च तस्य कथं संसारबंध इत्यत्राह अस्मन्मते त्विति। सार्वयोग्यता स्वाभाविकीति न तया बंधविरोधः अपितु सर्वज्ञेन तच्च बंधनिवृत्यांतरमेवेति न विरोध इत्यर्थः। न च वयं जीवब्रह्मविभागेन

नित्यमुक्तत्व (व्याघातः)-विरोधः। अविद्यायाः स्वकालेऽपि वस्तुतो निवृत्तत्वान्नित्यमुक्तत्वमुपपद्यत इति चेत्; कथं तर्हि पौर्वापर्यम्। प्रतिभासभेदाधीनमिति चेन्न; प्रतिभासयोरपि नित्यनिवृत्तस्वरूपतया तत्रापि पौर्वापर्यासिद्धेः। एवं च तत्तत्प्रतिभासपारम्पर्यगवेषणेऽपि न निस्तारः। न च सत्यस्ते प्रतिभासभेदः, येन निरुपाधिकं तत्र पौर्वापर्यं स्यात्। निवृत्त्यनुपपत्तिहेतवश्चात्र संचारणीयाः।

सर्वज्ञत्वाच्च। न हि सर्वं जानाति यत्किंचित्सर्वमेव वा न जानातीति सम्भवति। माभूत्सार्वज्ञ्यं ब्रह्मण इति चेत्, न तावदयं शापः। नाप्यनभ्युपगममात्रप्रकाशनम्, अकिंचित्करत्वात्। नापि प्रमाणानुधावनम्, वैपरीत्यात्। श्रूयते हि-''यस्सर्वज्ञस्सर्ववित्''(मुण्ड-१-१-९) इत्यादि। स्वयं च ब्रवीति- वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानि मां तु वेद न कश्चन॥ (श्री.भ.गीता ७-२६) इति। स्मरन्ति च - ''सर्वज्ञस्सर्ववित्सर्वशक्तिर्ज्ञानबलर्धिमान्''। (वि.पु) इत्यादि। न नित्यं

बंधमोक्षौ व्यवस्थापयामः। किंतु राजसूनोः स्मृतिप्राप्तौ व्याधभावो निवर्तते यथैवात्मनोऽज्ञस्य तत्वमस्यादिवाक्यतः इति ब्रह्मण एव स्वाविद्यया संसारः स्वविद्यया मोक्ष इति मतमाशंकते अस्माकमपीति। नित्यमुक्तत्वं च नेष्यत इति भावः। किं तर्हीति। ब्रह्मणो नित्यमुक्तत्वप्रतिपादकश्रुतिविरोध इत्यर्थः। ननु न वयं बंधमोक्षयोः कालभेदेन व्यवस्थां ब्रूमः। किं तु तयोस्सत्यत्व मिथ्यात्वाभ्यां इति शंकते। अविद्यया इति। एवं तर्हि स्वाभ्युपगतं बंधमोक्षयोः पौर्वापर्यं भज्येतेत्याह कथं तर्हीति। स्वरूपतः पौर्वापर्याभावेपि ज्ञानोपाधितः पौर्वापर्यंस्यादिति शंकते। प्रतिभासेति। प्रतिभासयोरपि किं मिथ्यात्वं उत सत्यत्वमिति विकल्पे प्रथम पक्षं दूषयति। प्रतिभासयोरपीति। परत्वं हि तन्निवृत्तिकालीनोत्पत्तिप्रागभावकत्वं संसार प्रतिभास्यस्य निवृत्तिः ब्रह्मस्वरूपमेव मोक्षकाले तदतिरिक्तनिवृत्त्यंगीकारे अपसिद्धान्तादतः उभयनिवृत्तिसमानकालीनत्वं उभयोरिति कथं पौर्वापर्यव्यवस्थेति भावः। ननु तदुत्तरत्वं तदधिकरणकालवृत्तिप्रागभावप्रतियोगित्वं। पूर्वत्वं च तत्प्रागभावानधिकरणकालावृत्तित्वं। तथा च नित्य निवृत्तत्वेपि इदं पौर्वापर्यं न संभवत्येवेति चेत् तत्राह एवं चेति। मोक्षप्रतिभासस्य मोक्षकालीनस्य स्वरूपातिरिक्तस्यासंभवात् स्वरूपस्य चानादेः प्रागभावप्रतियोगित्वात् तत्राप्यौपधिकमेव पौर्वापर्यमिति वक्तुं शक्यमनवस्थादिति भावः। द्वितीय्ये आह नच सत्तेति। यद्यपि निरूपाधिकपौर्वापर्यं युज्यते प्रतिभासयोस्सत्ययोः तन्निवृत्तेरपि सत्यायाः वाच्यत्वात्। न तु त्वया तथा वक्तुं शक्य इत्यर्थः। ननु यदि संबंधस्य मिथ्यात्वात् तदभावरूपनिवृत्तेर्नित्यत्वेप्यखण्डापरोक्षसाध्य सबंधनिवृत्तिमादाय बंधमोक्षयोः पौर्वापर्यं युज्यते इत्याशंक्याह निवृत्तीति। यादृशः कल्पितोप्यर्थरूपो ज्ञानेनोच्छेत्तव्यो बंधः तदभावस्यैव श्रुत्यर्थत्वेन कल्पितेनापि संसारेणास्पृष्टचैतन्याभावे नित्यमुक्तश्रुतेर्निर्विषयत्वापातः तात्विक सबंधाभावस्य जीवब्रह्मसाधारणत्वात् अपरोक्षज्ञानसाध्याबंधनिवृत्तिः सत्यासत्या वा। सत्यत्वे अद्वैत हानिः। मिथ्यात्वे तदध्यासात् मुक्त्यनुपपत्तिरित्यादिहेतव इत्यर्थः।

किं च ब्रह्मणस्सर्वज्ञत्वात् स्वात्मानं जानतः कथं स्वात्मगोचराज्ञानाश्रयत्वमित्याह सर्वज्ञत्वाच्चेति। किं ब्रह्मणो यत्किंचिद्गोचरं ज्ञानं उत सर्वगोचरं उभयथा विरोधान्नसंभवतीत्याह नहि सर्वमिति। अकिंचित्करत्वादिति। अन्यथा न किंचिदपि सिध्यतीति भावः। विपरीतप्रमाणमेव दर्शयति। श्रूयत इति। वेदाहमिति। भूतभविष्यद्वर्तमानातिरिक्ताभावात् तद् ज्ञानेसार्वज्ञमिति भावः। स्मरंतिचेति।

तस्य सार्वज्ञ्यमिति चेत्, अस्य कोऽर्थः? किं कदाचिदपि सार्वज्ञ्यं नास्तीति? उत सदप्यनित्यमिति? नाद्यः, श्रुतिविरोधात्; गुणनिषेधश्रुतीनां श्रुतिविहितगुणव्यतिरिक्तविषयत्वस्थापनात्। न द्वितीयः, स्वाभाविकसार्वज्ञ्य श्रुतिविरोधादेव। न हि स्वाभाविकसार्वज्ञ्यस्य विनाशस्सम्भवति। नापि चोत्पत्तिः, प्रागभावाभावात्। विस्तरस्त्वन्यत्र।अतो नित्यसर्वज्ञत्वाद्ब्रह्मणो न कदाचिदपि तस्याज्ञानाश्रयत्वसम्भवः। एतेन समस्तदोषनिषेधकवाक्यशतबाधोऽपि स्थापितः॥

ननु क एवमाह अज्ञानाश्रयभूतं ब्रह्मेति? यं प्रति तन्निषेधसम्भवः, इति चेत्; हन्त किमस्मदुक्तयुक्त्या प्रयुक्तो भवान् ब्रह्माज्ञानं निषेधति? उत स्वमनीषिकासिद्धवृषलोद्वाहमन्त्रन्यायेन? पूर्वत्र त्यजामस्संरम्भम्। उत्तरत्रापि न तावन्निरुपाधिकयोरेकत्र सम्भवः, उपाधिभेदापादितयोरपि न त्वदुक्तयुक्त्या सिद्धिः; न हि देशकालादिभेदेन तयोर्निर्वाहं पश्यसि, तथा दर्शनेऽपि प्रागुक्तयुक्तयः प्रतिस्पर्धिन्यः। प्रातिभासिको विधिः पारमार्थिको निषेध इत्यपि न पालयितुं शक्यम्। निषेधस्याप्यन्ततास्त्वदुक्तरीत्या

प्रत्यक्षसंकल्पादि भेदेन सर्वज्ञादिव्यपदेशः ॥ किं नित्यत्वमभावविशेषणं उत प्रतियोगिविशेषणमित्यभिप्रायेण पृच्छति। अस्यकोऽर्थ इति। ''स्वभाविकी ज्ञान बलक्रिया चेति'' (श्वेता-६-८) श्रुति विवक्षिता कादाचित्कत्वं हि विनाद्योत्पत्तिमत्वाद्वा नाद्य इत्याह नहि स्वाभाविकेति। द्वितीय्ये आह नापिचोत्पत्तिरिति। ननु जीवस्यापि सार्वज्ञमात्मस्वरूपप्रयुक्तत्वात् स्वाभाविकं। तथा अपहतपाप्मत्वादिगुणाष्टकं च ''संपद्याविर्भावःस्वेनशब्दात्'' (ब्र.सू.४-४-२) इत्यादौ उच्यते। तथापि ते कादाचित्कत्वं तत्रेष्टं तद्वन्ममापि स्यादित्यत्राह विस्तरत्विति। युक्तं जीवस्य कर्मणाति रोहितत्वात् सार्वज्ञादिकं कादाचित्कं तद्योग्यतामादाय स्वाभाविकत्वोक्तिः। तव तु न तथा। ब्रह्मणो निर्दुष्टतया कर्माभावात् ''सर्वज्ञस्सदा भवानि''त्यादिवचनाच्च न प्रतिबंदिरिति भावः। अत्र सार्वज्ञश्रुतेस्सर्व विषयज्ञानरूपत्वांगीकारेपि सर्वस्यापि ब्रह्मप्रतिभासमानत्वात् न तस्य त(द)दज्ञानाश्रयत्वं संभवतीत्यभिप्रायेण उपसंहरति अत इति॥ एतेनेति। ब्रह्मणः संसारबीजभूताज्ञानानुपपत्त्या ''निष्क्रियं निष्कलं शान्तं'' निरवद्य निरंजनं'' (श्वेता ६-२१) इत्यादि दोषनिषेधक श्रुतीनां बाध इत्यर्थः।

ननु ब्रह्मनाज्ञानाश्रयः अतो निरवद्यत्वश्रुति विरोधो नास्तीति शंकते। नन्विति। प्रयुक्तइतिप्रेरित इत्यर्थः। स्वमनीषिकेति। अज्ञानाश्रयत्वं नास्तीति स्वेच्छया वदसीत्यर्थः। वृषळानांमुद्वाह मंत्रः। तन्यायस्तत्ता दृश्यं। ''कुरु -माकार्षीः'' ''भुंक्ष्व'', ''माभोक्षिष्ठाःगच्छ'' ''मागच्छ'' इत्यादिव्याहतार्थ प्रतिपादकं भाषा वाक्यं वृषळोद्वाहमंत्रः। तथाच किं ब्रह्मव्यतिरिक्तस्यैव अज्ञानाश्रयत्वात् ब्रह्म नाज्ञानाश्रय इत्युच्यते उत अज्ञानाश्रयभूत ब्रह्मैव नाज्ञानाश्रय इत्यस्मदुक्तयुक्त्या इत्यादि फक्किकार्थः। निरूपाधिकयोरिति। उपाध्यवच्छिन्नवृत्तेरित्यर्थः। उपाधीति। बिंबप्रतिबिंबोच्छेदे भावोपाधिभेदेनापि नाज्ञानतदभावयोर्व्यवस्था संभवति। अव्यवहितयोरुपाध्यो व्यवस्थापकत्वायोगात्तयोर्व्यवस्थानुपपत्तेः। तस्याप्युपाध्यंतरांगीकारे अनवस्थप्रसंगादिति भावः। तर्हि संयोगतदभावादीनां घटतदभावादीनां च व्यवस्थास्यादित्यत्राह नहीति। देशकालादिभेदात्संयोगादिस्थले व्यवस्था संभवतीति भावः। तथा दर्शनेऽपीति। भेदाभावेपि कालभेदेन व्यवस्थांगीकारेऽपीत्यर्थः। प्रागुक्तयुक्तयः नित्यमुक्तत्वविरोधादयः। प्रातिभासिकविधिरिति। अज्ञान संबंधोमिथ्येत्यर्थः। पारिमार्थिकेति। अज्ञानाभावः। पारमार्थिक इत्यर्थः।

प्रातिभासिकत्वात्। नचाविद्यास्वरूपततदाश्रयत्वादेर्दुनिरूपतया तन्निषेधः पारमार्थिक इति युक्तम्, तन्निषेधस्य दुर्निरूपतया तत्स्वरूपादिपारमार्थिकत्वप्रसङ्गेन विपरिवर्तस्य सुशकत्वा (च्च)त्। भवतूभयमपि दुर्निरूपत्वादपारमार्थिकम्,. का नः क्षतिरिति चेन्न ''परस्परविरोधे हि न प्रकारान्तर स्थिति'' (न्याय.कु.सु. ३-७) रिति न्यायस्य सुस्थितत्वात्। ननु गगनकुसुमवदेतत्स्यात्; तद्धि न सुरभि नाप्युसरभीति चेन्न; तत्र स्वरूपस्यैवाभावेन विधिनिषेधयोरनवकाशात्, अत्र पुनस्स्वरूपसद्भावात्। अत्रापि तदभावे माध्यमिकविजय (प्रसङ्गात)स्स्यात्। ततश्चान्यतरपरिशेषे प्रामाणिकेनात्मना निषेधस्यैव स्थितौ विधेरसम्भवः। प्रमाणविरुद्धस्तु तत्सम्भवस्त्वादृशां भ्रमेणैव स्यात्। तथा चादित्येऽन्धतमसमपि कश्चिदल्पजीवितः कल्पयतीति न प्रामाणिकतत्त्वस्थितिविरोधः। एवं च क्षणभङ्गादिवादानामपि यथेष्टं परिग्रहः कार्यः, अर्थस्थितिमनादृत्याऽऽकस्मिकपरिग्रहमात्रेण वेदान्तार्थस्थापनस्य तत्र चात्र च विशेषाभावात्। युक्तीनां च यथाभिमानं त्रिचतुरकक्ष्यास्थायित्वस्य समानत्वात्। अन्यथा कथमेकैकशोऽनन्तस्यात्मवर्गस्य तत्तत्सैद्धान्तिकतर्केन्द्रजालव्यामोहवशंवदत्वमिति॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां ब्रह्माश्रयाज्ञाननिरासवादः एकोनविंशो वादस्समाप्तः॥

त्वदुक्तरीत्येति। प्रतिपन्नोपाधौ निषेधप्रतियोगित्वलक्षणयोगेनेत्यर्थः। नन्विद्या स्वरूप तदाश्रयत्व तद्विषयत्वादेदुर्निरूपत्वात् अविद्यायाः मिथ्यात्वात् तत्समानसत्ताक तदभावस्याविद्याश्रये ब्रह्मण्यसंभवात्तन्निषेधः पारमार्थिक एवेति शंकामनूद्यप्रतिवक्ति **नचेति। दुर्निरूपतयेति।** अज्ञानस्येवाभावस्याश्रय प्रतियोग्यादिसापेक्षत्वात्तस्यच दुर्निरूपत्वादित्यर्थः। **सुसिद्धत्वादिति।** समानसत्ताकयोर्विरोधस्य त्वयाप्यंगीकारादिति भावः। **स्वरूपसद्भावादिति।** ब्रह्मस्वरूपसद्भावादित्यर्थः। **माध्यमिकेति।** निरधिष्ठानभ्रमसिद्धेरिति भावः। एवं च विपरिवर्तप्रसंगेन सत्यत्वमिथ्यात्वाभ्यां अविरोधो न संभवतीति स्थितं। इदानीं ''परस्परविरोधेही''त्यादि न्यायमुपजीव्य युक्त्यंतरमाह **ततश्चेति।** ''परस्पर विरोध'' इत्यादिन्यायेनान्यतर परिशेषेऽवश्यके सति निरवद्यत्वादिश्रुतिबलादज्ञाना भावांगीकारे तद्विरुद्ध मज्ञनं ब्रह्मणि न संभवतीत्यर्थः। ननु तात्विकनिषेधं प्रतिपादयता प्रमाणेनाविरुद्धं व्यावहारिकमज्ञानसत्वं स्यादित्यत्राह **प्रमाणविरुद्धस्त्विति।** नहि तादृग्भ्रममात्रादर्थकत्वं स्यादिति भावः। एवं भ्रमस्थले अर्थस्याभावादत्वतीतेंधतमसकल्पनेऽपि तत्सिध्यभावादित्याह **तथा चेति। कल्पयती इति।** आसन्नमरणानामादित्यमण्डलमध्ये षण्मासातत्प्राकृतमोदनं भवतीति शास्त्रं सिद्धमिति भावः। भ्रममात्रादर्थसिद्धौ दोषांतरमाह **एवं चेति।** बाह्यानां तथा भ्रमादिति भावः। नित्यत्वश्रुतिबलान्नतत्परिग्रहः। **अध्यस्तमिति।** यथात्मनो ज्ञानाश्रयत्वश्रुतेर्भ्रांतिसिद्धार्थपरत्वेन प्रामाण्यं वदसि तथा क्षणभंगवादेपि स्थिरत्वश्रुते भ्रमसिद्धस्थैर्यविषयत्वेन प्रमाण्यसंभवादित्यर्थः। नन्वात्मस्थायित्वसाधकयुक्तीनां। त्रिचतुरकक्ष्यासहत्वादगीक्रियते क्षणभंगसाधक युक्तीनां तदभावात् तन्नांगीक्रियत इत्यत्राह **युक्तीनां चेति।** स्थायित्वं-सहिष्णुत्वं त्रिचतुरकक्ष्यास्थायित्वाभावे बाधकमाह **अन्यथेति॥** एकस्यैवानेकेषामप्यात्मनां क्षणभंगभ्रमः। तद्युक्तीनां त्रिचतुरकक्ष्या स्थायित्वमावेदयतीति भावः॥

॥ वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां एकोनविंशस्समाप्तः॥

॥अथ अवेद्यत्वभङ्गवादः विंशः ॥ २० ॥

१ श्रुतिगणशिरोनिष्णातानां स्वसत्त्वमभीप्सतां श्रवणमननध्यानैरध्यक्षतश्च चकास्ति यत्।
अमतमिति यद्भूम्ना मन्तव्यतामवगाहते भवभयतमःप्रत्यासेधं भजेमहि तन्महः ॥

यदाहुः- अनुभूतिस्स्वयंप्रकाशा, अनुभूतित्वात्, ''अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्ग''- तत्र तावदनुभूतिशब्दस्यार्थावगतिहेतुत्वे व्याघातःअहेतुत्वेऽपि पुनर्व्याधात इत्याबालगोपालमुपलभ्यम्। स्वयं प्रकाशे इत्यनेन किं स्वव्यवहारे स्वाश्रयस्य कदाचित्स्वगोचरानुभूत्यन्तरनैरपेक्ष्यमात्रं साध्यते? उत सर्वदा सर्वस्य स्वगोचरानुभूतिविरहः? नाद्यः, सिद्धसाधनात्। वयमपि संविदो विषयप्रकाशनवेलायां स्वाश्रयं प्रति संविदन्तरकर्मतामन्तरेण प्रकाशमङ्गीकुर्मः। तदिदं सिद्धसाधनत्वमभिप्रेत्याह- ''यत्त्वनुभूतेस्स्वयंप्रकाशत्वमुक्तम्, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैवे''ति। अत एव ये नाम स्वयंप्रकाशत्वनिवृत्तावनवस्थादिप्रसङ्गास्ते भवन्तु सम्यञ्चो न वेति तत्रास्माभिरिहोदासि। नापि द्वितीयः, प्रत्यक्षविरोधात्। तदाह- ''परानुभवस्य हानोपादानादिलिङ्गकानुमानज्ञानविषयत्वात्, स्वानुभवस्याप्यतीतस्याज्ञासिषमिति ज्ञानविषयत्वदर्शनाच्चेति। स्ववचनविरोधमभिप्रेत्याह- ''अतोऽनुभूतिश्चेत्स्वतस्सिद्धेति वक्तुं न शक्यते'' इति।

तथा हि। अनुभूतिस्स्वयंप्रकाशेत्यत्रानुभूतिशब्दः कस्यचिद्बोधको न वा? बोधकत्वेऽप्यनुभूतिरूप

पूर्ववादे सर्वज्ञत्वमुक्तमित्यनुभूतेरप्यननुभवविषयत्वं प्रसक्तमिति तन्निरूपयितुं वादार्थं संगृह्णाति। श्रुतीति। सत्वगुणाष्टकाविर्भावः। वादार्थं सूचयति श्रवणेति। चकास्तीत्यनुभाव्यत्वप्रतीतेः ''अमतं मत'' (केन १.३) मित्यदेरसिद्धं सूचयति अमतं मतमिति। भूम्ना अमतं परिच्छिन्नं न भवतीत्यमंतव्यत्वमवगत इत्यर्थः।

प्रत्यासेधविवर्तकं व्याघातं इत्यवेद्यत्वमेव ''स्वयंप्रकाशत्वमिति''। तैरभिधानादनुभूतिपदस्य बोधकत्वे सिसाधयिषिता वेद्यविपरीतसिध्या प्रतिज्ञाया व्याघात इत्यर्थः। अहेतुत्वेऽपीति। अबोधकत्वेन अनेन वाक्येनानु भूतेरवेद्यत्वाबोधनादिष्टासिद्धिरूप व्याघातस्य स्फुटत्वादित्यर्थः। शब्दार्थाभिप्रायेण विकल्पयति स्वयं प्रकाशेति। यत्वनुभूतेरित्यादिसिद्धसाधनपरं भाष्यमनुपपन्नमिव प्रकाशान्तरविषयत्व सामान्याभावस्य सिद्धेर्विषयप्रकाशनवेळायामपि यज्ञदत्तीयज्ञानस्य देवदत्तादि ज्ञानान्तरविषयतया सामान्या भावादित्याशंकायामुक्तप्रकारेण विकल्प्य दूषणपरं यत्वित्यादिभाष्यं इत्याह तदिदमिति। नन्वनुभूतेरनुभूत्यंतर वेद्यत्वेन तदवेद्यत्वे तस्या एवाभावात्तदा मिथ्यादिदोषास्युरित्यत्राह अत एवेति। यत एव ज्ञानान्तर वेद्यत्वनियमो नास्ति विषयप्रकाशनवेळायां स्वेनैव स्वसिद्धेरतो न ते दोषास्सत्यं चेत्यर्थः। प्रत्यक्षविरोधादिति। परज्ञानस्य परज्ञानमनुमिनोमिति स्वकीय्यादितद्ज्ञानस्यानिष्टमिति ज्ञानविषयत्वस्य च प्रत्यक्षविषयत्वात्प्रत्यक्षविरोध इत्यर्थः। तत्र भाष्योदाहरणव्याजेन प्रत्यक्ष विरोधमुपपादयेति। तदाहेति उपसंहारभाष्ये वक्तुं न शक्यत इत्युक्तेस्तात्पर्यमाह स्ववचनेति। अत्र स्वतस्सिद्धिरनुभवांतराविषयत्वं। स्ववचनविरोधमुपपादयति तदाहेति। तथाचानुभूतिशब्दस्य

ब्रह्मस्वरूपबोधकस्तदन्यबोधको वा? ब्रह्मस्वरूपबोधकत्वे सिद्धं तस्य तज्जन्यसंवित्कर्मतया प्रकाशमानत्वं प्रकाशमानं स्वरूपं अनेनानूद्यत इति चेन्न। तथाऽपि अनुवादात्मक संवित्कर्मतया प्रकाशमानत्वस्य दुरपह्नवत्वात्। अन्यथा तदनुवादत्वस्यासिद्धिप्रसङ्गात्। ततश्च प्रतिज्ञापदयोः फलप्रतिपादनाभ्यां व्याघातः। तदन्यबोधकत्वे तु तस्यैव स्वयंप्रकाशत्वं प्रतिज्ञातं स्यात्। ततश्च सिषाधयिषितासिद्धिरर्थान्तराख्यं निग्रहस्थानमपसिद्धान्तश्च प्रसज्येरन्। कस्यचिदप्यबोधक इति पक्षे त्ववाचकप्रयोगान्निरर्थकनिग्रहस्थानप्रसङ्गः। हेतोश्चाश्रयासिद्धिः।

एवं हेतुसाध्यप्रतिपादकशब्दावपि संविदन्वितहेतुसाध्यप्रतिपादकावित्यभ्युपगन्तव्यम्। अन्यथा त्वप्रतिपादकत्वे वाऽनन्वितप्रतिपादकत्वे वा निरर्थकापार्थकनिग्रहस्थानापातात्। अतस्तदन्वितहेतुसाध्यप्रतिपादने तयोरप्यनुभूतिविशेषकत्वात्ताभ्यामपि वेद्यत्वं फलितम्। अतस्साध्यहेतुवाचिपदयोः फलप्रतिपादनाभ्यां विरोधः। अतोऽनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्व प्रसङ्ग इति तर्कोऽपि स्ववधाय कृत्योत्थापनम्। प्रागुक्तप्रत्यक्षेण तत्रत्यानुभूतिशब्देनैव चानुभूतेरनुभाव्यत्वस्थितावननुभूतित्वप्रसङ्गात्।

अर्थावगतिहेतुत्वमसति न वेति पूर्वत्रापि विकल्प्य दूषणोक्त्यानुशंकनीयं। प्रकाशमानमिति। स्वत इति शेषः। अनुवादजन्यं च ज्ञानं वृत्तिरूपं न संविदिति तद्विषयत्वेपि न विरोध इति भावः। तथापीति। अनुवादात्मकपदं अनुवादजन्यपरं। तस्य संवित्वस्य प्रत्यक्षसिद्धत्वान्न तस्य संविदन्यत्वमिति तद्विषयत्वे स्वप्रकाशत्वभंग एवेति भावः। अन्यथेति। अनुवादजन्यतद्गोचर संविदभावेऽनुवादत्वमेव न स्यात् प्रकाशित्नार्थ प्रकाशस्यैव तत्वादिति भावः। प्रतिज्ञापदयोरिति। अनुभूतिस्वप्रकाशेति पदयोर्व्याघातो विरोध इत्यर्थः। तत्र हेतुः। फलप्रतिपादनाभ्यामिति। फलं साध्यमवेद्यत्वं। अनुभूतिपदेन अनुभूतिविषयक संविज्जननेनाभाव्यत्वस्याधानात् स्वप्रकाशशब्देन तन्निषेधादित्यर्थः। यद्यपि विरुद्धार्थप्रतिपादकत्वं तथापि फलस्वरूपस्य तज्जन्यज्ञानरूपेण विरोध लक्षणो व्याघात इति ध्येयं। अत एव प्रतिपाद्य प्रतिपादनयोरेव विरोध इति द्योतनाय फलप्रतिपादनाभ्यामित्युक्तं सिसाधयिषितेति। ब्रह्मणः स्वयं प्रकाशत्वं सिसाधयिषितमिति भावः। ब्रह्मणोरन्यस्य स्वयं प्रकाशत्वप्रतिज्ञानस्य प्रकृतानुपयुक्तत्वादिति भावः। तदुक्तं गौतमेन ''प्रकृतादर्थादप्रतिवंधार्थमर्थांतरमिति अपसिद्धान्त इति। (न्याय-द ५-२-७) ब्रह्मणोन्यस्य जडत्वसिद्धांतादिति भावः। अत्राप्यक्षपादसूत्रं ''सिद्धांतमभ्युप्येत्यानियमात्कथा प्रसंगोपसिद्धांत'' इति (न्यायद-५-२-२३) निरर्थकेति वर्णक्रमनिर्देशवत् निरर्थकमित्यक्षपाद सूत्रमिति भावः। हेतोश्चेति। प्रतिज्ञावाक्येन पक्षाप्रतीतेरज्ञानासिद्धिरित्यर्थः।

अन्यथेति अन्वितप्रतिपादनादित्यत्र विशेषणाभावे विशेष्याभावेत्यर्थः। अबोधकत्वे निरर्थकत्वं। अन्वितर्थबोधकत्वे अपार्थकत्वं पौर्वापर्यादप्रति बंधार्थमपार्थकमित्यक्षपादसूत्रादिति भावः। ननु संविदन्वितहेतुसाध्यप्रतिपादनेऽपि विशिष्टस्यार्थांतरत्वेन संविदः प्रतिपादनाभावान्नदोष इत्यत्राह तयोरपीति। साध्यहेत्वोरित्यर्थः। विशेषकमितरव्यावृत्ततया संविद्गोचरबुद्धिजनकं तथा च न विशिष्टं पदार्थांतरमिति वेद्यत्वं दुर्निवारं। अन्यथा संविदो न प्रकाशत्वसिद्धिरिति भावः। अतइति। स्वपदं हेतु परं हेतुसहकारत्वाभिमततर्केणानुभूतित्वहेतोरेवोत्सादः प्रसज्यतेत्यर्थः। तदेवाह प्रागुक्तेति। तस्योक्तव्याप्तिमत्वादिति भावः।

एतेनावाच्यत्वमपि ब्रह्मणो निरस्तं मन्तव्यम्। किंच यदनुभाव्यं (तदननुभूति) न तदनुभूतिरूपम्, यथा घट इति व्यतिरेकदृष्टान्तेऽपि त्वदुक्तन्यायेनानुभाव्यत्वप्रतिक्षेपस्य शक्यत्वात्साध्याव्यावृत्तो दृष्टान्तस्स्यात्। घटस्स्वयंप्रकाशो घटत्वात्, घटस्यानुभाव्यत्वे पटवदघटत्वप्रसङ्ग इति वियातजल्पस्य दुर्वारत्वात्। एवं च क्रमेण सर्वस्यापि स्वयंप्रकाशत्वमायातमिति तदनुविधायिसत्यत्वादिप्रसङ्गश्च दुस्तरः। घटोऽनुभूयते पटोऽनुभूयत इत्यनुभाव्यतयैव घटादिः प्रकाशत इति चेत् अनुभूतिरपि परगता स्वगता चातीतानागतकालयोरनुमानशब्दसंस्कारादिजन्यसंविदन्तरकर्मतयैव भातीति तुल्यम्। अनुभूतेरनुभाव्यत्वप्रतीतिर्भ्रान्तिरिति चेत्, किं घटादेरनुभाव्यत्वप्रतीतिर्भ्रान्तिर्न देवानांप्रियस्य? ततश्च परमार्थानुभाव्यत्वप्रतिक्षेपे घटादेरपि परमार्थानुभाव्यत्वरहितत्वाद्व्यतिरेकदृष्टान्तासिद्धिः। निषेध्यस्य क्वचिदप्यप्रसिद्धेर्निषेधासिद्धिश्च। अपरमार्थानुभाव्यत्वप्रतिक्षेपे सिद्धसाधनत्वं स्वपक्षविरोधश्च। अन्यथा तद्विषयशास्त्रानुमानाद्यनारम्भ प्रसङ्गात्। तत एवानुभाव्यत्वमात्रनिषेधोऽप्यशक्यः।

किंच यदि परगतानुभूतिर्नानुभूयते, कथं शब्दार्थसम्बन्धग्रहः? परबुद्धिविशेषानुमानेनैव हि सर्वत्र सिद्धे कार्ये वा व्युत्पत्तिः। एवं च व्युत्पत्तेरशक्यत्वाच्चेष्टाशब्दयोः प्रमाणकोटिनिक्षेप एव न स्यात्; परस्पराभिप्रायानभिज्ञतया वादिनोश्शुष्ककलह एव स्यात्; परस्पराशयपरिज्ञानादेव च सर्वो लौकिको व्यवहारः, त्वत्समानानां न पशुमृगादीनां भयाद्युत्पत्तिश्च। तदेतत्सर्वमभिप्रेत्योक्तम्- "परानुभवानुमानानभ्युपगमे च शब्दार्थसम्बन्धग्रहाभावेन समस्तशब्दव्यवहारोच्छेदप्रसङ्गः" इति। आचार्यस्य ज्ञानवत्तामनुमाय तदुपसत्त्यादि च क्रियते "इति भाष्यं, शिष्यस्य च व्यवहारविशेषादिभिरन्यथा ज्ञानादिकमनुमाय तस्मै तत्त्वमुपदिश्यत इत्यस्योपलक्षणम्। तदेवमनुभूतेरन्यस्य वा वेद्यत्वं नास्तीति प्रतिज्ञानं स्वव्याघातकत्वान्न साधनाङ्गमिति।

एतेनेति। आश्रयाद्युपस्थापकपदे पक्षज्ञतानुभूतिप्रतिपादनेत्यर्थः। व्याप्यत्वासिद्धिमाह किं चेति। ननु कुड्यादिकं दृष्टांतं स्यादित्यत्राह एवं क्रमेणेति। नन्वस्तु सर्वव्यापि स्वयं प्रकाशत्वं किंनश्छिन्नमनुभूतेस्स्वयं प्रकाशत्वाक्षतेरित्यत्राह तदनुविधायीति। तथा सति दृश्यत्वा भावेन मिथ्यात्वं सिध्येदित्यर्थः। ननु घटादौ स्वप्रकाशत्वं साधयितुं न शक्यते प्रत्यक्षादि बाधादिति वैशम्यं शंकते घटोनुभूयत इति। न वैषम्यमित्याह-अनुभूतिरपीति। देवानां प्रियस्य-मूर्खस्येत्यर्थः देवशब्दो मूर्खवाचि मूर्खाणां प्रियो मूर्ख एव भवतीति कैय्यटोक्तेः। अत्र किं पारमार्थिकस्यानुभाव्यत्वस्य निषेधस्साध्यः उतापारमार्थिकस्य। साध्यघटादावपि पारमार्थिकानुभाव्यत्वस्यापि भावात् ब्रह्मणस्तदभावसाधने दृष्टान्तासिद्धिरिति मत्वा द्वितीय पक्षं दूषयति ततश्चेति। अनुभाव्यत्वस्य संप्रतिपन्नत्वादिति भावः। अनुभूतेरेकत्वेपि भाव्यत्वं घटादाविवनुभूतावप्यभ्युपगतमिति स्वाभ्युपगतमविरोधश्चेत्याह। स्वपक्षेति। अन्यथेति। ब्रह्मणोभाव्यत्वाभाव इत्यर्थः। न च वृत्यर्थतया शास्त्रसार्थक्यं। तथापि वृत्तेरेवाज्ञाननिवर्तकत्वे तु तस्यैव ज्ञानत्वादिति भावः। सामान्यतोऽनुभाव्यत्वमात्रनिषेधे साध्ये घटादौ व्यतिरेकव्याप्तिग्रह संभवेप्युक्ताबाधान्नतत्साधनसंभव इत्याह तत एवेति।

व्युत्पत्तेरिति। व्युत्पत्तिः ज्ञानसंबंधः। शब्दस्य तज्जनकत्वं तत्संबंधः। चेष्टायास्तज्जन्यत्वं तस्याः प्रमाणत्वं लिंगतया बोध्यं। अभिप्रायोज्ञानं आश्रयः ज्ञानं भयाद्युत्पत्तिश्चेत्यनन्तरं न स्यातामिति शेषः। अत्र भाष्यमुदाहरति तदेतदिति।

ननु वेद्यत्वं वेद्यं न वा? आद्ये वेद्यत्वस्य वेद्यत्वान्तराश्रयत्वेनानवस्था। अन्यथा वेद्यत्वाभावे वेद्यमेव न स्यात्। उत्तरत्रावेद्यत्वं क्वचित्त्वयाऽपि प्रतिज्ञातं स्यात्-इति चेत् हन्त किं (तर्हि) वेद्यत्वस्य वेद्यत्वान्तरप्रतिक्षेपेणावेद्यत्वसमर्थनार्थमयं प्रयासः? उत वेद्यत्वमेव किमपि नास्तीति तत्स्वरूपप्रतिक्षेपार्थम्? अथान्यार्थम्? अनर्थको वेति। आद्ये त्वदुक्तानुमानस्य सपक्षे सति तत्रावर्तमानत्वात्सर्वानुमतासाधारणाख्याभासत्वप्रसंगः। तत्र साध्यवृत्तिर्मिथ्याभूतेति परिहार इति चेत् तर्हि तस्य वेद्यत्वमेवायातमिति निरर्थकास्सन्नाहाः। अनुभूतावपि च भवतामवेद्यत्वलक्षणसाध्यवृत्तिर्मिथ्याभूतैव, निर्धर्मकत्वाभ्युपगमात्; तस्य स्वरूपत्वाभ्युपगमे च विवाद एव नस्यात्-इत्यादिकमन्यत्र ग्राह्यम्। नापि द्वितीयः, वेद्यत्वस्वरूपापह्नवेन सर्वस्यापि वेद्यत्वप्रतिक्षेपे पुनरप्यसाधारणत्वप्रसङ्गात्। भ्रान्तिसिद्धं वेद्यत्वं तत्र विद्यत इति चेत्, तदनुभूतावपि समानमेव। तत्प्रतिक्षेपे ह्यपसिद्धान्तप्रतीतिविरोधादयः। न तृतीयः, अन्यस्य कस्यचिदनुपलम्भात्। चतुर्थस्तु परिशिष्टोऽस्मदिष्ट इति। एतेन वाच्यत्वं वाच्यमवाच्यं वेत्यादिप्रलापोऽपि प्रत्युक्तः।

यच्चाप्रसिद्धविशेणत्वपरिहारार्थं वेद्यत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगि, धर्मत्वात् घटत्ववदिति सामान्यतः साध्यप्रसिद्धिसाधकत्वेनोक्तमनुमानम्, तदपि प्रत्युक्तम् किंचिच्छब्देन तत्रैव तस्य वेद्यत्वापादनात्, किंचित्त्वधर्मेणानैकान्त्यप्रसंगाच्च। न हि किंचिच्छब्दवाच्यस्य किंचित्त्वं नास्तीति वक्तुं शक्यम्, वेद्यत्वादेरपि तथाऽपह्नवप्रसङ्गेनाश्रयासिद्ध्यादि प्रसङ्गात्। किंचित्त्वाभावे च न किंचिदेव भवेदिति तुच्छत्वमेव प्रसज्येत। तथा च तन्निष्ठान्ताभावप्रतियोगित्वसाधने भवतो न विवक्षितविशेषसिद्धिः।

वेद्यं न वेति॥ वेद्यत्वाधीनसत्ताकं वेद्यत्वं न स्यात्। तदभावे वेदनमपि न स्यादिति जगदांध्यं स्यादिति भावः। उत्तरत्रेति। ततश्चानुभाव्यत्वस्य क्वचित्त्वयाप्यंगीकारात् ब्रह्मणो मया तत्साधने कः प्रद्वेष इत्यर्थः। सर्वानुमतेति। असाधारणाख्यास्याभासत्वस्य सर्वानुमतत्वकथनाउद्व्यतिरेक्यनुमानस्य स्वानभ्युपगमत्वं गम्यते। ततश्च साधकं तु न संप्रतिपन्नं प्रत्युत बाधकमेवावगतमिति भावः। तर्हीति। वेद्यत्वेऽवेद्यत्वस्य मिथ्यात्वे तस्य वेद्यत्वमिति वेद्यत्वस्यावेद्यत्वसमर्थनार्थप्रयासो व्यर्थ इत्यर्थः। अनुभूतावदि चेति। तादृश स्याध्यासवेद्यत्वेऽपि सत्वादसाधारण्यं स्थितमेवेति भावः। तस्येति। स्वरूपस्योभयसंप्रतिपन्नत्वादित्याद्यविद्यानिवृत्ति दूषणस्थले द्रष्टव्यमित्यर्थः। पुनरपीति। वेद्यत्वस्यावेद्यत्वपक्ष इति वेत्यर्थः। प्रतीतिः- परज्ञानं जानामीति प्रतीतिः। आदिशब्देन शिष्याणामाचार्यप्रार्थनापि गृह्यते। प्रयोजनस्येति। शेषः। अस्मदिष्ट इति। अस्माकमनिष्टं न किं चिदित्यर्थः। एतेनेति। वेद्यत्वमवेद्यत्वं वेति दूषणनिस्तारेणेत्यर्थः। अप्रसिद्धविशेषणत्वं साध्याप्रतिसिद्धिरित्यर्थः।

तत्रैवेति। वेद्यत्वं किंचिन्निष्ठात्यंताभावप्रतियोगीति प्रयोग एव तस्यैव किंच्छिब्दार्थस्यैव वेद्यत्वपर्यवसानाद्बाध इति भावः। किंचाकिंचित्वं किंचिन्निष्ठात्यंताभावप्रतियोगि न वा। न द्वितीय इत्याह। किंचित्वधर्मेणेति। आद्येपि यन्निष्ठाभावप्रतियोगि तत्किंचिच्छब्द वाच्यं न वा नाद्य इत्याह न हीति। तथा च तत्र पुनरपि व्यभिचार इति भावः। वेद्यत्वादेरपीति। वेद्य शब्दवाच्येषु धर्मशब्दवाच्येष्वपि वेद्यत्वाभावाद्धर्मत्वा भावाच्चाश्रयासिद्धिरूपासिद्धि प्रसंग इति भावः॥ द्वितीये आह। किंचित्वाभाव

किंच सामान्यतः कस्यचिद्वेद्यत्वं नास्तीत्येतावति साधितेऽपि किंचिच्छब्दार्थोऽनुभूतिरिति कुतोऽवसीयते? पूर्वोक्ताविगीतहेतुवैभवादिति चेत् तर्हि घटस्स्वयंप्रकाशो घटत्वादित्यादिहेतुनाऽपि घटादिविशेषपरिग्रहो दुर्वारः। अनुभाव्यत्वप्रतीतिसदसद्भावाभ्यां वैषम्यं तु परिहृतम्। तर्कानुग्रहसदसद्भावाभ्यां वैषम्यमिति चेत्, कोऽसौ तर्कः? अनुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्ग इत्युक्तरूप इति चेन्न; घटादावपि तथाविधतर्कस्योदाहृतत्वात्। किंच यदि घटादिवदनुभूतेरनुभूतिलक्षणविरहस्स्यात्तदाऽननुभूतित्वं युक्तम्, न पुनरनुभाव्यत्वमात्रेण तत्सिद्धिः; तस्य तदप्रयोजकत्वात्। न चानुभाव्यत्वेऽनुभूतिलक्षणविरहस्स्यादिति वक्तुं शक्यम्, अनुभवान्तरानुभाव्येऽपि परानुभवादौ स्वसत्तयैव स्वविषयभासकत्वरूपस्य स्वसत्तयैव स्वाश्रयं प्रति प्रकाशमानत्वरूपस्य वा कस्यचिदनुभूतिलक्षणस्य स्वानुभवसिद्धस्यानपगमात्। तदवस्थाने चानुभूतित्वस्यानपायादिति। तदिदमुच्यते- ''नचान्यविषयत्वेऽननुभूतित्वमि''त्यादिना।

किं च योऽयमनुभाव्यत्वेऽनिष्टप्रसङ्गस्सोऽननुभाव्यत्वेऽपि समान इति प्रतितर्कप्रतिघातः। अनुभूतेरननुभाव्यत्वे गगनकुसुमादिवदननुभूतित्वप्रसङ्ग इति। तुच्छत्वात्तत्राननुभूतित्वम्, नत्वननुभाव्यत्वादिति चेन्न; साध्यसमव्याप्त्यभावेनोपाधित्वायोगात्। न ह्यनुभूतिव्यतिरिक्तेषु तुच्छत्वं त्वयाऽभ्युपगम्यते तत्रत्यमननुभूतित्वं तत्प्रयुक्तमित्येतावन्मात्रं विवक्षितमिति चेत्, तर्हि घटादिगतमप्यननुभूतित्वं तत्तद्वस्तुप्रतिनियतघटत्वादिप्रयुक्तं न त्वनुभाव्यत्वनिबन्धनमिति स्यात्। आश्रयाभावो धर्माभावे प्रयोजको भवितुमर्हति, निराश्रयधर्मसिद्ध्ययोगात्; न पुनराश्रयगतधर्म

इति। तन्निष्ठेति। तुच्छनिष्ठात्यंताभाव प्रतियोगित्वेऽपि किंचिन्निष्ठत्यंताभाव प्रति योगित्वरूपसाध्यप्रसिद्धिरित्यर्थः। तथापि व्यभिचार इति भावः। किं च अनेनानुमानेन कस्यचिदवेद्यस्य सिद्धावप्यसाधारण्यं दुष्परिहरमित्याह किं चेति। सामान्यतोप्यवेद्यत्वमनुभूतेरेवेति नासाधारण्यमित्याशंकते हेतुवैभवादिति। वैभवोहीतरत्र बाधसाहित्यमिति भावः। (घट) स्वयं प्रकाशइति। तथाचासाधारण्यं दुर्वारमिति भावः। तर्कस्या भासमान योगक्षेमत्वेनाप्रयोजकत्वमुक्त्वा सोपाधिकतयाप्यप्रयोजकत्वमाह किं चेति। अननुभूतित्वेनानु भूति लक्षणविरहोपाधिरित्यर्थः। तदतिप्रसंगवाचकत्वादिति॥ (तदप्रयोजकत्वादिति) तन्निरूपितव्याप्ति शून्यत्वादित्यर्थः। ननु साधनव्यापकत्वान्नासावुपाधिरिति शंकामनूद्य परिहरति नचानुभाव्यत्व इति। तदवस्थानेचेति। लक्षणमव्याप्तिर्लक्ष्यतावच्छेदकस्येति भावः। अत्रापि भाष्यं संवादयति। तदिदमुच्यत इति।

व्याप्तिस्तर्काप्रतिहतिरित्यादि तर्कांगपंचकमध्ये प्रथमागवैकल्यमुक्तवा द्वितीयांगवैकल्यमाह किंचेत्यादिना। उक्ततर्कमूल्याप्तौ तुच्छत्वमुपाधिरिति शंकते। तुच्छत्वात्तत्रेति। साध्यसमेति। वस्तुतस्साध्यव्याप्तिरेव नास्ति कुतः समव्याप्तिः घटादौव्यभिचारादिति भावः। खपुष्पत्वाद्यवच्छिन्नाननुभूतित्वे व्यापकं तुच्छत्वमुपाधिरिति शंकते तत्रत्यमिति। तस्यानुभाव्यत्वेऽननुभूतित्वं स्यादित्यत्राप्यवच्छिन्न साध्य व्यापकं घटत्वादिकमुपाधिस्यादित्याह तर्हीति। ननु तुच्छत्वं ह्याश्रयाभावः। तस्यावच्छिन्न साध्यव्यापकस्याप्युद्भूतरूपत्वप्रयोजकत्वं व्याप्तिमत्वाद्युक्तं नतु घटत्वादेरित्याशंकते। आश्रयाभाव इति। व्याप्त्येति। यत्रानुभाव्यत्वं

मात्रसद्भाव इति चेत् तर्ह्यनुभाव्यत्वमपि घटत्वादिवन्नाननुभूतित्वप्रयोजकमिति स्यात्, धर्ममात्रत्वाविशेषात् । व्याप्त्या विशेष इति चेन्न; सहचारमात्रस्य व्याप्तित्वाभावात् । न ह्यननुभाव्यत्वानुभूतित्वयोः कश्चिद्विरोधो दृष्टः, येन नियमस्सिध्येत्, साहित्यमेव परगतानुभवादिषु दृष्टम् ।

किंच अनुभूतेरेवानुभाव्यत्वेऽवश्यम्भाविन्यननुभूतित्वं प्रति कथमनुभाव्यत्वस्योपाधित्वम्? अनुभाव्यत्वस्याभावेऽपि स्वप्रकाशत्वादेवानुभूतेरसत्त्वं न प्रसज्यत इति युष्माभिरभ्युपेतव्यमिति चेन्न; तथाऽपि स्वप्रकाशसिद्धेयमनुभूतिरित्येवंरूपानुभूतिविषयतामन्तरेण तत्सत्त्वस्य व्यवस्थापयितुम शक्यत्वात् ।

इदमखिलमभिसन्धायोक्तम्- ''घटादेरप्यज्ञानाविरोधित्वमेवाननुभूतित्वनिबन्धनम्; नानुभाव्यत्व मित्यास्थीयताम्''-इति ।

नचास्य साधनव्यापकत्वम्, अनुभाव्यतयाऽभ्युपगन्तव्ये परानुभवस्वरूपे तदभावदर्शनात् । नच साध्यसमव्याप्तिहानिः;, अनुभूतिव्यतिरिक्तेषु सर्वेष्वपि साक्षादज्ञानविरोधित्वाभावात् । अनुभाव्यत्वेऽनुभूतेरज्ञानाविरोधित्वमपि प्रसज्यत इति चेत्, अननुभाव्यत्वेऽपि गगनकुसुमादिवत्तत्प्रसङ्गस्तदवस्थः । असत्त्वप्रयुक्तं तत्राज्ञानाविरोधित्वमिति तु दत्तोत्तरप्रायमेव । एवं

तत्राननुभूतित्वमिति शुद्धसाध्य व्याप्तिः विशेष इत्यर्थः । सहचारमात्रस्येति । व्याप्तिः किं सहचारमात्रात् यद्वा तर्कसहकृतात् । नाद्य इत्याह सहचारमात्रस्येतिं । व्यभिचारिसाधारण्येन व्याप्तिप्रयोजकत्वा भावादित्यर्थः । द्वितीये आह नहीति । प्रत्युत व्यभिचार एव स्फुट इत्याह साहित्यमेवेति ।

अनुमानस्य बाधमप्याह किंचेति । त्वयानुभाव्यत्वेन सिसाधयिषिताया एव अनुभाव्यत्वमवश्यं भाव्यं । अन्यथानुभूतेस्तुच्छत्वेन सर्वशून्यत्वप्रसंगात्तथा व्यभिचारादनुभाव्यत्वस्योपाधित्व मननुभूतित्व व्याप्यत्वं नास्तीत्यर्थः । शंकते अनुभाव्यत्वस्येति । तथापीति । स्वप्रकाशायास्तस्याः एवं रूपत्वाभावात्संविदन्तरं विषयत्वमावश्यकमिति भावः ।

उक्तार्थे भाष्यं संवादयति इदमखिलमिति । अनुभूतित्वनिबंधनमिति । अनुभूतित्वे उपाधिरित्यर्थः । अस्येति । अज्ञानविरोधित्वस्येत्यर्थः ।

नचेति । साधनमननुभूतित्वप्रसंजकतयाभ्युपेतं । अनुभाव्यत्वमित्यर्थः । नन्वालोकादवज्ञानविरोधिनि साध्यव्यापकतेत्यत्राह साक्षादिति । आलोकादेर्ज्ञानद्वारैवाज्ञान विरोधित्व मिति भावः । अनुभाव्यत्व इति । तथा च साधनव्यापकत्वादज्ञानविरोधित्वं नोपाधिरिति भावः एवमपि साध्यव्यापकत्वसंदेहात्संदिग्धोपाधित्वं दुर्वारं । तथाप्यनुभूतिरनुभाव्या भवितुमर्हति अज्ञान विरोधित्वादिति । प्रतिरोधमाह । अनुभाव्यत्वेपीति । ननु प्रतिरोधो न संभवति असत्वेन सोपाधिकत्वादित्या शंकते तत्रत्यमननुभूतित्वं तत्प्रयुक्तमित्यादेर्दूषणेनोक्तप्रायमित्याह असत्वप्रयुक्तमिति । एवमिति । अत्रानुमानद्वयमभिप्रेतं । ''अनुभूतिरनन्याधीनस्वधर्मा''-''अनन्याधीनस्वव्यवहारा'' वा ''स्व संबंधादर्थान्तरे तद्धर्महेतुत्वात्'' ''स्वसंबंधादर्थान्तरे तद्व्यवहार हेतुत्वात्'' रूपवदिति । तत्रायं निष्कर्षः

"अनुभूतिरनन्याधीनस्वधर्मव्यवहारा, स्वसम्बन्धादर्थान्तरे तद्धर्मव्यवहारहेतुत्वात्" -इत्याद्यनुमानेष्व प्यवेद्यत्वविवक्षायां पूर्ववद्दोषो भाव्यः, आगमबाधश्च।

यदि ह्यनुभूतिरूपं ब्रह्म न वेद्यम्, कस्तर्हि तत्त्वावेदकशास्त्रस्य विषयः? प्रपञ्चमिथ्यात्वमात्रमिति चेन्न; "अथातो ब्रह्मजिज्ञासा" (ब्र.सू.१-१-१), "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृ-उ-४-४-५) "ब्रह्मविदाप्नोति परम्" (तै.आ.६-१) "अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुः" (तै.आ.६-२) इत्यादीनां समुद्रघोषत्वप्रसङ्गात्। ब्रह्माध्यस्तोपरागतमात्रनिवर्तनार्थं ब्रह्मानुवादोऽयमिति चेत्, तथाऽपि तैस्तैश्शब्दैरनुवादरूपैरप्यनुभाव्यत्वमवर्जनीयमेव। मिथ्याभूतमिदमनुभाव्यत्वमिति चेत्, घटादेरपि समानमित्युक्तमेव। उपहितं ब्रह्म शास्त्रवेद्यमिति चेन्न; अतत्त्वावेदकत्वप्रसङ्गात्। तस्याप्युपाधेर्विलयान्न दोष इति चेन्न; तत्प्रतिक्षेपकेणापि केनचिदुपहितरूपेणानुपहिताकारेण वा ब्रह्मस्वरूपस्पर्शनस्यावर्जनीयत्वात्। अत उपहितरूपं वेद्यमनुपहितरूपं तु व्यवहर्तुं शक्यमिति तस्य वेद्यत्वप्रतिक्षेपोऽपि दुश्शकः।

ननु अवेद्यत्वेऽपि स्वप्रकाशत्वेनैवावस्थाय तत्त्वमस्यादिवाक्यजन्यस्य स्वेतरनिषेधवाक्यजन्यस्य

"तद्धर्मजनकतावच्छेदकनिरूपितस्वजातीयानपेक्षपरगतस्वोत्पाद्यधर्मजन्यतावच्छेदकनिरूपित धर्मसजातीयस्वगतयावद्धर्मा" "परत्र तद्व्यवहारजनकतावच्छेदकधर्मनिरूपितसजातीयानपेक्षतद् व्यवहारजन्यतावच्छेदक धर्मनिरूपित सजातीय यावत्स्वव्यवहारेति वा द्रव्यसाक्षात्कारहेतुरूपवदिति। विस्तरस्तु श्रुतप्रकाशिकायां द्रष्टव्यः। एवं चानुमानद्वयमप्यनुभूतिनिष्ठज्ञाततामात्रस्य च तद्व्यवहारमात्रस्य च ज्ञानान्तरानपेक्षत्वेन अनुभाव्यत्व एव पर्यवसानादित्यभिप्रायेण दोषमाह अवेद्यत्वविवक्षायामिति। पूर्वदोषास्तुच्छत्वादय अवेद्यत्वे बाधकत्वमाह आगमेति। आगमस्य बाधः वैयर्थ्यमित्यर्थः।

तदुपपादयति। यदिहीति। तत्वावेदकशास्त्रं-वेदान्तशास्त्रं। नेति। शास्त्रं- शास्त्रयोनित्वात् (ब्र.सू.१.१.३) तत्वोपनिषदमित्यादिना ब्रह्मणः प्रमाणान्तरवेद्यत्वनिषेधाद्वेदान्तवेद्यत्वमेव वक्तव्यं। तद्वेद्यत्वाद्यभावे तेषामर्थान्तरबोधने सामर्थ्या भावाद्ब्रह्मबोधने नैरर्थक्यमापद्येरन्निति भावः। ननु ब्रह्मणः स्वयं प्रकाशत्वेपि तस्याज्ञानाविरोधित्वादध्यसनिवर्तकत्वाभावेन तन्निवर्तकापरोक्ष्यवृत्तेर्वेदान्त साध्यतया वेदान्तानां सार्थक्यं। वेदान्तजन्यवृत्यधीना ज्ञानानिवर्तकत्वमेव जिज्ञासासूत्रादेर्विषय इत्याशंकते। ब्रह्मण्यध्यस्तेति। स्वप्रकाशतया सर्वदा भासमान ब्रह्मविषयत्वादनुवाद्यत्वोक्तिः। वृत्तेरप्रकाशात्मकत्वात्तदवच्छिन्न चैतन्यविषयत्वस्य व्यावहारिकभेद एवेति ब्रह्मण्यावश्यकत्वा वेद्यत्वमवर्जनीयमेवेत्याह तथापीति। तस्यापीति। विलयो-निषेधः। तत्प्रतिपादकत्वेन तत्वावेदकत्वमिति भावः। किं च किमुपहितस्य वेद्यत्वनिषेधः उतानुपहितस्य। नाद्यः उपहितस्येदानीं वेद्यत्वांगीकारेण तन्निषेधे व्याघातात्। नद्वितीयः। अनुपहितस्य व्यवहारानर्हतया तत्रावेद्यत्वप्रतिज्ञादेरप्यसंभवादित्याह अत इति। ननु ब्रह्मणो वेदान्तजन्यज्ञानविषयत्वाभावेपि तद्ज्ञानाभासे जीव ब्रह्म भेदे ब्रह्मव्यतिरिक्त मिथ्यात्वे च स्वेनैव भासमानं ब्रह्म तटस्थतयावच्छेदकं स्यात्। इदमेवावच्छेदकत्वं "द्रष्टव्य ( ) इत्यत्रोच्यते।

ननु ज्ञानविषयत्वं शंकते नन्विति। अवच्छेदकत्वं व्यावृत्तिबुद्धिजनकत्वं। नन्वच्छेदकमिति बध्यापि

''द्रष्टव्य'' इत्यादिविहितज्ञानस्य चावच्छेदकं ब्रह्म भवेदिति चेन्न; अवच्छेदकमिति बुद्ध्यैवात्रापि विषयीकारात् । अन्यथा (स्वयंप्रकाशानुवादादि) स्वप्रकाशानुमानादिनैरर्थक्यप्रसङ्गाच्च । तस्मादवच्छेदकत्वावेद्यत्वप्रतिपादकमपि वाक्यमन्ततो वेद्यत्वमेवोपस्थापयति ।

ननु- ''यस्यामतं तस्य मतं मतं यस्य न वेद सः'' । ''अविज्ञातं विजानतां विज्ञातमविजानताम्'', (केन-२.३) ''विज्ञातारमरे केन विजानीयात्,'' (बृह-४-१४) '' येनेदं सर्वं विजानाति तं केन विजानीयात्'', (बृह.४-४-१४) यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, (तै-भृगु) ''न शब्दगोचरो यस्य योगिध्येयं परं पदम्'' (स्मृतिः) इत्यादिकं कथं निर्वहणीयमिति चेत्, भवतो वा कथम्? स्वरसप्रतीतमवेद्यत्वमङ्गीकुर्वता मया किं नाम दुर्निर्वहमिति चेन्न; मतत्वविज्ञाततत्वादेरपि तत्रैव स्वरसप्रतीतत्वात्, अमतविज्ञातादिशब्दैरपि तत्रैव तत्स्वरूपप्रतिपादनात् । अन्यथा प्रागुक्तनयेन परस्परविरोधेन चानन्वयादिप्रसङ्गात् । अमतत्वोपहितरूपेण मतत्वमङ्गीकुर्म इति चेत्, किमतः? तावताऽपि ज्ञानविषयत्वस्य दुस्त्यजत्वात् । अमतत्वं सामान्यतस्स्वानुविद्धं मतत्वमपि प्रतिक्षिपतीति चेत्; तथा सत्यमतत्वमप्रतिपन्नमेव भवेत् । तथाऽप्यमतत्वे वाक्यतात्पर्यम्, मतत्वव्यपदेशस्तु गलोपरि गर्जितमिति

ब्रह्म न विषयीक्रियते । किं तु अवच्छेदकत्वमेव तद्ज्ञानाविषयीभूतमपि ब्रह्म स्वेनैवभासमानतटस्थं सदवच्छेदकत्वं व्यावर्तयतीत्यत्राह अन्यथेति । तथा च स्वप्रकाशपदेन अवच्छेदकपदेन च ब्रह्मणो प्रतिपादनात् तत्पदद्वयं व्यर्थमित्यर्थः। किंच स्वप्रकाशादिपदानां ब्रह्मबोधकत्वस्योक्तत्वात् तन्नयायेनान्यत्व प्रतिपादकवेदान्तवाक्यस्थपदानामपि ब्रह्मबोधकत्वात् तदपि वाक्यं स्वांशे वैयर्थ्यमवेद्यत्वमेवे साधयतीत्याह । तस्मादिति ।

नन्वननुभाव्यत्वपदेपि श्रुतिबोधोस्तीति शंकते नन्विति । न शब्दगोचर इति। अत्र यद्यपि शब्दप्रतिपाद्यत्वमेव निषिध्यते । तथापि प्रमाणान्तरावेद्यतवाच्छब्दवेद्यत्वस्यापि निषेधादवेद्यत्वपर्यव सानमिति भावः । अवेद्यत्वपक्ष एव ताःश्रुतयो बाधिता स्यादित्याह भवतो वेति । बाधमेव शंकापूर्वमुपपादयति स्वरसप्रतीतमिति । यद्बलमादाय अवेद्यत्वं ब्रूषे तद्बलादेव वेद्यत्वं सिध्यतीत्याह अमतेति । अज्ञातादि शब्दैः ब्रह्म स्वरूपाप्रतिपादन इत्यर्थः । प्रागुक्तेति । अन्यथा स्वप्रकाशानुवादनैरर्थ्य प्रसंग इत्युक्तप्रकारेणेत्यर्थः । अवेद्यत्वस्य स्वरसतः प्रतीतिवत् वेद्यत्वस्यापि स्वरसतः प्रतीतेः परस्पर विरोधादनन्वयः । 'अमत' मित्यादिना स्वरूपाप्रतिपादने 'मत' मित्यादिकृत्स्नानर्थक्यमित्यर्थः । नन्वमतस्योपक्रमे प्रतिपादितत्वादमतत्वेन मतत्वमेवमतमित्यनेन प्रतिपाद्यते । अमतं इत्यत्रापि नत्वाकारान्तरेण मतत्वं निषिध्यते । अतोऽनान्वयो न वैयर्थ्यमितिशंकते । अमतत्वेति । नमतत्वांगीकारेपि स्वरूपे मतत्वस्य सिद्धत्वादमतत्वस्य बाधितत्वादमतत्वेन मतत्वमेव न संभवतीत्यन्वयः । अमतत्वांगीकारे वैयर्थ्यं च प्रतीत्य भावात् तदवस्थमिति परिहरति । किमत इति । सामान्यतो मतत्व निषेधकशब्दः स्वाधीनमतत्वमपि निषेधतीति न मतत्वापादनमिति शंकते । अमतत्वमिति । तथा सतीति । ब्रह्मणोमतत्व विशिष्टतया बोधना भावात् ब्रह्मण्यमतत्वं प्रतिपन्नमेव स्यादित्यर्थः । अस्त्वमतत्वेन ब्रह्मणः प्रतिपादनं । तथापि मतत्वस्याप्रतिपादनात् नानन्वय इति शंकते तथापीति । नन्वमतशब्देन न मतत्वमपि प्रतिपाद्यते इति चेत् तत्राह मतत्व व्यपदेश इति । अहृदयमित्यर्थः । हन्तेति । ब्रह्मतात्पर्यविषयेति । इति प्रतीतिविषयत्वस्य

चेन्न; विपरिवर्तस्य दुर्वारत्वात्। कस्यामतत्वे वाक्यतात्पर्यं वर्ण्यते? ब्रह्मण इति चेत्, हन्त ब्रह्मणो वेद्यत्वभयं परित्यज्य किमेवमुच्चारयसि? यदि चाकारभेदेन मतत्वामतत्वयोर्व्यवस्था, तदाऽस्मत्पक्षेऽपि न काचित्क्षतिः। तत्तद्वाक्यप्रतिपन्नगुणविभूत्याकारितवेषेण मतत्वम्, वस्त्वन्तरस्वभावविरहेण तत्तत्प्रमाणगोचर तयाऽनवच्छिन्नविषयत्वादिना चामतत्वमिति। एतेन "अविज्ञातं विजानता" (केन-२.३) मित्यादिकमपि निर्व्यूढम्। विज्ञातारमरे केन विजानीयात् (बृह.४-४-१४) इत्यत्र कृच्छ्रेण ज्ञातव्यत्वे तात्पर्यम्, बाह्यार्थप्रकाशनक्षमचक्षुराद्यगोचरत्वे वा। एवम्, येनेदं सर्वं विजानाति तं केन विजानीयात् (बृह-४-४-१४) इत्यादिकमपि भाव्यम्। यद्वा, मत्तस्स्मृतिर्ज्ञानमपोहनं च (श्री.भ.गी.१५-१५) इत्याद्युक्तप्रकारेण यत्प्रसादेनेदं सर्वं विजानाति, तं परमात्मानं तत्प्रसादमन्तरेण केन विजानीयादिति। यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह (तै.भृगु) इत्यत्रापि ब्रह्मानन्दस्य वाङ्मनसापरिच्छेद्यत्वे तात्पर्यं प्रकरणादौ व्यक्तम्। अन्यथा यच्छब्दादिभिस्तत्प्रतिपादनासम्भवात्; "आनन्दं ब्रह्मणो विद्वान्" इति तद्विषयविहितवेदनासंभवाच्च। एतेन, न शब्दगोचरो यस्येत्यादिकमपि निर्व्यूढम्; निष्कृष्टस्वरूपस्य देवादिशब्दागोचरत्वे वा तात्पर्यम्। एवमन्यान्यपि वेद्यत्वादिप्रतिक्षेपकाणि वाक्यानि प्रमाणान्तरश्रुत्यन्तरवाक्यशेषवाक्यस्थपदान्तराविरोधेन नेतव्यानि। "अनुभाव्यत्वेऽननुभूतित्व मित्युपहास्यम्" इति तर्कदूषणमुपसंहृत्योपहास्यतां प्रतिपादयता आगमबाधादिकं सुस्पष्टमिति सूचितं मन्तव्यमिति॥

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्याम् अवेद्यत्वभङ्गवादः विंशोवादस्समाप्तः॥

स्फुटत्वादिति भावः। अस्मत्पक्ष इति। वेद्यत्वपक्ष इत्यर्थः। आकारितंआकारविशिष्टं। वस्त्वंतरेति। चाक्षुषत्वादिप्रयोजकरूपादिविरहेण प्रत्यक्षाद्यगोचरतयेत्यर्थः। अपरिच्छिन्नेति। गुणविभूत्यादिभिः परिच्छिन्नो न भवतीत्यपरिच्छिन्नः सचासौ विषयवेद्यं ब्रह्म अपरिच्छिन्नत्वात्परिच्छिन्नतया मतं न भवतीत्यर्थः। तत्प्रसादं विना। अमृतत्वमादिशब्दार्थः निर्व्यूढमिति। विजानतामपि परिच्छिन्नतया न ज्ञातमित्यर्थः। विज्ञातारमिति। ज्ञातव्यत्वमात्रनिषेधकेनेति। हेतापायोगात् भगवत्प्रसादसहकृतन्यायोप बृंहितवेदान्तैरेव ज्ञातव्यत्वं विवक्षितमिति भावः। एवमिति। सापिश्रुतिः प्रमाणान्तराग्राह्यविषयेत्यर्थः। येन ब्रह्म इदं सर्वं विजानाति मुक्तो भवति तं प्रत्यक्षादिषु मध्ये केन विजानीयात् भगवत्प्रसादरहितेन न केनापि गृह्णीयादेवेत्यर्थः। प्रकरणादौ व्यक्तमिति। "सैषानंदस्यमीमांसा भवतीति" (तै.भृगु-४) उपक्रमादिति भावः। अन्यथेति। अवेद्यत्व परत्व इत्यर्थः। यच्छब्दाभिरिति। "यतो वाचोनिवर्तन्ते" त्यत्र यच्छब्दानंदशब्दादिभिरित्यर्थः। विद्वानिति। अप्राप्तत्वाद्वेदनं विधीयत इति भावः। धर्मपदयोजनामाह निकृष्टेति। देवादिशब्दानां शरीरजीवविशिष्टगोचरत्वादिति भावः। एवमन्यानपीति। (श्री.भ.गी.७-२६) यद्वाचानभ्युदितं। अगृह्यो न गृह्यते (केन १-४) न ग्राह्यः केनचित्कचित् "मां तु वेद न कश्चने"त्यादीति विवक्षितानि प्रमाणान्तराणि प्रकाश्यत्वादिलिंगकानुमानानि। श्रुत्यंतरं। ब्रह्मविदाप्नोति (तै.आ.१) इत्यादि। यद्वाचानभ्युदितं (केन १.४) इत्यत्र तदेव ब्रह्म त्वंविद्धि (केन.१-४) इति वाक्यशेषः। अगृह्यो न गृह्यतेत्यत्र स एव वेतिवेति इत्यात्मा ग्राह्य इति वाक्यशेषः। वाक्यस्थ पदान्तराणि तदुपस्थापकानि पदानि। आगमबाधादिकं किमिति भाष्ये नोक्तमित्यत्राह अनुभाव्यत्व इत्यादिना। ब्रह्मज्ञानाय वेदान्तशास्त्रं व्याकुर्वन् स्वक्रियाव्याघातं कथं न जानीयादित्यर्थः॥

॥ वत्सजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां विंशोवादस्समाप्तः॥

॥अथ संविदनुत्पत्तिदूषणवादः एकविंशः ॥ २१॥

विविधविषयाकृष्टैर्वागादिभिस्तुलभागसां स्वयमुपनतं स्वान्तर्ध्वान्तं चिरस्य निरस्य नः।
भगवति हरौ प्रत्यक्तत्वान्तरात्मनि निर्भरप्रसृमरसुधाधाराकारा प्रसीदतु शेमुषी॥

ये तु स्ववचनविरोधजालमप्यवधीरयन्तः सर्वसाक्षिकामपि संविदुत्पत्तिं प्रतिक्षिपन्ति, तान्प्रति ब्रूमः। किं घटादिविषयप्रकाशात्मिकाया एव संविद उत्पत्तिः प्रतिक्षिप्यते? उत सकलविषयविरक्तायाः कस्याश्चिदन्यस्याः? नाद्यः, घटादीनामप्यनुत्पत्तिमत्त्वप्रसंगात्। नहि तदुत्पत्तेः प्रागेव तद्विषया प्रत्यक्षसंविदस्मदादीनां सम्भवति। अन्यथाऽस्मदादीनामपि सर्वदा सर्वज्ञत्वप्रसङ्गात्। ननु पूर्वं स्वरूपेणावतिष्ठते, पश्चात्तु सामग्री वैचित्र्यात्तत्तद्धटादिविषया भविष्यतीति चेन्न; सत्यां संविदि सामग्र्या एवानपेक्षणात्। तत्तद्धटादिविषयीकरणलक्षणसम्बन्धार्थं तदपेक्षेति चेन्न; सामग्रीविशेष प्रतिनियतसंवित्स्वरूपातिरिक्तसम्बन्धकल्पने प्रमाणाभावात्। संवित्स्वरूपनित्यत्वे श्रुतिसिद्धे सामग्री वैयर्थ्यपरिहाराय तत्कल्पनमिति चेत्, स किं संविदि साध्य आकारः? उतानादिसिद्धं संवित्स्वरूपमेव? तत्र सधर्मकत्वसविकारत्वादिभीरुणा भवता प्रथमः पक्षो न कक्षीकार्यः . आरोपितधर्मविकारान्वयाददोष

पूर्ववादे प्रतिज्ञादिजन्यज्ञानविषयतया चाननुऽभाव्यत्वं निराकृतं। तदनुपपन्नं। अनुभूतेरूत्पत्तिविनाशयोर भावेन प्रतिज्ञादीनामनुभवाजनकत्वादित्याक्षेप संगतिमपेक्षयोत्पत्ति विनाशौ निरूपयन् वादार्थं संगृह्णाति विविधेति। विषयाः शब्दादयः। वागदीत्यादिशब्देन चक्षुरादीन्युच्यन्ते। चिरस्य विभर्ति प्रतिरूपकमन्यथा अचिरेणेत्यर्थः। प्रत्यक्तत्वं जीवः। तस्यान्तरात्मा-परमात्मा- ''यस्यात्मा'' (बृह-५-७-२२) इति श्रुतेः। प्रसृमरता-प्रसरणशीलता प्रसरणनिरूपावस्था योगित्वेनोत्पत्त्यवगमात् वादार्थस्सूचितः॥

ये पुनरिति। प्रतिवादिनश्शिष्याणा चेत्यादिना वक्ष्यमाण स्ववचनविरोधः घटादिविषय प्रकाशात्मिकाया इति। अहमर्थधर्म भूताया इति। विवक्षितं तेन तदभिमतसंविदो घटादिप्रकाशात्मकत्वेपि कोट्यंतराद्भेदः सकल विषयः। विरक्ताकारा इति। स्वत इति शेषः अनहमर्थधर्मायाः निर्धर्मकाया निराश्रयाया इत्यर्थः। अनुवृत्तिप्रसंगमुपपादयति न हीति। विषयप्रागभावकाले ईश्वरयोगिव्यतिरिक्तानां सन्निकर्षाभावात् प्रत्यक्षं न संभवतीत्यर्थः। ईश्वरप्रतीतिवदस्मदादीप्रतीतेरपिनुत्पन्नविषयतास्त्वित्याशंक्य तथा सति कारणापेक्षाविरहात् सर्वदा सर्वेषां सर्वज्ञतास्यात् इत्याह अन्यथेति। ननु पूर्वं घटादिविषयकत्व रहिता संवित् तत्तद्विषयेंद्रिय सन्निकर्षादिसामग्रीवशात्तत्तद्धटादि विषया भविष्यतीति शंकते नन्विति। किं सामग्री वैचित्र्यं यद्धटादि विषयकं ज्ञानमुत्पद्यते उत विषयीकरणलक्षण संबंधः। नाद्य इत्याह सत्यामिति। द्वितीय्यमाशंकते तत्तदिति। तत्तत्प्रत्यक्षादि सामग्रयनन्तरं साक्षात्करोमीत्यन्वयादिदर्शनात् संविदर्थत्व कल्पनमेव सामग्र्यायत्तं। न तु संबंधांतरमपि कल्पयित्वा तदर्थत्वकल्पनमित्याह नेति। ननु नहि ''द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते'' ''न विज्ञातुर्विज्ञाते र्विपरिलोपो विद्यते'' ''प्रकाश्यन्ते न जन्यन्ते'' (विष्णुध.१०४ अ) इत्यादिभिः संविदो नित्यत्वावगमादन्वय व्यतिरेकावपि स्वरूपातिरिक्त संबंधादिकल्पनीयं तावतापि सामग्र्यासार्थक्यमेवेति शंकते संविदिति। किमिति संबंध इति। शेषः। साध्याकारोऽपि श्यामिकेव धर्मोवास्यात् क्षीरस्य दधिभाव इव विकारो

इति चेन्न; आरोपस्यैव विषयीकरणात्मकस्य निरूप्यमाणत्वात्। यदि हि विषयीकरणमप्यारोपितम्, तर्हि तद्विषयविषयीकरणान्तरापेक्षयाऽनवस्था। क्वचिद्वा विषयीकरणस्य सत्यत्वेन प्रागुक्तो दोषः। न च विषयीकरणमारोपितमप्यविषय इति वाच्यम्; व्याघातात्। नापि विषयीकरणान्तरमन्तरेण स्वरूपेणैव तत्प्रकाशत इति वाच्यम्, तत्रैव सामग्रीनैरपेक्ष्यप्रसंगेन सर्वदा संविदस्तद्विषयत्वे तत्सम्बन्धि घटादेरपि सर्वदा प्रकाशप्रसङ्गात्।

किंच विश्वव्याप्तायामनादौ संविदि तत्तदधिष्ठानतया भासमानायां सम्बन्धार्थं सामग्रीगवेषणमिति भवतो न युज्यते; न ह्यसंविदध्यस्तो घटादिलक्षणः कश्चित्समस्ति भवताम्; न च घटादिः सामग्र्यऽधीनसंबन्धलक्षणमात्रसिद्धसत्ताकः। अतो यावदुत्पत्तिविनाशं घटादिप्रकाशो दुर्वारः। प्रकाशत एव कस्मैचिदिति चेन्न; सर्वस्मैप्रसङ्गात्। एकस्यामेव हि संविदि विश्वारोपो भवताम्।

वास्यात् उभयथापि न संभवतीत्याह तत्रेति। आदिशब्देनोत्पत्यादिः। धर्मविकाराददोष इति। वेदाः प्रमाणमितिवन्निरूप्यमाणत्वात् निरूपणेन विचारेण निरस्यत्वादित्यर्थः। पर्यायेण गच्छति पर्याययतीति वत् "प्रातिपदिकात् धात्वर्थे" इति णिच्। निरासप्रकारं दर्शयति यदि हीति। आरोपविषयत्वमारोपितत्वं। तथा चारोपितस्य विषयीकरणस्य विषयीकरणान्तरमपेक्षितं तन्मिथ्याभूतं सत्यं वा नाद्य इत्याह विषयीकरणमिति। तद्विषयीकरणान्तरापेक्षयेति। आरोपित प्रथम विषयीकरणान्तरापेक्षया इत्यर्थः। न प्रागुक्तो दोष इति। किन्त्वपसिद्धान्त इति शेषः। यद्वा सत्यत्वेन सत्यतया प्रागुक्तोदोषः सामग्र्य एव नापेक्षणादित्युक्तो दोष इत्यर्थः। न्याघातादिति। आरोपितत्वं नाम आरोपविषयं तस्या विषयत्वोक्तौत इत्यर्थः। ननु संवित् घटादि प्रकाश एव विषयीकरणमपेक्षते। न तु विषयीकरणेपि स्वरूपस्यैव तत्प्रकाशात्मकत्वादिति शंकते नापीति। तत्रैवेति। विषयीकरणविषये सामग्रीनरैरपेक्ष्यान्नित्यभूतायास्संविदः सर्वदा तद्विषयत्वे विषयीकरणस्य सर्वदाभानात् विषयभानं विना तद्भानायोगात् घटादीनामपि सर्वदा भानप्रसंग इत्यर्थः।

किंच विश्वव्याप्तायां नित्यायां च सर्व देशकालवर्तिपदार्थाधिष्ठानत्वयोग्यायां संविदि प्रपंचाध्यासं अवोचः। अस्मिन्कल्पे अहमर्थधर्मभूतायां तादृश्यं संविदि अध्यासो वाच्यः। तदतिरिक्तसंविदध्यासे एतत्संविदाभानायोक्तः। ततश्चाधिष्ठान भूतयया तया संविदा घटादीनां भानावश्यंभावात् कादाचित्कसंबंधापेक्षाविरहात् न तदर्थं सामग्र्यपेक्षेत्याह किं चेति। नन्वधिष्ठान भूतायापि संविदा सामग्र्यधीनसंबंधदशायामेव घटादिर्भासते नान्यथेत्यत्राह न चेति। मिथ्यार्थस्यभाने नियतसत्ताकत्वात् घटादेसन्निकृष्टदशायामेव त्वं स्यात् नान्यथा। तच्च प्रमाणविरुद्धमित्यर्थः। ननु "दृष्टिसृष्टि" पक्षोऽस्माभिरभ्युपगम्यत इति चेत् तदत्यंताभावगतं दृष्टि शब्देन किं चैतन्यं विवक्षितं उत चक्षुः स्सन्निकर्षादिः। पूर्वत्र सर्वदासत्वप्रसंगात्। उत्तरत्र चक्षुरादेरपि सृष्ट्ययोगेन सृष्ट्यनुपपत्तेरित्यादि दोषबाहुळयादिति भावः। अत इति। यत एव मध्यस्तो घटादिः प्रतीति नियतसत्ताकोधिष्ठानमात्रभावस्य बाध इत्यर्थः। कस्मैचिदिति। ईश्वरादेवेत्यर्थः। सर्वस्मै इति। अविशेषादिति भावः। अविशेषमुपपादयति एकस्यामिति। अहमर्थधर्मभूत संविदि सर्वासामर्थानामेकैवेति भावः। ननूक्तदोषपरिहारायानंतास्संविदस्स्वी क्रियन्ते ततश्च यस्य यस्यां संविदिं योऽर्थोऽध्यस्यति तस्य तया संविदा अर्थो भासते इति

अनन्तसंविदध्यासात्प्रकाशाप्रकाशोपपत्तिरिति चेत्; घटादिविषयसंविदामध्यस्तत्वे संविदन्तरानुपलम्भे च शून्यवादप्रसंगात्। सत्यां संविदि नानात्वमात्रमध्यस्तमिति चेत्, तथा सति सर्वत्र सर्वविषयप्रकाशो दुर्वारः, सर्वेषु प्रतिमाचन्द्रेषु कलङ्कप्रकाशवत्। यस्तु दृग्दृश्ययोस्सम्बन्धानुपपत्त्या विश्वमपह्नोतुमीहते, स कथं तत्सम्बन्धार्थं प्रयतते? अतः संविदनुत्पत्तिवादिनामप्रकाशो वा यावत्सत्त्वं तत्प्रकाशो वा दुष्परिहरः। प्रागभावरहितायास्संविदः कथमुत्पत्तिरिति चेन्न; उक्तानुपपत्त्यैव तत्सत्त्वात्।

ननु न तावत्संविदा स्वप्रागभावग्रहः, स्वप्रागभावस्थितौ संविदनुत्पत्त्या ग्राहकाभावात्। तदपक्रमे तु विषयाभावादेव तद्ग्रहणायोगात्। नापि संविदन्तरेण तद्ग्रहः, निष्प्रतियोगिकाभावग्रहणायोगात्। प्रतियोगिन्याश्च संविदस्स्वतस्सिद्धायास्संविदन्तरविषयत्वायोगादिति। नैवम्, स्वतः परतश्च तद्ग्रहोपपत्तेः। स्वतस्तावत् एतावन्तं कालं न किंचिदहमज्ञासिषमिति योऽयं प्रत्ययः, स हि सामान्यतः पूर्वकालवर्तिनं स्वात्माभावमपि गृह्णाति। न चातीतस्य प्रागभावस्य कथं विषयीकार इति वाच्यम्, अस्मदादिप्रत्यक्षज्ञान व्यतिरिक्तज्ञानेषु त्रिकालवर्तिनामपि ग्रहणात्। न चातीतस्यासतो ग्रहणादप्रमाणत्वम्, अतीतस्यापि

प्रकाशाप्रकाशोपपत्तिरिति शंकते। अनन्तेति। संवित्स्वाध्यासः संविद ध्यासः। अद्वैतावदिनात्वया संविदानन्तमध्यासेन वाच्यं अन्यथा अद्वैतभंगप्रसंगात्। ततश्चात्रैवं विकल्पः किं संविदामेवमध्यासः उत तस्यां नानात्वस्येति आद्यं दूषयति। घटादीति। घटादिसंविदां पूर्वमभावादधिष्ठानत्वायोगात् तदतिरिक्तसंविदोनुपलंभनिरस्तत्वात् अधिष्ठानांतरा भावात् निरधिष्ठानाध्यसे च शून्यवादतापत्तिरित्यर्थः। द्वितीयं कल्पमाशंकते। सत्यामिति। भेदाध्यासेऽपि घटादिविषयकज्ञानस्य सर्वगतस्य अनपायात् सर्वत्र सर्वविषयप्रकाशो दुर्वार इत्याह। तथासतीति। ननु चंद्र भेदाध्यासे सति यथा सव्यदक्षिणव्यवस्था तथा घटविषयत्वतदविषयत्वव्यवस्थाप्युपपद्यत एवेत्याशंक्याह। सर्वेष्विति। प्रतीयमानधर्मविरोधिधर्माध्यास एव तयोर्धर्मयोः परस्परत्यान्ता भावसमानाधिकरणतया परस्परं भिन्नाश्रयन्वेन व्यवस्थया प्रतीतिरूपपद्यते। नत्वन्यथापि। तथा सति कळंकचंद्रत्वादेरपि व्यवस्था प्रसंगात्। घटविषयकत्वपटविषयकत्वादिकंच न परस्परं विरोधि समूहालंबने तदुभययादर्शनात् तथाच प्रतीतिव्यवस्थाया एव दुरूपपादत्वे कुत एकस्मिन्नधिष्ठानेऽध्यस्यमानयोरर्थयोव्यवस्थेति भावः। विषयीकरणलक्षणसंबंधस्य सामग्र्यधीनत्वे दृग्दृश्यसंबंधानुपपत्त्या विश्वमिथ्यत्वकथनं संगतं स्यादित्याह। यस्त्विति। अन्यथेत्यारभ्योक्तमुपसंहरति। अत इति। यत एवं घटादिविषयस्वप्रकाशस्य कादाचित्कत्वमुपपत्त्ययोग्यं अत इत्यर्थः यावत्सत्तमिति। यावत्संवित्सत्तमित्यर्थः। ज्ञानस्य नित्यस्यापि विषयसत्त्वदशायामेव तत्प्रकाशत्वस्य तैरंगीकारादिति भावः। उक्तानुपपत्त्यैवेति। कादाचित्कविषयप्रकाशान्यथानुपपत्तेत्यर्थः।

संविद इति। प्रत्यक्षसंविदइत्यर्थः। शेषे षष्ठी। किं प्रागभावं वर्तमानं गृह्णाति किं वा अवर्तमानं। नाद्य इत्याह प्रागभावसिद्धाविति। द्वितीयेत्वाह। तदपक्रम इति। प्रतियोगिग्रहणमप्यस्त्वित्यत्राह। प्रतियोगिन्याश्चेति। अवेद्यत्वादिति भावः। संवित्प्रागभावस्य प्रतियोगिग्राह्यत्वमुपपादयति। स्वतस्तावदिति। ज्ञानमात्राभावग्राहकस्य स्वभावग्राहकत्वस्यापि भावादिति भावः। अस्मादादिति। नच

स्वकाले सत्त्वात्, अन्यथा वर्तमानस्य पूर्वोत्तरकालासत्त्वेन तद्ग्राहिणोऽप्यसद्ग्राहित्वेना प्रमाणत्वप्रसङ्गात्। गृह्यमाणवैपरीत्याभाव एव हि प्रामाण्यम्, न पुनर्ग्राह्यस्य ग्रहणसमकालत्वम्। अन्यथा भवन्मतेनार्निवचनीयरजतसमकालवर्तिन्या रजतभ्रान्तेः प्रामाण्यप्रसङ्गात्।

संवित्प्रागभावग्राहकं किमिदं प्रमाणमिति चेत् यद्धवद्यभावग्राहकं तदेव। प्रत्यक्षानु प्रविष्टतया वा पृथक्प्रमाणात्मिकया वा योग्यानुपलब्ध्या घटाद्यभावग्रह इति चेत्। इहापि तथैव। अतिक्रान्तैवानुपलब्धिकाले कथमुपकुर्यादिति चेन्न; स्मृत्यभावकल्पितया प्राचीनयैव तया तत्सिद्धेः, प्रातर्गजाभावादिविज्ञानवत्। तद्धदत्रापि प्रमाणसंज्ञाविशेषो यथारुचि प्रक्षिप्यताम्। न च संस्कारविलयात् स्मृत्यभावः; प्रबलतरसुखदुःखकालदैर्ध्यादिसंस्कारतिरस्कारकाभावे तदयोगात्। न च सुषुप्त्यादय एव संस्कारोच्छेदकाः, तथा सति पूर्वदिनाद्यनुभूतस्यास्मरणप्रसङ्गात्। तथा च सुप्तोत्थितः शत्रुमपि मित्रतया प्रतिपद्येत, पु(त्र)त्रीमपि, कलत्रतया, श्रोत्रमपि नेत्रतयेति विश्वविप्लवः। न च विषयप्रकाश विरहादहंभाव विगमाद्वा संस्कारानुत्पत्त्या तदस्मृतिः, अर्थान्तरा प्रकाशासद्भावयोः प्रकाशमानसंस्कारोत्पत्ति प्रतिबन्धकत्वेऽतिप्रसङ्गात्। न चाविशदप्रकाशरूपत्वादस्मृतिः, सर्वदा संविदंशस्यास्मरणप्रसंङ्गात्। न

प्रत्यक्षे तथा नियम इति वाच्यं। अप्रयोजकत्वादिति भावः। किं सर्वकालासत्वमप्रामाण्यप्रयोजकं उत असत्वमात्रं नाद्य इत्याह। अतस्तस्यापीति। द्वितीये आह। अन्यथेति। अन्यथाभाववन्मत इति। इदं रजतमित्यत्र शुक्तौ रजतस्योत्पत्यंगीकारादिति भावः।

संवित्प्रागभावे संवित्प्रागभावग्राहीदं प्रत्यक्षादिषु किं प्रमाणमित्यर्थः। इहापि तथैवेति। समस्समाधिरिति भावः। ननु यद्यपि प्रत्यक्षसामग्र्यनुप्रविष्टतया स्वतंत्रयावानुपलब्ध्योत्पन्ने न संविदंतरेण नेदानीं घटं साक्षात्करोमीत्याकारे संविदंतरस्याभावो गृहीतुं शक्यते। तथाप्यतीतकालीनप्रागभावस्य तत्कालीनानुपलब्ध्या कालांतरग्रहो नोपपद्यत इत्याशंकते। अतिक्रांतैवेति। यद्यपि स्वकाले ग्रहणमात्रादपि ग्रहणानुपपत्तिनिबंधनः प्रागभावनिरासः परिहृत एव तथापि कालांतरे ग्रहणसंभवमुपपादयन् परिहरति नेति। संवित्तत्कालीनतया नोपलब्धा तत्कालीनतया अस्मर्यमाणत्वादित्यनुपलब्धौ अनुमितायां अहं तदा संविदभाववान् तदानीं तदुपलब्धिमत्वात् इति तल्लिंगकानुमानेन संविदभावसिद्धेरित्यर्थः। ननु प्रातर्गजाभावादिस्थले अनुपलब्धि प्रमाणेनैव अस्माकमर्थसिद्धिः। त्वया अर्थापत्यनंगीकारात् कथं सविदभावसिद्धिरित्यत्राह। तद्धदत्रापीति। यथा प्रातर्गजा भावादितिविज्ञानस्थले कार्यानुसारात् करणे आवश्यके तस्मिन् अन्यथारुच्यनुपलब्ध्यादि संज्ञा प्रक्षिप्यते एवमिहाप्येतावंतंकालं अमुं नाज्ञासिषं इत्याकारज्ञानलक्षणकार्यानुसारात् क्लृप्ते करणे यथारुचि संज्ञा प्रक्षिप्यतां प्रमाणस्वरूपदुरपह्नवमेवेत्यर्थः। ननु यत्रानुभूतेपि संस्कारविनाशात् स्मरणं तत्र व्यभिचार इत्याशंक्याह। नच संस्कारेति। व्यभिचारइति शेषः। तदयोगादिति। संस्कारनाशायोगादित्यर्थः। तथा च तादृशसंस्कारविनाशा भावविशिष्टास्मरणं हेतुरिति न व्यभिचार इति भावः। नन्वेवं पूर्वदिनानुभवानुमानं न स्यात्सुषप्त्यादेस्संस्कारविनाशकस्य सत्वेन संस्कारविनाशकाभावविशिष्टस्मरणस्याभावादित्याशंक्य परिहरति (संस्कारानुत्पत्तेः ततश्च तत्र व्यभिचार इत्याशंक्य)। नचेति। ननु सुषुप्तौ तावत् संविदनुभूयते। नच सा तत्कालीनतया पश्चात्

हि संविदंशे वैशद्यं तवास्ति, नित्यमेव निर्धर्मकत्वात्। विषयाश्रयोल्लेखाद्वैशद्ये तत्स्मृतिरिति चेत्, तदपि न; वैशद्यमन्तरेणाप्यन्धकाराद्यनुभूतवस्तुमात्रादिषु स्मृतिदर्शनात्।

तदेवं स्वतस्तत्प्रागभावग्रह उपपादितः। परतोऽपि तत्प्रागभावग्रहः संविदो वेद्यत्वसमर्थनादेव सिद्धः। अन्यथा त्वद्वाक्यजन्यापि संवित्तत्प्रागभावस्य दुर्ग्रहत्वं न साधयेत्, संवित्प्रागभावदुर्ग्रहत्वग्रहणे संविद्ग्रहणावश्यंभावात्। स्वप्रकाशस्वरूपमेव प्रतियोगित्वेनोपजीव्य तत्प्रागभावदुर्ग्रहत्वं साध्यत इति चेत्, एवं तर्हि तत्प्रागभावग्रहेऽपि तदेवोपजीव्यताम्। किंच, प्रतिवादिनः शिष्याणां च त्वत्सिद्धान्तार्थज्ञानमनुत्पन्नं मत्वैव त्वया वाक्यं प्रयुज्यते, स्वयमपि कदाचिद्गुरूपदिष्टं प्रतिवादिनिर्दिष्टं वाऽर्थमजानानो न जानामीत्येव भाषसे, जिज्ञाससे चः; एवं मूर्खपण्डितविभागोऽपि लोके बहुलमुपलभ्यते। तदेतदखिलं ज्ञानप्रागभावग्रहाभावे कथं घटेत? ज्ञानादिविधिशास्त्रं च कथं जीवेत्? तदेवं स्वस्मिन् वर्तमानस्य भविष्यत्संवित्प्रागभावस्य ग्रहणं योग्यानुपलब्ध्या जायते, अतीतस्य तु स्मरणानुमानादिना। परगतस्याप्यनुमानादिनैव। अतः स्वतः परतोऽपि सिद्धः संविदः प्रागभावः।

ननु भवद्भिरपि धर्मभूतज्ञानस्यापि स्वरूपनित्यत्वमभ्युपेतम्, ततश्च तत्प्रागभावतदुत्पत्त्यादि समर्थनेऽपसिद्धान्त इति चेन्न; अस्माकं धर्मभूतज्ञानस्य सधर्मकत्वादवस्थाविशेषवत्त्वात्तत्तदर्थं

समर्थ्यति। तदस्मरणं च अहंप्रत्ययविगमाद्विषयावच्छेदविगमाच्च संस्कारानुत्पत्तेः। ततश्च तत्र व्यभिचार इत्याशंक्य परिहरति। न च वि-ेति। अर्थांतरेति। यदि सुषुप्तौ संविदन्वभविष्येत् तद्विषयसंस्कारो प्रपत्स्येत। न च तत्राहंप्रत्ययविगमस्य विषयावच्छेदविरहस्य च संस्कारानुत्पत्ति प्रयोजकत्वं। तथा सति घटाननुभवस्य पटाभावस्य चानुभूतकुड्य संस्कारप्रतिबंधकत्वप्रसंगादतस्तत्र संविदोऽननुभव एवेति न व्यभिचार इति भावः। ननु न तत्र स्मृत्यभावेन संविदननुभवः त्वया साधयितुं शक्यते। सौषुप्तिकसंविदनुभवस्य निर्विकल्पकवदविशदतया संस्कारानुत्पत्तेरेवास्मरणोपपत्तेरितत्याशंक्य परिहरति। नचेति। नहीति आपरोक्ष्यलक्षण वैशद्यस्य सुषुप्तावपि सत्वात्। तदानीं विद्यमानस्य त्वन्मते निर्धर्मकतयेकिमप्यभावादित्यर्थः। ननु विषयाश्रयविशिष्टतया संविदुल्लेखो वैशद्यं। तच्च सुषुप्तौ नास्त्येव। नचैवं सति सधर्मकत्वमपीत्याशंकते। विषयाश्रयेति। अंधकारादिति। विरप्यालोक सहितांधकारादिषु देवदत्तस्य तद्धर्मभूत दंडादेरप्य विशदावभासोऽस्ति। ततस्मृतिश्चेति भावः।

अन्यथेति। संविद्ग्रहणाभावे प्रागभाव ग्रहणाभावस्य त्वयैवोकत्वादिति भावः। एवमपि संविदः प्रागभावस्सिद्ध एवेति परस्य व्याघातस्सुस्पष्टः। तथाप्यत्यंताज्ञाततासूचनाय दूषणांतरमाह। एवं तर्हीति। अनुपपन्नं मत्वेति। अन्यथावैयर्थ्यशंकया परबोधे प्रवृत्तिर्नस्यादिति भावः। न जानामीति पुनरुपदेशे जानामीत्यपि तस्मात्प्रागभावो गृह्यत इति भावः। एवं मूर्खेति। तस्यैव शास्त्राध्ययने सति पिंडतत्वाज्ञानप्रागेव मौर्ख्यमिति भावः। ज्ञानादिति। ज्ञानस्योत्पत्त्यभावे आज्यावेक्षणादिविधि शास्त्रमुच्छिद्येत ज्ञानार्थश्रवणादिति नेक्षे तोद्यंतमादित्यादि निषेध शास्त्रं चोच्छिद्येतेत्यर्थः।

अस्माकमिति। स्वरूपनित्यत्वं हि सिद्धांतः। तथा चावस्थारूपविकारांगीकारात्सर्वमुपपद्यते। निर्धर्मवादिनस्तवे तु नकथंचिदपीति भावः। नन्ववस्थावत्त्वेनापि न निर्वहति। अनुभूतिर्निर्विकारा

सामग्रीसमागमोपपत्तेः। तत्तत्प्रकाशात्मकावस्थाविशेषेषु च प्रागभावोत्पत्त्यादिबुद्धेरुपलम्भ विरोधाद्यभावात्, अपसिद्धान्ततानवताराच्च। अनुभूतेरवस्थान्तरापत्तिरेव न सम्भवति, अजत्वादेवेति चेन्न; स्वरूपानुत्पत्तिमात्रस्य भवदभिमताविद्यया अस्मदभिमतप्रकृत्यादिभिश्च व्यभिचारात्। समस्तव्यतिरिक्तत्वे सतीति तर्ककौशलम्, अन्ततोऽप्रयोजकत्वं च। अवस्थान्तरापत्तिराहित्यस्य हेतुत्वे साध्याविशेषात्, मिथ्याभूतावस्थान्तरनिषेधेऽपसिद्धान्तात्, सत्यावस्थानिषेधे च व्यतिरेकव्याप्तेर्भग्नत्वात्। यत्सत्यावस्थाविशिष्टं तज्जायते, यथा घट इति हि सा। न च घटादेः सत्यावस्थाविशिष्टत्वं त्वयाऽभ्युपगम्यते। एतेनानुभूतेर्विनाशनिषेधोऽपि प्रत्युक्तः, प्रागुक्तप्रकारेण प्रत्यक्षादिबाधाच्च। यदि घटाद्यनुभूतिर्न विनश्येत्, तर्हि सुषुप्त्याद्यनुपपत्तिः, भवत्पक्षे मोक्षानुपपत्तिश्च। विद्यमानायां तस्यां विषयोल्लेखविलक्षणावस्था विशेषस्य प्राग्वदेव दुष्प्रतिपादत्वात्। प्रध्वंसेऽपि ग्राहकभावचोद्यं प्राग्वदेव परिहर्तव्यम्। न च स्वरूपनित्यत्वे प्रध्वंसानुपपत्तिः, घटादिष्वपि सत्कार्यवादिभिस्तथैव प्रध्वंसस्य निर्वहणीयत्वात्। उक्तं च भाष्ये- "तमिममिन्द्रियद्वारकज्ञानप्रसरमपेक्ष्योदयास्तमयव्यपदेश" (श्री भाष्यं, जिज्ञा) इति। नापि द्वितीयः, अहमर्थविलक्षणाया निर्विषयायास्संविदोऽनुपलम्भनिरस्तत्वात्। मुक्तौ निर्विषयत्वस्यान्यत्र प्रतिक्षेपात्। स्वापमदमूर्च्छासु निर्विषयसंविदुपलम्भोऽस्तीति वाङ्मात्ररूपत्वात्। अहमर्थस्य तु स्वरूप मात्रप्रकाशात्मकस्य विषयान्तरविरहेऽपि घटादिविषयग्राहिसंविद्विलक्षणतया तदाश्रयतया च प्रतिपन्नस्य

अनुभूतित्वादिति शंकते। अनुभूतेरिति। अत्र किमजऽत्वं स्वरूपानुवृत्तिमात्रं यद्वा अवस्थाराहित्वं नाद्य इत्याह। स्वरूपानुवृत्तिमात्रस्येति। क्वचित्स्वरूपानुवृत्तिमात्रस्येति। दृश्यते यत्र यत्र व्यभिचारः तत्सर्वव्यतिरिक्तत्वे सतीति विशेषयिष्याम इति चेत्तत्राह। समस्ततेति। द्वितीये आह। अवस्थांतरेति। ननु सत्यमिथ्यावस्थयोरन्य तराभावस्साध्यं। अन्यतराभावो हेतुरिति न साध्याविशेष इति चेत्तत्र किं मिथ्याभूतावस्था भावस्साध्यः किं परमार्थावस्थाभाव इति विकल्पमभिप्रेत्य आद्ये आह। मिथ्याभूतेति। द्वितीयं दूषयति सत्येति। अन्वयव्याप्तिस्तु प्रतियोग्यप्रसिद्धया साध्याप्रसिद्धया न शंकार्हापीति भावः। एतेनेति। अविद्यादिषु व्यभिचार प्रदर्शनेन अनुभूतिर्विनाशरहिता अजत्वादित्यादि विनाशनिषेधानुमानं निरस्तमित्यर्थः। दूषणांतरमाह प्रागुक्तेति। अतः स्वतः परतोऽपि सिद्धः संविदः प्रागभाव इत्यत्र प्रत्यक्षादिबाधस्य फलितत्वात् प्रागुक्ततोक्तिः। असाधारणदोषमाह। तत्पक्षइति। तदुभयमुपपादयति। विद्यमानायामिति। विषयोल्लेख विलक्षणावस्था विषयोल्लेखराहित्य सुषुप्तिमोक्षोऽपि तादृशः। तथाच संविदोनिर्धर्मकतया विषल्लेखावस्थायामसंवित्स्वरूपत्वागंतुकत्वाभावात्संवित्सत्वे विषयोल्लेख स्याप्यावश्यकतया तद्विरहलक्षणा सुषुप्त्यादिदुर्भणमित्यर्थः। न च स्वरूपनित्यत्व इति। सिद्धांत इति शेषः॥ तदैवेति। उत्पत्तिवेदव विनाशस्याप्यवस्थामादाय भाष्ये निर्वहणादित्यर्थः। अस्य वादस्योपक्रमे किं घटादि विषयप्रकाशात्मिकाया एव संविदः उत्पत्तिः प्रतीक्ष्यते उत संकल्पविषयविरक्तायाः कस्यचिदन्यस्या इति कल्पेद्वितीयकोटिं दूषयति। नापि द्वितीय इति। किं सा संविदहमर्थविलक्षणो यद्वा अहमर्थ एव। नाद्य इत्याह। अहमर्थेति। ननु मुक्तौ निर्विषया संविदस्तीत्यत्राह। मुक्ताविति। अहमर्थातिरिक्तायां संविदि निर्विषयत्वस्य वादांतरेप्रतिक्षिप्तत्वादित्यर्थः। वाङ्मात्ररूपत्वादिति। अहमर्थातिरिक्तज्ञानमात्र निषेधस्यैव नकिंचिदहमवेदिषमिति प्रतीतेरिति भावः। द्वितीयं दूषयति।

भवता संविद्विलक्षणतयाऽहङ्कारग्रन्थित्वाभ्युपगमात्; पक्षान्तरे तु तद्वदेव तद्धर्मभूतसंविदोऽपि सर्वदा निर्विषयत्वसाधनस्योपलम्भनिरस्तत्वात् । सुषुप्तौ तु निर्विषयायास्तस्याः प्रकाशादर्शनात् । स्वमात्रप्रकाशस्याप्यहमर्थस्वरूपस्यास्माभिःप्रत्यक्त्वानन्दत्वादिविशेषवत्तयैव स्वतः प्रकाशत्वाभ्युपगमेन कचिदपि निर्विशेषप्रकाशानभ्युपगमात् । यद्यप्यस्मत्पक्षे सुषुप्त्यादिषु धर्मभूता संविन्निर्विषया, तथाऽपि साश्रयत्वादिभिस्तदानीमपि न निर्धर्मकत्वम् । विषयरहितायास्तु तस्यास्तदानीं न प्रकाशमिच्छामः, येन प्रतिसन्धानप्रसङ्गचोद्यान्न मुच्येमहि । उक्तं हि भाष्ये-यत्त्वनुभूतेस्स्वयंप्रकाशत्वमुक्तम्, तद्विषयप्रकाशनवेलायां ज्ञातुरात्मनस्तथैवे'' (श्री भाष्यं, जिज्ञा) त्यादि । यच्चानुमानम्- ''अनुभूतिरनुत्पन्ना, अनुभूतित्वादि''त्यादिकम्, तदप्युपपादितप्रत्यक्षादिसमस्तप्रमाणबाधितम्, प्रागुक्तप्रतिकूलर्तकजालप्रतिहंत च । केवलव्यतिरेकिभङ्गश्चान्यत्र कृतः । घटादिविषयोल्लेखरहित स्वरूपमात्रपक्षीकारे चाश्रयासिद्धिर्वा सिद्धसाधनं वेत्यादिदूषणमूह्यम् ॥

॥इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां संविदनुत्पत्तिदूषणवादः एकविंशः ॥ २१ ॥

अहमर्थस्यत्विति । परैर्घटादिविषयग्राहित्वा भावात् संविदाश्रयत्वाच्चाहमर्थस्योक्तेरिति भावः । ननु त्वयाहमर्थस्य निर्विषयसंविद्रूपत्वांगीकारात् त्वन्मतानुसारेण तद्दृष्टांतीकृत्याहमर्थधर्मत्वेनाभ्युपगताया वस्तुतो निराश्रयायास्संविदोनिर्विषयत्वं प्रसाध्य तस्याः उत्पत्तिः प्रतिक्षेप्यते इत्यत्राह । पक्षांतरे त्विति । अहमर्थस्यांतः करणभिन्नत्वपक्ष इत्यर्थः । किं संविदः सर्वदानिर्विषयत्वं प्रसाध्यते उत सुषुप्त्यादौ नाद्य इत्याह । तद्वदेवेति । द्वितीयं दूषयति । सुषुप्ताविति । त्वन्मते संविदः सर्वदा स्वप्रकाशत्वानभ्युपगमात् सुषुप्तौ निर्विषया संविदस्तीति चेत्तस्यास्तदानीं प्रकाशावश्यकत्वेन तदनुसंधान प्रसंग इति भावः । वस्तुतोऽहमर्थस्य निर्विषयत्वं सिद्धमिति दृष्टांतासिद्धिरित्याह । स्वमात्रेति । मात्रचा घटादि विषयव्यावृत्तिः । नन्वस्माभिर्यादृशी संविदिष्यते तया तादृशी सुषुप्त्यादावभ्युपगम्यत एवेत्यत्राह । यद्यपीति । सुषुप्तौ निर्विषयत्वांगीकारेपि न त्वदभिमत निराश्रयनिर्विषयनिर्धर्मकाहमर्थविलक्षणो संविदसिद्धौ येन तस्या अनादित्वं साध्यतेति भावः । ननु सुषुप्तौ निर्विषया संविदिष्यते तर्हि तस्यास्तदानी प्रकाशमानत्वात्तदुत्तरकालं तदनुसंधानं तवापि स्यादित्यत्राह । विषयरहितायास्त्विति । प्रागुक्तेति । अतो यावदुत्पत्ति नाशं घटादेः प्रकाशप्रसंगो दुर्वार इत्यादिभिरित्यर्थः । अन्यत्रेति । न्यायपरिशुद्ध्यादावित्यर्थः । विषयोल्लेख रहितस्य सार्वकालिकत्वे आश्रयासिद्धिः । कादाचित्कत्वे धर्मभूतज्ञानस्य तादृशस्य सुषुप्तौ सिद्धत्वात् सिद्धसाधनमित्याह । घटादीति । आदिपदेन निश्चित साध्यवतद विद्या दिव्यावृत्तेरसाधारव्यं विवक्षितं ।

वत्सजलधिकौस्तुभ नृसिंहगुरु सुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां एकविंशः समाप्तः ।

अथ संविन्निर्विकारत्वानुमानभङ्गवादः द्वाविंशः ॥२२॥

परिणमयति विश्वं यस्स्वयं निर्विकारः परिणमति च योऽसौ तत्तदर्थान्तरात्मा।
विषमविषयतृष्णाधन्वकान्तारजातं व्यपनयतु भयं मे विश्वजिष्णुस्स विष्णुः ॥

यदुच्यते-अनुभूतिर्निर्विकारा, अनुत्पन्नत्वात्, यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति, यथा घटादिरिति। तत्र संविदुत्पत्त्यादिसमर्थनादसिद्धिबाधौ सुगमौ। किंच किमिदं निर्विकारत्वं नाम? किमुत्तारवधिराहित्यम्? उत घटादिवन्नामान्तरव्यपदेशार्हावस्थाविशेषराहित्यम्? उतावस्थामात्रराहित्यमिति। नाद्यः, अनुत्पन्नेन प्रागभावेनोत्तरावधिमता व्यभिचारात्। भावरूपाज्ञानेन न भवत्पक्षे। भावान्तराभाववादिनस्तेऽनुत्पन्नः प्रागभावो नास्तीति चेन्न; त्वदभिमतेनाप्यन्यतरानैकान्त्यनिर्वाहात्। भावत्वे सतीति विशेषयिष्याम इति चेन्न; कथायामविशेषितस्य हेतोर्विशेषणे हेत्वन्तरापातात्। अस्मान्प्रति व्यर्थविशेषणत्वाच्च। ततश्च पुनस्त्यागे प्रतिज्ञाहानिः। भावरूपाज्ञाने व्यभिचारस्तदवस्थः। इदं सर्वं हृदि निधायाह-भावेष्विति विशेषणे तर्ककुशलताऽऽविष्कृता भवतीति। (श्री भाष्यं जिज्ञा) विशेषितोऽप्ययं हेतुर्भवदभिमतयाऽनाद्यविद्यया तत्त्वज्ञानोदयादन्तवत्याऽनैकान्तः। मिथ्याभूतायास्तस्याः प्रध्वंसोऽपि

पूर्ववादे अनुभूतेरवस्थांतरापत्तिरेव न संभवति अजत्वादित्युक्तं। अनुमानं विस्तरेण दूषयन्वादार्थं संगृह्णाति। परिणमयतीति। ननु "बहस्यां प्रजायेये" (तै.आनं.६-अनु, छां-६-२-३) ति सविकारताश्रवणान्निर्विकारताकमित्यत्राह। तत्तदर्थांतरेति। साक्षाद्विकाराभावान्नविरोध इति भावः। घन्वामरूभूमिः। विश्वं परिणमयति तृह्णाति-परिणमयतीति। ननु "बहुस्यां प्रजायेयेति" सविकारता श्रवणात् निर्विकारताक इत्यत्राह-तत्तदर्थान्तरात्मतेति। साक्षाद्विकाराभावान्न विरोध इति भावः। सामान्येन भयं व्यपन्यत्विति विशेषेण वादार्थस्सूचितः। विश्वमध्ये अनुभूतेरप्यंतर्भावाद्भयस्य ज्ञानविकारत्वादिति भावः।

तत्र संविदिति। आदिपदेन सविकारत्वं गृह्यते। उत्पत्तिमत्वादसिद्धिः विकारत्वाच्च बाधः इत्यर्थः। उत्तरावधिर्विनाशः उत घटादिवदिति नामांतरव्यपदेशार्हावस्था परिणामः तद्राहित्यमित्यर्थः। अवस्थामात्रराहित्यमिति। कार्यमात्रराहित्यमित्यर्थः। अभावांरतवादिमतेनाह अनुत्पन्नेति। भवत्पक्षइति। व्यभिचारादित्यनुषंगः। त्वदिति। त्वया स्वप्रागभाव व्यतिरिक्तेति। विद्यानुमाने विशेषणदानादिति भावः हेत्वंतरापातादिति। हेत्वंतरं नामनिग्रहस्थानं प्रसज्येत "विशेपत्वोक्तेर्हेतौ प्रतिषिद्धे विशेषणमिच्छतो हेत्वंतरमिति" गौतमवचनादित्यर्थः। अस्मान्प्रतीति। अस्मन्मते भावस्यैवाभवत्वात् व्यर्थविशेषणतया व्याप्यत्वासिद्धिरिति भावः। ततश्चेति। ननु हेतुहानिरेव स्यात् न प्रतिज्ञाहानिरितिचेन्न। हेतु विशेषत्यागेपि प्रतिज्ञाहानिरेव प्रतिज्ञाहानिशब्दस्योक्तहान्यर्थत्वात् तदुक्तं वरदराजीये "अत्र प्रतिज्ञाग्रहणं मुक्तमात्रोपलक्षणं सत्यमन्वर्थ संज्ञेयमुपलक्षण नामैव प्रतिज्ञाहानि" रिति। अविशेष हेतावेव पूर्वोक्तं व्यवहारं च स्मारयति। भावरूपेति। आहेति। भाष्यकारइति शेषः। ननु पारमार्थिक विनाशाभावस्साध्यः। भावरूपाज्ञानस्य मिथ्यात्वेन विनाशित्वमप्यपरमार्थिकमिति तदभावस्य पारमार्थिकस्य साध्यस्य सत्वान्नव्यभिचार इति शंकते। मिथ्याभूताया इति। व्याप्तिग्रहासंभवेन दूषयति। नेति। किं प्रतिभासिकविनाशित्वं व्याप्तिनिरूपकं उत व्यावहारिकं उत पारमार्थिकमिति विकल्पमभिप्रेत्याद्यं दूषयति।

मिथ्याभूत इति नानैकान्त इति चेन्न; घटादिप्रध्वंसस्यापि मिथ्यात्वेन यदुत्तरावधिमदिति व्यतिरेक व्याप्तेर्दुर्ग्रहत्वापातात्। व्यवहारिकं घटादेरुत्तरावधिमत्त्वमुपजीव्य व्याप्तिग्रह इति चेन्न; अविद्याया अपि तथाविधोत्तरावधिमत्त्वाभ्युपगमेनानैकान्त्यस्यानिस्तारात्।

अथ पुनः परमार्थोत्तरावधिराहित्यमेव साध्यार्थ इत्यातिष्ठसे, तथाऽपि व्यतिरेकासिद्धिः; यत्परमार्थविकारवत्तदुत्पन्नं यथा घट इति भवता उच्चैर्भाषितुमशक्यत्वात्। माभूद्व्यतिरेकः; अविद्याऽपि सपक्ष एवास्तु, हेतुश्च सपक्षैकदेशवर्तिकेवलान्वयी भविष्यतीति चेन्न; तथाऽप्यप्रसिद्धविशेषणत्वापातात्। न ह्यप्रमितप्रतियोगिकं व्यतिरेकमभ्युपगच्छामः। न च परमार्थविकारं प्रमितमिच्छसि। न चाप्रमितस्य परमार्थता सम्भवति। क्वचिच्च परमार्थविकाराभ्युपगमेऽपसिद्धान्तः। ततश्च भवदृशा विकारश्चेदपरमार्थ इति व्याप्तौ सिद्धायां व्यवच्छेद्याभावाद्वार्थं विशेषणमिति। तदेतदखिलमभिसन्धायाह- ''किं भवतः परमार्थभूतोऽप्यस्ति विकारः? येनैतद्विशेषणमर्थवद्व (विष्य) वती''ति (श्री भाष्यं जिज्ञा)।

ननु माभूद्व्यवच्छेद्यम्, तथाऽप्यनैकान्त्यपरिहारक्षमतयाऽपि सार्थं विशेषणमिति चेत्, हन्तैवं शशविषाणरूपविकारहितेति किं न साध्यते? तावताऽपि ह्यनैकान्त्यं सुपरिहरम्। अप्रसिद्धविशेषणत्वा पातादिति चेत्, तुल्यम्। अस्तु तर्हि सिद्धसाधनत्वपरिहारार्थं परमार्थेति विशेषणम्, प्रसङ्गतस्त्वनैकान्त्यमपि परिहरिष्यति; विकारराहित्यमात्रे हि साध्यमाने मिथ्याभूतविकारराहित्यमात्रेण यदि भवान् सिद्धसाधनतां

घटादीति। घटादेर्व्यावहारिक विनाशित्वादिति भावः। द्वितीयमाशंकते। व्यावहारिकमिति। अविद्याऽया अपीति। घटादितुल्यत्वादिति भावः।

तृतीयमाशंकते। अथ पुनरिति। उच्चैर्भाषितमिति। परमार्थस्य विकारस्याभ्युपगमे अपसिद्धांता पातादिति भावः। ननु पारमार्थिकोत्तरावधिमत्वस्य व्यतिरेक एव साध्यः। न च व्यतिरेकासंभवः हेतोरन्वयित्वादिति शंकते। अथ पुनरिति माभूदिति। अप्रसिद्धविशेषणत्वं साध्याप्रसिद्धिरित्यर्थः। तदेवोपपादयति नहीति। अस्तु परमार्थ विकारस्यापि क्वचित्प्रमितिरित्यत्राह। नच परमार्थेति। माभूद्विकारस्य प्रमितिः तथापि सः बाधात्परमार्थोऽस्त्वित्यत्राह। नचेति। प्रमाणंविनापि प्रमेयांगीकारेऽतिप्रसंगादिति भावः। अप्रतीस्यापि परमार्थत्वे अद्वैतभंगश्चेत्याह। क्वचिच्चेति। ततश्चेति। विकारा भावं साध्यता त्वया विकारमात्रस्य पारमार्थिकत्वांगीकारात्पारमार्थिकविकारस्याप्रसिद्ध्या तदभावस्याप्यप्रसिद्धेः तद्वाधनासंभवादपारमार्थिविकाराभाव एव साधनीयः। तथा च विशेषणमनुपादेयेत्यर्थः। नन्वपरमार्थविकारः भाव एव साध्यः। परमार्थविशेषणं वात्विद्यायां व्यभिचारवारकतया सार्थकं चेति।

शंकते। ननु माभूदिति। हंतैवमिति। शशविषाणविशेषितविकारराहित्य तुल्यमिति भावः। तुल्यमिति। परमार्थविकारस्य प्रतियोगिनोऽप्रसिद्धत्वादिति भावः। ननु विकारराहित्यमात्रे साध्ये सिद्धसाधनात् किंचिद्विशेषण विशिष्टं साध्यं वाच्यं। शशविशाणरूपविकारराहित्यसाध्यंतु न सिद्धसाधनपरिहारार्थं। तस्यापि सिद्धत्वात्। अत एव तत्परित्यागः। नत्वप्रसिद्धविशेषणत्वात् परमार्थविकारराहित्य साधने तु सिद्धसाधनमिति न तुल्यत्वमिति शंकते। अस्तुतर्हीति। ननु विकारराहित्यमात्रे साध्ये कथंसिद्धसाधनमित्यत्राह। विकारराहित्यमात्रेहीति। पारमार्थिकापारमार्थिकविकारानुगतस्यैव

ब्रूयात्तदाऽस्माभिर्विशेषितव्यमिति चेन्न; अतिप्रसङ्गात्। पर्वतोऽग्निमानित्यादिषु सर्वेष्वपि प्रयोगेषु परमार्थाग्निमानित्यादिप्रयोगप्रसङ्गात्। स्वयंप्रकाशानुमानेषु च भवताऽनुभूतिः परमार्थतः स्वयंप्रकाशेत्यादिप्रयोगो वाच्यः, अन्यथा हि मिथ्याभूतस्वयंप्रकाशत्वाभ्युपगमेन परः सिद्ध साधनतामुद्धाटयेत्। नच वयमप्यपरमार्थान् कांश्चन विकारानिच्छामः, येन संविदस्तद्योगात्सिद्धसाधनतां प्रब्रूम इति बिभेषि। अतः सुष्ठूक्तं भाष्ये विशेषणवैयर्थ्यम्। उत्तरयोरपि कल्पयोरनैकान्त्यमदर्शयत्- ''भवदभिमताऽविद्याऽनुत्पन्नैव विविधविकारास्पद''मि (श्री भाष्यं जिज्ञाति)। तत्र न तावद्धितीयः, अविद्याया एव महदादिनामान्तरव्यपदेशार्हसमस्तविकारयोगित्वस्य भवद्भिरेव स्वीकारात्। घटकपाललोष्टाद्यवस्था विशेषोऽपि ह्यन्ततोऽविद्याया एव। अनुभूतिस्मृत्यादि नामान्तरव्यपदेशार्हावस्थाभेदाश्च संविद एव प्रत्यक्षमीक्ष्यन्त इति कथं तदभावसाधनम्? अनुभूतित्वादयः संविदवस्थाविशेषा मिथ्याभूता इति चेन्न; दत्तोत्तरत्वात्। नहि सत्यः कश्चिदवस्थाविशेषस्ते समस्ति। अत एव न तृतीयोऽपि। अपसिद्धान्तप्रसङ्गस्त्वधिकः, मिथ्याभूतानामवस्थाविशेषाणां संविदो भवतैव स्वीकारात्। अन्यथा जगद्भ्रमतन्निवृत्त्यपेक्षातदुपायगवेषणतदनुष्ठानतदर्थशास्त्रारम्भादेरभावप्रसङ्गात्। इष्टप्रसङ्गोऽयमिति चेन्न; व्यावहारिकव्यवस्थाप्रतिष्ठितानां तेषां त्वयैव स्वीकारात्। अन्यथा तिष्ठ सत्यपक्षे, त्यज वा

विकारत्वस्यैकस्याभावात् तदवच्छिन्नसामान्याभावस्य साधयितुमशक्यत्वात्। विकाररहित्यमात्रे साधिते मिथ्याभूतविकाराभावप्रतीतेस्सिद्ध साधनं। तद्व्यावृत्यर्थं परमार्थविशेषणं साध्यमित्यर्थः। अति प्रसंगमुपपादयति पर्वतोग्निमानिति। ननु परमार्थाग्निमानित्यादिरूपेणैव साधनं तत्रेष्टमिति चेत्तथापि मिथ्याभूतपरमार्थत्वा मादायसिद्धसाधनोद्भावनशंकया परमार्थत्वेऽपिपरमार्थविशेषणमेव तत्र तत्रपीत्यनवस्थायां तात्पर्यात्। न च वयमपीति। स्वाधिकरणनिष्ठात्यंताभावप्रतियोगित्वमेव मिथ्यात्वं विवक्षितं ततश्चमिथ्याभूतविकाराभावस्यसिद्धत्वात् सिद्धसाधनमित्याहुः। अन्येतु विकारसामान्याभावः साध्यः। तथाच मिथ्याभूतविकारांगीकारत्सिद्धसाधनं बाध इत्याहुः। अदर्शयदिति। भाष्यकार इति शेषः। तत्परं भाष्यं दर्शयति भवदभिमतेति। भाष्यं विवृणोति न तावदिति। द्वितीयः परिणामित्वा भाव कल्पः। अविद्यायाः प्रत्यक्षामवस्थामप्याह। घटकपालेति। प्रत्यक्ष बाधमप्याह। अनुभूतीति। नन्वंतः करणविकाराः। एतेन संविद्विकाराइति चेन्न घटादिविकाराणां अनृतत्वेनेव स्मृत्यादिविकाराणां ज्ञानत्वेनानुभवादिति भावः। दत्तरोत्तरत्वादिति। परमार्थत्वविशेषणे प्रसिद्धविशेषणत्वापातादित्यादिनेति भावः। अत एवेति। अविद्यायां व्यभिचारबाध सिद्धसाधनादत एव विकारमात्रनिषेधपक्षोऽसंगत इत्यर्थः। अपसिद्धांतमेवोपपादयति मिथ्याभूतानामिति। ब्रह्मण एव संवित्वादिति भावः। अन्यथेति। मिथ्याभूत, विकाराणामप्यभावे शास्त्रं किमर्थमिति भावः। अन्येतु विकारमात्रस्यैवाभावात् जगद् भ्रमतन्निवर्तकशास्त्रादिदर्शनविरोध इति भावः इत्याहुः। गजोपि मिथ्या पलायनमपि मिथ्येति न्यायेन शास्त्रारंभादिकमपि नास्तीति शंकते। इष्टेति। व्यवहारिकेति। प्रतीतिसिद्धानामपि रुचेर्ब्रह्मणोऽप्यपहारप्रसंगेन, शून्यवादिशिष्यता प्रसज्येत।तद्व्यावृत्यर्थं व्यावहारिकव्यवस्था स्वीकार्येत्यर्थः। शून्यवादबहिर्भावमिच्छते यदि व्यावहारिक व्यवस्था न विरोचते नवा सत्यपक्षमेव शरणमित्याह अन्यथा तिष्ठेति। ननु परमार्थ विकारशून्यत्वमेव साध्यते। विकारवतश्चतत्साधने

शास्त्रारम्भादिकमिति। संविद्विकाराणां मिथ्यात्वेवात्र साध्यत इति चेन्न; अत्रापि व्यतिरेकभङ्गप्रसङ्गात्। नहि यद्विकारवत्तदुत्पन्नं यथा घट इत्यत्र सत्यविकारयोगित्वमुत्पत्तिव्याप्तं दृष्टम्, येन तन्निवृत्त्या तन्निवृत्तिस्स्यात्। लोकदृष्ट्या तथा दर्शनमस्तीति चेन्न; तस्याः संविद्विकारेषु घटादिविकारेषु च पक्षपाताभावेन त्वदुक्तव्याप्तेर्दुर्ग्रहत्वात्। त्वद्दृष्टेस्तूभयविद्वेषशीलतयाऽपि तथाविधनियमग्रहासिद्धेः। केवलान्वयित्वशङ्काऽपि पूर्ववद्दूष्या।

ननु भवतोऽपि ब्रह्मानुत्पन्नं निर्विकारं च, ततस्तदेव समर्थयमानेष्वस्मासु कस्ते कोप इति चेन्न; अस्मत्सिद्धान्तापरिज्ञानात्। नहि वयं लोकसिद्धामुदयास्तमयादिविकारशतशालिनीमहमर्थधर्मभूतां संविदं परं ब्रह्मेति परिभाषामहे; नच तामेव सकलविषयाश्रयशून्यावस्थाम्; अपितु समस्तचिदचिद्विशिष्टतया स्वविशेषणभूतचिदचित्प्रतिष्ठितक्लेशादिजन्मादिविकारजातं स्वरूपतोऽस्पृष्टविकारक्लेशं सङ्कोचविकासवैदेशिकसार्वज्ञ्यमनन्तमङ्गलगुणमीश्वरतत्त्वम्। यदि तस्य निर्विकारत्वं साधयसि, कामं साध्यताम्। तत्र प्रमाणमिदमन्यद्वेति निपुणं विभावय। न चेश्वररूपस्यापि समस्तावस्थाशून्यत्वं साधयितुं शक्यम्, कादाचित्कतत्तन्मूर्तद्रव्यसंयोगविभागाद्यवस्थाविशेषाणां वियदादिष्विव विश्वव्यापिनीश्वरेऽपि दुर्वारत्वात् नित्यासङ्कुचितप्रकाशात्मनि तज्ज्ञानेऽपि तत्सङ्कल्पाद्यवस्थाविशेषणामनन्तानामाम्नातत्वात्।

विशेष्यवति विशिष्टनिषेधस्य विशेषणनिषेध पर्यवसानात् मिथ्याविकारत्वं सिध्यतीति नोक्तविरोध इति शंकते। संविद्विकाराणामिति। नहि सद्विकारवदिति। सत्यविकारवदित्यर्थः। त्वन्मते विकाराणामसत्यत्वादित्यर्थः। ननु लौकिकप्रतीत्यनुसारेण अनुमानं प्रवर्तते। लौकिकानां घटादि विकारेदुंपारमार्थस्यैव प्रतीते घटादौ परमार्थविकारोत्पत्योः व्याप्तिग्रहस्संभवत्येवेति शंकते। लोकदृष्ट्येति। लौकिकैस्संविद्विकाराणामपि पारमार्थ्येन ग्रहात् तत्त्रैव व्यभिचारग्रहात् सत्यविकार योगित्वोत्पन्नत्वयोर्न व्याप्तिग्रह इत्याह। नेति। तस्या इति। लोकदृष्टेरित्यर्थः। नन्वस्मद्दृष्टयनुसारेणानुमान प्रवृत्तौ व्यभिचारो नास्त्येव अनुभूतेः परमार्थ विकाराभावात् घटादिविकाराणा संविद्विकाराणामुभयेषां परमार्थत्वाभावात् व्यतिरेकासिद्धिरिति भावः। ननु परमार्थ विकाराभाव एव साध्यः। न च व्यतिरेकासंभवः अन्वयित्वादिति शंकां निरस्यति। केवलान्वयित्वेति। अप्रसिद्धविशेषणत्वापातादित्यादिना दूष्येत्यर्थः। सिद्धांतिनापसिद्धांत दोषमाशंकते।

नन्विति। निरनुयोज्यनुयोगमुद्भावयति। नास्मदिति। नन्वीश्वरसंविदो विकारांगीकारेऽपसिद्धांत इत्यत आह। न च तामेव चेति। तृतीयकल्पे, दोषमाह। न च तामेवेतीत्यप्याहुः। कामं साध्यतामिति। वक्ष्यमाणं प्रतिहेतुस्वरूपदृष्टविकारक्लेशमिति विकारमात्राभावो ब्रह्मस्वरूपेपि साधयितुं शक्यो न भवतीत्याह। नचेश्वररूपस्यापि इति। संयोगेति। असंगत्वश्रुतिश्च न स्थानतोपि परस्योभयलिंगं सर्वत्रहीत्यधिकरण प्रतिपादित दोषाभावपरेति भावः। तदैक्ष बहस्यां प्रजायेयेत्यादि श्रुतिशत सिद्धसंकल्प लीलारसाधनंत विकाराश्रवणाच्च नेश्वरधर्मभूतज्ञानेप्यवस्थामात्रशून्यत्वसाधन संभव इत्यत आह। नित्येति। तद्ज्ञानेपि ईश्वरज्ञानेपि। नन्वीश्वर ज्ञानस्य विकारांगीकारे दुःखाद्यपुरुषार्थानामपि प्रसंग

अकर्मनिबन्धनतया च तेषामपुरुषार्थत्वप्रसङ्गा भावात् । बीजाङ्कुरवदवस्थाप्रवाहानादित्वेनाहेतुकत्वादिचोद्यानवतारात् । आगमिके चास्मिन्नर्थे हैतुकसंक्षोभस्याशक्यत्वादिति ॥

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां संविन्निर्विकारत्वानुमानभङ्गवादः द्वाविंशः ॥२२॥

इत्यत्राह ॥ अकर्मेति ईश्वरस्यकर्माभावात् कर्ममूलत्वात् दुःखादेरिति भावः । ननु विकारस्य कर्ममूलत्वाभावे निर्हेतुकवादप्रसंग इत्यत्राह । बीजांकुरवदिति । न चलोके कर्मेवकारणमिति भावः । ननु कर्ममूलत्वाभावे सुखाद्यवस्थापि नस्यादित्याह । आगमिकेचेति । (तै उ.आन ८ अनु) ''सएको ब्रह्मण आनंदः'' (ब्र.सू.२-१-३३) लोकवत्तुलीलाकैवल्यं'' इत्यादिश्रुतिसूत्रादिभिर्निर्णीयर्थेशुष्कतर्कस्यानवतारात् सुखमात्रे न कर्ममूलत्वमिति भावः ॥

॥ वत्सजलधिकौस्तुभ नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां द्वाविंशस्समाप्तः ॥

।।अथ संविन्नानात्वनिषेधकानुमानभङ्गवादः त्रयोविंशः ।।२३।।

प्रतिपुरुषमनेकाः प्रत्यवस्थं विचित्राश्शुभगतिषु धियो यश्चोदयत्वञ्जसा नः।
अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं सवितुरहमुपासे तस्य देवस्य भर्गः ।।

यदाहुः- अनुभूतिर्न नाना, अजत्वात्; यन्नाना तज्जायते, यथा घटः। दृश्यमानस्तु संविद्भेदो विषयाश्रयादिभेदोपाधिकत्वान्न स्वाभाविकः, घटाकाशतरङ्गचन्द्रपराभिमतसमवायादिभेदवत्।

अन्यथा कल्पनागौरवप्रसङ्गादिति। तदसारम्; किमत्र यतःकुतश्चिदपि भेदो निषिध्यते? उत संविज्जातीयमात्रात्? अथ संवित्स्वरूपात्? उत संविदन्तरात्? अथवा संवित्सजातीयराहित्यं साध्यत इति। न प्रथमः, प्रत्यक्षविरोधात्, देहात्मविवेकानुपपत्तिप्रसङ्गात्; अपसिद्धान्ताच्च। ''युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमः प्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्ता''विति (शांङ्कर भाष्यं) हि वः कूटस्थोपदेशः। अपरमार्थोऽपि भेदस्तत्र निर्दिश्यत इति चेत् साधु तत्त्वोपदेशः समारब्धः। परमार्थतस्तयोः(ऐक्य)भेदप्रसङ्गाच्च। अत्राप्यपरमार्थभेदनिषेधे स एव दोषः, परमार्थभेदानुमितिप्रसङ्गो वा। परमार्थभेदनिषेधे तु व्यतिरेकव्याप्तिभङ्गः, यत्परमार्थभेदवत्तदुत्पन्नम्, यथा घट इति हि सा स्यात्। नच घटादौ परमार्थभेदस्त्वयाऽभ्युपगम्यते। तदाह-''जन्मप्रतिबद्धःपरमार्थविभागः किं क्वचिद्दृष्टस्त्वयेति।

पूर्ववादे देवदत्तीयसंविदंतरवेद्यत्वादिना वेद्यत्वमुक्तं। तदनुपपन्नं संविदो भेदाभावेन विषयविषयिभेदाभावात्। न च भेदाभावोऽसिद्धः। संविन्नाना न अजत्वात् इत्यनुमानादित्युत्थानात्संगतिरित्यभिप्रायेण वादार्थंसंगृहणाति। प्रतिपुरुषमिति। जडत्वहेतुसाम्यमेव संगतिरित्यपरे। संविन्नानात्वे गायत्रीप्रमाणमित्यभिप्रायेणाह। शुभगतिषुधियो यश्चोदयतीति। शुभगतयः शुभहेतुधर्मादयः इत्यर्थः। ''भर्गाख्यं विष्णुसंज्ञित''मिति प्रमाणानुसारेणाह। तद्विष्णुसंज्ञितमिति। नपुंसकतच्छब्देन भर्गशब्दस्यकारांतो नपुंसक इतिगम्यते।

विषयाश्रयादित्यादिपदेन वृत्तिर्गृहयते। अप्रयोजकत्वशंकामपाकरोति। अन्यथेति। विषयाश्रयभेदस्यसिद्धत्वान्नतद्भेदः कल्पनीयः। वृत्तिभेदस्यकल्पनेपि फलमुक्त्वा गौरवं न दोषायेति भावः। अनुभूतिनानत्वेन गौरवं। भेदप्रतीतेःक्लप्तानुभूति भेदविषयत्वे लाघवात् अक्लप्तो साध्ययाधीनत्वकल्पन एव गौरवात्। अन्यथा घटादि भेदस्यापह्नवापातादित्यभिप्रायेणाह। तदसदिति। प्रत्यक्षविरोधादिति। घटादिभेदस्य प्रत्यक्षसिद्धत्वात् बाध इत्यर्थः। देहात्मेति। देहात्मविवेकाभावे पारलौकिक वृत्तिर्नस्यादिति भावः। अपसिद्धांतमेवोपपादयितुं तदिदं भाष्यमुपपादयति युष्मदिति। इतरेतरभावानुप पत्ताविति। परमार्थत इत्यर्थः। अपरमार्थत इति। तथा च नापसिद्धांत इति भावः। परमार्थतस्तयोरैक्यप्रसंगश्चेति। भेदस्यापरमार्थिकत्वं हि अभेदस्यापारमार्थिकत्व एव स्यादिति भावः। किं चानुमानेनापि किं अपरमार्थ भेदनिषेधस्साध्यते उतापरमार्थ भेदस्य नाद्य इत्याह। अत्रापीति। स एवेति। सः अपसिद्धांत एवेत्यर्थः। परमार्थेति। समानसत्ताकयोरेवात्रासंभवात् परमार्थभेदवत्यपरमार्थभेदनिषेधे सिद्धसाधनमिति भावः। द्वितीयं दूषयति परमार्थेति। व्याप्तिभंगमुपपादयति यदिति। न च घटादाविति।

(श्री भाष्यं जिज्ञा) अविद्यायाश्चानुत्पन्नतयाऽभ्युपेतायास्संविदपेक्षया परमार्थभेदाभ्युपगमे पक्षविपक्षमात्रवृत्तितया विरुद्धो हेतुः। अपरमार्थभेदाभ्युपगमे तु जडाजडतादात्म्यातिदेशः। तदाह- अविद्याया आत्मनः परमार्थतो विभागाभावे वस्तुतोऽविद्यैव स्यादात्मेति (श्री भाष्यं जिज्ञा)

न द्वितीयः, संविदः संविद्विजातीयत्वानभ्युपगमेन सिद्धसाधनात्। न हि संविदेव भवति संविज्जातीयमात्राद्भिद्यत इति कश्चिदिच्छति। तथेच्छन्तमपि प्रति नासौ हेतुः, अविद्यायां संविद्विजातीयायां तद्वृत्तेः। ह्यनुपपन्ना संवित्तत्त्वात् सर्वस्मादेव हि भिन्ना त्वयेष्यते। तद्भेदानभ्युपगमे तन्मिथ्यात्वाभ्युपगमे च दत्तमुत्तरम्। न तृतीयः, सिद्धसाधनत्वादेव। नापि चतुर्थः, संविदन्तरसिद्धौ तदवधिकभेदस्यापि सिद्धेस्तन्निषेधायोगात्। तदसिद्धौ कथं तन्निरूपितभेदनिषेधः। उपाधिवशात्संविदन्तरत्वेन प्रतीयमानं स्वरूपमेव संविदन्तरशब्देनानूद्य तदवधिकभेदो निषिध्यते, चन्द्रस्तरङ्गचन्द्रान्न भिद्यत इतिवदिति चेत् तथाऽपि हेतोर्विरोधः, संविदन्तराद्भिन्नायामविद्यायां तद्वृत्तेः। न हि सा संविदन्तरभेदरहिता, प्रागुक्तदोषात्। यश्च प्रवाहानादिमविद्यामिच्छति, तस्यापि प्रागभावे संविदन्तराद्भिन्ने हेतुवृत्तेर्विरोध एव। यद्यप्यभावमपि नेच्छेत्, तथाऽपि घटादिषु संविदन्तरभेदाभावात्सपक्षभूतेषु सर्वेषु हेतोरवृत्तेरसाधारणता। अपरमार्थस्संविदन्तराद्भेदस्तत्रास्तीति न सपक्षतेति चेत्; तर्हि संविदोऽपि संविदन्तरादपरमार्थभेदयोगान्न तत्र तद्राहित्यं साधयितुं शक्यम्। अपारमार्थ्यमेव तस्यात्र साध्यत इति चेत् तथाऽपि घटादिष्वपि संविदन्तरभेदापारमार्थ्यसिद्धेः

अद्वैतभंगप्रसंगादिति भावः। तदाहेति। भाष्यकार इति शेषः। परमार्थविभागः। परमार्थ भेदः। जन्मप्रतिबंधः प्रतिबंधो व्याप्तः उत्पत्तिव्याप्त इत्यर्थः। परमार्थभेदस्य निषेध इति पक्षे दूषणांतरमाह। अविद्याया इति। साध्याभावव्याप्तत्वादिति भावः। अपरमार्थेति। अविद्यासंविदोरित्यर्थः। तदाहेति। भाष्यकृदित्यर्थः।

नहि संविदेव हीति। समान सत्ताकयोर्भेदाभेदयोर्विरोधादिति भावः नासौ हेतुरिति। व्यभिचारादिति भावः। तमेवोपपादयति। सा हीति। दत्तमुत्तरमिति।जडयोरैक्य प्रसंग इत्यर्थः। सिद्धसाधनत्वादेवेति। सर्गासांस्वापेक्षया भेदाभावस्य सिद्धत्वादिति भावः। संविदंतरेति। क्लप्तसंविदपेक्षया भिन्नायास्संविद इत्यर्थः। तदसिद्धाविति। संविदंतररूपप्रतियोग्यसिद्धया तन्निरूपितभेदस्याप्यसिद्धिरिति भावः। ननु संविदंतरत्वेन प्रतीयमानप्रतियोगिकभेदनिषेधस्साध्यः। तथा च नाप्रसिद्धिरिति शंकते। उपाधिवशादिति। चंद्र इति। चंद्रस्य तरंगचंद्रस्य च भेदानभ्युपगमादिति भावः। हेतोर्विरोध इति। व्यभिचार इत्यर्थः। प्रागुक्तेति। जडाजडयोरैक्यप्रसंगादित्यर्थः। नन्वविद्यायांहेतुर्नास्त्येव उत्पन्नत्वात्। न चादित्वाभ्युपगमविरोधः प्रवाहानदित्व इति पूर्वपक्षयेकदेशमतमाशंक्य तथा सति तत्प्रागभावे व्यभिचार इति परिहरति। यश्चेति। नन्वभावांतरमेव नास्तीति क्व व्यभिचार इति शंकते। यद्यपीति। किमत्र पारमार्थिको भेदो निषिध्यते उतापारमार्थिकः नाद्य इत्याह। तथापीति। द्वितीयं शंकते। अपरमार्थ इति। साधयितुं शक्यमिति। बाधादिति भावः। गूढाभिसंधिराशंकते। अपरमार्थ्यमेवेति। भेदे सति तदभावसाधने भेदापारमार्थ्य पर्यवसानादिति भावः। गूढाभिसंधिं प्रतिवक्ति। तथापीति। नन्वस्तु पक्षता न चासाधारण्यं। अविद्यायां तत्प्रागभावे वा हेतोर्व्यत्यस्तप्रयोगादिति चेन्न। अविद्यायाः प्रवाहानादित्वं प्रागभावोतिरिक्तो नास्ति

सपक्षत्वमपरिहार्यम्। संविदः संविदन्तराद्भेदमात्रं मिथ्या, घटादेस्तु स्वरूपमपीति विशेष इति चेत्, किमतः? स्वरूपस्य मिथ्यात्वे सत्यत्वेऽपि संविदन्तरप्रतियोगिकमिथ्याभेदयोगित्वस्य साधारणत्वात्।

एतेन अनुभूतित्वादिति हेतुनाऽप्यस्य साध्यस्य दुस्साधत्वं दर्शितम्। तरङ्गचन्द्रदृष्टान्तोऽपि विषमः, तरङ्गचन्द्रस्य मिथ्याभूतस्य सत्यचन्द्रतादात्म्यायोगात्। यदि चन्द्रव्यतिरिक्तस्तरङ्गचन्द्रो नास्तीति निर्दिश्येत, तर्ह्यत्रापि संविदन्तरं मिथ्येत्येवोक्तं स्यात्। तथा विषयाश्रयभेदभिन्नानन्तसंविदुपलम्भे च कस्यास्सत्यत्वं कासां तु तरङ्गचन्द्रवन्मिथ्यात्वमिति विशेषकाभावादनियमेन सर्वसंविन्मिथ्यात्वं सर्वसंवित्सत्यत्वं वा प्रसजेत्। सामान्यतस्संवित्तत्वे कुतश्चित्सिद्धे तद्व्यतिरिक्तास्संविदो निषिध्यन्त इति चेत्, क एवमाह? संवित्तत्वव्यतिरिक्तास्संविद इति, अपि तु संविद एव संविदः। न च संवित्तत्वं सामान्यतः सिध्यदेकमिति सिध्यति, येन तद्व्यतिरिक्तसंविन्मिथ्यात्वं साध्येत। एकतया सिद्धौ च किमत्र पुनस्साध्यम्? अत एव न पञ्चमः, एकयाऽनाद्यविद्ययाऽनैकान्त्याच्च। प्रवाहाविद्यापक्षेऽपि सजातीयवत्यविद्याप्रागभावे त्वदभिमतेऽनुत्पन्नत्वहेतोर्वृत्तेर्विरोधश्च। तस्यापि सजातीयवत्त्वं मिथ्येति चेत्, तर्हि घटादेरपि सज्जातीयवत्त्वं मिथ्येति यन्नाना तदुत्पन्नमिति व्याप्तिप्रदर्शनासिद्धिः। व्यावहारिकं घटादेः

इति चाभ्युपगम्य प्रवृत्तेरसाधारण्यमिति भावः। नन्वध्यस्तस्याधिष्ठानाभावप्रतियोगित्वमेव नत्वधिकरणनिष्ठाभावप्रतियोगित्वं। तथा च संविदस्सत्यत्वेन अधिष्ठानत्वात्तत्र भेदाभावस्संभवति। घटादेस्तु मिथ्यात्वेनानधिष्ठानत्वात्। न तत्र भेदाभावः। ततो न बाधो नवा साधारण्यमित्यभिसंधिमुद्घाटयति संविदस्संविदंतरादिति। घटादौ संविदंतरभेदस्य तन्निष्ठाभावप्रतियोगित्वाभावे सत्यत्वप्रसंगेन न तत्र तदत्यंताभावस्यावश्यकत्वात् असाधारण्यं। यदि च तत्र मिथ्यात्वेपि न तदभाव इत्युच्यते तथा संविद्यपि तदभावो नस्यादिति बाध एव स्याद्इति परिहाराभिप्रायमुद्घाटयति किमत इति।

एतेनेति। सत्यमिथ्याभेदविकल्प दुःखेन प्रवृत्तौ साधारण्य व्यभिचारादिनेत्यर्थः॥ विषम इति। साध्यविकल्प इत्यर्थः॥ ननु संविद्व्यतिरिक्त संविदंतरं मिथ्येति विवक्षायां अयं दृष्टांत इति शंकते। यदिति। दूषणमाह। तथा सतीति। विनिगमकमाशंकते। सामान्यत इति। तथा सति सिद्धसाधनार्थ दोष इत्याह। एकमिति। अपि त्विति। सामान्यतः कुतश्चित्सिद्धसंवित्वा पेक्षया न भिद्यन्त इत्येव ब्रूम इत्यर्थः। संवित्तत्वस्य एकतयैव सिद्धत्वात् भिन्ना संविदः तदभिन्नाः कथंस्युः। अपितु मिथ्यैवस्युरित्यत्राह न चेति। संवित्तत्वस्य सामान्यसिद्धावपि प्रत्यक्षेण तन्नानात्वोपलंभात् न तेन प्रमाणेन संविदैक्य सिद्धिरित्यर्थः। सामान्यतः संवित्साधक प्रमाणेन संविदैक्यसिद्धौ दूषणांतरमाह एकतयेति। अत एवेति। प्रत्यक्षसिद्ध भेदवत्तया जातिमत्वेन बाधादित्यर्थः। किंच किं स्वभिन्नसंविद्राहीत्यर्थः। यद्वा स्वसजातीया भाववत्वं नाद्य इत्याह। एकतयेति। द्वितीये आह प्रवाहेति। विरोधो व्यभिचारः। ननु पारमार्थिक सजातीयराहित्यं विवक्षितमिति नव्यभिचार इति शंकते तस्यापीति। तर्हि व्याप्यत्वासिद्धिरित्याह॥ तर्हीति। ननु व्यावहारिकयोस्साहचर्यादेव पारमार्थिकयोर्व्याप्तिर्लाघवेन सहचारमात्रस्यैव व्याप्तिप्रयोजकत्वादित्याशंक्य व्यावहारिकव्यभिचारादेव पारमार्थिकव्याप्तिविरोध इति दूषयति।

सजातीयवत्त्वमुपजीव्य व्याप्तिप्रदर्शनमिति चेत्, प्रागभावस्यापि व्यावहारिकसजातीयवत्त्वात्तद्वर्तिनो हेतोर्विरोध एव। न चाभावस्य जातिर्नास्तीति सजातीयाभावः, समानोपाध्याक्रान्तत्ववेषेणाविशेषात्। अन्यथा संविदोऽपि जातिमनभ्युपगच्छतः सिद्धसाधनत्वप्रसङ्गात्। नच घटादिभेदस्य व्यावहारिकत्वमिति स्थितमन्यत्र। तदेतत्सर्वमभिप्रेत्याह-''अबाधितप्रतीतिसिद्धदृश्यभेदसमर्थनेन दर्शनभेदोऽपि समर्थित एव, छेद्यभेदाच्छेदनभेदवदि'' (श्री भाष्यं जिज्ञा) ति।

ननु दृश्यभेदेऽपि दर्शनमेकमेवोपलभ्यते, यथा घटपटाविमाविति; छेद्यभेदेऽपि छेदकव्यापार एक एव दृश्यते, यथा एकप्रहारभेद्येष्वनेकेषु काण्डेषु; अतः कर्मभेदे क्रियाभेद इति न व्याप्तिः; नच दृश्यभेदसमर्थनन्यायेन दर्शनभेदसिद्धिरिति विवक्षा, छेद्यभेदाच्छेदनभेदवदित्युदाहरणस्याना काङ्क्षितत्वप्रसङ्गात्; न च छेद्यभेदसमर्थनन्यायेन छेदनभेदस्समर्थ्यते, यदर्थमप्युदाह्रियेत, अतः किमर्थं भाष्यमिति । उच्यते-दृश्यभेद इति न दृश्यानां स्वरूपभेदमात्रं विवक्षितम्, अपि तु कर्मकारकत्वविशेषणभेदः, अनेकेषामप्येकसामग्रीविशेषमध्यपतितानां घटादीनामेकं कर्मत्वम्, एवं कारकान्तरेष्वप्यनेकेषामेकं तत्तत्कारकत्वं दृश्यते, यथा दर्शपूर्णमासयोः करणत्वमेकमेव तथाऽत्राप्यनेकेषामेकं कर्मत्वमिति न विरोधः। एवं छेद्यभेदेऽपि द्रष्टव्यः-

ततश्चायमर्थः-यदि सर्वासां संविदामैक्यं स्यादेकस्यां घटादिप्रतिनियतविषयायां संविदि संविदन्तरविषयाणामपि प्रकाशप्रसङ्गः, न च तथोपलभ्यते, दृष्टादृष्टव्यवस्थाप्रदर्शनात्, अतोऽवगम्यते मिथोऽनाघ्रातविषयाः संविदः स्वरूपतो भिन्ना इति । तत्रेदं निदर्श्यते-यथा छेदनक्रियाः

व्यावहारिकमिति । समानोपाध्याक्रांतत्वेति । सजातीयपदेन समानोपाध्याक्रांतत्वमेव विवक्षणीयं । तादृशस्य विशेषणस्य प्रागभावेपि सत्वादित्यर्थः। घटादिभेदः घटादिव्यक्तिः। अन्यत्र मिथ्यात्वभंगे अत्र भाष्यमुदाहरति। तदेतदिति।

दूषणांतरमप्याह। न च दृश्यभेदसमर्थनेति। भेदसमर्थनन्यायो भेदव्याप्तिः। यत्र यत्र दृश्य भेदः तत्र तत्र दर्शनभेद इति विशेषव्याप्तिविवक्षायां तदुदाहरणवाक्ये छेद्यभेददृष्टांतस्संगतो भवतीत्यर्थः। ननु छेद्य भेद समर्थनन्यायेन यथा छेदन भेदस्समर्थ्यति एवं दृश्यद्रव्यभेद समर्थनन्यायेन दर्शनभेदोपि समर्थ्यत इति भाष्यार्थः। तथा च नादृष्टांतासांगत्यमित्याशंक्याह। नचेति। यदर्थमिति। अत्र कर्मभेदात्क्रियाभेद इति व्याप्तिर्विवक्षिता तत्र दृष्टांतप्रदर्शनार्थं छेद्य भेदाद्युदाहरणमित्यर्थः। ननु स्वरूपभेदः कथं कर्मकारकत्वमित्यत्राह एवमिति। दर्शपूर्णयोरिति। ''दर्शपूर्णमासाभ्यामि''ति श्रुत्यासह तयोः कारकत्वमिति भावः।

ननु कर्मकारकत्वभेदो ज्ञानक्रिया भेदात् तद्भेदश्च कर्मकारकत्व भेदादिति कथं कर्मभेदार्थ ज्ञानभेद समर्थनं अन्योन्याश्रयादित्यत्राह ततश्चायमर्थ इति। यदि सर्वासां संविदां ऐक्यं स्यात् तदानीं घटसंवित्वेन प्रतीयमान संवित्कर्मत्वमेव पटे विद्यमानं संवित्वेन प्रतीयमान संवित्कर्मत्वं स्यात् ततश्च घटस्य संवित्कर्मदशायां सर्वेषामपि तत्तत्संवित्कर्मत्वमिति दृष्टादृष्ट व्यवस्थान्न न स्यात् इत्यर्थः। संविदंतर मिथः इत्यादिव्यपदेशो लोकव्यवहारसिद्ध इति नात्रान्योन्याश्रय इति भावः। एतेनेति। स्वाभाविकभेद

परस्परास्पृष्टविषयाःपरस्परं विभिद्यन्ते तद्वदिति। एतेन दृश्यमानस्य संविद्भेदस्य विषयादिभेदोपाधिकत्वं विषयभेदमिथ्यात्वेन संविद्भेदस्य मिथ्यात्वसमर्थनं च निरस्तम्। दृश्यमानत्वादेव च कल्पनागौरवप्रसंगोऽपि परिहृतः। दर्शनस्य च बाधकाभावादेव (च) प्रमात्वं सिद्धम्। ननु प्रत्यगात्मनिष्ठधर्मभूतज्ञानं नित्यमिति य इच्छति तस्य कथं संविद्भेदस्य विषयभेदोपाधिकत्वापह्नवः? उच्यते; नित्याऽपि संवित्तत्तत्कर्मानुरूपं तेषु तेषु विषयेषु संकोचं विकासं च भजते। ततश्च कर्मानुरूपतत्तद्विषयीकरणविकारविशेषापेक्षया स्वरूपत एव क्रियाभेदः प्रतिनियतविषयता च युज्यते। तव तु न तथा, नित्यनिर्विकारस्वप्रकाशमात्रत्वाभ्युपगमात् संविदः। मायातिरोधानतदधीनविचित्र विषयत्वादिकं तु न सम्भवतीत्यन्यत्र द्रष्टव्यमिति॥

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां संविन्नानात्वनिषेधकानुमानभङ्गवादःत्रयोविंशः॥२३॥

समर्थनेनेत्यर्थः। ननु एवं तत्संवित्कल्पने गौरवं स्यादित्यत्राह दृश्यमानत्वादेवेति। प्रत्युत प्रतीयमानस्य भेदस्यौपाधिकत्वकल्पन एव गौरवं स्यादित्यर्थः। ननु दर्शनस्य भ्रांतित्वात् ततः कथं भेदसिद्धिरित्यत्राह। दर्शनस्य चेति। ननु सिद्धांतेपि धर्मभूतज्ञानं विषयभेदाधीनभेदवदेव। प्रत्येकमात्मनां ज्ञानस्यैकत्वात् नित्यत्वाच्च कथमौपाधिकत्वनिषेधो भेदस्येत्याशंकते। नन्विति। तत्रापि सामग्रीभेदेन विषयीकरणलक्षण क्रिया भेद एव जन्यते। नन्वौपाधिक भेद इति भावः। ननु ममापि तथास्त्वित्यत्राह। तव त्विति। ननु मायया यथा घटापेक्षायां संविदस्तिरोधानं पटापेक्षया न तिरोधानं तथा घटज्ञानं न भवति पट ज्ञानं भवति तत्कृत भेदेन प्रदेशेन भेदव्यवहारो ज्ञातत्वात्। अज्ञानत्वेचेति। ममापि संभवतीत्यत्राह। मायेति। तिरोधानानुपपत्तावित्यर्थः।

वत्सकुलजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां
शतदूपणीटीकायां त्रयोविंशः स्समाप्तः।

।।अथ निर्विशेषत्वानुमानभङ्गवादः चतुर्विंशः ।।२४।।

विभूतिगुणवर्गेण विशिष्टं यमधीमहे ।
अप्रतर्क्यविशेषाय तस्मै भगवते नमः ।।

यदाहुः-अनुभूतिर्निर्विशेषा, अनुभूतित्वात्, यत्सविशेषं न तदनुभूतिः, यथा घटः, अनुभूतेस्सविशेषत्वे घटवदननुभूतित्वप्रसङ्ग इति । अत्र तावत्प्रतिज्ञायां निर्विशेषपदमनुभूतिपदप्रतिपन्नादधिकार्थबोधकम्? न वा? पूर्वत्र तेनैवानुभूतिरितिवदनधिकार्थत्वेन पुनरुक्तिनिग्रहापत्तिः। समस्तविशेषाभाव एव तेन प्रतिपाद्यत इति चेन्न; उक्तोत्तरत्वात्। तथा हि। स किमनुभूतिस्वरूपमेव? ततोऽतिरिक्तं वा किंचित्? पूर्वत्र पुनरुक्तिः, सिद्धसाधनता च । नहि संवित्पर्यायशतपाठेऽपि नः काचित्क्षतिः। उत्तरत्र विशेषवत्त्वमवर्जनीयम्। समस्तविशेषाभावो न ब्रह्मणो रूपादिवद्धर्म इति चेत्, रूपादिवद्धर्मत्वं नास्तीति वदता किं गुणत्वादिरूपेण धर्मत्वं प्रतिक्षितम्? उत यथाकथञ्चिद्विशेषणत्वमपि? आद्ये गुणत्वादिरूपेण विशेषकत्वाभावेऽपि प्रकारान्तरेण विशेषेकत्वात्सविशेषत्वं तावदवर्जनीयम्। तथा च सति गुणादिरूपे विशेष कःप्रद्वेषः? द्वितीये पक्षीकृताया एवानुभूतेसा(ध्यधर्मा) ध्यानन्वयस्य त्वैयवोक्तत्वादनुमानवृत्तान्तानभिज्ञत्वमनन्वितानिग्रहस्थानं च। प्रमाणवलादयमेको विशेषः स्वीक्रियत

अनुभूतिविषयचिंता सामान्यादियमपि चिंतासंगतेति वादार्थं सूचयन्मंगळमाचरति। विभूतीति। ब्रह्मण एव अनुभूतित्वेन तैरभ्युपगमात् तस्य च सविशेषत्वेनैव प्रतिपन्नत्वान्नतस्य निर्विशेषत्वसाधनं संभवतीति वादार्थस्सूचितः। निषेधश्रुतेस्तात्पर्यमाह । अप्रतर्क्येति निर्विशेषत्वे षाड्गुण्य प्रवृत्तिनिमित्तक भगवच्छब्दविरोधोपीत्यभिप्रायेण भगवते नम इति अधिकोर्थो निर्विशेषरूपोधर्मः पुनरुक्तिनिग्रहा पत्तिरिति शब्दार्थयोः पुनरुक्तं । अन्यत्रानुवादादिति गौतमीयं सूत्रंमिति भावः । ननु विशेषाभावोनुभूति स्वरूपातिरिक्त एव अतो न पौनरुक्त्यं ।

विशेषमात्रस्यैव निषेध्यत्वेन विशेषा भाव रूपविशेषस्यापि निषेधात् न सविशेषत्वदोष इत्यभिप्रायेण शंकते । समस्तेति । ननु कथं उक्तोत्तरत्वं विशेषा भावोऽतिरिक्तः तस्यापि निषेधे न मिथ्यात्वादित्यत आह । तथा हीति । तत्र विशेषाभावस्याप्य भावः स्वयमेव न भवति प्रतियोगित्वतदभावयोरेकत्र विरोधात्। तथा चातिरिक्तएवस्वोऽस्याभाव इति वक्तव्यं। तत्र स्वानुभूति स्वरूपकतान्य पूर्वत्र पौनरुक्त्याद्यवर्जनीयं उत्तरत्र सविशेषत्वप्रसंग इति दूषयति। स किमित्यादिना। ननु समस्तविशेषाभाव स्वरूपतातिरिक्त एव परंतु रूपादिकं। यथा घटादेर्धर्मो न तथा ब्रह्मणस्सधर्मता न पौनरुक्त्यं नापि सविशेषत्वमिति शंकते। समस्तविशेषाभाव इति। किं विशेषाणां गुणत्वमेव प्रतिक्षेप्यते । न तु यथा कथंचित्संबंधमात्रमपीति । आद्ये सविशेषत्वस्य न प्रतिक्षेपः विशेषाणां गुणत्वाभावेपि तत्संबंधमात्रात् सविशेषत्वोपपत्तेः। द्वितीय्ये पक्षसंबंधाप्रसिद्धेरनुमा साध्य न फला सिद्धिरित्याह। न रूपेत्यादिना ।। अनुमानवृत्तांतः पक्षेसाध्यसंबंधसाधकत्वानन्वितनिग्रहस्थानमित्यर्थः । अप्रतिबंधार्थत्वादपार्थकनिग्रहस्थानमित्यर्थः। प्रमाणवलादिति। अयं विशेषाभाव एकोंगीक्रियते न पुन

इति चेत्, प्रमाणबलादिति किमिदमेवानुमानं प्रमाणम्? उतान्यच्छ्रुत्यादिकम्? न पूर्वः, असिद्धेः। कथं तस्यैव प्रमाणत्वे विमन्यमानं प्रति तदेव प्रमाणमुपस्थापयसि? नोत्तरः, श्रुत्यादेर्निर्विशेषप्रतिपादकत्वस्य दूषयिष्यमाणत्वात्। यदि चाभावरूपमेकं विशेषमभ्युपगच्छसि, तदाभावरूपेष्वन्येषु विशेषेषु किं भावरूपत्वादेवामर्षः? उत प्रमाणाभावात्? नाद्यः, अभावरूपे विशेषे कस्यचिदमर्षप्रसङ्गात्। न द्वितीयः, नित्यत्वस्वयंप्रकाशत्वादेस्त्वयैव प्रमाणैरुपपाद्यमानत्वात्। व्यावहारिकप्रमाणोपस्थापितत्वान्नित्यत्वादीनां मिथ्यात्वमिति चेन्न; निर्विशेषत्वस्यापि व्यावहारिकप्रमाणोपस्थापितत्वेन मिथ्यात्वप्रसङ्गात्। अस्त्वेवं किंनश्छिन्नमिति चेत्, नित्यत्वनिर्विशेषत्वादेर्मिथ्यात्वेन सौगतवैशेषिकाद्यभिमता नित्यत्वसविशेषत्वादेरवर्जनीयत्वात्।

ननु निर्विशेषमिति प्रतिज्ञायां विशेषान्तरं निर्विशेषत्वं च विशेषत्वलक्षणसामान्योपाधिना युगपदेव प्रतिक्षिप्यते, ततःपरं च न किंचिद्वक्तव्यमस्तीति चेत्, तत्तत्साध्यधर्मानन्वयलक्षणो दोषःप्रागेवोक्तः। किंच विशेषान्तरशब्देन किं सामान्यतः सविशेषत्वमेव विवक्षितम्? उत रूपरसादयः कतिचन विशेषाः? पूर्वत्र निर्विशेषत्वमपि नास्ति सविशेषत्वमपि नास्तीति व्याहतवर्णना; ''परस्परविरोधे हि न प्रकारान्तरस्थिति'' ति (न्यायकुसु ३-८) रिति न्यायात्। उत्तरत्र रूपरसादिविशेषं निर्विशेषत्वादिकं

रेतदतिरिक्तोऽभावरूपोऽभावाविशेषः स्वीक्रियत इत्यर्थः। असिद्धेरिति। प्रमाणत्वासिद्धेरित्यर्थः॥ असिद्धिमेवोपपादयति कथमिति। विशेषाभावस्यापि विशेषत्वादनुभूतिर्निर्विशेषेति प्रतिज्ञायास्सामान्यतो विशेषमात्रनिषेधे विशेषत्वावच्छिन्नप्रतियोगिकाभावस्यापि निषेधेन व्यघाताद्भावाभावमात्र प्रतियोगिकाभावस्याप्रसिद्धया च न तद्व्यतिरिक्तत्वावच्छिन्नप्रतियोगिकाभावस्य साधनसंभव इति प्रमाणत्वे विमतिरित्यर्थः। पूर्वोक्त साध्याभ्युपगम एव बाधकमाह यदि चेति। अभावरूप इति। यदि प्रमाणसत्वेपि तत्क्रोधमात्रादेव भावरूपविशेषासिद्धस्तदान्यस्यक्रोधादभावरूपविशेषोऽपि न सिध्येदित्यर्थः। नित्यत्वेति। नित्यत्वादीनां ब्रह्मस्वरूपभिन्नत्वे नित्यादिपदानामभिन्नार्थत्वप्रसंगेन धर्मत्वमेव वाच्यमित्यर्थः। अस्तु नित्यत्वादीनां सिद्धिः तथापि मिथ्यात्वान्नदोष इति शंकते। व्यावहारिकेति। तर्हि निर्विशेषत्वमपि न सिध्येदित्याह निर्विशेषत्वस्येति। अस्तु निर्विशेषस्यापि मिथ्यात्वं न तावतापि मिथ्यात्वं न तावता सविशेषत्वप्रसंगः। विशेषाणामपि मिथ्यात्वादिति शंकते। किन्नश्छिन्नमिति। छिन्नं न भवति त्वदभिमतं सर्वं छिन्नमित्याह। किन्नश्छिन्नमिति। तदेवोपपादयति। नित्यत्वेति। तथाच सौगतादिमतप्रसंग इति भावः।

ननु निर्विशेषत्वस्य मिथ्यात्वेऽपि न विशेषांतरस्य सत्यत्वसिद्धिः। निर्विशेषमिति प्रतिज्ञायां विशेषत्वेन रूपेण निर्विशेषत्वस्य युगपदेव निषेधात्। ततश्च तमेवोभयनिषेधमादाय सविशेषत्वशंकायामपि न किंचिद्वक्तव्यमवशिष्यते। तस्यापि विशेषत्वरूपेण निषेध्यांतभविनमिथ्यात्वेन परिहृतत्वादित्याशंकते। ननु निर्विशेषमिति। तथा सति विशेषांतराभाव पक्षे प्रतिक्षेपात्साध्य धर्मानन्वयः पक्षे साध्यासिद्धिरूपो दोषस्यादित्यर्थः। पूर्वत्रेति। निर्विशेषत्वस्य निषेधेन विशेषत्वस्य विधिस्यात् सर्विशेषत्वनिषेधेर्विशेषत्वस्य विधिस्यात्। तथा च समानसत्ताकयोर्भावा भावयोर्युगपदेकत्र निषेदाद्व्याघातस्यादित्यर्थः। परस्परेति। परस्पराभावाव्यापकत्वं विरोधइत्यर्थः। उत्तरत्रेति। यदि

चापोह्य शास्त्रसिद्धैः सर्वज्ञत्वादिभिः सविशेषत्वप्रसङ्गः । किञ्चेयं प्रतिज्ञा त्वदभिमतहेतुरूपधर्मप्रतिक्षेपिका? न वा? आद्ये हेत्वभावे साध्याभावः, प्रतिज्ञाहेतुविरोधश्च। द्वितीये तेनैव विशेषणतयाऽभ्युपगतेन सविशेषत्वम्। हेत्वादिधर्मान्वयस्य प्रमाणसिद्धत्वाभ्युपगमेन तन्निषेधे कालात्ययापदेशप्रसङ्गश्च । यदिच व्यावहारिकहेतुधर्मान्वयेन साध्यसिद्धिरिति मन्यसे, तदा बाष्पधूमभ्रमानुमितदहनवत् स्वप्नलब्धद्रविणनिर्मितभूषणवच्च साध्यव्यापिव्यावहारिकत्वस्य त्वयैवानुमन्तव्यत्वान्न किंचिदस्माकं दूषणीयमस्ति। यादृच्छिकसंवादिलिङ्गविभ्रमवदभिमतसिद्धिरिति चेत्, किमियं सिद्धिर्निर्णयात्मिका? उत सन्देहात्मिका? न पूर्वः, यादृच्छिकसंवादीत्यनेनैव विसंवादशिरसोऽपि सम्भावितत्वेन निर्णयासिद्धेः। नोत्तरः, सन्दिग्धनिर्णयार्थं न्यायं प्रवर्तयितुमिच्छतः पुनरपि तेनैव न्यायेन सन्देहस्यैव स्थिरीकरणात्। असत्यात्सत्यसिद्धिभागस्तु स्वस्थाने द्रष्टव्यः। अतो न कथंचिदपि सर्वविशेपशून्यत्वं प्रतिज्ञातुं शक्यते । घटस्य च परमार्थतः सविशेषत्वानभ्युपगमाद्दृष्टान्तस्साध्याव्यावृत्तः । अथ मिथ्याभूतविशेषयोगात्तत्र सविशेषत्वमिच्छसि; तदाऽनुभूतेरपि तथाविधविशेषाभ्युपगमान्न तत्प्रतिक्षेपः शक्यः । परमार्थविशेषशून्येति साध्यार्थे तु व्यतिरेकदृष्टान्तासिद्धिरुक्ता। यस्त्वनुभूतिर्दृश्यधर्मरहितेति साध्यं प्रयुङ्क्ते, तस्य साध्यविशेषणवैयर्थ्याच्च निग्रहः। अदृश्यधर्मानभ्युपगमात्। एवं प्रत्यक्त्वाजडत्वप्रकाशत्वादिहेतवोऽपि निरस्ता वेदितव्याः।

कतिपयविशेषाणां निषेध इति ब्रूषे तर्हि घटादि धर्मत्वेन प्रसिद्धानां रूपादीनां प्रमाणविधुराणां पदाभिमत निर्विशेषत्वाविद्याश्रयत्वादीनां निषेधस्यात्ततश्च शास्त्रगम्यसार्वज्ञादेरप्रत्यूहादिति भावः प्रतिज्ञाहेतोर्विरोधश्चेति । हेतुसिद्धौ साध्यासिद्धेः साध्यसिद्धौहेत्वसिद्धिः । प्रतिज्ञाहेतुवचनयोः परस्परव्याघात इत्यर्थः। साध्यानुमितेः पूर्वं पक्षे हेतु निर्णयस्य आवश्यकत्वाद्धेतोश्च विशेषत्वात्परामशे नानुमानस्य बाधश्चेत्याह । हेतुत्वादिति । आदिपदेन पक्षतावच्छेदकादिग्रहः । नन्वस्तु हेतोः प्रतिक्षेपः नचैवमसाधकत्वप्रसंगः । व्यवहारिकत्वेन साधकत्वसंभवाल्लाघवेन सत्वमात्रस्य प्रयोजकत्वादित्या शंकामनुवदति । यदि च न्यवहारिकेति ।सत्वमात्रस्य प्रयोजकत्वेऽति प्रसंगमाह । तदेति । हेतु समान सत्ताकत्वेनेति शेषः । तथा च निर्विशेषस्यापि मिथ्यात्वं स्यादिति तत्साधने सिद्धसाधनमित्यर्थः । स्वप्नलब्धेति। यथा कार्यस्य कारणसमानसत्ताकत्वं नियत तथा ज्ञाप्यस्यापि ज्ञापक समान सत्ताकत्वं नियतमित्यर्थः । लिंगभ्रमवदिति । लिंगभ्रमस्थले इवेत्यर्थः । किमियमिति । किं निर्विशेषत्वानुमिति निर्विशेषत्वं परमार्थः। उतापरमार्थ इति संशयविरोधि न वेति विकल्पार्थः। न पूर्व इत्यादि लिंगपरामर्शस्य भ्रमत्वनिश्चयात् यादृच्छिक संवादस्यादर्शनात् तत्संभावनामात्रस्य विसंवादिसाधारण्यात् अनुमितौ अप्रामाण्यसंदेहादित्यर्थः। संदिग्ध इति। संदेहनिवर्तनार्थं अनुमान प्रवृत्तिः। ततश्च तदर्थ प्रवृत्तिनाप्यनुमानेना प्रामाण्यसंदेहास्कंदितेनार्थ संशयस्यैवाधानात्तस्य चाहितस्य तदाधायकसहस्रेणापि निवृत्तिर्नस्यादित्यर्थः। नच व्यावहारिकमेव साधनमस्तु। न च व्यावहारिकसाधने व्यावहारिकमेव साध्यमिति नियमः। असत्यादपि सत्यसिद्धेर्यथा मिथ्याभूतसर्पादितो भयादित्यत आह। असत्यादिति। सर्पादिज्ञानमेव तत्र भयादिहेतुः नत्वसत्यरज्जुसर्पादित्यसिध्यात्सत्यसिद्धिभंगे द्रष्टव्य इत्यर्थः। प्रतिज्ञादूषणमुपसंहरति अत इति। किं परमार्थो विशेषाभावस्साध्यः उतापरमार्थः नाद्य इत्याह।। घटस्येति। परमार्थस्य विशेषाभावस्य घटादौ

ये च धर्मपक्षीकारेण प्रयोगाः-भेदादयो नानुभूतिधर्माः, दृश्यत्वात्, धर्मत्वात्, रूपादिवत्, इत्यादयः; तत्र तावत् स्वाभ्युपगतनित्यत्वादीनामपि पक्षीकारेऽपसिद्धान्तः। तद्बहिष्कारे तैरेवानैकान्त्यम्। तेषां मिथ्यात्वेनाभ्युपगमान्नापसिद्धान्तानैकान्ताविति चेन्न; तथा सति तत्प्रतिक्षेपकान् प्रति तत्समर्थनप्रयासनैरर्थक्यात्। तेषामनुभूतिस्वरूपमात्रत्वे च तत्स्वरूपमभ्युपगच्छद्भिस्सौगतादिभिस्सह न विमन्तव्यम्। अनित्यत्वादिकल्पनातैर्विवादस्तत्प्रतिक्षेपश्च क्रियत इति चेन्न; अनित्यत्वादिनिषेधस्यापि स्वरूपत्वे स्वरूपातिरिक्तस्य सत्यत्वे मिथ्यात्वे च सिद्धसाधनत्वव्याघातादिभिर्दत्तोत्तरत्वात्। किञ्चानुभूतिशब्देन लोकसिद्धसंविद्विवक्षायां विषयाश्रयस्वगतविशेषाणामनन्तानां प्रत्यक्षादिसिद्धत्वस्थापनात्कालात्ययापदेशः। श्रुतिसिद्धब्रह्मस्वरूपपक्षीकारे तु श्रुत्यैव तद्गतानन्तविशेषविषयया बाधश्चापरिहार्य इति। तदेतत्सर्वमपि संगृहीतं भाष्ये-"यदपि नास्या दृशेर्दृशि(स्व)रूपाया दृश्यः कश्चिदपि धर्मोऽस्ति, दृश्यत्वादेव तेषां न दृशिधर्मत्वमिति च, तदपि स्वाभ्युपगतैः प्रमाणसिद्धैः नित्यत्वस्वयंप्रकाशत्वादिधर्मैरुभयमनैकान्तिकं" (श्री भाष्यं जिज्ञा)मित्यादिना। तत्र स्वाभ्युपगतैरित्यपसिद्धान्तादेस्संग्रहः। प्रमाणसिद्धैरिति तु बाधादेः। अनैकान्तिकशब्दः

सत्वाद्धेतोरसाधारण्यमित्यर्थः। ननु घटादौ पारमार्थिकविशेषाभावोऽपि नास्ति प्रतियोगिमात्रस्याभावसत्व विरोधित्वादित्याशंकते। अथेति। तथा सति बाध एवेत्याह। तदेति। ननु परमत्वावच्छिन्नविशेषाभावस्साध्यः स च घटे न बाधितः। प्रतियोगितावच्छेदकावच्छिन्न प्रतियोगिसत्वस्यैव विरोधित्वादित्याशंक्य परिहरति। परमार्थेति। उक्तेति॥ संविदो निर्विकारत्व भंगवादे तथापि व्यतिरेकासिद्धिरित्याद्युक्त न्यायोनोक्तप्रायेत्यर्थः। वैयर्थ्यादिति। साध्यविशेषणवैयर्थ्यस्य प्रतिज्ञाहान्यंतर्भावादिति भावः। च कारः पूर्वोक्तदोष समुच्चयार्थः।

अनुभूतिर्निर्विशेषा प्रत्यक्त्वात् अजडत्वात् प्रकाशत्वात् अपरिच्छिन्नत्वात् व्यतिरेकेण निघटवदित्याद्यनुमानान्यप्युक्तदूषणा निरस्तानित्याह। यस्त्विति। किमनुभूतिधर्मत्वमात्रं निषिध्यते पारमार्थिकानुभूति धर्मत्वमिति विकल्पमभिप्रेत्याद्यं द्वेधा विकल्प्य दूषयति। तत्र तावदिति। द्वितीयं कल्पमुत्थापयति। तेषां मिथ्यात्वेनेति। पारमार्थिकानुभूति धर्मत्वाभाव एव साध्यः। नित्यत्वादयश्च व्यावहारिक एव। अतस्तेषां पक्षत्वे बहिर्भावे वा नोक्तदोषादित्यर्थः। तथा सतीति। ब्रह्मणि नित्यत्वादिकमनिच्छद्भिरपि नित्यत्वादिकं मिथ्येत्येवाभिधीयते इत्यर्थः। ननु नित्यत्वादिकं ब्रह्मणस्स्वरूपमेव अतस्तस्य पक्षत्वेपि धर्मत्वाभावान्न बाधः। पक्षबहिर्भावेपि हेत्वभावान्न व्यभिचार इति शंकामनूद्य परिहरति। तेषामिति। अनित्यत्वादिकल्पनादिति। कल्पिता अनित्यत्वादि निरासार्थं यत्नसार्थक्यमित्यर्थः। नित्यत्वादिनिषेधस्येति। स्वरूपत्वे सिद्धसाधनं स्वरूपातिरिक्तत्वे नित्यत्वेचानुभूतिमात्रोपक्रमव्याघातः। अद्वितीयत्वव्याघातश्च मिथ्यात्वेप्युपक्रम व्याघातः तत्प्रतिक्षेपा संभवश्चेति भावः।अनुभूति पक्षकानुमाने दूषणांतरंचाह। किंचेति। यदपीति। अस्याः दृशेरित्यादिना दृशिपक्षकानुमानमुक्तं दृश्यत्वादेवेत्यादिना धर्मपक्षकमुक्तं तदुभयमपीत्यन्वयः। अपसिद्धांतादेरित्यादि शब्देन नित्यत्वादिप्रतिक्षेपकान्प्रति तत्समर्थनप्रयासकैरर्थ वयादेर्ग्रहः। बाधादेरित्यादिशब्देन अनैकांतिकादि संग्रहः नन्वनुभूतित्वस्य कथमनैकांत्यं परपक्षे तदसंभवादित्यत्राह। अनैकांतिकशब्द

स्वसाध्यसम्बन्धनियमनिषेधार्थः। तेन यथासंभवं बाधादेरपि संग्रह इति।

प्रतिप्रयोगश्च-अनुभूतिः सविशेषा, भासमानत्वात्, घटादिवत्; नित्यत्वादयोऽनुभूतिधर्माः अभ्युपगतानुभूतिस्वरूपं प्रति तद्धर्मतया प्रमाणतस्साध्यमानत्वात्; यत्र यत्प्रमाणतः साध्यते स तद्धर्मः यथा सम्प्रतिपन्नः, इत्यादयः। नचात्र विपक्षे बाधकाभावः शङ्क्यः, प्रागुक्तनिर्विशेषप्रतिज्ञानुपपत्त्यादेरेव बाधकत्वात्। अन्ततो निर्विशेषानुमानस्यैव विपक्षे बाधकरहितत्वाच्च। न च दृष्टान्तासिद्धिः, त्वयैव घाटदेर्व्यतिरेकदृष्टान्ततयोदाहरणात्। बाधादेरपि प्रसङ्गाभावेन प्राबल्यमस्मदुक्तानामिति॥

॥इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां निर्विशेषत्वानुमानभङ्गवादः चतुर्विंशः॥२४॥

इति। यथा संभवमिति। अनुभूतिलिंगे बाधः दृश्यत्वलिंगेऽनैकांत्यमित्यर्थः।

सविशेषेति। स्वसमानसत्ताकविशेषेत्यर्थः। भासमानत्वादिति। प्रकाशमात्रत्वं विवक्षितं। तच्चानुभूतेश्चेतन्याविप्रयत्वपि परेणांगीकृतमिति नासिद्धिः। अनुभूतिधर्मा इति। अधिकरण समानसत्ताकानुभूतिं धर्मेत्यर्थः। पक्षासिद्धिपरिहारार्थमाह। अभ्युपगतेति। तद्धर्मतया प्रमाणतस्साध्यमानत्वादित्येव हेतुः। उभयाभ्युपगतप्रमाणभावेन अनुभूतिधर्मतया प्रतीयमानत्वादित्यर्थः। उभयाभ्युपगतप्रमाणभावाश्रुतिः तयानुभूतेर्नित्यत्वादि प्रतिपत्तेः। तथा च प्रमाणत्वेसिद्धे साध्यसिद्धिः। साध्यसिद्धौ प्रमाणत्वसिद्धिरित्यन्योन्याश्रयो नेति भावः। तद्धर्मतया स्वरसिकबाधरहितप्रतीति विषयत्वादित्यर्थःइत्यपरे। तेन प्रमाणभावप्रतिपन्नक्षणिकत्वादौ व्यभिचार इति ध्येयं। प्रागुक्तेति। अनुभूतिपक्षके निर्विशेषत्वानुपपत्तिर्विपक्षे बाधिका। नित्यत्वादि पक्षकेतु नित्यत्वादीनामनुभूति समानसत्ताकतधर्मत्वाभावे मिथ्यात्वात्तत्प्रतिक्षेपकान् प्रति तत्समर्थन प्रयासनैरर्थक्यादिर्विपक्षे बाधिका। अयमेवेति। प्रतिज्ञानुपपत्तयादेरित्यादिशब्दार्थः। अंतत इति। प्रत्युतेत्यर्थः। ननु व्याप्यत्वासिद्धिरसाध्याप्रसिद्धेरित्यत्राह। नचेति। त्वयैवनिर्विशेषत्वानुमाने व्यतिरेकव्यवृत्यर्थं घटादेस्सविशेषत्वांगीकारादित्यर्थः। नन्वेवमपि सविशेषत्वमसिद्धमेव त्वदनुमानस्य मदुक्तेन प्रतिरोधात् इत्यत आह बाधादेरपीति। त्वदुक्तानुमाने तु बाधोप्यस्तीति न तुल्यतेति भावः॥

॥ वत्सकुलतिलकनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां चतुर्विंशःसमाप्तः॥

॥अथ संविदात्मत्वभङ्गवादः पञ्चविंशः ॥२५॥

अन्योन्यव्यतिरिक्तयोरविजहद्धर्मत्वधर्मित्वयोर्व्यापारे गृहमेधिनोरिव ययोः साहित्यमासूत्र्यते।
सा संवित्सकलार्थसाधकवपुस्तत्सिद्धभोगः प्रभुः, श्रीमानस्तु स मे समस्तदुरितोत्ताराय नारायणः॥

यदुच्यते- संविदात्मा अजडत्वात्, यदुक्तसाध्यं न भवति तदुक्तसाधनमपि न भवति, यथा घटः, इति; तदसत्; स्वस्मै भासमानत्वरूपस्याजडत्वस्य हेतोरसिद्धेः। अव्यभिचरितप्रकाशसत्ताकत्वस्य सुखादिभिर्व्यभिचारात्। तेषामपि संविद्व्यतिरेकस्यानात्मत्वस्य च सौगतसुहृदा त्वयाऽप्यपरित्यागात्। सजातीयनैरपेक्ष्यादेरपि दीपादिभिर्घटादिभिरपि वा व्यभिचारत्। सर्वथा सजातीयनिरपेक्षप्रकाशत्वस्य पक्षेऽप्यसिद्धेः। सा खल्वात्मसम्बन्धसापेक्षप्रकाशा। अन्यथा स्वाश्रयव्यतिरिक्तेभ्योऽपि तत्प्रकाशप्रसङ्गात्। अत एवात्मनिरपेक्षत्वमप्यसिद्धम्; संविदन्तरनिरपेक्षप्रकाशत्वस्य स्वस्मै परस्मै वेति विकल्पे

अनुभूतिविचारप्रकरणेन संगतिमभिप्रेत्यवादार्थं संगृह्णाति। अन्योन्येति। बहुधास्फुटं भिन्नयोः पारमार्थिकधर्मधर्मिभावादभेदो न युक्त इत्याह अविजहदिति। ''य स्सर्वज्ञः सर्ववित्'' (मुंड-२-२-७) ''स्वाभाविकी ज्ञानबलक्रिया'' (श्वेता-६.८) चेति श्रुतेरिति भावः। असूत्रयेति। ''अभिद्योपदेशा'' (ब्र.सू.१-४-२४) दित्यादिसूत्रेष्विति भावः। सकलार्थसाधकेति। साधकशब्दो व्याप्यपरः। धूमोऽपिवह्निसाधक इतिवदीश्वरज्ञानस्यार्था व्यभिचारात्सर्वविषयप्रमेत्यर्थः। तत्सिद्धिभोग इति। अपरिच्छिन्न स्वरूपसाक्षात्काराधीनापरिच्छिन्नानंद इत्यर्थः॥

अत्र अजडत्वं स्वस्मै भासमानत्वं वा अव्यभिचरित प्रकाशसत्ताकत्वं वा सजातीयनिरपेक्ष प्रकाशत्वं वा आत्मनिरपेक्षत्वं वा संविदंतरनिरपेक्षत्वं वा ज्ञानत्वमेवेति वा विकल्प्याद्यंदूषयति। स्वस्मा इति। स्वकर्तव्यव्यवहाराद्यनुगुणज्ञानप्रकाश्यत्वस्येत्यर्थः। द्वितीये आह अव्यभिचरितेति। व्यभिचारोव्यापकत्वा भावः। अव्यभिचारो व्यापकत्वं अव्यभिचरित प्रकाशो यस्येति बहुव्रीहिः। प्रकाशव्याप्तसत्ताकत्वमिति यावत्। व्याप्तिश्च कालिकी आदिपदेन दुःखादिर्गृह्यते। सुखादीनामपि संविदभिन्नतया पक्षत्वान्न व्यभिचार इत्याशंक्याह। सजातीयेति। निराकरोति। तेषामपीति। सुखादीनां संविदभेदे आत्मा भेदे च तयोरस्थैर्य प्रसंगस्य सुहृत्प्रीत्यर्थं अंगीकर्तुं योग्योऽपि वैदिकान्वंचयितुं आत्मस्थैर्यकं चुकिना त्वया संविदात्माभेदो नांगीकृत इत्यर्थः। अपरित्यागादिति भेदः। तृतीये आह सजातीय निरपेक्ष व्यवहारस्येत्यर्थः। आदि पदेन सजातीय सापेक्ष व्यवहाराभावो गृह्यते। किं सजातीयपदं सजातीयप्रकाशपरं उत न आद्ये दोषः। दीपादिभिरिति। संवित्प्रदीपसाधारणनिर्वचनीयाखंडधर्मरूपस्य प्रकाशत्वस्य परैरभ्युपगमादिति भावः। द्वितीये दोषमाह। घटादिभिरिति। चतुर्थे आह। सर्वथेति। प्रकाशपदं व्यवहारपरं केनापि रूपेण यत्सजातीयं तदनपेक्ष विवतारकमित्यर्थः। असिद्धिमुपपादयति सा खल्विति। प्रकाशमात्रव्यवहारहेतुत्वे नित्यचैतन्येन सर्वदा सर्वेषां व्यवहारप्रसंगेन देवदत्तीयत्वादेरपि व्यवहारप्रयोजकतया तैरंगीकारादिति भावः। अन्यथेति। तदीयत्वस्य व्यवहाराप्रयोजकत्वे दे[illegible]दत्तस्य स्वीय घटसंविद्विषयव्यवहारवदितरेषामपि देवदत्तीय घटसंविद्विषय व्यवहार प्रसंगइत्यर्थः। पंचमं दूषयति। अत एवेति। तत्तद्व्यवहारस्य तत्तदात्मसापेक्षत्वाभावे पूर्ववदति प्रसंगात् तत्सापेक्षत्वासिद्धिरित्यर्थः।

पूर्वस्यासिद्धेरुत्तरस्य विरुद्धत्वात, अन्यस्मा एव भासमानत्वनियमात्, घटादिवदनात्मत्वसिद्धेश्च। अन्यथा घटादेरपि भासमानत्वमात्रेणात्मत्वप्रसङ्गस्यावारणात् । अतो ज्ञानत्वमेव हेतुः परिशिष्यते । तच्च प्रकाशरूपत्वम् । तच्च स्वस्मै परस्मै वेति विकल्पेन दूषितमेव । न कस्मैचिदिति पक्षे तु प्रकाशत्वहानिः, तथैव सर्वत्र प्रसिद्धेः ।

किंचानेन हेतुना संविद आत्मत्वं साधयन्तः किमिदमात्मत्वमभिसन्धाय साधयन्ति? किं ज्ञातृत्वादिकम्? उत प्रत्येतुः प्रत्येतव्याद्यतिरिक्तत्वम् ? अथवा स्वस्मै भासमानत्वम्? उताव्यभिचरितप्रकाशसत्ताकत्वम्? यद्वा स्वप्रकाशत्वम्? उत स्वानतिरिक्तत्वम्? यद्वाऽन्यदेव किंचिदिति। नाद्यः, प्रत्यक्षविरोधात् । ज्ञातृत्वं हि ज्ञानाश्रयत्वम् । तत्र स्वापेक्षया स्वस्यैवाश्रयत्वं व्याहतम्, आश्रयत्वाश्रयित्वलक्षणविरुद्धधर्माध्यासात् । अत एव स्वाश्रयतादात्म्येन ज्ञातृत्वमपि प्रतिक्षिप्तम् । धर्मधर्मिभेदाभेदपक्षस्तु भवताऽपि नाङ्गीक्रियते । नापि ज्ञानान्तराश्रयत्वं वक्तुं शक्यम्, योग्यानुपलम्भनिरस्तत्वात्, इच्छादेरिच्छान्तराश्रयत्वादिवत् । किंच क्षणिकस्यैव ज्ञानस्य ज्ञातृत्वं साध्यते?

षष्ठमाह।। संविदंतरेति। संविदंतरनिरपेक्ष प्रकाशत्व रूपहेत्वंतर्गतप्रकाशोवस्तुतः किं स्वस्मा एव परस्मैवेति विकल्पः। असिद्धेरिति। संविदतिरिक्तात्मन एव संविद्व्यवहारकर्तृत्वासिद्धांते सिद्धिः परमतेऽतकरणस्यैव कर्तृत्वादसिद्धिः । विरुद्धत्वादिति । परस्मा एव प्रकाशमानत्वस्य घटादावनात्मत्व व्याप्यत्वदर्शनात्तद् व्याप्यस्य संविदन्तर निरपेक्षं परस्मा एव प्रकाशमानत्वस्य सुतरामनात्मत्वव्याप्यत्वादिति भावः । परस्मा एव भासमानत्वहेतुना सत्प्रतिपक्षत्वमाह। अस्मा इति। परमतेप्याकारस्यैव व्यवहारकर्तृत्वेन तं प्रत्येव भासमानत्वादिति भावः । अन्यथेति । यदि वस्तुतः स्वस्मै भासमानत्वस्यात्मत्वव्याप्तत्वा तत्सहचरित्वमात्रेण संविदंतर निरपेक्षप्रकाशमानस्याप्यात्मत्व व्याप्यत्वमिष्यते तदातत्सहचरित भासमात्रान्यस्वात्मत्वव्याप्तिप्रसंगेन तेन तदा घटादावात्मत्वसाधनं स्यादित्यर्थः । सप्तमाह अतो ज्ञानत्वमेवेति । प्रकाशत्वहानिमुपपादयति । तदैवेति । यः प्रकाशः स किंचित्प्रतीति व्याप्तेरित्यर्थः ।

हेतुं दूषयित्वा साध्यं दूषयति । किं चेति । ज्ञातृत्वादिकमित्यादिपदेन कर्तत्वभोक्तृत्वे गृह्येते । प्रत्येतुरिति । पंचम्यंतं प्रत्येतव्यविशेषणं । ज्ञातृत्वे सति ज्ञेयत्वस्यविशिष्टस्य विवक्षिततत्वान्न पूर्वभेदः स्वानतिरिक्तत्वमिति । साध्यवाच्यात्मशब्दस्य स्वपरत्वाभिप्रायेण विकल्प्य अनुभूतिरात्मेत्यस्य स्वातिरिक्तो न भवतीत्ये तद्विकल्पार्थः। प्रत्यक्षविरोधादिति। ज्ञानं ज्ञातृ न भवतीति प्रत्यक्षविरोधादित्यर्थः। दूषणांतरमाह ज्ञातृत्वं हीति । ननु स्वरूपतो ज्ञानरूपस्याश्रयतादात्म्यज्ञातृत्वमतिविरुद्धमित्यत आह अत एवेति। व्याघातादेवेति भावः। ननु धर्मधर्मिभावो नात्यंतभिन्नयोः घट पटयोस्तदभावात्। अतो धर्म धर्मिभवान्यथानुपपत्त्यैव धर्म धर्मिणो भेदअभेदसिद्धौ तस्यैव तादात्म्यरूपत्वात् ज्ञातृतादात्म्यात् ज्ञातृत्वाश्रयत्वं सिध्यत्वेवेत्यत्राह धर्मधर्मि भेदाभेदेति। भिन्नयोरेव धर्म धर्मिभावसिद्धिः। अतिप्रसंगस्तु प्रमाणबलेन परिहार्य इति भावः व्याघात परिहाराय ज्ञानांतराश्रयत्वं (++++) मिष्टयाहत इत्यांशंक्याह। नापीति । योग्यानुपलंभेति । घटादिज्ञानेनांतरानुपलंभादिति भावः । इच्छादेरिति । यथा इच्छाप्रयत्नादेरिच्छाद्याश्रयत्वमनुपलंभनिरस्तं तथेत्यर्थः। भवंतमास्कंदयतीति। आत्मनः क्षणिकत्वादिति

उत स्थिरतयाऽभ्युपगतस्य तस्यैव? पूर्वत्र प्रतिसन्धानाद्यनुपपत्तिः। सौगतादीन्प्रति प्रयुक्ता भवन्तमास्कन्दति। उत्तरत्रापि किं निराश्रयस्य ज्ञानस्य ज्ञातृत्वं साध्यते? उत साश्रयस्य? आद्येऽप्यस्मदभिम (तज्ज्ञानात्मका) तात्मनो ज्ञातृत्वसाधने सिद्धसाधनत्वम्। निराश्रयज्ञानान्तरपक्षीकारे तु आश्रयासिद्धिः। सर्वाभ्युपेतसंविद एव निराश्रयत्वविवक्षायां प्रत्यक्षादिविरोधः। द्वितीये ज्ञातृद्वयोपलब्धिप्रसङ्गः। उत्तरोत्तरज्ञानानांमप्युक्तहेतुसम्बंधाविशेषण ज्ञातृत्वप्रसङ्गेनानवस्था व्यभिचारो वा। किंच सत्यज्ञातृत्व साधनेऽपसिद्धान्तः। आरोपितज्ञातृत्वसाधने त्वदुक्तवाक्यानुमानादिभिस्तदारोपस्यास्माभिरभ्युप गमात्सिद्धसाध्यता।

प्रतीयमानज्ञातृत्वस्यारोपितत्व साधनं त्वनन्तरमेव दूषयिष्यामः। एवं ज्ञातृत्वकल्पप्रतिक्षेपेणैव द्वितीयः कल्पोऽपि प्रतिक्षिप्तः। अवेद्यत्वाभिमतानुभूतेर्वेद्यत्वप्रसंगस्त्वधिकः। नापि तृतीयः, प्रत्यक्षविरोधात्। स्वाश्रयायैव हि सा भासमाना दृश्यते। स्वस्मा इति प्रकाशफलित्वं हि ज्ञाप्यते। प्रकाशफलित्वं च प्रकाशाधीनव्यवहारादिमत्त्वम्। नच ज्ञानमात्रस्यैव व्यवहारादिकर्तृत्वं भवताऽप्यभ्युपगम्यते। फलित्वारोपसाधने तु प्राग्वदेव परिहारः। नापि चतुर्थः, सिद्धसाधनात्। तावता चात्मत्वसिद्धौ सुखदुःखादेरपि प्रसङ्गात्।

पञ्चमषष्ठयोरपि सिद्धसाधनतैव। नापि सप्तमः; तत्किं परसम्प्रतिपन्नात्मतादात्म्यविधिपर्यवसितम्? उतानुभूतेर्यथाकथंचिदात्मशब्दप्रतिपाद्यतामात्रनिष्ठमिति? आद्ये व्याघातादिदोषस्तदवस्थः। द्वितीये तु सिद्धसाधनत्वमेवेति। अस्तु तर्ह्यात्मानं पक्षीकृत्यात्मत्वादेव ज्ञानतादात्म्यसाधनम्; ततो नोक्तदोषावकाशः इति चेन्न; धर्मिणोऽपि धर्मतादात्म्यविधेर्व्याहतत्वात्। तस्य ज्ञानत्वमात्रसाधने तु

भावः। अस्मदभिमतेति। प्रतिशरीरं भिन्नस्येत्यर्थः। ननु तादृशमीश्वरस्वरूपमस्तीतिचेत् तथा सति सिद्धसाधनमिति भावः। प्रत्यक्षादित्यादिपदेन सविषया संविन्निराश्रया प्रत्यक्षेण धर्मतया प्रतीयमानत्वाद्धटवदित्याद्यनुमान विरोधः। ''द्रष्टुर्दृष्टे'' (बृ.४.४.१४) ''र्विज्ञातारमरे'' (बृ.४.४.१४) ''रसयिताघ्राते''(बृह.५.७.२३) त्यादि श्रुतिविरोधश्चगृहीतः ततश्चाश्रयासिद्धिरिति भावः। दूषणांतरमाह॥ उत्तरोत्तरेति। उत्तरोत्तरज्ञानानां ज्ञातृत्वाभावे व्यभिचारः ज्ञातृत्वांगीकारे अनवस्थेत्यर्थः। अपसिद्धांत इति। ज्ञातृत्वस्य परमते मिथ्यात्वादिति भावः।

ननु प्रतीय्यमान ज्ञातृत्वस्यमिथ्यात्वसाधने तात्पर्यमित्यत्राह प्रतीय्यमानेति। द्वितीय्यःकल्पः प्रत्येतुः प्रत्येतव्यादव्यतिरेकविकल्प इत्यर्थः। वेद्यत्वप्रसंगस्त्विति। तथाच दृश्यत्वान्मिथ्यात्व प्रसंग इति भावः व्यवहारादिमत्वमित्यादिग्रहणेन सुख दुःखादिर्गृह्यते। प्राग्वदेवेति। सिद्धसाधनमित्यर्थः। तावतेति। तस्यैवात्मत्वे सुखादेरप्यात्मत्वप्रसंग इत्यर्थः।

सिद्धासाधनतयैवेति। संविदस्संविदंनतिरिक्तत्वस्य सिद्धत्वादिति भावः। व्याघातादिति। परस्परप्रतिपन्नात्मनोज्ञातृत्वात् तदभेदसाधने पूर्वोक्तव्याघातः। प्रत्यक्षविरोधश्चेत्यर्थः। सिद्धसाधनमेवेति। आत्मशब्दलक्ष्यत्वस्य अनुभूतावपि संभवादिति भावः। किं ज्ञानतादात्म्यमित्यत्र धर्मभूतज्ञानतादात्म्यं विवक्षितं उत ज्ञानत्वमात्रं यद्वा विषयोल्लेखः। नाद्य इत्याह धर्मिणोपीति। द्वितीये आह। तस्येति।

त्र्यन्तविदां सिद्धसाधनात्। आत्मशब्दवाच्यस्यैव विषयोल्लेखलक्षणावस्थायोगः कल्पनालाघवाद्विधीयते इति चेन्न; तथाऽपि तथाविधावस्थैव ज्ञानम्, तदाश्रय आत्मेति वैशेषिकादिवत्तस्य ज्ञातृत्वमेव सिध्यति। अवस्थामिथ्यात्वाद्वैषम्यमिति चेन्न, बाधाभावादिना तत्सत्यत्वस्य दुरपह्नवत्वात्। तथाऽपि भवदभिमतानन्तावस्थनित्यज्ञानातिरिक्त आत्मा न सिध्यतीति चेन्न; ज्ञातुः तद्धर्मभूतज्ञानस्य च तावता दुरपह्नवत्वात्। ज्ञानं किमेकमेव सत्सामग्रीवशाद्विषयोल्लेखाद्यवस्थावद्भवति, उत ज्ञातर्येव ज्ञानलक्षणानन्तावस्थेति विशये श्रुतिशरणानां पूर्वःपक्षः, लाघवमात्रशरणानामुत्तर इति स्थिते द्वेधाऽपि भवदभिमतं न सिध्यत्येवेति का पूर्वरूपे वार्ता। उत्तररूपे दुस्तरं श्रुत्यदिकमनुसन्धत्स्वेति। श्रुतिरेवात्मनो ज्ञानानतिरिक्तत्वं साधयतीति चेन्न; परिहृतप्रायत्वात्।

तत्र हि-"श्रुतिप्रत्यक्षसंसिद्धे ज्ञातृत्वे ज्ञानताश्रुतिः। नेया तद्गुणसारत्वात्स्वप्रकाशतयाऽपि वा।"

वदन्ति हि "विज्ञातारमरे केन विजानीयादि" (बृह.४-१४)त्याद्याःपरश्शताः श्रुतयः साक्षाज्ज्ञातृत्वमेव। तदविरोधाय ज्ञानमात्रश्रुतिरपि जडत्वं प्रतिक्षिपति, न तज्ज्ञातृत्वम्, अन्यथा प्रत्यक्षादिभिश्च विरोधात्। येनैव शास्त्रेण ज्ञानरूपत्वमात्मनः साध्यते संविदात्मत्वपक्षे तस्य श्रोताऽपि न सिध्येत्। न ह्यनात्मानं प्रत्युपदिश्यत इति भवताऽपीष्यते। आत्मा तु संविन्मात्ररूपो ज्ञातृत्वाभावान्न

तृतीयं शंकते। आत्मशब्दवाच्यस्यैवेति। तथाविधेति। सिद्धे ज्ञाने कादाचित्कविषयसंबंधस्य निरस्तत्वात् विषयोल्लेखो ज्ञानमेव पर्यवस्यतीति भावः। बधाभावादिति। आदिपदेन अर्थक्रियाकारित्वं विवक्षितं। ननु भवन्मते ज्ञानस्यैव नित्यस्य घटादिविषयीकरणादनंतावस्थांगीक्रियते। तथा च तादृशावस्थाया एव ज्ञानतया तदाश्रयस्य ज्ञानस्यैव ज्ञातृत्वमस्तु न ततोऽतिरिक्त आत्मेति शंकते। तथापीति। श्रुतिशरणानामिति। न विज्ञातुर्विज्ञातेर्विपरिलोपो वियत इति। ज्ञातृसमवेत ज्ञानस्य नित्यत्वश्रुतेर्ज्ञानसाधन विधान श्रुत्या च जन्यत्वसिद्धेश्चेति भावः। पूर्वरूपेति। आत्मन एव घटादिविषयोल्लेखावस्थावत्वे इत्यर्थः। तथा सत्यात्मसमवेतानेकज्ञानपक्षोस्त्वित्यत्राह। उक्तरूप इति। श्रुतिरुदाहृतैव। आदिशब्देन नित्याभावात्मकोभिहित इत्यादिस्मृति ग्रहः॥ ननु "विज्ञानं यज्ञं तनुते" (तै आनं ५ अनु) "यो विज्ञानेतिष्ठन्नि" (बृ-५-७-२२) त्यादि श्रुतिरेवात्मनो ज्ञानाभेदं साधयतीति शंकते। श्रुतिरेवेति। परिहृतप्रायत्वादिति। तस्य ज्ञानत्वमात्रसाधने सिद्ध साधनादित्यनेनेत्यर्थः।

उक्तं परिहारांतरं च संगृह्णाति । तत्र हीति। सारशब्दः प्रधानपरः। ज्ञानगुणसारत्वात् ज्ञानशब्देन व्यपदेश इत्यर्थः।

ननु तस्य ज्ञानत्वमेवास्तु ननु ज्ञातृत्वमित्याशंक्य श्रुतिबलात्ज्ञातृत्वमपरिहार्यमित्याह। वदन्तीति। ननु ज्ञातृत्वमेवाधिकमेव प्रतिपाद्यत इत्यत्राह साक्षादिति। ज्ञातृत्वस्य अंतःकरणोपाधिकत्वे परंपरासंबंधाद्विज्ञातारमिति निर्देशोपपन्न एव ततोपाधिगतस्य तत्रारोपः श्रुतेरप्रामाण्यप्रसंगादिति भावः॥ नन्वेषोयमात्मा ज्ञानमात्र इति श्रुति विरोध इत्यत्राह तदविरोधायेति। मात्रशब्दः कात्स्न्र्य परः। संविद आत्मत्वे प्रतिपत्तुरभावाच्छास्त्रवैयर्थ्यं इत्याह। येनेति। संविदात्मत्वपक्षे येनैव शास्त्रेण ज्ञान रूपत्वमात्मनस्साध्यते तस्य शास्त्रस्य श्रोतापि न सिध्यतीत्यन्वयः ननु संविदेव श्रृणोतीत्यत्राह आत्मा

श्रोतुमीष्टे । अहंकारः श्रृणोतीति चेत्, स किं स्वार्थं परार्थं वा श्रृणोति? नाद्यः, स्वनाशपर्यन्तत्वात्; अहमर्थात्यन्तविलयगर्भो हि भवत्पक्षे मोक्षः । न हि कश्चित्स्वनाशाय मोक्षशास्त्रं श्रृणोति । अत एव न द्वितीयः, स्वात्यन्तनाशेन परोपकारस्य कस्याप्यनभिमतत्वात्; अहमर्थस्य चात्मत्वमस्मन्मतेन सिद्धमिति ॥

॥इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां संविदात्मत्वभङ्गवादः पञ्चविंशः ॥२५॥

त्विति । ज्ञातृत्वविशेषत्वाच्छ्रोतृत्वस्येति भावः । नन्वहंकारस्य श्रोतृत्वान्नशास्त्रवैयर्थ्यमिति शंकते । अहंकार इति । स्वनाशपर्यवसितत्वमाह । अहमर्थात्यंत विलयेति । ननु भवत्पक्षेप्येष दोषस्सम इत्यत्राह अहमर्थस्येति । मोक्षकालतत्सत्ताभ्युपगमान्नदोष इति भावः ॥

इति वत्सकुलजलधिकौसुतेन नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां पंचविंशस्समाप्तः ।

॥अथ अहमर्थात्मत्वसमर्थनवादः षड्विंशः ॥२६॥

अहंत्वेदंत्वाभ्यां स्वपरविदितांश्चेतनगणानहङ्कारादीनप्यचिदुपधिभेदाननहमः।
अहन्ता यस्यैका कबलयति वैशिष्ट्यविभवान्ममास्मिन्विश्राम्यत्वहमिति मतिर्विश्ववपुषि॥

यदुच्यते - अहमर्थो नात्मा, सुषुप्तिमोक्षयोरननुवर्तमानत्वात्। मोक्षे न तदनुवृत्तावज्ञत्वादिप्रसङ्गाच्च। अतश्चैतन्यमात्रमात्मा। तत्रानिदमि चैतन्ये निरुपाधिरहंभ्रमः। कर्तृत्वादिस्तु सोपाधिः सर्पलोहित्यवत्क्रमादिति। अत्र ब्रूमः-सुषुप्तौ तावदहमर्थाननुवृत्तौ पुनः प्रतिसन्धानानुपपत्तिप्रसङ्गः। न ह्यहमर्थान्तरेणानुभूतमर्थमहमर्थान्तरं स्मर्तुमलम्, अतिप्रसङ्गात्। सुषुप्तावपि तदनुवृत्तौ तदानीमपि तत्प्रकाशप्रसङ्ग इति चेन्न; विद्यमानस्य प्रकाशनियमानभ्युपगमात्। तदानीमप्रकाशेऽपि तदनुवृत्तौ किं प्रमाणमिति चेन्न; पूर्वोत्तरवर्त्यहमर्थप्रतिसन्धानबलादेव मध्येऽपि तत्कल्पनात्। पूर्वोत्तरकालावच्छिन्नमध्य

आत्मनिरूपण प्रसंगमभिप्रेत्याह अहंतेति। स्वयं स्वेनाहमिति। विदितः परेण त्विदमित्यर्थः। अचिदुपाधिभेदान् अचिद्रूपोपाधिविशेषानित्यर्थः॥ अनहमः अहमिति मकारांतशब्दानुकरणं अनव्ययं तेनाहमिति शब्दवाच्यं लक्ष्यते। तं न भवतीति नञ् समासः अहमर्थभिन्ननित्यर्थः॥ तेनाव्ययत्वाद्विभक्तिश्रवणानुपपत्तिर्नास्तीति ध्येयं। विशेष्यमाह अहंकारादीनिति। यस्येश्वरस्साएकाहंताकमिळयति "देवानां वासवोस्म्यह" ( ) मित्यादि विभूत्यध्यायोक्तन्यायेन तत्तच्छब्दवाच्यता समानाधिकरणो भवतीत्यर्थः। तत्र हेतुमाह वैशिष्ट्यविभवादिति। वैशिष्ट्यस्य विभवो अपृक्सिद्धत्वं ममेति अहमिति व्यवहारहेतुभूता मदीयामतिर्वामदेवादेरिव मत्प्रकारतया परमात्मानं विषयीकरोत्वित्यर्थः।

अनुवर्तमानत्वादिति। तदानीमविद्यमानस्यानित्यत्वात्मनो नित्यत्वादिति भावः। मोक्षेचेति। संसार दशायां अहमर्थमस्य ज्ञानादिव्याप्तिदर्शनादिति भावः। सुषुप्तावनुवर्तमानत्वे तत्प्रकाशप्रसंग इत्यपि विवक्षितं। अहमर्थस्य भ्रान्तिसिद्धतयापि नात्मत्वमित्यत्राह तत्रेति। नन्वाज्ञानाधीनत्वाद्भ्रमस्य कथं निरूपाधित्वमिति चेत् अहमिति प्रथमोध्यास इति जीवभावस्याविद्याध्यासवत् अनादित्वान्निरुपाधित्वमिति भावः। केचितु चैतन्यमात्र एव भ्रमः किंचिदवच्छिन्नचैतन्य इति निरूपाधिकत्वमित्यत्राहुः। कर्तृत्वादिभ्रमः सोपाधिरिति। अविद्यामूलोन्तःकरणावन्नध्यस्तो वेति भावः। सर्पलौहित्यवदिति। रज्जौ सर्पवदिति। रज्जौ सर्पवत् स्फटिके लौहित्यवदित्यर्थः। सुषुप्ताविति। तथा च हेत्वसिद्धिरिति भावः। अतिप्रसंगादिति। देवदत्तानुभूतस्य तस्य यज्ञदत्तेन स्मरणप्रसंगादिति भावः। तत्प्रकाशप्रसंगइति भावः। अहमर्थप्रकाशप्रसंग इत्यर्थः। वियामानस्येति। यद्यपि प्रकाश इष्ट एव तथाभ्युप्येत्य इदं बोध्यं। तदानीमप्रकाशेऽपीति। सुषुप्तावित्यादेः पूर्वोक्तस्य तर्कोपन्यासपरत्वादिः अहं प्रश्न इति न दोषः। अहमर्थप्रतिसंधानमिति। पूर्वेद्युरत्रस्थितोऽहमिदानीमप्यत्र प्रतिष्ठामीति प्रत्यभिज्ञानमित्यर्थः। ननु स्वापदशायां स्वापकालस्य स्फुरणात्तत्प्रतिसंधानायोगात् कथं तत्कालावच्छेदेन अहमर्थस्य कल्पनमित्याशंक्य कल्पितकालविशिष्टस्वापानुसंधानवत् कल्पितकालविशिष्टाहमर्थकल्पनमुपपद्यत इत्याह पूर्वोत्तरेति। पूर्वोत्तरकालावधित्वं विवक्षितं।

कालकल्पनेनास्वाप्समितीदानींतनकालानुसन्धानवदिदानीमतीतकालावच्छिन्नाहमर्थस्यापि प्रकाशोपपत्तेः। मध्ये चाहमर्थाभावे संस्काराधाराभावात्प्रतिसन्धानाभावप्रसङ्गाच्च(ङ्गश्च)। संवित्स्वरूपमविद्यास्वरूपं वा तदाधारो भवत्विति चेन्न; तयोरपि तदानीमनुवृत्तौ प्रमाणाभावात्। न हि ज्ञातारमन्तरेण ज्ञानमज्ञानं वा स्थातुमलम्। अन्यथा घटादिष्वपि तदवस्थितिप्रसङ्गात्। ज्ञानाभावस्तत्रापि विद्यत इतीष्टप्रसङ्ग इति चेन्न; भवदभिमतभावरूपाज्ञानस्य तत्र प्रसज्यमानत्वात्, तस्य च तन्निष्ठत्वेन त्वयाऽनभ्युपगमात्। न च संवित्स्वरूपस्य संस्काराधारत्वम्, निर्विकारत्वनिर्विशेषत्वविरोधात्। नाप्यविद्यास्वरूपस्य, तथा सति तस्यैव ज्ञातृत्वप्रसङ्गात्। न ह्यन्यगतसंस्कारेणान्यस्य स्मृतिः संभवतीत्युक्तम्। उपादानोपादेयभावादुपपद्यत इति चेन्न; क्षणभङ्गनयप्रसङ्गात्। सत्कार्यवादाभ्युपगमेनाविद्यातद्विवर्तयोरेकत्वादुपादानं संस्कारे उपादेये कार्यकर इति चेन्न; उपादानोपादेययोः काल्पनिकैक्यस्य सौगतमतेऽपि सत्त्वात्; परमार्थैक्यस्य त्वन्मतेऽप्यभावात्।

किं वा सुषुप्तिकाले संविदविद्ययोः सद्भावे प्रमाणम्? सुप्तोत्थितस्य सुखमहमस्वाप्समिति परामर्श इति चेन्न; तेन सुखस्वापविशिष्टतदानींतनाहमर्थस्यैव विषयीकरणात्। इदानींतनाहमर्थप्रकाशनेन तदुपलक्षणमिति चेन्न; इदानींतनसुखसंविद्ध्यां तदानींतनस्वापविशिष्टाहमर्थोपलक्षणं किं न स्यात्?

अध्वर्यस्यरात्र्यन्तर्हवत्व व्याप्त्यामध्यकालकल्पनमिति भावः। तदर्नीं तनेति। तदनींतनकाले अनुसंधानमिति सप्तमीसमासः। तदानींतनकालावच्छिन्नतया स्वापानुसंधानवदित्यर्थः॥ प्रकाशोपपत्तेरिति। प्रकाशकल्पन संभवादित्यर्थः। प्रतिसंधानादेः स्मरणं प्रत्यभिज्ञा च न स्यातामित्यर्थः। तयोरिति। त्वदभिमत निराश्रयसंविदज्ञानयोरित्यर्थः। बाधकमप्याह। नहीति। न च जानामीति ज्ञानसमानाधिकरणतया अनुभूयमानमज्ञानं नाज्ञातरि संभवतीति भावः। अन्यत्रेति। ज्ञानाश्रयेऽपि संभव इत्यर्थः। निर्विशेषत्वेति। न च मिथ्यात्वेन परिहारः तथापि तस्या एव ज्ञातृत्वप्रसंगादिति भावः। इत्युक्तमिति। अहमर्थांतरंगतानुभवेनाहमर्थांतरंगत्वास्मृत्यसंभवोक्त्यैवाज्ञानगतानुभवो अहमर्थेपि स्मृत्यसंभव उक्त्यभिप्राय इति भावः। क्षणभंगेति। तत्रापिकार्यकारणभावेन उपादान संभवात् क्षणिकत्वदूषणमलग्नकं स्यादित्यर्थः। सत्कार्येति। क्षणभंगे कार्यकारणयोर्भिन्नत्वात्प्रतिसंधानानुपपत्तिः। अत्र तु न तथेति भावः। परमार्थेति। न च धर्मिसमसत्ताकमैक्यमस्तीति वाच्यं। अन्तः करणांतरस्याप्यविद्योपादानकत्वेनाति प्रसंगादिति भावः।

संविदवृत्त्यानुवृत्तिप्रमाणाभावं पूर्वोक्तं प्रपंचयितुं पृच्छति किंचेति। सुप्तेति। सुखमहमस्वाप्सं इत्यस्य सुखमनुभवं न स्वाप्सं इत्यर्थः। तत्रास्वाप्सं इत्यविद्यापरामर्शः स्वापस्य सर्वाज्ञानरूपत्वात्सुखमिति। संविद इति भावः। तथा सत्यस्मदिष्टमेव सिध्यतीत्याह। तेनेति। इदानीमर्थस्यप्रकाशात्तस्य च स्वापसुखाश्रयाश्रयात्मभेदभेदाध्यासात्तथाप्रतीत्युपपत्तिरित्यर्थः। तदुपलक्षणमिति। अहमर्थोपलक्षणं स्वापात् इदानीतन महमर्थं प्रत्येतत्कालीनस्वापसुखादेर्व्यावर्तकत्वा दुप लक्षणत्वोक्तिरिति भावः। इदानीं तनेति। इदानींतन सुखसंविद्विशिष्टात्मनि तदानींतन स्वापविशिष्टाहमर्थस्याध्यासात्तथा प्रतीतिरिति किन्नस्यादित्यर्थः। तथा च नोपलक्ष्यत्वमिति भावः।

तदानीमहमर्थप्रकाशाभावे कथं तत्परामर्श इति चेत् कथं तदानीमज्ञानसुखसाक्षिसंवित्प्रकाशाभावे तत्परामर्शः? तत्परामशदिव तदा तत्प्रकाशोऽपि कल्प्यत इति चेत् तथाऽहमर्थप्रकाशोऽपि कल्प्यताम्। उपलम्भविरुद्धं तत्कल्पनमिति चेत्, कोऽयमुपलम्भः? एतावन्तं कालं न किंचिदहमज्ञासिषमित्येवंरूप इति चेत्, तर्हि तत एवाज्ञानसुखसाक्षिसंवित्प्रकाशकल्पनमपि विरुध्येत। उपलम्भस्य बहिर्विषयवेदननिषेधरूपत्वात्तत्कल्पनमुपपद्यत इति चेत्, समःसमाधिः।

मामप्यहं न ज्ञातवानित्युपलम्भो विरोधीति चेत्, कस्य विरोधी? किमहमर्थस्य? उत तत्संवेदनस्य? उत वेदनमात्रस्य? न प्रथमः, अतद्रूपत्वादुपलम्भस्य। न ह्येतावन्तं कालं नाहमभूवमिति कश्चित्प्रतिसन्धत्ते, अपि तु विद्यमानमपि मां न ज्ञातवानिति। न द्वितीयः, एतावन्तं कालं न ज्ञातवानित्यनेन संविदमपि न ज्ञातवानिति संवित्संवेदनस्यापि निषेधप्रसङ्गात्। स्वप्रकाशेन तदा तत्प्रकाशनम्, निषेधस्तु विषयप्रकाशस्येति व्यवस्थेति चेत्, तुल्यमहमर्थेऽपि। अत एव न तृतीयः, स्वपक्षोन्मूलनप्रसङ्गाच्च। "नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवती" (छां ८-११-२) ति सुषुप्तिविषयश्रुत्या तदानीमहमर्थप्रकाशकल्पनं विरुध्यत इति चेत्, तर्हि "प्राज्ञेनात्मा संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति" (बृह-६-३-२१) तद्विषयश्रुत्यैव संवित्सुखादिप्रकाशकल्पनमपि विरुध्येत्, अविशेषात्। तथाऽपि तदानींतनमज्ञानमनुभूतमननुभूतं वा?

नन्वस्तु स्वापकाले अहमर्थः। तथावन तस्य परामर्श इत्याशंकते ॥ तदानीमिति। कथं वेति। अज्ञानसुखयोस्तत्साक्षिभूतसंविदश्च प्रकाशाभावे कथं तत्परामर्श इत्यर्थः। परामर्शदिवेति। तथा परामर्शादिवेत्यन्वयः। सुखमहमस्वाप्समिति परामर्शादित्यर्थः। तथाहमर्थेति। सुखमहमस्वाप्समितिपरामर्शः सुखादेरिव अहमर्थस्यापि भानविशेषादिति भावः। तत्कल्पनमहमथ 'प्रकाशकल्पनं। एतावतं कालं नकिंचिदहमज्ञासिषं इति परमार्शविषय अहमर्थस्योपालं भविरोधे हि अज्ञान सुखसं विदामप्युपालंभविरोधस्यादिति परिहरति। तर्हीति। तत्कलपनमुपपद्यत इति चेदिति। अनादिप्रकाशकल्पनमिति भावः। सम इति।

अहमर्थस्याप्यबाह्यत्वादिति भावः। किमर्थविरोधत्वेनोपलं भविरोधित्वमुत साक्षादेवेति पृच्छति। कस्येति। अतद्रूपत्वादिति। अहमर्थाभावस्य विरोधिनोनवगाहित्वादिति भावः। तदेवोपपादयति। नह्येतावन्तमिति। प्रत्युत संविदर्थविरोधि विषयतेति दर्शयति। अपित्विति। निषेध प्रसंगादिति। न ज्ञातवानिति। सामान्यनिषेधस्य यावद्विशेषविषयत्वादिति भावः। निषेधस्त्विति। प्रत्यग्वस्त्वतिरिक्त विषयशब्दार्थ इति भावः। तुल्यमिति। ममप्यहं न ज्ञातवानिति निषेधोऽपि देवत्वाद्याकारेणाहमर्थोल्लेख विषय इति भावः। अत एवेति। विशेषनिषेधरूपत्वेनातद्रूपत्वादेतावंतंकालं न किंचिदज्ञासिषमिति परामर्श विरोधाच्चेत्यर्थः ॥ स्वपक्षेति। अज्ञानसंविदो प्रकाशस्यापि निषेधप्रसंगादित्यर्थः ॥ (नाहेति) अयमहमस्मीति संप्रत्यात्मानं जानाती (छां ८-१-२२) त्यर्थः अत्र न जानातीति प्रकाशनिषेधः प्रकाश कल्पनाविरोधीति भावः। तर्हीति संवित्सुखादेरप्यांतरत्वादिति भावः। तथा चेति। तथाच "प्राज्ञेनात्मने" (बृ-६.३.२१) ति श्रुतेर्नकिंचिदज्ञासिषमिति परामर्शस्य चाज्ञानसंविद्व्यतिरिक्तविषयतया संकोचः कार्यः।

पूर्वत्र संविदोऽपि प्रकाशसिद्धिः, स्वयंप्रकाशत्वात्; उत्तरत्रज्ञानप्रतिसन्धानानुपपत्तिरिति चेन्न; तदानींतनकालस्येव तदानींतनाज्ञानस्यापि तदानीमेव कल्प्यमानत्वेन तद्विषयप्रतिसन्धाना(न) भ्युपगमात्। तथाऽपि प्रातर्गजाभावादिनयेन तदानीमधिकरणोपलम्भोऽवश्यंभावीति चेन्न; इदानीमेव कल्प्यमाने मध्यकालवर्तिनि स्वात्मनि योग्यस्मृत्यभावेन ज्ञानाभावस्यापि कल्पनोपपत्तेः। तदानीमधिकरणोपलम्भस्यावश्यंभावेऽपि अहमर्थस्यैव प्रकाशकल्पना युक्ता। अहं न ज्ञातवानिति स एव ह्यज्ञानाश्रयतया प्रतिसन्धीयते। अतो न कथश्चिदपि सुषुप्तावहमर्थाभावो वक्तुमपि शक्यः। अहमेव पूर्वं सुप्तः, तथाऽप्यहमर्थस्तदानीं नास्तीति स्ववचनविरोधाच्च।

मुक्तावप्यहमर्थानुवृत्तिः प्रागेव श्रुतिवशाद्दर्शिता। न च मोक्षे अहमर्थानुवृत्तावज्ञत्वप्रसङ्गः, तथा सति संविदनुवृत्तावपि तत्प्रसङ्गात्। यथावस्थितस्वरूपप्रकाशो नाज्ञत्वादिहेतुः, अपि तु तद्विरुद्ध एवेति चेत्, तुल्यम्। यदि च मोक्षेऽहमर्थो न स्यात् मोक्षशास्त्रस्याधिकार्यभावः स्यात्। न हि स्ववधाय स्वयमेव बुद्धिपूर्वकारी प्रवर्तते। अहमर्थस्य चात्यन्तविनाशो मोक्षे भवद्भिरिष्यते। संविदात्मनः स्वस्य च विवेकाग्रहात् प्रवर्तते इति चेत्, तर्हि स्वविनाशे संविदो विनाशमभिमन्येत। स च स्वविनाश एवेति मन्यमानो न प्रवर्ते

नाज्ञासिषमिति प्रतीतेरन्यथोपपादयितुं शक्यत्वादिति भावः। अज्ञानप्रतिसंधानेति। अननुभूतस्य स्मरणायोगादिति भावः। तदानीमेवेति। उद्बोधकाल एव अनुमेयत्वात् स्मृतित्वं न संभवतीत्यर्थः। ननु चत्वरादेरधिकरणस्य प्रागननुभूतस्य इदानीं स्मरणे न तत्र गवाद्य भावकल्पनमस्तु इहत्वननुभूतस्य अज्ञानाधिकरणस्य स्मरणाभावे कथं तत्राभावकल्पनमित्याज्ञानाश्रयसंविदनुभव आवश्यक इति शंकते। तथापीति। इदानीमिति पूर्वोत्तरजाग्रदवस्थावच्छिन्नयोरैक्यप्रत्यभिज्ञया मध्येपि सत्वस्य कल्पनेन तदानीं ज्ञानवत्वे नियमतस्तद्वत्तया समक्रव्यस्य तथा स्मृत्य भावेन ज्ञानाभावकल्पनमित्यर्थः। नन्विदानीं ज्ञायमानत्वेप्यधिकरणस्यपूर्वकालानुभवाभावेस्मर्तुं योग्यत्वस्यैवाभावेन तद्वत्तयास्मर्तुं योग्यत्वस्य सुतरामभावादज्ञानानुभवः कथमित्यत्राह तदानीमिति। प्रतिसंधीयत इति। प्रतीतिमात्रं विवक्षितं न च श्रुतिविरोधः। नह्यहमिति न जन्मादिति श्रुतिः किंच त्वयमहमस्मीति न जानामीति तत्राहमयमस्मीति मनुष्यत्वादिरूपेण प्रतीतिरेव निषिध्यते इति स्वरसतः प्रतीय्यते। यथा ''कच्छिद्धवाल्लोकात्प्रेत्यात्मानं वेदायमहम्मीती'' अथ योऽहं चैतमग्निं सावित्रंवेद स एवास्माल्लोकात् प्रेत्य आ.त्मानं वेद अहमस्मीति॥ (तै-ब्रा-३-१०-११) त्यादौ अन्यथा ''न बाह्यं किंचन वेद नांतरं न किंचिदहमवेदिषमिति'' (बृ-६-३-२१) श्रुति विरोधात् अज्ञानसंवित्प्रकाशस्यापि लोपप्रसंगादिति भावः अहमिति। अहमेव सुप्त इति स्वापाश्रयतया प्रतीयमानस्य स्वापकालीनत्ववचनं विरुद्धमिति भाव।

मोक्षे नुवर्तमानत्वमप्यसिद्धमिति दूषयति। मुक्तावपीति। तथासतीति संसारदशायां संविदोप्यज्ञानव्याप्तेरिति भावः। यथावस्थितेति। अज्ञानं तज्जन्यत्वाभावात् न तद्व्यप्यमित्यर्थः। तुल्यमिति। नाहमर्थो तज्जन्यत्वात् तद्व्याप्यः किं तु यथावस्थित विपरीत ज्ञानमिति भावः। अधिकारी मोक्षशास्त्रानुष्ठाता। तत्र हेतुमाह। नहि स्ववधायेति। ननु सुषुप्तिदशायामिव प्रलीनोहमर्थस्सूक्ष्मरूपेण वर्ततामित्यत्राह। अहमर्थस्येति। मुक्तौ निरन्वयविनाश एवाहमर्थस्येष्ट इति भावः। संविदात्मन इति। स्वाभिन्नतया ज्ञातसंविदो नित्यताज्ञानात्प्रवर्तत इत्यर्थः। नहीति। नित्याभेदग्रहात्प्रवृत्तिवदनित्याभेदग्रहान्निवृत्तिस्यादित्यर्थः।

तैव। स्वात्मावस्थानभ्रमात् प्रवर्तत इति चेन्न; फलस्वरूपमजानतस्तदर्थित्वायोगेनोपायानधिकारात्। अहमर्थस्थितिमपेक्षमाणस्य च भवन्मते नित्यसंसारप्रसङ्गात्। अहमर्थस्थितिभ्रमेण प्रवृत्तस्याप्यद्वैतज्ञानोदयसामर्थ्यदिवानिच्छतोऽप्यहमर्थविनाश इति चेत्, तथा सति राज्यकामस्य शिरश्छेदवदपवर्गः स्यादिति सम्यक् पुरुषार्थपरत्वं शास्त्रस्य समर्थितं भवति।

अस्तु तर्ह्याध्यात्मिकादिदुःखत्रयाभिघातवशात्तदविनाभूताहमर्थस्यापि विनाशोऽभिमत इति, तदपि मन्दम्; "तमेवं विद्वानमृत इह भवति" (तै-आ.३.पु.सू) "तमेव विदित्वाऽतिमृत्युमेती" (श्वे ३-८)त्यादिभिर्मृत्युतरणहेतुतया श्रुतस्य ब्रह्मवेदनस्य साक्षान्मृत्युहेतुत्वप्रसङ्गात्। "ब्रह्मैव भवति" (मुंड-३-२-३) "सर्वं ह पश्यः पश्यति" (छां-७-२६-२)इत्यादिभिर्विरोधप्रसङ्गाच्च। अस्तु तर्हि ज्ञप्तिरूप एवात्मा मोक्षशास्त्राधिकारीति चेन्न; तस्य ज्ञातृत्वमन्तृत्वाद्यसंभवेन श्रवणमननाद्ययोगात्, नित्यमुक्तस्वभावतयाऽपवर्गार्थित्वासंभवाच्च। ज्ञातृत्वदुःखित्वाध्यासात्सर्वमुपपद्यत इति चेन्न; तदध्यासप्रलापानामन्यत्रोत्सारितत्वात्। एतेनात्मनोमपवर्गार्थमहमर्थरूपो ज्ञाता प्रवर्तत इति च प्रयुक्तम्, दृष्टादृष्टरूपप्रयोजनान्तरमन्तरेण परार्थं स्वानर्थस्य परमकारुणिकैरप्यनभ्युपगमात्। तदेतत्प्रियतमोज्जीवनार्थं मुण्डोपहारवदित्यायातम्। अपि च यद्यहमर्थो नात्मा कथमनात्मनि देहेऽहंबुद्धिः देहात्मभ्रम इत्युच्यते? स हि त्वत्पक्षे देहाहङ्कारभ्रम इत्यभिधीयेत। आत्माहङ्कारयोरैक्यभ्रमाद्देहाहङ्कारभ्रम एव देहात्मभ्रम इति चेन्न; तद्भ्रमस्याद्याप्यसिद्धेः। संविद्रूपस्य चाहं जानामीत्यादिना

फलेति। अहमर्थेनसह अविद्याग्रंथिविलयस्य त्वन्मते मोक्षत्वात्फलस्वरूपज्ञानं नस्वात्मावस्था न संभवादिति भावः। नित्यसंसारेति। अहमर्थस्थितिमपेक्षमाणस्य तद्विनाशहेतुमोक्षसाधने प्रवृत्तिर्नस्यादिति नित्यसंसारप्रसंग इत्यर्थः। ननु मोक्षेप्यहमर्थस्थितिभ्रमेण तत्साधने प्रवृत्तस्य मोक्षः सेत्स्यतीत्याशंकते। अहमर्थेति। स्वस्यैव नाशे स्वसंबंधितया काम्यमानस्य पुरुषार्थस्यासिद्धेश्शास्त्रस्य विप्रलंभकवाक्यवत्पुरुषार्थपरत्वं न स्यादित्याह तथा सतीति।

ननु दुःखस्यातिदुःस्सहत्वादात्मनाशेपि लोके प्रवृत्तिर्दृश्यत इति शंकते। अस्तु तर्हीति। तदपीति। संसारोह्यनिष्टत्वात्मृत्युरित्युच्यते। अतः स्वनिवृत्तिरपि सकलसुखोच्छेदकत्वेन अनिष्टत्वान्मृत्युरेवेत्यर्थः। ब्रह्मैवेति। विनष्टस्य वेदितुरहमर्थस्य ब्रह्मभावसर्वदर्शनयोरसंभवादिति भावः। तस्य ज्ञातृत्वेति। ज्ञातृत्वादि स्वरूपयोग्यस्य श्रवणादिकं न संभवतीति तद्विधिशास्त्रं व्यर्थस्यादित्यर्थः। बंधाभावाच्छास्त्रबला भावाधिकार्यभावात् शास्त्रं व्यर्थमित्याह। नित्यमुक्तेति। सर्वमिति। श्रवणादिकमपवर्गार्थित्वं चेत्यर्थः। अध्यासासंभवस्य प्रागुक्तत्वादित्याह तदध्यासेति। एतेनेति। वक्ष्यमाणेनेत्यर्थः। दृष्टादृष्टेति॥ यद्यपि योधृमरणतादौ स्वानर्थे प्रवृत्तिर्दृष्टा तथापि सादृष्टादृष्ट प्रयोजनार्थ परमकारुणिकोऽपि स्वप्रयोजनानपेक्षः परानुग्रहे प्रवर्तते। तथापि स्वानिष्टं न सहत इति भावः। मुंडोपहारः देवतां प्रति कबंधोपहारः स्वशिरच्छेद इति यावत्। मुष्कोपहारः इति क्वचित्पाठः। मुष्कः मेढ्ं वृषणोच्छेदे प्रियतमोज्जीवनेन न किंचित्प्रयोजनमिति भावः। आत्माहंकारयोरिति। आत्माहंकारयोरहमित्यभेदाध्यासः। तदभेदाध्यासो देहे स्थूऽलोहं कृशोऽहं इति ततो देहाहंकारतादात्म्यवदात्मभेदोऽपि प्रतीय्यत इत्यर्थः। तद्भ्रमस्येति। अहमिति

तद्धर्मभावादिविरुद्धधर्मवत्तया प्रतीयमानस्याहमर्थेन देहेन वा तादृशभ्रमप्रसङ्गाभावात्। ततश्च देहात्मवादनिराकरणप्रयासोऽपि निरर्थकः स्यात्, देहश्चैतन्यमिति चार्वाकैरप्यनङ्गीकारात्। देहस्याहन्त्वचेतनत्वादिप्रतिक्षेप एव हि तान्प्रति क्रियते। अन्यथा तेषां सिद्धसाधनत्वात्।

यदि चाहमर्थो नात्मा, तस्य प्रत्यक्त्वमपि न स्यात्, अहंबुद्ध्यैव प्रत्यगर्थस्य परागर्थाद्विवेकात्। ''युष्मदस्मत्प्रत्ययगोचरयो''(शांकर भा १-१-१) रित्यादि हि भवदीयभाष्येऽप्युक्तम्। नन्वहमर्थविषयेंऽशद्वयमस्ति, तत्र तत्प्रकाशांशः प्रत्यक्पदार्थः, तदधीन प्रकाशोऽहन्त्वांशः परागर्थः, इदं रजतमिति भ्रमे शुक्तिरजतांशभेदवदिति। तदप्याशामोदकमात्रम्, इदं प्रत्ययेऽपि कश्चित्प्रत्यगंशोऽस्तीति निष्कर्षप्रसङ्गात्। उपलम्भविरुद्धः स इति चेत्, तुल्यम्। अहंप्रत्ययविषयेऽपि वस्तुन्येवेदमंशः परकीयानुमानाद्दृश्यत इति चेत्; तर्हि तत्रैवेदंप्रत्ययगोचरे प्रत्यगंशोऽपि सिद्ध इति तद्वदेव घटादिष्वपि तत्कल्पनाप्रसङ्गः। नात्र परात्मनीदमंशः प्रतीयते, अपि त्वेकमेव वस्त्वंशभेदमन्तरेणापि प्रतिसंबन्धिभेदेनाहन्त्वेदन्त्वाभ्यां प्रकाशत इति चेन्न; अहमर्थप्रकाशोऽप्येकस्यैव पुत्रत्वेन पितृत्वेन प्रतीतिवत् इदमंशभानप्रसङ्गात्। तत्रापि कदाचिदयमहमस्मीति प्रतिभातीति चेन्न; देवोऽहमित्यादिषु देवादिशब्दवत्

ज्ञानस्याहमर्थातिरिक्ते तरभेदावगाहित्वे मानाभावात्तद्भ्रमाधीन देहात्मभ्रमासिद्धेरिति भावः। तदेवोपपादयति। संविद्रूपस्येति। परेण संविद एवात्मतयांगीकारत्तस्याश्चाहमर्थधर्मतया प्रतीय्यमनत्वेनाहमथभिदध्यासस्तदधीनो देहाभेदाध्यासश्च संभवतीत्यर्थः। यद्यपि अयं शुक्तिरजतभिन्नेति ज्ञान दशायामेव इदं रजतमिति बुद्धिरुत्पद्यते तथापीति। प्रकृते प्रत्यक्षतो भेदज्ञानेतदभेद भ्रमासंभव इति भावः। नैरर्थ्यक्यमेवोपपादयति। देहश्चैत्यन्यमिति। नन्विदं दूषणं सर्वेषामपि समानमित्यत आह देहस्येति। तान् प्रति देहस्याहंत्वचैतन्यादेरेव निराकरणात् न साधारण्यमिति भावः। तत्र हेतुमाह। अन्यथेति। चार्वाकैश्चैत्यन्यस्य देहधर्मतयांगीकाराद्देहभेदानंगीकारादिति भावः।

नन्विति। अहं बुद्धिविषयत्वं पराक्त्वाद्भेदे प्रयोजकं न भवतीति भावः। तदधीनेति। चैतन्यस्वरूपे स्वप्रकाशतया प्रकाशमाने तत्राध्यस्तस्याहमर्थस्य तदभिन्नतया प्रकाशोऽहमिति प्रकाश इत्यर्थः। इदं प्रत्ययेऽपीति। अयं घट इत्यादि प्रतीतावपीत्यर्थः। अत्र यद्यपि घटस्सन्निति सद्रूपचैतन्यांशोऽस्त्येव तथापि प्रत्यगंशोऽहमिति प्रतीतिप्रयोजकोंऽशो विवक्षितः अन्यथा अहं प्रतीतिरेतत्प्रत्यग्वस्तुगोचरा इदं प्रत्ययस्तु न तथेति व्यवस्था न स्यादिति भावः। उपलंभेति। इदमहं न भवति इदं प्रत्ययविषयात्प्रत्यग्वस्तुनो भेदानुभवविरोधादित्यर्थः। तुल्यमिति। अहंप्रत्ययविषयस्यापि इदमर्थापेक्षया अहमिदं न भवामीति भेदानुभवविरोधान्नाहं प्रत्ययविषयः इदमंश इत्यर्थः। नन्वहं प्रत्ययविषयः इदमंशोऽपि इत्यत्रानुभव विरोधोस्ति अहं प्रत्यय विषयेपि इदमंशानुभव एव वर्तत इति शंकते। अहं प्रत्ययेति। परेणानुमानादाविति। क्वचित्पाठः परस्येत्यर्थः। तर्हीति। अविशेषादिति भावः। नन्विदमंशो परमात्मप्रतीतौ नास्त्येव अपितु एकस्यैव वस्तुनः उभयथापि प्रतीतिरिरिति तद्दृष्टांतेन न घटादौ साधनं युक्तमिति शंकते नात्रेति। अहमर्थे इदंत्वस्य सत्वादिति भावः। तत्रापीति। तथा च नानिष्टमिति भावः। देवोहऽमिति। यद्यपीदंत्वस्य अहमर्थगतत्वेऽपि नदोषः। नचेदंत्वस्य पराक्त्व व्याप्तत्वात् प्रत्यक्त्वविरोधः परमात्मन इदंत्वेन अनुमानात्तद्व्याप्तिभंगात्। नच स्वेन भासमाने

विशेषणविवक्षया तत्रेदंशब्दप्रयोगात् । तस्य चांशस्यास्माभिरपि परत्वाभ्युपगमात् । प्रतिसंबन्धिनिरूप्योऽहमर्थो न स्वरूपं भवितुमर्हतीति चेन्न; पुत्रादिष्वपि तत्प्रसङ्गात् । प्रतिसंबन्धिनिरपेक्षं मनुष्यत्वाद्याकारान्तरं दृश्यते, अतस्तत्र न दोष इति चेन्न; अत्रापि वस्तुत्वचेतनत्वाद्याकारान्तरसिद्धेः।

नन्वहं शब्दप्रत्यभिज्ञानादहंकार एवाहमर्थ इति निश्चीयते, स च क्षेत्रान्तर्भूतो भगवता परिगणितः, ''महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च'' (श्री.गी.१३-७) इत्यारभ्य ''एतत्क्षेत्रमिति'' (गी.१३-६) वचनात्, ''निर्ममो निरहंकार'' इत्यादिषु च हेयतयाऽयमुपदिश्यते, अतो नात्मा भवितुमर्हतीति। तदसत्, बुद्धिशब्दप्रत्यभिज्ञानेन भवदभिमतसंविदोऽपि बुद्धिपर्यायवाच्यमहत्तत्वानतिरेकप्रसङ्गात् । अध्यवसायाख्यकार्योपकरणत्व मात्रेण तत्र बुद्धिशब्द इति चेत्; तर्हि अनात्मनि देहे अहमभिमानाख्यकार्यकरतयाऽत्राप्यहंकारशब्द इति भाव्यम् । अहम्भावान्तरहेतुत्वं न शब्दशक्त्या प्रतीयत इति चेन्न; अभूततद्भावार्थच्विप्रत्ययमुत्पाद्य व्युत्पत्त्या तदुपपत्तेः । क्षेत्रान्तर्भावपरिगणनं तु बुद्धेरप्यविशिष्टमिति। संविदोऽपि क्षेत्रकुक्षिनिक्षेपे नैरात्म्यवादप्रसङ्गः, समाधिश्च समान एव। निरहंकार इत्यादिषु गर्वपर्यायोऽहंकार उत्कृष्टजनावमानहेतुत्वादनर्थहेतुरिति हेयतयोपदिश्यते; न पुनरहमर्थोऽहंकारतत्त्वं वा, तयोरुपाधिमन्तरेणानर्थहेतुत्वाभावात् । तथा च सत्युपाधेरेव हेयत्वापत्तेः। नचाहंभावः स्वरूपेण त्यक्तुं शक्यः, त्यागबुद्धावपि तदनुप्रवेशात् । सुषुप्तिमूर्छादिषु तत्त्यागाभ्युपगमेऽपि

इदंत्वं प्रत्यक्त्वविरोधि अयमहमस्मीति भानादेव विरोधाभावात् तथापि तत्र तत्र प्रत्यगपेक्षया भिन्नमेव इदं वस्तु तदात्मनाध्यासात्प्रतीयत इति तव मतं । तदा प्रत्यग्भूतमहंवस्तु तदपेक्षयाभिन्नमेव । इदं वस्तु देवादिवत् तदात्मनाध्यासात्प्रतीयत इति वक्तुंशक्यमिति भावः । नन्वहमर्थस्य प्रतिसंबंधिनिरूप्यस्य पुरुषविशेषनिरूप्यसर्पादिवदेकरूप धर्मविरहात् स्वरूपशून्यत्वान्नात्मत्वमिति शंकते । प्रतिसंबंधीति । पुत्रादिष्वपीति । पितापुत्रादेरपि प्रतिसंबंधिनिरूप्यत्वात् स्वरूपं न स्यादित्यर्थः । ननु प्रतिसंबंधिनिरूप्याकारमात्रमेव चेत् यस्य धर्मः स तस्य निस्स्वरूपत्वं नतु प्रतिसंबंधि निरूप्याकारेणेति शंकते। प्रतिसंबंधि निरपेक्षमिति। आदिशब्देन प्राणित्वादिर्गृह्यते। तर्ह्यहमर्थस्यापि नातिस्वरूपत्वमिति परिहरति। अत्रापीति। आदिशब्देन कर्तृत्वादि परिग्रहः।

नन्वेवमपि नाहमर्थ आत्मा भवितुमर्हति क्षेत्रत्वात् हेयत्वाच्च देहादिवदिति शंकते नन्विति । अहंशब्देनाहंकारशब्दार्थः प्रत्यभिज्ञानसिद्धिरिति परिहरति तदसदिति । किं च बुद्धिशब्दश्च संविच्छब्दपर्याय इति तत्प्रत्यभिज्ञया क्षेत्रांत र्भावादात्मत्व संविदोऽपि न स्यादित्याह बुद्धिशब्दप्रत्यभि ज्ञान इति। ननु तत्र बुद्धिशब्दो न संवित्प्रवृत्ति निमित्तकः। अतो न तत्प्रत्यभिज्ञानमिति शंकते। अध्यवसायेति। अत्रापीति। तथा च प्रवृत्तिनिमित्त भेदादपि न प्रत्यभिज्ञेति भावः। अहंभावं नेति। अहं शब्दस्याहं भावना परत्वाभावादिति भावः । अभूतेति । अनहं देहाद्यहं करोतीति विवक्षायां स्वरूपस्य स्वतस्साध्यत्वा भावाज्जापाकुसुमस्य स्फटिके रक्तत्वाहेतुवत्तद्भावनायां पर्यवस्यतीति भावः। क्षेत्रांतर्भावस्य कःपरिहार इत्याशंक्य तदंतर्भावो नास्तीति उभयं समाधेयमित्याह क्षेत्रांतर्भवेति। हेयत्वोपदेशोपि नाहमर्थस्येत्याह निरहंकार इत्यादिना। नन्वर्थहेतुनाप्यनर्थवद्धेयता प्रयोजकेति तयोरपि तद्धेतुत्वाद्धेयता स्यादित्यत्राह।

नासौस्वशक्त्या, दैवादापन्नत्वात्। अहंभावस्य चोपादेयत्वमेव श्रुत्या प्रतीयते अथातोऽहंकारदेशः (छां-७-२७-१) ''अहमेवाधस्तादहमुपरिष्टात्'' (छां ७-२५-१) ''त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि भगवो देवते तद्योऽहं सोऽसौ योऽसौ सोऽहमि'' (जाबाला इति शांकरे) त्यादिषु तत्त्वमसि निरूपणे चैषामबाधितं सामानाधिकरण्यमनुसन्धेयमिति सिद्धमनारोपितज्ञातृत्वविशिष्टोऽहमर्थ एवात्मेति॥

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्तचार्यस्य कृतिषु शतदूषण्यां अहमर्थात्मत्वसमर्थनवादः षड्विंशः॥२६॥

तयोरिति। शरीरादिरूपाधिरन्यथा भवन्मतेपि संविदोप्यध्यासहेतुतया त्यागप्रसंगादिति भावः। त्यागानुष्ठानासंभवाच्च निरहंकारवाक्यं न तत्त्यागविधिपर इत्याह। सुषुप्तीति। श्रुतिबलादपि निर्ममादिवाक्यं नाहमर्थत्यागपरमित्याह। अहं भावस्य चेति। असाधित इति। उपासनार्थमहमर्थ उपदिश्यत इत्यर्थः। तथाहं ग्रहोपासन प्रकारं दर्शयति। त्वंवेति। तद्योहमिति। तत्तस्मात्कारणात् अहं यः यद्रूपः असौ सः अहमर्थ ईश्वरः स यःईश्वरो यद्रूपः असावपीश्वरः अहमित्यर्थः तत्वमसि इति। तत्रापि त्वंपदस्याभिमुखावस्थाहमर्थः परत्वादुपादेयत्वमेव न च तत्र सामानाधिकरण्यार्थं चैतन्यमात्रे लक्षणेति वाच्यं। मुख्यार्थस्य सामानाधिकरण्ये बाधकाभावाद्देवदत्तो गौर इत्यादिषु विशिष्टसामानाधिकरण्योऽपि मुख्यत्वादिति भावः।

'अत्मानं' चेद्विजानीयादहमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनु संचरेत्;''

इति निष्कृष्टात्मविषयकं ज्ञानं अहंत्वप्रकारतया अभिलर्पत्याश्रुतेः।

''आत्मन्येष न दोषाय शब्दोहमिति यो द्विजः। अनात्मन्यात्मविज्ञानं शब्दो वा भ्रांति लक्षणः॥''

इति स्मृतेः। बाल्ये योऽहंपितरमन्वभूवं इदानीं नप्तॄन् उतु भवामीति प्रत्यभिज्ञाबलाच्च ज्ञातृत्वादिविशिष्टोहमर्थ एवात्मेति सिद्धमित्याह। इति सिद्धमिति।

॥ इति वत्सकुलजलधिकौस्तुभ नृसिंह गुरुसुतेन सिंहदेवेन कृतायां शतदूपणी टीकायां षड्विंशस्समाप्तः॥

॥अथ ज्ञातृत्वाध्यासभङ्गवादः सप्तविंशः ॥२७॥

तमाश्रये यस्त्विह चेतनानामेको बहूनां विदधाति कामान्।
शक्तिः परा यस्य समस्तसूतिः स्वाभाविकी ज्ञानबलक्रिया च॥

यदाहुः-ज्ञातृत्वादिप्रकाशो भ्रान्तिः, देहात्माभिमानवत एव जायमानप्रकाशत्वात्, स्थूलोऽहमित्यादिप्रतीतिवदिति, तदसत्; हेत्वसिद्धेः। न हीश्वरस्य योगिनां मुक्तानां वा देहात्मभ्रमः, न च तेषां ज्ञातृत्वादिकं न प्रकाशते। यथा परं ब्रह्मैव सङ्कल्पयति-"हन्ताऽहमिमास्तिस्रो देवता" (छां-६-३-१) इत्यादि। अस्ति च "वेदाहं समतीतानी" (गीता-७-२६)त्यादिभगवद्गीतावाक्यशतम्। तथा "तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्च" (बृह-३-४-१०) "सर्वं ह पश्यः पश्यती" (छां-७-२६-२)त्यादिभिर्योगिनां मुक्तानां चाहंत्वज्ञातृत्वादिप्रतिपत्तिः। अन्यथा संवित्स्वरूपप्रतिभानस्यापि भ्रान्तित्वप्रसङ्गः। देहात्मभ्रमनिवृत्तावपि तत्प्रतिभासोऽस्तीति चेत् कुतः? श्रुतेरिति चेत्, तुल्यम्। किंच ज्ञातृत्वावभासो निरधिष्ठानस्साधिष्ठानो वा? नाद्यः, अपसिद्धान्तात्। न

आत्मप्रसंगचिंतांतरमपिसंगत मित्यभिप्रायेण वादार्थ संगृह्णाति। तमिति। "नित्योनित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति कामानि" (श्वे ६-२३, कठ २-१५.२३)ति श्रुति सिद्धार्थ चेतनानांमिति पदेन सूचितः। कल्पितत्वं श्रुत्यापराचष्टे। शक्तिः परेति। "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचे" (श्वे.६.८)ति श्रुतेस्स्वाभाविकत्वस्य पारमार्थिकत्वस्य सिद्धेरिति भावः। तथा च भगवतो ज्ञानात्मकस्य पारमार्थिकज्ञातृत्वादिसिद्धौ तन्न्यायेन चेतनानामपि पारमार्थिक ज्ञातृत्वादिकमिति भावः।

ज्ञातृत्वेति। नन्वंतः करणगततया ज्ञातृत्वप्रकाशे बाधः स्थूलोऽहं जानामीति प्रतीतौ च सिद्धसाधनमिति चेन्न। अहं जानामीति व्यवहार हेतुभूतप्रकाशत्वेन पक्षत्वान्नदोष इति भावः। यद्यहं जानामीति व्यवहार हेतु प्रत्ययःकदाचिद्देहविषय तदा देहविषयत्वेनापि विशेषणीयं। भ्रांतिरिति। अत्र विशेष्यावृत्तिप्रकारत्वं विवक्षितं। न मिथ्यात्वं। कर्तृत्वादेरात्मन्यौपाधिकत्वस्य सिषाधयिषितत्वात्। देहेति। समानाधिकरणदेहात्मभ्रमप्रागभावकाले जायमानत्वादित्यर्थः। तेनाविद्यानिवर्तक चरमसाक्षात्कारे न व्यभिचार इति बोध्यं। तदसदिति। इदानीं तन घटप्रमायां व्यभिचार इति भावः। ननु समानाधिकरणदेहात्माभिमानप्रागभावशून्येऽसंभाव्यमानतज्जातीयत्वविवक्षायां दोषमाह हेत्वसिद्धेरिति। असिद्धिमेवोपपादयति नहीति। प्रतिपत्तुरभिन्नाहं प्रत्ययत्वादिति। विवक्षितुमीश्वरस्य मुक्तानां च योगिनां च अहंकार एव अहंत्वप्रकारकप्रतीतिरित्यत आह। यथा परमिति। तद्धैतदिति। योगिनः "सर्वंः ह पश्यः पश्यतीति" (छां ७-२६-२)। मुक्तानां च तादृशाहंप्रत्ययोसीति तदप्यंसिद्धमिति भावः। व्यभिचारोऽपि तत्रेति बोधकत्वं हेतुश्रुत्या ज्ञातृत्वसिद्धेः। तत्समानाधिकरणमहंत्वमपि सिद्धमेवेति सर्वदर्शनसिद्ध्या तत्सिद्धिरिति भावः। अन्यथेति। असिध्यभावे सर्वज्ञानयाथार्थ्यप्रसंगादिति भावः। ननु सर्वथा वर्तमानत्व हेतुरित्यभिप्रायेण शंकते। देहात्मेनि ' ''नेरितीति ॥ स्वप्रकाशनित्यत्वादिश्रुतेरित्यर्थः। तुल्यमिति।

द्वितीयः, संविदधिष्ठानत्वे तत्सामानाधिकरण्येनानुभवितुः ज्ञातृत्वं ज्ञानमिति प्रकाशप्रसङ्गात्; इदं रजतमिति शुक्तिसामानाधिकरण्येनेव रजतस्य । अधिष्ठानान्तरस्य तु परमार्थस्यानभ्युपगमात्, अपरमार्थस्याप्यन्ततस्संविदधिष्ठानत्वेनोक्तदोषानपायात् । दर्पणादिषु व्यधिकरणतया मुखाद्यध्यासस्तर्हि कथमिति चेन्न; उक्तोत्तरत्वात् । तत्र हि परमार्थभूते दर्पणे मुखदेशत्वमध्यस्ते । तत्र च सामानाधिकरण्यमस्त्येव।

किंच सत्यस्य दर्पणस्याधिकरणत्वं मुखस्य चारोपितस्याधेयत्वं पश्यामः, अत्र तु सत्यतयाऽभ्युपेतायास्संविद एव मुखवदारोपितत्वाभिमतोऽहमर्थ एवाधिकरणतया प्रतीयते । एवं मुखदर्पणसंसर्गाध्यासपक्षेऽप्यधिकरणसत्यत्वादसिद्धिः। ननु दर्पणे मुखदेशत्वारोपः, मुखे वा दर्पणदेशित्वारोपः, एवमत्रापि संविद्यहमर्थदेशित्वारोप इति कः पक्षपातः? यथा संप्रतिपन्नस्य देवदत्तस्य गन्धर्वनगरदेशित्वारोप इति चेन्न; सामग्रीसंभवासंभवाभ्यां विशेषात् । तत्र हि दर्पणप्रतिहतप्रतिस्रोतः प्रवृत्तनयनालोकेन देशवियुक्तमुखमात्रग्रहणेऽनुकूलस्रोतसा च दर्पणदेशे गृह्यमाणे देशत्वादिसाम्यान्मुख देशभेदाग्रहणाच्च मुख देशत्वारोपसंभवः; मुखे च यत्किंचिद्देशवर्तिनि दर्पणदेशवृत्तिवस्त्वन्तरेण देशित्वादिसाम्यात् अन्यदेशवृत्तित्वाग्रहाच्च दर्पणदेशित्वारोपः, अत्र तु संविदि निर्विशेषायां देश्यन्तरसाम्यासंभवात्तद्भेदाग्र(हणा)हासंभवाच्च कथमहमर्थदेशित्वाध्यासः? अहमर्थे तर्हि संविद्देशत्वाध्यास इति चेन्न; तदध्यस्तस्य अहमर्थस्य तत्सामानाधिकरण्यप्रतीतियोग्यस्य रजते

उक्तश्रुतिभिः''अहमन्नमि''(तै.उ.भृ.)त्यादि श्रुतिभिश्चेत्यर्थः । तत्सामानाधिकरण्येनेति । तच्छब्दोज्ञातृत्वपरः । अनुभवितुश्चिद्रूपात्मनः इत्यर्थः । सामानाधिकरण्यं अभिन्नता किं ज्ञानत्वेन प्रतीतेर ध्यासः उतस्वरूपेण आद्ये ज्ञातृत्वं ज्ञानमिति प्रतीतिप्रसंगात् । द्वितीये ज्ञातृत्वमिति निरधिकरणतया भासेतेति भावः । संविदोन्यदधिष्ठानं चेन्न दोष इत्यत आह । अधिष्ठानांतरस्येति । उक्तदोषादिति । सदिदं रजतमिति । रजतस्यसत्तेव अत्रापि स्वाधिष्ठानसंविदा सामानाधिकरण्यात् पूर्ववद् ज्ञातृत्वं ज्ञानमिति प्रकाश प्रसंगादित्यर्थः । अध्यासे अधिष्ठानसामानाधिकरण्यप्रतीति नियमो नास्तीत्यत आह ॥ दर्पणादिष्विति । अध्यस्तस्य अधिष्ठान गततया प्रतीतिमात्रेदृष्टांततयोक्तिः नतु प्रतिबिंबत्वे । ततश्च ज्ञातृत्वाहंतृत्वयोस्संविदध्यासाहं ज्ञातेति समानाश्रयतया प्रतीतिरूपपद्यत इत्यर्थः ।

किं मुखमध्यस्यते उत मुखसंसर्ग इति विकल्पमभिप्रेत्याद्येदोषमाह सत्यस्येति । ज्ञातृत्वाध्यासोऽहं जानामीति प्रतीतिरेव । तत्र च ज्ञानमेवाधेयतया अहमर्थ एवाधिकरणतया प्रतीयते तच्चायुक्तमित्यर्थः । द्वितीये दोषमाह । एवं मुखदर्पणेति । अथाहमर्थ एव सद्रूपं । अद्वितीयमिति संविदो मिथ्यात्वं स्यादित्यर्थः । नन्वन्यतरस्मिन् अन्यतर संसर्गाध्यासमात्रेण न तयोः सत्यत्वमिथ्यात्वनियमो दर्पण मुखयोस्सत्यत्वादिति शंकते नन्विति । तथाप्यधिकरणस्य सत्यत्वं स्यादित्याशंक्याधिकरणमिथ्यात्वे दृष्टांतमाह यथेति ।सामग्रीति अध्याससामग्रीत्यर्थः । तदेवोपपादयति । तत्रा हीति । अत्रा त्विति । सादृश्यं हि भेदाग्रहहेतुः । तस्य निर्विशेषे वक्तुमशक्यत्वात्तदभावे न तदाभावादारोपसामग्रय भाव इति भावः । पूर्वदोषे सत्येन दोषांतरमाह । तदध्यस्तेति । चैतन्येध्यस्तत्वादहमर्थस्य तस्मिन् चैतन्य स्संसर्गारोपो न

शुक्तिदेशत्वाध्यासवत्तदनुपपत्तेः। मणिप्रभाविषयसप्रभाकमण्यारोपवत्सर्वमुपपन्नमिति चेन्न; प्रभाश्रयस्य परमार्थमणेस्संप्रतिपन्नत्वेन तस्य तत्प्रभायां तत्साम्यादिभिरारोपस्योपपत्तेः। अत्रापि यदि ज्ञानाश्रयस्सत्य इष्यते ज्ञानस्य सत्यं साधर्म्यम्, तदा तद्धर्मे ज्ञाने कुतश्चित्तदारोपस्संभवतीति शङ्क्येत। न च तत्साधर्म्येऽपि तस्य संभवः, प्रभावद्धर्मभूतस्य ज्ञानस्य धर्मिणमन्तरेण कदाचिदपि प्रकाशासंभवात्। धर्मधर्मिभावेन तु प्रतीतौ धर्मे धर्म्यारोपासंभवात् गमने गन्तृत्वारोपवत्तदसंभवः। न हि मणिधर्मतयैव प्रतीतायां प्रभायां मणिबुद्धिसंभवः।

स्फटिकरागायःपिण्डौष्ण्यादिवत्संविद्यपि तच्छायापत्तितः संसर्गतो वा ज्ञातृत्वमस्त्विति चेन्न; जपाकुसुमवह्न्यादेर्वास्तवरागौष्ण्ययोगेन तच्छायापत्तिसंसर्गाभ्यां तद्गुणकत्वेन प्रतीत्युपपत्तेः; अत्र तु संविद्यहंकारे च वास्तवज्ञातृत्वानभ्युपगमात्, अवास्तवज्ञातृत्वच्छायापत्त्यादावन्योन्याश्रयानवस्थादि दोषात्। ज्ञप्तिमात्रत्वच्छायापत्त्यादौ ज्ञप्तिमात्रप्रतिभासप्रसङ्गाच्च। अहङ्कारवृत्तिविशेषेऽनुभवस्य

युक्तः। शुक्त्यध्यस्तु रजते शुक्तिदेशत्वाध्यासासंभवादिति भावः। अहमर्थदिशित्वारोपपक्षेप्ययं दोषस्सम इति बोध्यं। ननु मणि प्रभायां सप्रभाकमण्यारोपे प्रभाया यथाधिष्ठानत्वप्रतीतिः मणिगतत्व प्रतीतिश्च तद्वत् ज्ञातृत्वविशिष्ठस्य अहमर्थस्य संविदध्यासात्। संविदाभेद प्रतीतिः संविदाश्रयत्व प्रतीतिश्चेतिशंकते। मणिप्रभेति। नेति। मणौ प्रभानारोप्यते स्वतः सप्रभाक मणिः प्रभायामारोप्यते। अहमर्थस्यतु संविदनाश्रयत्वात् संविदारोप्यत इति वाच्यं। तथाच पूर्वन्यायेन अहमर्थे संविदारोपो न स्यादिति पूर्वदोषस्तदवस्थ इति भावः। सत्यस्य ज्ञानाश्रयस्य संभवे चैतन्ये निर्धर्मकि सत्यसादृश्याभावान्नारोप इत्याह तेन चेति। ननु सत्य भूतसादृश्याभावेपि समुद्रजले अध्यस्तनीलरूपसादृश्यान्नील शिलात्वाध्यासवदारोपित सादृश्यादप्यध्यासस्संभवतीत्यत आह न चेति। प्रभाया मणिधर्मतया प्रत्यक्षसिद्धा तथा ज्ञानमप्यहमर्थ धर्मतया प्रत्यक्षसिद्धं तच्च यदि धर्मिणमंतरेण कदाचित्प्रतीय्येत तदा तथा भासमाने अध्यास इति शंक्येत। न च धर्मिणमंतरेण ज्ञानस्य कदाचित्प्रतीतिरित्यर्थः। नहीति। यदवच्छेदेन मणि धर्मता प्रतीतिस्तदवच्छेदेन मणित्वप्रतीतिर्नसंभवति। किंतुरक्ततामात्रेण प्रतीत इत्यर्थः।

नन्वौपाधिक भ्रमत्वान्न सादृश्यापेक्षा नापि विशेषदर्शनं प्रतिबंधकमिति शंकते स्फटिकेति। स्फटिके रागस्य छायापत्तिर्वा अयः पिंडसंसर्गाद्यौष्णवत् चितिछायापत्या संसर्गतो वा ज्ञातृत्वमित्यर्थः। अन्योऽन्येति। संविदि ज्ञातृत्वं अहंकारच्छायापत्त्या अहंकारे तु तादृशः संवविच्छायापत्त्या अन्योन्याश्रयः। यद्यन्यछायापत्याहंकारे ज्ञातृत्वं तदा तस्मिन्नप्यन्यच्छायापत्येति अनवस्थेत्यर्थः। ननु ज्ञातृत्वविशिष्टस्य चैतन्यस्य छायापत्तिः येनान्योन्याश्रयस्यात्। किं तु ज्ञप्तिगतस्य ज्ञाप्तित्वमात्रस्य अहमर्थे छायापत्तिः तथाचाहमर्थस्य ज्ञानत्वे सिद्धे तस्य संविदि छायापत्त्या संविदो ज्ञानाश्रयत्वप्रतीतिसंभव इत्याशंक्यैव मप्यहमर्थे ज्ञातृत्व प्रतीतिर्नस्यात् अहं ज्ञानमित्येवभानं स्यादित्याह। ज्ञप्तिमात्रत्व इति। आदिशब्देन संविच्छाया पत्तिरूप संशिश लब्धज्ञानता न स्यात्। अहंकारस्य संविदिच्छायापत्तिर्विवक्षिता। नन्वंतः करणवृत्तिविशेषो अभवस्यच्छायापत्तिः तस्तरक्तः स्फटिक इत्यत्र प्रतिबिंबितरक्तद्रव्यस्य स्फटिके नैव सत्यभेदेन प्रतीतौ अहमर्थस्य ज्ञातृत्वे सति तदभेदाध्यासतादात्मनो ज्ञातृत्वोपपत्तिरिति शंकते। अहंकारेति। शब्दादीनां प्रतिबिंबाभावस्य पूर्वेरूक्ततया तन्यायेन चैतन्यस्यापि प्रतिबिंबो न संभवतीति परिहरति शब्देति।

च्छायापत्त्या ज्ञातृत्वप्रकाश इति चेन्न; शब्दगन्धरसादीनां की दृशी प्रतिबिम्बतेति न्यायेन नीरूपस्य च्छायापत्त्ययोगात्। भेदाग्रहमूलभ्रमस्यापि निर्विशेषे दुर्निर्वहत्वस्यान्यत्र प्रपञ्चितत्वात्। उभयत्रासिद्धमपि चूर्णहरिद्रासंसर्गजरागवत् ज्ञातृत्वं प्रकाशत इति चेन्न; तथा सति वास्तवज्ञातृत्वप्रसङ्गात्। आगन्तुकचैतन्यवादावतारस्त्वधिकः, लोकायतवादावतारो वा। ते ह्येवमाहुः-"पृथिव्यप्तेजोवायव एव तत्त्वानि, तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदि" (चार्वाकसूत्रं) ति। ननु च ज्ञातृत्वोत्पत्त्यभ्युपगमे स्यादिदं चोद्यम्, न पुनरध्यासे। तथा हि-क्रियाशक्तिमानहङ्कारो व्यञ्जकस्वभावत्वात् दर्पण इव स्वनिष्ठतया मुखम्, स्वक्रियात्मनाऽनुभूतिमभिव्यनक्ति, तत एव जानामीति भ्रम इति। तदपि मन्दम्, नित्यप्रकाशस्यानुभवस्याभिव्यक्तिनैरपेक्ष्यात्; अपेक्षायामपि जडस्याहङ्कारस्य संविद इव साक्षाद्व्यञ्जकत्वाभावात्। इन्द्रियादिवद्व्यञ्जकत्वाभ्युपगमेऽपि तज्जन्यज्ञानान्तरानभ्युपगमेन तदसिद्धेः। ज्ञानान्तराध्यासस्य त्वयापि निरूप्यमाणत्वात्। तज्जन्यज्ञानविषयतया घटादेरिव संविदोऽपि त्वदुक्तप्रकारेणाननुभूतित्वमिथ्यात्वादिप्रसङ्गाच्च।

किंच, किमनभिव्यक्तस्यैवाहङ्कारस्यानुभूतिव्यञ्जकत्वम्? उताभिव्यक्तस्य वा? नाद्यः, सत्याकारत्वेनानारोपितत्वप्रसङ्गात्। न द्वितीयः, संविदभिव्यक्तिमन्तरेण तदनभिव्यक्तेः।

निरूपितस्याचाक्षुषस्येत्यर्थः। निरूपिताधिक भ्रमासंभवस्तु पूर्वमेवोक्त इति स्मारयति। भेदाग्रह मूल भ्रमस्येति। तथा सतीति। अंतः करणचैतन्यसंसर्गादंतःकरणे ज्ञातृत्वं रागदृष्टांताज्जायत इति गम्यते इति भावः। किमंतःकरणे ज्ञातृत्वं जन्यते उत चैतन्यांतःकरणसमुदाये। नाद्य इत्याह आगंतुकेति। ज्ञातृत्वंहि ज्ञानमेव। तथा चाजन्यज्ञानवादिनो जन्यज्ञानानंगीकारात् अपसिद्धांत इति भावः। द्वितीय्ये आह लोकायतेति। बृहस्पतिसूत्रमुदाहरति। एवमिति। तेभ्यश्चैतन्यं संसृष्टेभ्यः। तत्समुदायशरीरे चैतन्यमित्यर्थः। किणुरंकुरितव्रीहिः। न तु दृष्टांतेन सर्वसाधर्म्यं वाच्यं अतिप्रसंगात्। किंतु समुदितस्यान्यकार्यजनकत्वे दृष्टांत इत्याशंकते। ननु चेति। क्रियाशक्तिमान् क्रियात्मनाभिव्यंजक शक्तिमान्। अभिव्यक्तस्यापि सौरालोकस्य करतलाभिव्यंग्यत्वं दृश्यत इत्याह अपेक्षायामपीति। अत्र व्यंजकत्वव्यवहारानुगुण्यरूप प्राकाश्यापादकत्वं विवक्षितं। नन्वत्र व्यजकत्वं तद्व्यवहार हेतु ज्ञानजनकत्वं विवक्षितमित्यत्राह इंद्रियादिवदिति। अभ्युपगमेति। विवक्षायामपीत्यर्थः। तज्जन्येति। ब्रह्मचैतन्यस्यैव ज्ञानत्वाभ्युपगमेन तदजन्यस्य जन्यस्याभ्युपगमे अपसिद्धांतादिति भावः॥ नन्वाध्यासिकज्ञानहेतुतयेंद्रियव्यंजकत्वमुप पद्यत इत्यत्राह ज्ञानांतरेति। अंतः करणे ज्ञानाध्यास एवहीदानीं जन्यते। तत्सिध्यर्थं चांतःकरणस्याभिव्यजकत्वाय ज्ञानांतराध्यासमुच्यते। अयं चोपपादकाध्यासः उपपाद्याध्यासवदेवा सिद्ध इत्यर्थः। अरोपितस्य वा अनारोपितस्य वा ज्ञानांतरास्याभ्युपगमे दूषणांतरमाह तज्जन्येति। अनुभूतेरनुभूतिविषयत्वे अननुभूतित्वप्रसंग इति त्वदुक्ततर्केणेत्यर्थः मिथ्यात्वादित्यादि शब्देन जडत्वादिग्रहणं। सत्तयेति। मिथ्यावस्तुनः प्रतीतिव्याप्तत्वादिति भावः।

किमनभिव्यक्ता संवित् अंतःकरणमभिव्यनक्तिउताभिव्यक्ता। नाद्य इत्याह। अनभिव्यक्तायाा इति। द्वितीये संविदोऽभिव्यक्तेरंतः करणेनैवेत्यऽन्योन्याश्रय इत्याह तदभिव्यक्तित इति। तादधीन्येति।

अनभिव्यक्तायाश्च संविदो व्यञ्जकत्वे स्वयंप्रकाशत्वादिपरित्यागप्रसङ्गात् । तदभिव्यक्तितः पश्चादभिव्यक्तस्याहङ्कारस्य तदभिव्यक्तिं प्रति करणत्वे विरोधात्, तादधीन्यादिप्रसङ्गाच्च । पूर्वाभिव्यक्तस्याप्यनुभवस्य तद्व्यङ्ग्येनैवाहङ्कारेण विशदव्यक्तिस्साध्यते, रविकरव्यङ्ग्येन करतलेन पूर्वव्यक्तरविकरविशदीकरणवदिति चेन्न; निर्द्धर्मके निरंशे स्वप्रकाशे वैशद्यासंभवस्यान्यत्रोक्तेः । रविकरे तु सधर्मके सावयवेस्फुटास्फुटभावाद्युपपत्तेः । न च तत्र करतलेन तद्विशदीकरणम्, करतलप्रतिहति वशाद्बहुलीभूतस्यालोकस्य सेतुसंरुद्धस्रोतस इव स्वयमेव बहुलतयोपलम्भात् । न च तत्र निरोध एव नास्तीति वक्तुं शक्यम्, तिरोधानवैयर्थ्यादिप्रसङ्गात् । न च निरोधेऽपि बाहुल्यं नास्तीति शङ्कनीयम्, प्रतीपस्रोतसा तत्सिद्धेः । तच्च दर्पणादिप्रतिफलितरविकिरणैर्गर्भगेहान्धकारनिरसनादिषु सिद्धम् । न च तावता करतलादुपरिष्ठादपि बहुलोपलम्भप्रसङ्गः, मूलाग्रयोरालोकानां घनविरलभावस्य सर्वत्र दीपादिष्वप्युपलब्ध्या प्रतिहतालोकस्याप्यग्रवैरल्योपपत्तेः । न च मात्रयापि पार्श्वालोकात् करतलोपरितनस्यालोकस्य न वैषम्यं दृश्यत इति वाच्यम्, सूक्ष्मस्य वैषम्यस्य दुर्ग्रहत्वात् । अन्यथा माध्यंदिनमार्ताण्डमण्डलालोकमध्यजाज्वल्यमानप्रदीपालोकसन्निधाने तत्रत्यालोकमण्डलस्य

अन्यानपेक्षत्वरूप स्वप्रकाशत्वहानिप्रसंग इति भावः । ननु स्वप्रकाशत्वेनाभि व्यक्तासंवित् स्वाभिव्यक्तेनैवाहंकारिण प्रकाश्यत इति नान्योश्रयः इति शंकते । पूर्वाभिव्यक्तस्येति । किमतिरिक्त धर्मप्रकाशो वैशद्यं उत अवयवविशेषप्रकाशः । यद्वा स्वरूपप्रकाश इति विकल्पमभिप्रेत्य त्रितयस्याप्यसंभवं पदत्रयेणाह निर्धर्मक इत्यादिना । निर्विशेषजिज्ञासाभंगादावित्यर्थः।रविकरेत्विति । पीतत्वविशेषस्यावयवविशेषस्य च प्रागभातस्य भानमस्तीति भावः । ननु प्रागनुभूतांशाभावेपि करतलेन विशदीकरणं दृष्टमित्यत आह । नचेति । तत्र करतलस्य न विशदावभासहेतुत्वं अपितु प्रहत भावप्रयोजकत्वमिति भावः । ननु तत्र बहुळभावना अस्ति । तद्धेतु निरोधस्यैवा भावादित्यत आह नचात्रेत्यादिना । आतपतिरोधानार्थं नामातपत्रादीनां नैरर्थकचा प्रसंगादिति भावः। (+++)वादावदर्शनादित्यत आह न चेत्यादिना । यद्यपि गवादौ नास्ति तथापि प्रवाहादौ तत्संभवतीति भावः । ननु स्रोतसि बाहुल्यमस्तु न तेजसीत्यत्राह । तच्च दर्पणादिष्विति । ननु करतलदर्पणयोः निरोधकत्वसाम्येपि दर्पणनिरुद्धस्य प्रकाशवैशद्याद्यनयो दृश्यत इति चेन्नदर्पण निरुद्धालोकसंसर्गाद्भास्वरतरं तेजोंतरमपि जायते तेनाधिकतेजोवत्वान्न साम्यं । न चात्रापि प्रकाशांतरोत्पत्तेः प्रागेव निरस्तत्वादिति भावः । न चेति । बहुळी भावस्याविशेषादिति भावः । दीपादिष्वित्यादिशब्देन विद्युदादिग्रहः । अग्रवैरल्येति । करतलाद्युपरिदेश इत्यर्थः । ननु करतलप्रतिहत्या बहुळी भावः । तथा सति कर पार्श्व प्रदेशे प्रति हत्यभावाद्बहुळी भावभावे न करतलालोकापेततया करपार्श्वालोके वैशम्यप्रतीतिस्यात् । नच दृश्यते तस्माद्विश्वप्रकाश एव भवतीत्याशंकते नापीति । तत्राप्येकपार्श्वेन निरोधात्तिर्यक्प्रतीतिवृत्तिरस्तीति बाहुलचमस्त्येव । यदि वा वैशम्यमस्तीति तदा सूक्ष्मत्वान्नगृह्यत इति परिहरति । सूक्ष्मस्येति । अन्यथेति । प्रदीपालोकस्य अभिभूतत्वात्तेन बाहुळयेऽप्य ग्रहणमिति तदसंसृष्टालोकान्नवैषम्यग्रह इति चेन्न । प्रतीतिबलादभिभवः कल्प्यते तथा सूक्ष्मत्वात् वैषम्यस्याग्रहःकल्प्यत इति भावः नन्वत्राप्यभिभवः कल्प्यतामित्या शंकते नचेति । उपलंभेति । ननु

बहुलतरत्वेन ग्रहणप्रसङ्गात्। न च करतलप्रतिहतौ मूलेऽपि तत्प्रसङ्गः, उपलम्भव्यवस्थाप्यत्वादुपलब्धियोग्यबाहुल्यस्य।

किंच यत्स्वनिष्ठतयाऽभिव्यक्तेः प्रयोजकं व्यञ्जकत्वम्, तत्किं ज्ञानत्वम्? उत ज्ञानजनकत्वम्? यद्वा इन्द्रियत्वम्? उत तदनुग्राहकत्वम्? उत तत्सम्बनहेतुत्वम्? यद्वा बोद्धृबोध्ययोरन्यतरगतप्रतिबन्धनिराकर्तृत्वम्? अथवा सांख्यादिमते घटादिं प्रति दण्डादेरिव स्वानतिरिक्तस्वाभिमतानुभूतिं प्रति जनकत्वमेवेति। नाद्यः; असिद्धेः, विरोधाच्च। उत्तरे कल्पास्सर्वेऽपि संविदो ज्ञानविषयत्वानभ्युपगमेनैव निरस्ताः। विशेषतोऽपि ब्रूमः। न द्वितीयः, इन्द्रियादिभिरनैकान्त्यात्। न तृतीयः, असिद्धेः। अहङ्काररजन्मनामेकादशानामेव हीन्द्रियत्वं श्रूयते। न चतुर्थः, अदृष्टेश्वरादिभिर्व्यभिचारात्। अत एव न पञ्चमः। इन्द्रियक्रियादिभिश्च व्यभिचारोऽधिकः। न षष्ठः, शमदमादिभिर्दोषादिभिश्चानैकान्त्यात्; दर्पणादिदृष्टान्तस्य च साधनवैकल्यात्। न चाहङ्कारापनेयं किंचिदनुभूतिंविषयज्ञानोत्पत्तिप्रतिबन्धकं संभवति, बाह्यस्यान्धकारादेरिवान्तरस्य किल्बिषादेरप्यहङ्कारनिवर्त्यत्वाभावात्। अज्ञानस्यापि भावरूपस्याभावारूपस्य या ज्ञानमात्रनिवर्त्यत्वात्। भवदभिमताज्ञानस्य स्वरूपाश्रयविषयादिदुर्निरूपत्वस्यन्यात्रस्थापनात्। नच ज्ञानप्रागभावस्तदुत्पत्तिप्रतिबन्धकः, प्रागभावस्य कैश्चित्कारणत्वाभ्युपगमात्, अन्येषामपि कार्यस्य तन्निरसनरूपत्वेन कार्योत्पत्तेः प्रागभावनिरसनापेक्षायामात्माश्रयप्रसङ्गात्।

बाहुळ्ये सत्यपि क्वचित्प्रतीतिः क्वचिदप्रतीतिरिति यदि तदालोकस्य साम्येपि क्वचिद्विशदावभासः क्वचिन्नेत्यस्तु किं बाहुल्यभेदकल्पनयेति चेत्सत्यं एकेंद्रियज्ञानस्य विषयप्रयुक्तवैशम्यं वाच्यं अन्यथाज्ञानाभाव प्रसंगात् शुक्तिरजताकार ज्ञानस्यापि सामग्री विशेषाभावेपि संभवात् यदि रजताकारस्य शुक्तावभावात् अप्रामाण्यं स्यात् तदा विशदत्वस्यापि स्वरूपाभावात् अप्रामाण्य प्रसंगादिति ज्ञानाकारभेदे विषयभेद आवश्यक इति भावः।

तदन्यग्राहकत्वमिति। दीपादिवदिंद्रियानुग्राहकत्वमिति अर्थः। तत्वसंबंधहेतुत्वमिति। दर्पणादिवत् इंद्रियसंबंध हेतुत्वमित्यर्थः। बोद्धृगत प्रतिबंधो विपरीतज्ञानादिः बोध्यगतप्रतिबंधो अंधकारादिः। अथवेति। सत्कार्यवादिनः सांख्यस्य घटाद्यभिव्यक्तेरेतदुत्पत्तिः अभिव्यक्तिश्च घटाभिन्न एवेत्यर्थः। असिद्धेरिति। अंतःकरणस्य ज्ञानत्वाभावादित्यर्थः। विरोधश्चेति। घटादिज्ञानस्य स्वनिष्ठतया घटाद्यभिव्यंजकत्वदर्शनात् इत्यर्थः। ज्ञानविषयत्वनभ्युपगमेनेति। जन्यत्वानभ्युपगमेनेत्यपि द्रष्टव्यं। तेन चरमविकल्प निरासः। इंद्रियादिभिरिति। घटादीनामिंद्रियनिष्ठतया प्रकाशाभावादिति भावः। असिद्धेरिति। इंद्रियत्वासिद्धेरित्यर्थः। तदुपपादयति अहंकारेति। अदृष्टेश्वरादिभिरिति। अनुग्राहकत्वं सहकारित्वं। तददृष्टादेरप्यस्तीति भावः अत एवेति। अदृष्टेश्वरयोः कार्यमात्रे हेतुत्वादिति भावः। इंद्रियक्रियेति। क्रियायास्तत्संयोगहेतुत्वादिति भावः। शमदमेति। शमदमादि बोध्दृगतकल्मषनिवर्तकः। दीपादिः बोध्यगत तिमिरादि निवर्तकः। असिद्धिमप्याह। नचाहंकारेति। अभावरूपस्येति। प्रतियोग्यतिरिक्तनिवृत्त्यभ्युपगमेनोक्तं। अस्तु वाहांकारस्य ज्ञाननिवर्तकत्वं। तथापि भावरूपाज्ञानस्य किं ज्ञानोत्पत्तिप्रतिबंधकत्वं किमभावरूपस्य। नाद्य इत्याह भवदभिमतेति। प्रमाणानुपपत्त्यादिस्थल इत्यर्थः। द्वितीये आह न चेति। कारणत्वेति। प्रतिबंधकत्वे कैश्चिदपि कारणत्वं वक्तुं शक्यं। कारणी भूताभाव प्रतियोगित्वे न तस्य नियतपूर्वसत्वाभावे न कैश्चिदपि कारणत्वस्य वक्तुमशक्यतया कारणत्वशंका स्पदस्य प्रतिबंधकत्वायोगादिति भावः।

किंच व्यञ्जकानां स्वनिष्ठतयाऽभिव्यङ्ग्याभिव्यञ्जनस्वभावत्वे सौगतसौहार्दं प्रकाशितं भवति। अप्रामाण्यं स्वत इति हि तैरङ्गीक्रियते। स्वतः प्रामाण्यभागे चापौरुषेयी श्रुतिरिति न प्रमाणं स्यात्। अथ मन्यसे-आत्मा तावन्निर्विकार इति श्रुतिसिद्धम्, तस्य च ज्ञातृत्वाभ्युपगमे विकारित्वप्रसङ्गः, ज्ञातृत्वं हि गन्तृत्ववत्क्रियाविशेषकर्तृत्वरूपत्वाद्विक्रियात्मकम्; अतः कृतिशक्तिमतोऽन्तःकरणस्य सैव कृतिश्चितिशक्ति रूपात्मसन्निधानेन ज्ञानरूपेव भातीति न क्वचिदपि तात्त्विकं ज्ञातृत्वम्। प्रयोगश्च- ज्ञातृत्वकर्तृत्वाहंत्वादिकं नात्मधर्मः, विक्रियात्मकत्वात्, दृश्यत्वात्, दृश्यनिष्ठत्वात्, अहमर्थसमानाधिकरणतया प्रतीयमानत्वात्, संप्रतिपन्नवत्। अत्रैव विकारिद्रव्यस्थमिति वा साध्यम्। विप्रतिपन्नोऽहंप्रत्ययो नात्मगोचरः, अहंप्रत्ययत्वात्, देहाहंप्रत्ययवदिति; यद्वा, आत्मा वा ज्ञातृत्वकर्तृत्वाहंत्वादिरहितः, निर्विकारत्वात्, अन्तः करणरूपाहङ्कारव्यतिरिक्तत्वात्, अजडत्वात्, प्रत्यक्त्वात्, आत्मत्वादित्यादिभिश्चेति। अत्र ब्रूमः यथा निर्विकारत्वमात्मनश्श्रुतिसिद्धं तथा ज्ञातृत्वमपि तत एव सिद्धम्। तथाहि ''अथ यो वेदेदं जिघ्राणीति स आत्मे'' (छां ८-१२-७) त्यादि तथा ''एष हि द्रष्टा (स्प्रष्टा) श्रोते'' त्याद्यारभ्य ''विज्ञानात्मा पुरुष'' (प्रश्न ४-९) इत्यादिभिरात्मन एव साक्षाज्ज्ञातृत्वं श्रूयते। निर्विकारश्रुतिविरोधात् भ्रान्तिसिद्धविषया ज्ञातृत्वश्रुतिरिति चेन्न, विपरिवर्तप्रसङ्गात्। निर्गुणनिरूपणे च विषयव्यवस्थाया निर्वहणं द्रष्टव्यम्।

किंच व्यंजकस्य ज्ञानस्य स्वनिष्ठतया विषयाभिव्यंजकत्वे सति ज्ञानाप्रामाण्यप्रसंगेन सौगतमतप्रवेशप्रसंग इत्याह। किं चेतिं। इष्टापत्तिं परिहरति स्वतः प्रामाण्येति। अप्रामाण्यस्य स्वतस्त्वे प्रामाण्यं स्वतो न स्यात् तथा च श्रुतौ न स्वतः प्रामाण्यं पौरुषेयत्वेन वक्तुर्गुणादपि नेति प्रामाण्यमेव न स्यादित्यर्थः। क्रियाविशेषेति। क्रियाविशेषाश्रयत्वरूपत्वादित्यर्थः। कृतिशक्तिमतः- क्रियाशक्तिमत इत्यर्थः। न क्वचिदिति। अंतः कारणे आत्मेति चेत्यर्थः। अहंत्वादिक मित्यादिशब्देन इच्छात्वादिपरिग्रहः। ज्ञातृत्वकर्तत्व पक्षयोः क्रियात्मकत्वंहेतुः। अन्यत्साधारणं अहमर्थेति। अहंत्वातिरिक्त पक्षे अयं हेतुः। अहंत्वसमानाधिकरणतया प्रतीयमानत्वादित्यर्थः। नन्वनुभूत्यात्मेति प्रतीयमानात्मत्वे व्यभिचारः। अहंत्वातिरिक्तात्मत्वस्य प्रत्यक्षेण तथा प्रतीत्याभावादिति भावः। ननु तर्हि तन्मात्रस्य हेतुत्वे शेष वैयर्थ्यमिति चेत् प्रत्यक्त्वानुकूलत्व परमप्रेमास्वदत्वाभावव्यभिचारवारकत्वान्न विशिष्टोहेतुः तत्रेति भावः। संप्रतिवन्नवदिति। गंतृत्व घटत्वदेहत्वानि यथा योग्यं दृष्टांताः। आत्माचेति। अत्र धर्मरहित इत्यपि साध्यं विवक्षितं। तदभिप्रायेण द्वितीयहेतुव्यतिरिक्ताव्यतिरेकिणः ज्ञातृत्वराहित्ये साध्ये द्वितीयो हेतुरन्वयि। तत्राहंकारपदं स्वरूपकथनपरंबोध्यं। आदिशब्देनात्मत्वं ज्ञातृत्वसमानाधिकरणमंतः करणवृत्तित्वादि विवक्षितं। तदभिप्रायेण ज्ञातृत्वाभावे श्रुतिविरोध इति प्रतितर्कबाधितास्तर्काः इति दूषयति। अत्र ब्रूम इति। ननु श्रुतिरंतः करणस्य ज्ञातृत्वादिवक्तीत्यत्राह। विज्ञानात्मापुरुष इत्यादिभिरिति। अत्र विज्ञानात्मा ज्ञानस्वरूप आत्मा द्रष्टेति ज्ञातृत्वमंतः करणव्यतिरिक्तस्योक्तमित्यर्थः। साक्षात्कर्तृत्वं प्रत्यक्षेणज्ञातृत्वंमित्यर्थः। ननु ज्ञातृत्वश्रुतेः भ्रांतिसिद्धविषयतया अन्यथासिद्धवद्ध निर्गुणश्रुत्यनुगृहीतायाः निर्विकार श्रुतेः अन्यथासिद्धिर्वक्तुं न शक्यत इत्याह निर्गुणनिरूपिते चेति। हिंसानिषेधवाक्यवत्सामान्यतो गुणनिषेधश्रुतेरविषयतया व्यवस्थायाः वक्ष्यमाणत्वादिति भावः।

निर्विकारश्रुति विरोधोपि नास्तीत्याह कथंचेत्यादिना। तावदिति। मृत्पिंडस्य घटावस्थायां

कथं च ज्ञातृत्वस्य विकारात्मत्वम्? न तावन्मृत्पिण्डादिवत्स्वरूपान्यथाभावेन; तदसिद्धेः। नापि धात्वर्थयोगितामात्रेण, अस्तिभवतीत्यादियोगेनानुभूतेरपि विकारित्वप्रसङ्गात्। नित्यत्वादस्त्यादेर्विकारत्वं नास्तीति चेन्न; ज्ञातृत्वेऽपि समानत्वात्। ज्ञातृत्वस्य कादाचित्कतयोपलम्भाज्ज्ञानं विकार इति चेन्न; अस्त्यादेरपि कादाचित्कतयोपलम्भात्तस्यापि विकारत्वप्रसङ्गात्। ज्ञाननित्यत्वश्रुत्यादिबलादस्त्यादेर्न विक्रियात्मत्वमिति चेत्, तर्हि ज्ञातृत्वमपि श्रुतिसिद्धमेव; यथा-"न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" (बृह.६-३.३०) इति। एवंच सति कर्मोपाधिकतत्तत्करणव्यापारद्वारकनियतविषयज्ञानप्रकाशाप्रकाशावपेक्ष्य उदयास्तमयव्यपदेशः। उक्तं च भगवता शौनकेनापि- "यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः। दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा"॥ (विष्णु धर्म १.१.५५) "यथोदपानकरणात्क्रियते न जलाम्बरम्। सदेव नीयते व्यक्तिमसतस्संभवः कुतः॥" (विष्णुधर्मः१-१-७६)॥ "तथा हेयगुणध्वंसादवबोधादयो गुणाः। प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते"॥ इति। (विष्णुधर्म १०४-१८९) एतेन ज्ञाननित्यत्वे नित्योपलम्भप्रसङ्ग इति चोद्यमपि परिहृतम्, कर्मोपाधिकसङ्कोचवशात्तदप्रकाशात्। ज्ञानसङ्कोचविकासाभ्यामात्मनो विकारित्वमिति चेन्न; साक्षात्तदाश्रयत्वाभावात्,व्यवधानेन तदाश्रयत्ववचनस्य स्वरूपविषयनिर्विकारश्रुत्या सह विरोधगन्धाभावात्। एवं च सति प्रत्यक्षकलहशान्तिरपि स्यात्। यच्च विक्रियात्मकत्वादित्याद्यनुमान तूलजालम्, तत्रापि बाधानैकान्त्यादिपवनदहनसंमूर्च्छनम्। बाधस्तावन्नित्यज्ञातृत्वप्रतिपादक श्रुत्यादिवशात्सर्वत्र सिद्धः।

स्वरूपान्यथा भावात्। यथा घटस्य तद्विकारत्वं तथा ज्ञातृत्वावस्थायां पुरुषस्यान्यथाभावोनेति न तस्य विकारात्मत्व मित्यर्थः। नापीति। ज्ञातृत्वदशायामात्मनो ज्ञाधात्वर्थयोगितामात्रेणेत्यर्थः। कादाचित्क धात्वर्थयोगित्वं विकारित्वमित्याशयेन शंकते। नित्यत्वादिति। ज्ञातृत्वे ज्ञानस्वरूपाश्रयत्वे। ज्ञातृत्वस्येति। जानामि अज्ञासिषमिति कादाचित्कतयोपलंभादित्यर्थः। ज्ञानमिति। अनुभूतिरासीत् अस्ति भविष्यतीति कादाचित्कतयोपलंभादित्यर्थः ।भविष्य ज्ञाननित्यत्वेति । कालस्यातीतत्वादिरूपत्वात् तत्कालावच्छिन्नरूपेण सत्वस्याप्यतीतत्वादिव्यवहारात् न सत्वस्यविकारत्वमिति भावः। श्रुतिसिद्धमिति। नित्यतयेति शेषः। यथा न विज्ञातुरिति। ननु समानाधिकरणे षष्ठ्या तथाच विज्ञातेर्ज्ञानस्वरूपस्य विज्ञातुरात्मनो नित्यत्वं प्रतिपाद्यते। न तु तद्धर्मभूत ज्ञानस्येति चेन्न तथासति घट्टकुट्टी प्रभातं। श्रुत्यैवात्मनो ज्ञातृत्वप्रतिपादनात्। किंचात्मनो नित्यस्य ज्ञानात्मकत्वस्य पेक्षितस्य वाक्यांतरसिद्धस्य विधानायोगात् वाक्यवैयर्थ्यं। वैयधिकरण्ये पुनः ज्ञाननित्यत्व विधिसंभवेन सप्रयोजकत्वमिति भावः। ननु ज्ञानमुत्पन्नं नष्टमिति व्यवहारविरोधप्रसंगात् अनुवादोपि सोढव्य इत्यत्राह एवं च कर्मेति। ज्ञानप्रकाशौ ज्ञानावस्थाविशेषणजनियमभागिनौ न तु ज्ञानस्वरूपमिति भावः। प्रकाश्यन्ते- प्रकाशयोग्यावस्था विशिष्टा भवंतीत्यर्थः। न जन्यंते न स्वरूपेण न जन्यंते।

एतेनेति। वक्ष्यमाणे नेत्यर्थः। कर्मोपाधिकेति। तथा च विषय प्रकाशावस्थापन्नस्य उपलंभ इत्यर्थः। किंच ज्ञानगत संकोचाद्यवस्थाया साक्षादाश्रयत्वाद्विकारत्वं उत परंपरयाप्याश्रयत्वमात्रेण नाद्य इत्याह साक्षादिति। द्वितीये आह व्यवधाने नेति। निर्विकारश्रुतिस्साक्षात् विकारं निराचष्ट इत्यर्थः। ननु संबंधसामान्येनैव विकारनिषेधपरत्वं श्रुतेरस्त्वित्यत्राह एवं चेति। जानामीति। ज्ञातृत्वस्य प्रत्यक्षतया

विशेषतश्च ब्रूमः-विक्रियात्मकत्वादिति स्वरूपपरिणामविवक्षायामसिद्धिः। क्रियायोगमात्रादि विवक्षायामस्त्याभिरनैकान्त्यम्। दृश्यत्वान्नात्मधर्म इत्यस्य दूषणं तु निर्विशेषत्वनिराकरणे ग्राह्यम्। दृश्यनिष्ठत्वादित्येतदप्यात्मनो दृश्यत्वसमर्थनेन परिहृतम्। यदि पुनर्द्रष्टुनिष्ठत्वनिषेधे तात्पर्यम्, तदा व्याघातः नहि ज्ञातृत्वमेव ज्ञातृनिष्ठं न भवतीति संभावयामः। यच्चहमर्थसमानाधिकरणतया प्रतीयमानत्वादिति, तदप्यात्मत्वेनानैकान्तिकम्। अस्ति ह्यहमात्मेत्यपि सामानाधिकरण्यम्। आत्मा तावदस्ति, तस्यात्मत्वं नाम किमपि नास्तीति कुत्रानैकान्त्यमिति चेत्? तर्हि ज्ञाता नाम कश्चिदस्ति ज्ञातृत्वं नाम किंचिन्नास्तीति परिभाष्य तत्पक्षीकारणे प्रयोगं परित्यज्य तूष्णीमास्स्व। एषु च ज्ञानमात्रात्मधर्मत्वनिषेधे त्वप्रसिद्धविशेषणता। ज्ञानधर्मत्वमात्रनिषेधेंऽशतस्सिद्धसाधनता। ज्ञातृधर्मत्वनिषेधे स्ववचनविरोदापसिद्धान्तौ। विकारिद्रव्यस्थमिति साध्येऽप्यात्मनोऽपि शरीरसम्बन्धादिमात्रविकाराभ्युपगमेन सिद्धसाधनता उत्पत्तिविनाशादि विकारिद्रव्यनिष्ठमिति साध्येऽपि बाधप्रयोजकत्वादिरपरिहार्यः।

एवमहंप्रत्ययो नात्मगोचरः, अहंप्रत्ययत्वादित्यत्रापि ज्ञानमात्राहमर्थाद्यात्मशब्दार्थविकल्पेन

उपलंभात् उपाधिनिष्ठं ज्ञातृत्वमात्मनि तत्संसर्गात् भासते अयः पिंडौष्ण्यवदिति त्वयाप्युक्तत्वात्। सामान्ये निषेधोनोपपद्यत इत्यर्थः।आत्मनो ज्ञातृत्वविकारित्वप्रसंग इति तर्कं दूषयित्वानुमानं दूषयति तच्चेति। न ज्ञातृत्वेति। औपाधिकव्यावृत्त्यर्थ नित्यपदं। ''जानात्येव अयमिति'' शब्दोऽहमिति नित्यज्ञातृत्वप्रतिपादक श्रुतिः। ''कर्ता बोद्धेति'' कर्तृत्व श्रुतिः। ''आत्मन्येष न दोषाया (विष्णु.पु.२-१६-१८) तयोर्द्विजे'' ति अहंतेस्मृतिः। नन्वनुमानेन श्रुतेरेव बाधोस्तु। नच नरशिरश्शौचानुमानस्यापि बाधकत्वप्रसंगः तत्र श्रुतेः साध्यप्रसिद्ध्यर्थ उपजीव्याया अधिक्यबलत्वादितिचेदत्रापि केवलतर्कमात्रादात्मनोऽसिद्ध्या पक्षसाध्यप्रसिद्धिप्रसंगे तत्सिद्ध्यर्थमात्मसाधक श्रुत्यपेक्षणादुप जीव्यतयो ज्ञातृत्वेन धर्मिग्रहकतया श्रुत्याबाधसंभवादिति भावः।

क्रियेति। क्रियाधात्वर्थः। तत्वादित्यर्थः। आदिशब्दाज्जन्यत्वं विवक्षितं ननु चलनात्मकक्रियायोगो विवक्षितोऽस्त्वितिचेत्तथासति ज्ञातृत्वस्य चलनात्मकत्वाभावादसिद्धिरित्यर्थः। अस्त्यादिभिरित्यादि शब्देन संयोगादिग्रहः। निर्विशेषत्वनिराकरण इति पूर्वोक्तनिर्विशेषत्व निराकरणवादे द्रष्टव्यमित्यर्थः। दृश्यत्वसमर्थनेनेति। तथा चाप्रयोजकत्वादात्मादावनेकांत्वाच्च दूषितमित्यर्थः। प्रत्यक्त्वमात्मत्वमिति पक्षे दोष उक्तः। ज्ञातृत्वमात्मत्व पक्षे दोषमाह। यदि पुनरिति। व्याघातमुपपादयति नहीति। द्रष्टुत्वं हि ज्ञातृत्वविशेषः तथाश्रयासिद्धिरिति भावः। सामानाधिकरण्यं समानाधिकरण्यप्रत्यक्ष प्रतीतिरित्यर्थः। नच तत्र मानाभावः भवतैव। तथैवाहंबुद्धेस्संवलित विषयत्वस्यांगीकारोद्योग्ययारन्योन्यतादात्म्यज्ञाने तद्धर्मस्सामानाधिकरण्यप्रतीतेरावश्यकत्वादिति भावः। तर्हीति। वाङ्मात्रस्या प्रयोजकत्वादिति भावः। नात्मधर्म इति। साध्ये किं धर्मज्ञानरूपात्मधर्मतत्वं निषिध्यते उत ज्ञानत्वाश्रयधर्मवत्वं यद्धा ज्ञानमात्र धर्मत्वमिति विकल्पे आद्ये आह ज्ञानमात्रेति। निर्धर्मस्या प्रसिध्या साध्याप्रसिद्धिरित्यर्थः। द्वितीये आह अंशत इति। यत्किंचित्ज्ञानधर्मत्वनिषेधे धर्मभूतज्ञानं प्रति अधर्मत्वात्सिद्धसाधनतेत्यर्थः। अंशो धर्मभूतज्ञानं पक्षैकदेश इति यावत्। तृतीयेआह। ज्ञात सामान्यतो ज्ञानधर्मत्वनिषेधे बोध्ये ''विज्ञानात्मा पुरुष'' इति श्रुतिबाधः। ज्ञातृधर्मत्व निषेधे प्रतिज्ञापसिद्धांताभ्यां ग्रह इत्यर्थः। शरीर संबंध विकारेति।

सिद्धसाधनत्वाप्रसिद्धविशेषणत्वविरोधापसिद्धन्तादिर्द्रष्टव्यः। न च भ्रान्तिस्थलेऽहंप्रत्ययस्यानात्मविषयतया अन्यत्रापि तथैव भवितव्यम्, अतिप्रसङ्गात्। यश्चात्मा ज्ञातृत्वादिरहित इति साध्ये निर्विकारत्वादिति हेतुः, सच विकारविकल्पेन निरस्तप्रायः। यस्त्वन्तः करणरूपाहङ्कारव्यतिरिक्तत्वादिति, सोऽपि तेनैवात्मनो ज्ञानरूपत्वमपि निषेद्धुं शक्यमिति प्रसञ्जकत्वादप्रयोजकत्वाच्च परिहृतः। ज्ञातृत्वाभ्युपगमे जडत्वपराक्त्वानात्मत्वादिप्रसङ्ग इति विपक्षे व्याप्तिसिद्धेः प्रयोजकत्वमिति चेन्न; ज्ञातृत्वेऽप्यजडत्वादिकं भवत्विति त्वत्प्रयुक्तप्रसङ्गव्याप्तावपि पर्यनुयोगावतारात्। एतेनाजडत्वादित्यनुमानमपि निरस्तं भवतीति। यश्चाहङ्कारस्य ज्ञातृत्वमिच्छति, स कथं दृश्यत्वप्रकृतिपरिणामत्वादिभिर्देहस्याचेतनत्वं साधयति। यदि पुनर्दृश्यत्वाद्यविशेषेऽपि देहस्याचेतनत्वमन्तःकरणस्य ज्ञातृत्वं च देहत्वादिवव्यवस्थितं मन्येत, तदाऽन्तःकरणस्यैव दृशित्वमपि साधयेत्, पर्यनुयोगपरिहारयोस्तुल्यत्वात्। विकारिद्रव्यविशेषस्यैव परिणामविशेषवशाज्ज्ञातृत्वमिच्छन्नूनं भूतचैतन्यवादमेवाभिप्रेत्यात्मापह्नवादिषु भिक्षुपादप्रसारणन्यायेन प्रव(र्ते)र्तत इत्यायातम्। अतस्सिद्धं ज्ञातृत्वमात्मन एव; तच्चानध्यस्तं सत्यमिति॥

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां ज्ञातृत्वाध्यासभङ्गवादः सप्तविंशः॥२७॥

शरीरसंबंधस्य तत्र युक्ते दुःखादि संबंधस्य च विकारत्वादिति भावः। उत्पत्तिज्ञातः कर्मादिकर्तुः फलभोगार्थं नित्यत्वांगीकारादन्यथा कर्मादौ प्रत्यया योगात् न्नित्यत्वादेव स्वरूपान्यथाभावरूपविकारभावस्यापि संभवाद्बाध इति भावः आदिशब्देन सत्तायां व्यभिचारोग्राह्यः।

एवमहंप्रत्यय इति। अत्रापि ज्ञानमात्रात्मविवक्षायां प्रसिद्धविशेषणता ज्ञानमात्मेति विवक्षायां पूर्ववदंशतस्सिद्धिसत्वादिकात्मेत्युक्तावपसिद्धांतः। अहंकारस्यतन्मते ज्ञातृत्वादहमर्थत्वमात्मत्वमित्युक्ते प्रतिज्ञाविरोधोऽपीत्यर्थः। अप्रयोजकतामाह नचेति। अनात्मविषयत्वं आत्मविषयत्वं क्वचित्सहकारमात्रस्यप्रयोजकत्वादिति भावः। स चेति। धात्वर्थायोगित्वमसिद्धं। अस्त्यादियोगार्थं अन्यथा भावराहित्यमप्रयोजकमस्तीति योगवद् ज्ञातृत्वस्यापि संभवादित्यर्थः। सोऽपीति। ननु धर्मभूतज्ञानस्य व्यभिचारात्कथमात्मनो ज्ञानरूपत्वनिषेधः साधयितुं शक्य इति चेन्न। परमते धर्मभूतज्ञानस्य वृत्तिरूपतया ज्ञानभिन्नस्यान्यदात्मनो दृश्यत्वादिप्रसंगादिति भावः। तर्कमूलभूत व्याप्तिरेव नास्ति अप्रयोजकत्वादिति परिहरति। ज्ञातृत्वइति। तत्प्रयुक्तप्रसंगव्याप्तावपिज्ञातृत्वेप्यजडादिकं भवत्विति पर्यनुयोगावतारादित्यर्थः। एतेनेति -अप्रयोजकत्वेनेत्यर्थः। स कथमिति। ज्ञातृत्वमेवाचेतनत्वं तथाचाहंकारतुल्ययोगक्षेमतया शरीरस्याचेतनत्वं साधयितुमशक्यमित्यर्थः। अंतःकरणस्यैवेति। दृश्यत्वस्याप्रयोजकत्वादहमर्थस्य आत्मत्वेन किंचिद्बाधकत्वमिति भावः। प्रत्युत ज्ञातृत्वस्य अनात्मनिष्ठत्वे लाघवात्प्रत्यक्षसिद्ध देहस्यैव ज्ञातृत्वसंभवेन देहातिरिक्ते मानाभावात्क्रमेण चार्वणचार्वाकपक्षपातप्रसंग इत्याह। विकारिद्रव्येति। भूतचैतन्यवादभूतं भूतसंघातात्मकं शरीरं। तत्र किण्वान्यायेन चैतन्योपत्तिवादः शरीरात्मवाद इति यावत्। अनध्यस्तं सत्यमिति। अध्यस्तत्वासंभवात्प्रतीयमानं सत्यं भवतीत्यर्थः।

। वत्सजलधिकौस्तुभनृसिंहगुरुउतेन सिंहदेवेन कृतायां शतदूषणीटीकायां सप्तविंशः समाप्तः।

॥अथ साक्षित्वभङ्गवादः अष्टाविंशः ॥२८॥

चतुर्दशविधस्यापि साक्षिवर्गस्य साक्षिणे।
स्वतस्सर्वविदे तस्मै नमस्सर्वान्तरात्मने॥

यत्पुनराहुः-आसंसारमज्ञानसाक्षित्वेन ब्रह्मावतिष्ठते। श्रूयते हि-''साक्षी चेता केवलो निर्गुणश्च'' (श्वेता-६-११) त्यादि। न च स्वप्रकाशप्रत्यक्षादैन्द्रियिकप्रत्यक्षाच्चातिरिक्तं साक्षिप्रत्यक्षं नाम न किञ्चिदुपलभ्यत इति वाच्यम्, सुखमहमस्वाप्समेतावन्तं कालं न किंचिदहमज्ञासिषमिति सुखाज्ञानयोः साक्षित्वेन सुप्तोत्थितस्य स्वात्मपरामर्शादिति। अत्रोच्यते। तत्र तावत्स्वरूपसुखप्रकाशः स्वप्रकाशान्तर्गतः, न पुनस्साक्षिप्रकाशगम्यः। वैषयिकसुखप्रकाशस्तु सुषुप्तिकाले न संभवति। अज्ञानमपि तदानीन्तनस्मृत्यभावेनानुमीयते, तत्कालादिवत्। न हि सुषुप्तिकालोऽपि तदानीमेव साक्षिणा गृहीत इतीच्छसि। इष्यमाणत्वेऽपि कालोपाधेरपि कस्यचिद्ग्रहीतव्यतया जागरनिर्विशेषत्वप्रसङ्गः। तदग्रहणे पुनरेतावन्तं कालमिति कालविशेषणोपादानविरोधस्स्यात्। किंच किमिदं साक्षित्वमिति निरूपणीयम्। किं साक्षात्कर्तृत्वम्, उत साक्षात्कारत्वम्, उताविद्यकप्रकाशं प्रति हेतुत्वम्, उतान्यत्किंचित्? इति। नाद्यः, ब्रह्मणो वास्तवज्ञातृत्वानभ्युपगमात्। लोकेपरमार्थद्रष्टारमेव साक्षीति व्यपदिशन्ति। आविद्यकस्यापि ज्ञातृत्वस्याहंकारनिष्ठत्वाभ्युपगमेन विलीनाहंकारेषु सुषुप्त्यादिकालेषु तदसिद्धेः।

न द्वितीयः ''साक्षाद्द्रष्टरि संज्ञाया'' (अष्टाध्यायी-५-२-१२)मित्यनुशासनविरोधात्। आह

आत्मनः स्वाभाविकंज्ञातृत्वं प्रत्यक्षादिना साधितं। तदा साक्षित्वाच्च ज्ञातृत्वं समर्थयन् वादार्थं संगृह्णाति। चतुर्दशेति। यथादिक्पालादीनां साक्षित्वं न विषयावभासत्वं तथा भगवतोपीति भावः। किं तर्हि साक्षित्वमित्यपेक्षायां साक्षात्कर्तृत्वमेव साक्षित्वमित्याह। स्वत इति। नन्वद्वैत श्रुतिबलात्स्वरूपातिरिक्तः ज्ञानाभावात् ज्ञातृत्वसंभवेन विषयावभासत्वमेव वाच्यमित्यत आह सर्वांतरात्मन इति। विशिष्टाद्वैत एव अद्वैतश्रुतेस्तात्पर्यमिति भावः।

सुखमहमिति। सुखाज्ञानयोस्साक्षित्वेनैव ''सुखमहमस्वाप्सं'' एतावंतं कालं न किं चिदवेदिषमिति सुप्नोत्थितस्य स्वात्म परामर्शादिति संबंधः। अयं परामर्शः स्वापकाले सुखाज्ञानयोःप्रकाशादेव नान्यथेति भावः। अत्रोच्यत इति। अत्र सुखशब्देन स्वरूपसुखमुच्यते उत वैषयिकसुखं नाद्य इत्याह। तत्र तावदिति। स्वरूपसुखस्य प्रकाशः स्वरूपसुखस्य प्रकाशइत्यर्थः। साक्षिप्रकाशगम्य इति साक्षिप्रकाश इति गम्यः। अवगंतव्य इत्यर्थः। द्वितीय आह वैषयिक इति। कारणाभावादिति भावः। अज्ञानानुभवदशायां सुषुप्तिकालेप्यनुभूयते नवा। द्वितीय आह तदानींतनेति। अननुभूतस्य सुषुप्तिकालस्येतावंतं कालं इत्यनुमिति वदज्ञानस्यापि साक्ष्यननुभूतस्यानुमितिरस्तिइत्यर्थः। द्वितीय आह न सुषुप्तीति। ननु ब्रह्मस्वरूपमेव कालस्य ग्रहणमस्त्येवेति मन्यमानं प्रत्याह इष्यमाणत्व इति। सिषाधयिषितं साक्षित्वं किमिति विकल्प्य दूषयति। किं चेति। मिथ्याभूतं ज्ञातृत्वं अभ्यपगतमेवेत्यत्राह। लोक इति।

ननु लाघवाददृष्टत्वमात्रं प्रयोजकमित्यत्राह आवियस्यापीति। एतेनौपाधिकं साक्षित्वमिति निरस्तं।

चाहमर्थात्मत्वसमर्थनमध्ये ''साक्षित्वं च साक्षाज्ज्ञातृत्वमेव, न ह्यज्ञातुस्साक्षित्वम्, ज्ञातैव हि लोकवेदयोस्साक्षीति व्यपदिश्यते, न ज्ञानमात्रम्; स्मरति च भगवान् पाणिनिः-साक्षाद्द्रष्टरि संज्ञायामिति साक्षाज्ज्ञातर्येव साक्षिशब्द''मिति। औपचारिकसाक्षित्वाभ्युपगमेऽपि स साक्षात्कारः किं स्वात्मनः उताविद्यायाः? नाद्यः, स्वप्रकाशस्यान्यवैमुख्येन दृगधीनसिद्धेरविद्याया एवासिद्धिप्रसङ्गात्। न द्वितीयः, मिथ्याभूताविद्यागोचरत्वेन वृत्तिज्ञानवत् ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्। स्वरूपणेणाबाधितस्यापि वृत्तिज्ञानस्य विषयमिथ्यात्वादेव हि मिथ्यात्वमुपवर्णितं सविषयमिथ्यात्ववादिभिः। स्वगोचर एव साक्षात्कारः पुनरविद्यागोचर इव भातीति चेन्न; तथाऽप्यविद्याया असिद्धिप्रसङ्गात्। न ह्यन्यगोचरस्य ज्ञानस्य ततोऽन्यगोचरत्वेन भ्रमः, अनुव्यवसायस्य विषयावच्छिन्नग्राहकत्वात्। तद्भ्रमेऽपि न तेन ज्ञानेन तत्सिद्धिः। किंच स्वगोचर एवायं साक्षात्कारोऽविद्यागोचर इव कस्य भाति? न तावद्ब्रह्मणः, अहमविद्यागोचर इति ज्ञातुमसमर्थत्वात्। नाप्यविद्यायाः, अहं ब्रह्मणो गोचर इव भातीति तस्या अपि ज्ञातुमशक्यत्वात्। न चान्यस्य, तदुभयव्यतिरिक्तस्य कस्यचित् सुषुप्त्यादिषु अप्रकाशमानत्वेन तदयोगात्। न च न कस्यचिदिति वक्तुं शक्यम्, भातीत्यादेः प्रतिसम्बन्धिनमन्तरेण प्रयोगादृष्टेः। मिथ्यासाक्षित्वमिति चेन्न;।

''साक्षित्वं यदि मिथ्या स्यात् साक्ष्यन्तरपरिग्रहः। न चेदाधारभावेऽपि मिथ्यात्वमनुवर्ण्यताम्'' ॥

उपाधिविलयादौपाधिकस्यापि असंभवान्नद्वितीय इति। किं साक्षिशब्द मुख्यार्थत्वमुत गौणार्थत्वं नाद्य इत्याह साक्षादिति। आह चेति। भाष्यकार इति शेषः। ननु ''साक्षात् ज्ञातृत्वं'' साक्षित्वमिति पाणिनीयस्मृतौ न दृश्यत इत्याशंक्य सूत्रस्थदृष्टशब्द विवरणेन परिहरति। साक्षित्वं चेति द्वितीयं दूषयति। औपचारिकेति। स्वात्मन इति विषयविषयिभावे षष्ठी। स्वप्रकाशस्येति। स्वात्मन इत्युक्तौ स्वस्मै प्रकाश इति पर्यवसानादन्यवैमुख्यसिध्याद्यविद्यायाः असिद्धिप्रसंग इत्यर्थः। स्वरूपेणाबाधितस्यापीति। वृत्तिरूपज्ञानं ज्ञानत्वेन प्रतीयमानं न सामान्येन ज्ञानं नास्तीति बाध्यते बाधरूपस्यापि ज्ञानतया विरोधात्। अपितु रजतं नास्तीति विषयबाधाद्रजतज्ञानं नास्तीति बाध्यत इति विषयबाध एव सविषयज्ञानबाध इति तैरुक्तमित्यर्थः। मिथ्या विषयत्वाभावात् न मिथ्यात्वमिति शंकते स्वगोचर इति। तथापीति दोषोस्तीति शेषः। तथापीत्यर्थः। क इत्यपेक्षायामाह। अविद्याया अपीति। तदुपपादयति। नहीत्यादिना। अनुव्यवसायस्येति। व्यवसायोपनीतस्यैव अनुव्यवसाय विषयत्वादिति भावः। अंगीकृत्यापीत्याह। तद्भ्रमेऽपीति। अविद्यागोचरत्वाभावे अविद्यागोचरत्व भ्रमविषयेणापि ज्ञानेनाविद्यासिद्धिर्नस्यात्तद्गोचरस्यैव तत्साधकत्वादिति भावः। अहमिति। अहमर्थस्यैव भ्रांति ज्ञानाश्रयत्वात् ब्रह्माविद्ययोरथात्वान्नतयोरुक्त भ्रांतिरिति भावः। अहं ब्रह्मण इति। इव शब्द एवार्थः। अहं ब्रह्मणोगोचर एवेति अभावं इति वा ज्ञातुमशक्यत्वादित्यर्थः। दूषयति तदुभयेति। तदयोगादिति। अविद्यायां ब्रह्मविषयत्व भ्रमयोगादित्यर्थः। भातीत्यादेरिति। यज्ञदत्तस्यभाति देवदत्तस्य भातीति भानस्य प्रतिसंबंधितयैव सिद्धत्वादिति भावः।

नन्वासंसारमविद्यायास्स्वात्मनश्च प्रकाशो ब्रह्मणः, अपवर्गे तु स्वात्मन एवेति नियम इति चेत्, किमपवर्गदशायामविद्यायाः प्रकाशो निवृत्तो न वा? निवृत्तश्चेत् स्वात्मैव निवृत्तस्स्यात्। अनिवृत्तत्वे त्वविद्याऽपि तदानीमनिवृत्ता स्यात्। प्रागपि प्रकाशमात्राधीनसिद्धिर्हि सा। यदि च ब्रह्मस्वरूपसाक्षात्कार एवाविद्यामपि प्रकाशयेत्, ब्रह्मणोऽविद्यायाश्च तादात्म्यं प्रसज्येत। स्वरूपमेव हि तेन प्रकाशनीयम्। अस्वरूपप्रकाशत्वे वृत्तिवन्मिथ्यात्वं प्रागेवोक्तम्। विपयापहार एव वा स्वरूपापहारोऽपि वा यद्वा तद्वा मिथ्यात्वमस्तु। किंचाविद्यासाक्षित्वं ब्रह्मणस्स्वरूपमेव, ततोऽन्यद्वा? पूर्वत्र स्वरूपस्य नित्यत्वान्नित्यमविद्यासाक्षित्वप्रसङ्गः। उत्तरत्र तत् किं परमार्थभूतमुतापरमार्थभूतम्? आद्ये ब्रह्मव्यतिरिक्तसत्यत्वानभ्युपगमेनापसिद्धान्तः। द्वितीये तत् किमविद्यास्वरूपमुत तदारब्धम्? नाद्यः, विषयस्वरूपमात्रस्यैव साक्षिस्वरूपत्वे घटादेर्यावद्विनाशं व्यवधानादिदशायामप्यविच्छेदेन प्रकाशप्रसङ्गात्। न द्वितीयः, साक्षित्वाधीनसिद्धेरविद्यायाः साक्षित्वजनकत्वायोगात्। साक्षित्वस्याप्यनादित्वाभ्युपगमेनापसिद्धान्ताच्च । एतेनाविद्याप्रकाशं प्रति हेतुत्वपक्षो निरस्तः, अनादेर्हेत्वनपेक्षणात्। नापि चतुर्थः,

---

ननु स्यादेवान्यथाख्यति पक्षे तद्विषयत्वाभावादविद्यासिद्धिः। अस्माकं तु भ्रमे सति मिथ्याभूतमविद्याविषयत्वमप्यस्तीति स्यादविद्यासिद्धिरिति किं चेत्यतः प्रागुक्तदोपस्योद्धारं शंकते मिथ्येति। साक्षित्वमिति। तथा सति मिथ्याभूत साक्षित्वसाधक साक्ष्यंतरं वाच्यं तत्रापि तथेत्यनवस्थेत्यर्थः। साक्षित्वविषयसाक्ष्यभावेपि साक्षित्वं मिथ्यास्त्वित्यत्राह। न चेदिति। आधारस्सत्वाधिष्ठानं भावस्सद्रूपं ब्रह्म यथा साक्षित्वस्य अध्यासादभावे मिथ्यात्वं तथा सर्वाधिष्ठानस्य निरधिष्ठानस्यापि ब्रह्मणो मिथ्यत्वमस्त्व विशेषादितिभावः।

नन्वज्ञानागोचरस्य तद्गोचरत्वमध्यासितमिति न ब्रूमः। स्वरूपमेवत्वासंसारंमविद्यागोचरं अतो नाविद्याया असिद्धिः। नापि मिथ्यात्वं यावत्स्वरूपं सत्यस्वरूपस्यापि विषयत्वेन घटादिज्ञानवत् सत्यत्वादिति शकंते। नन्विति। तस्य तत्वादिति। स्वात्मन एव अविद्याप्रकाशत्वादित्यर्थः। तदानीं प्रकाशे प्रागपि संसारदशायामपि प्रागेवेति आत्मस्वरूपस्य स्वरूपातिरिक्तस्य मिथ्यात्वात् तद्विषयस्य रजतवृत्तिवत् मिथ्यात्वं स्यादित्यर्थः। न च सत्यस्वरूपविषयत्वासत्यता शुक्तिविषयस्यापि रजतभ्रमस्य मित्यात्वांगीकारादिति भावः। इतरमते विपयापहार इति। मायिमते स्वरूपापहार इति। यद्यपि मायिमतेऽपि विषयस्य मिथ्यात्वं न ज्ञानस्वरूपस्य विषयमिथ्यात्वेन प्रवृत्तिमिथ्यात्वस्यैकदेशिमतत्वात्सिद्धांतेपि सर्पादिज्ञानस्य विषयबाधेपि सत्यत्वमंगीकृतं तथाप्यजन्यस्य ज्ञानस्यासत्यविषयत्वे अविद्याया मिथ्यात्वं नस्यान्निवृत्ति भावान्मोक्षेपि न स्यात् किं च यदि मिथ्याविषयवृत्तेः तन्मते स्वरूपापहारः ब्रह्मण्यपि तथा स्यद्यदि विषयापहार एव वृत्तावपि तथा स्यात्सर्वदा वृत्तिसाक्षिणोर्नवैषम्यं स्यादिति तात्पर्यं। नित्यविद्येति । अविद्यायाः प्रकाशसमानसत्ताकत्वात् नित्यता स्यादित्यर्थः। विषयस्वरूपेति। अविद्यासाक्षित्वं यद्यविद्यास्वरूपं तर्ह्यविशेषाद्धटादिसाक्षित्वमपि घटादिस्वरूपमेव। ततश्च विषयसत्वे साक्षित्वस्यापि आवश्यकतया सर्वदाभान प्रसंग इत्यर्थः। साक्षित्वाधीनेति। अन्योन्याश्रय प्रसंगादिति भावः। साक्षित्वाधीनत्वान्नाविद्याया इति। यदि तदा ''षडस्माकमनादय'' इत्यस्य विरोधस्स्यादित्याह।

तस्यापि स्वरूपान्तर्भावबहिर्भावादिविकल्पदुःस्थत्वादिति । अतो न कथंचिदपि निर्विशेषज्ञानमात्रस्य साक्षित्वं संभवतीति साक्षित्वोपदेशसामर्थ्यदिव ज्ञातृत्वादिकमात्मनोऽवश्याभ्युपगन्तव्यमिति ॥

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां साक्षित्वभङ्गवादः अष्टाविंशः ॥२८॥

साक्षित्वस्यापीति । एतेनेति । वक्ष्यमाणेन तृतीय विकल्पोपीत्यर्थः । अनादेरिति । अविद्याप्रकाशस्यानादित्वाभ्युपगमादिति भावः । न चतुर्थ इति । साक्षित्वविकल्पे अन्यत्रेति चतुर्थ पक्ष इत्यर्थः । दुश्यत्वादिति । स्वरूपांतभवि ब्रह्मस्वरूपस्य मिथ्यारूपाविद्यागोचरत्वेन मिथ्यात्वं स्यात् ।अंतभवि सत्यत्वे द्वैतप्रसंगः । मिथ्यत्वे तस्याविद्यास्वरूपत्वे घटादीनां स्वरूपस्यापि साक्षित्वप्रसंगेन सर्वदा घटादिप्रकाशप्रसंगः । तज्जन्यत्वे तदधीनसिद्धेरविद्याया तज्जनकत्वादपसिद्धांतश्चेति दोषइत्यर्थः । नन्वस्तु घटादि स्वरूपस्यैव साक्षित्वं तथापि कदाचित्तदीयत्वा भावप्रकाशेर्थांतरस्याप्रकाशप्रसंगादहमर्थतद्धर्मज्ञानानामपि प्रकाशभावाद प्रकाशप्रसंगाच्छुद्धचिदाश्रया अविद्यायाः अप्यंतः करणोपाधिकचैतन्यसंबंधाभावाद प्रकाशप्रसंगाच्चेति ।

इति वत्सजलधिकौस्तुभनृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणीटीकायां अष्टाविंशः समाप्तः ॥

॥अथ शास्त्रविरोधपरिहारवादः एकोनत्रिंशः ॥२९॥

विदितमनुवदन्तो विश्वमेतद्यथावद्विदधति निगमान्ताः केवलं यन्मयत्वम्।
अविदितबहुभूमा नित्यमन्तर्विधत्तां हयवरवदनोऽसौ सन्निधिस्सन्निधिं नः ॥

यदाहुः-शास्त्रप्रत्यक्षयोर्विरोधे शास्त्रं बलीयः। अन्यथाऽद्वैतशास्त्रस्य प्रामाण्योच्छेदप्रसङ्गात्, अपरोक्षदेहात्मभ्रमादेश्च दुर्निरासत्वापातात्। न चात्र विरोध एव न सम्भवतीति वाच्यम्, भेदप्रपञ्चगोचरत्वतन्निषेधाभ्यां विरुद्धविषयत्वोपलम्भात्। न च देशकालस्वरूपादिभेदेन निषेधः संकोचमर्हति, "नेह नानास्ति किंचन", (बृह.६-४-९) "तस्मान्न विज्ञानमृतेऽस्ति किंचित्क्वचित्कदाचिद्द्विज वस्तुजातमि" (वि.पु.२-१२-४३) त्यादिभिस्सर्वदेशसर्वकालवर्तिनां ब्रह्मव्यतिरिक्तवस्तूनां सर्वप्रकारनिषेधोपलम्भात्। "त्रय आवसथास्त्रयः स्वप्ना" (?) इति च स्वप्नस्येव जागरसुषुप्त्योरपि मिथ्यात्वमेव ह्युच्यते। नच जागरादिवत्स्वप्नस्यापि सत्यत्वमुच्यत इति विपरिवर्तः, स्वप्नशब्देनैव तयोरुपचरितत्वात्। स्वप्नशब्दस्य च मिथ्यार्थे लोकप्रसिद्धत्वात्। अन्यत्र तदभावात्। न ह्यावसथशब्दस्सत्ये प्रसिद्धः। न च भेदविधायकश्रुतिबलात् भेदनिषेधकश्रुतीनामन्यपरत्वम्, निषेधस्यैव

ननु प्रत्यक्षादिभिरात्मनस्सविशेषत्वमुक्तं। तदसंगतं निर्विशेषत्व बोधकशास्त्रेणाधिकबलेन प्रत्यक्षस्यबाधादिति पूर्वपक्षं दूषयन् वादार्थं संगृह्णाति। विदितमिति। एतद्विश्वं प्रत्यक्षादिसिद्धं जगत् यथावत्प्रत्यक्षविदिताकारेण केवलं निषेदपरत्वं विना यन्मयत्वं विदधातीति योजना।एवं च सत्वे न हि विश्व गृह्णाति प्रत्यक्षं प्रबलमिति निषेधकत्वाभिमत श्रुते स्तच्छरीर एव तात्पर्यमिति वादार्थसंग्रहः।

अद्वैतशास्त्रस्य प्रत्यक्षात् प्राबल्यं वक्तुं सामान्यतः शास्त्रस्य प्रत्यक्षात्प्राबल्यमाह शास्त्रेति। द्वैतशास्त्रस्य प्रतियोगिसमर्पकतया कथंचित्प्रामाण्यं संभवतीति भावः। अपरोक्षेति। देहातिरिक्तात्मासिद्धिप्रसंगेन शास्त्रमात्राप्रामाण्यं प्रसज्येतेति भावः। ननु न शास्त्रप्रत्यक्षयोः विरोधः अधिष्टानत्वेनानुगतसन्मात्रस्यैव प्रत्यक्षविषयत्वेन भेदविषयत्वाभावादित्यत आह न चेति। अयं घटः अयं पटः इति भेदप्रपंचगोचरत्वस्य नेहनानास्तीचति तन्निषेधविषयत्वस्य प्रत्यक्षशास्त्रयोरनुभव-सिद्धयोरपलापायोगादित्यर्थः। ननु विधिनिषेधयोर्देशांतरकालांतर विषयत्वेन वा विधिनिषेधयोः स्वरूपभेदे न वा संकोचात् न विरोध इत्यत्राह। न च देशेति। आदिशब्देन ब्रह्मणोन्यत्स्वतंत्र नास्तीति स्वातंत्र्यादिप्रकारेण निषेधस्यभिन्न विषयत्वं विवक्षितं। नेह नानेति। (बृह.६-४-९) त्रयस्त्रयस्यावस्थ नेहनाना विज्ञानमृत इत्यादिना ब्रह्मव्यतिरिक्त कृत्स्नस्यापि देशकालाद्युपाधिनिरपेक्षं निषेधात्पारतंत्र्याद्यसिद्धेः प्रकारविशेषनिषेध इति संकोचोऽप्ययुक्त इति भावः। ननु त्रयः स्वप्ना स्त्रय आवसथा" इति स्वप्नोपलक्षितावस्थाप्ना शब्देनावस्थावत्सत्यत्वमेवोच्यत इत्यत्राह न च जागरादिवदिति। स्वप्नशब्देनैवेति प्रथमश्रुतस्य अवस्थस्यैवोद्देश्यत्वात् स्वप्नशब्देन स्वप्नकल्पत्वमा इति मिथ्यात्वं विधीयत इत्यर्थः। किं च स्वप्नशब्दस्य उद्देश्य समर्पकत्वेप्य आवसथ शब्दस्य विधेयसत्यत्व समर्पकत्वायोगात् न तदुद्देश्शेन तद्विधिरित्याह अन्यत्रेति। स्वप्नशब्दस्योद्देश्यसमर्पकत्व इत्यर्थः। नह्यवस्था शब्द इति। यद्यप्यौपचारिकार्थत्वेनावस्थशब्दस्य सत्यपरत्वं वक्तुं शक्यं तथापि

प्रसङ्गसापेक्षत्वेन विध्यपेक्षया परत्वात् अपच्छेदन्यायेन बलीयस्त्वात्। नच सिद्धवस्तुविषययोस्समुच्चय-विकल्पादिसम्भव इति निर्गुणवादे निरूपितम्। अतोऽत्यन्तविरोधे रज्ववधिकरणसर्पभूविदलन-वत्कम्बुकलधौतवच्चोभयबाधोऽन्यतरबाधो वाऽवश्यंभावी। तत्र नाद्यस्संभवति, पारमार्थिकत्वा पारमार्थिकत्वातिरिक्तकोटिदर्शनाभावात्। निषेधकतया परस्य च शास्त्रस्य निषेधकान्तरादर्शनात्। न च विधिरेव निषेधस्य निषेध इति वाच्यम्, तस्य स्वरूपतस्स्वार्थावगाहित्वात्। निषेधस्य तु प्रतियोगिप्रतिक्षेपात्मकतयैव स्वरूपलाभः।

विनाशादिषु कथमिति चेन्न; तत्रापि प्रतियोग्यपेक्षत्वात्। विनाशादिषु शब्देषु नास्तिशब्दस्य गोचरः। नञुपश्लेषवैधुर्यात् केवलं प्रतिपद्यते॥

अतोऽन्यतरबाधोऽवशिष्यते। बाधश्च बलवता दुर्बलस्यैव। न च प्रत्यक्षपरोक्षयोः प्रत्यक्षत्व परोक्षत्वाभ्यामेव प्राबल्यदौर्बल्ये, शुक्तिप्रत्यक्षेण शुक्तिरजतप्रत्यक्षबाधस्य दीपशिखादिभेदानुमानेन

स्वप्नशब्दस्य मिथ्यामात्रे शक्तिवदआवसथ शब्दस्य न सत्यमात्रे वृत्तिस्वप्नावसथेऽपि वृत्तिरिति भावः। ननु तुल्य प्रामाण्येन भेदशास्त्रेणा भेदश्रुतेरन्यपरत्वे सिद्धेर्न प्रत्यक्षस्य शास्त्रविरोध इत्याशंक्याह न चेति। भेदश्रुतेरन्यथासिद्धत्वात्तुल्यप्रामाण्याभावान्नाभेद शास्त्रस्यान्यपरत्वमित्याह -निषेधस्येति। नन्वरूणयैकहायनीवद्व्रीहियववद्वा विकल्प समुच्चयोक्त अस्त्वित्यत्राह न च सिद्धेरिति। निषेधस्येति अत इति उक्तरीत्या संकोचा भावादित्यर्थः। अत्यंतविरोध इति। शास्त्र प्रत्यक्षयोरोत्यर्थः। पारमार्थिकत्वेति। सर्पभूदळनाभ्यां मुख्यरज्वादेरिव सत्यमिथ्यात्वातिरिक्तकोद्‌यभावादित्यर्थः। किंच यदि निषेधकमुभयोरस्तितदाभयबाधस्यान्नचोत्तरस्य बाधकमस्ति न च प्रत्यक्षमेव तन्निषेधकं। तथात्वं हि घटादिप्रत्यक्षस्य घटाभावो नास्तीति अद्वैतशास्त्रवेद्यमिथ्यात्वघटकाभावप्रतिक्षेपरूपतया वाच्यं। तथा च तादृशाभावप्रसंगसापेक्षत्वेन शास्त्रात्परत्वं स्यात्। ततश्च शस्त्रप्रत्यक्ष शास्त्रयोरन्योन्याश्रयः। तस्मादुभयोर्निषिधाभावान्नोभयबाध इत्याह निषेधकतयेति। निषेधप्रापकप्रत्यक्षापेक्षया निषेधकस्य परत्वमिति भावः। ननु प्रतिक्षेपरूपत्वाभावेपि प्रतियोगिनः एवाभावभावत्वेन प्रत्यक्षस्य तन्निषेधकतास्यादित्याशंक्याह नचेति। स्वरूपतः न प्रतियोग्यवगाहनमात्रान्निषेधकत्वं बाधकत्वं वा शुक्तिरजतप्रतीत्या तदभावस्य निषेधबाधयोर दर्शनादपितु प्रतिक्षेपरूपत्वादेव। तच्च प्रत्यक्षस्य नास्तीत्यर्थः। ननु घटो नष्ट इत्यादिषु प्रतियोगिनिषेध रूपतादृश्यते। प्रतियोगिप्रतिक्षेपकता तु नास्ति। न गू श्रवणादिति शंकते विनाशादिष्विति तत्रापीति। घटस्य विनाश इति प्रतियोगि प्रतिक्षेपकत्वेनैव प्रतीतिरस्तीत्यर्थः।

ननु तर्हि स्वरूपेण प्रतिपद्यत इति लौकिकः कथं व्यवहरन्तीत्यत्राह विनाशादिष्विति। नास्ति शब्दगोचरस्यैव विनाशशब्दगोचरत्वात्प्रतियोगिसापेक्षत्वं। तत्प्रतिक्षेपरूपेण प्रत्ययत्वंचास्त्येव। किं तु नञ् संबन्धाभावात्स्वरूपेण प्रतीयत इति लौकिकानां भ्रांतिमात्रमित्यर्थः।

नन्वथासिद्धस्य बाधकत्वादन्यथासिद्धिं प्रदर्शयितुमाह बाधश्चेति। निषेधत्वेन बाधकत्वं न विवक्षितं। किंतु बलवत्वेन निषेधरूपत्वे बलवत्वं प्रयिकमित्यर्थः। इत्यपि प्रायेण पूर्वोक्तिरिति भावः। शुक्ती ति

दीपैक्यप्रत्यभिज्ञानबाधस्य च परित्यागप्रसङ्गात् । न चोपजीव्योपजीवकाभावात् प्रत्यक्षशास्त्रयोः प्राबल्यदौर्बल्ये; व्याप्तिग्राहकप्रत्यक्षोपजीविनाऽनुमानेन ज्वालैक्यप्रत्यक्षबाधस्योक्तत्वात् । नच पूर्वत्वादुपक्रमवत् प्रत्यक्षप्राबल्यम्, पूर्वत्वमात्रस्यापच्छेदे परस्यैव प्राबल्यनिश्चयेनाप्रयोजकत्वात् । न च परत्वस्य बाधप्रयोजकत्वे माध्यमिकमर्यादया त्र्यन्तानामपि बाध्यत्वमिति वाच्यम्, परत्वमात्रस्य बाधकत्वेनानुपन्यासात् । अन्यथा द्विचन्द्रज्ञानादिना प्राक्तनचन्द्रैकत्वज्ञानादिबाधप्रसङ्गात् । तस्माद्द्वयोर्ज्ञानयोर्विरोधे सावकाशत्वादन्यथासिद्धं बाध्यम्, अनवकाशत्वादनन्यथासिद्धं बाधकम् । अवकाशश्चाविरुद्धविषयलाभोऽप्रमाणकोटिनिवेशो वा । तत्र पूर्वस्येहासंभवो दर्शितः । उत्तरस्तु कारणदोषे पर्यवसितः । न च शास्त्रजन्यज्ञानस्य दुष्टकारणप्रसूतत्वम्, कर्त्रभावेनैव भ्रमविप्रलम्भप्रमादाशक्ति मूलत्वशङ्कोच्छेदात्; अविच्छिन्नसम्प्रदायत्वेन शैथिल्यावापोद्धापादिविचारवैदेशिकत्वात्; उपबृंहणब्रह्ममीमांसाद्यनुग्रहेण प्रतिपत्तृदोषाणामपि निर्मूलत्वात् । अतश्शब्दप्रमाणदोषतया संप्रतिपन्नसमस्तसम्भावनाविरहे शास्त्रजन्यज्ञानस्य निर्दोषकारणप्रसूतत्वेन प्रामाण्यात् प्राबल्यं प्रतिष्ठितम् । न च प्रत्यक्षदोषतया संप्रतिपन्नकाचकामीलादिदोषविरहात् गगनपवनदहनसलिलवसुधा-दिगोचरप्रत्यक्षस्यापि प्राबल्यं स्थितमिति वाच्यम्, भेदवासनायाः प्रत्यक्षदोषत्वेन वासनामूलभेदभ्रमे दृष्टत्वात्; भेदवासनायाश्च बीजाङ्कुरन्यायेन प्रवाहानादितया तत्तत्प्रत्यक्षमूलत्वोपपत्तेः । अतो दुष्टकारणप्रसूतं

बाध्यत्वप्रयोजकाभावेपि बाध्यत्वं दृश्यत इत्यर्थः । अत्र शुक्तिरजत प्रत्यक्षस्येति पाठमिच्छंति । तदा बाधस्येत्यध्याहार्यः । दीपशिखेति । बाधकत्वप्रयोजकाभावेऽपि बाधकत्वं दृश्यत इत्यर्थः । एवं च प्रत्यक्षत्व परोक्षत्वयोर्व्यभिचारान्न बाध्यबाधकभावप्रयोजकतेति भावः । न चोपजीव्येति । वर्णपदादि प्रत्यक्षस्योपजीव्यत्वादन्यस्य तज्जातीयत्वादिति भावः । ज्वालैक्येति तस्योपजीव्यजातीयत्वादिति भावः । न च पूर्वत्वादिति । वेदोपक्रमाधिकरणन्यायेनेत्यर्थः । माध्यमिकेति न सन्नासन्नसदसदसन्नचाप्यनुभवात्मक मिति मिथ्यात्वरूप चतुर्थकोटेरपि तेन निषेधाद्बाधस्स्यादित्यर्थः । परत्वमात्रस्येति । शास्त्रांतरापेक्षया शास्त्रस्य परत्वं प्राबल्य प्रयोजकं । न परत्वमात्रमिति भावः । ज्ञानयोरिति ज्ञानयोरत्रप्रकरणे ज्ञानशब्देन ज्ञानं करणं च यथायोग्यं विवक्षणीयं । तेन विरुद्धयोरविरुद्धत्वविषयत्वं ज्ञानकरणमादाय वक्ष्यमाणं न विरुद्धमिति भावः । अन्यथासिद्धमिति । प्रतीयमानार्थे प्रामाण्यं विनापि संभावितोदयत्वन्यथासिद्धत्वं उत्तरस्त्विति । अप्रामाण्यकोटिः निवेशस्य कारणदोषंविना ज्ञानुमशक्यत्वात् कारणे प्रमातरि प्रमाणो प्रमेयो वा दोषेण ह्यप्रमाणकोटि निवेशो भवदिति भावः । न च शास्त्रेति । अत्र शास्त्रजन्यज्ञानस्य दुष्टकारण प्रसूतत्वाभावोक्त्या शास्त्रं दुष्टं न भवतीत्यवगम्यत इति भावः । कारणदोषाभावमुपपादयति कर्तुभावेनै वेति । शैथिल्यं पठच (त्य) मानस्यावेदकत्वं आवाह पोधिकवाक्यप्रक्षेपः । आवापः केषांचिद्वाक्यानां उच्छेदः (अभेदः) आदिशब्देन वर्णव्यत्या सादिर्विवक्षितः । विचारः संदेहः । ननु वक्तृदोषाद्यभावेपि श्रोतृदोषाभवत्वित्यत्राब उपब्रृंहणेति । प्रामाण्यादिति । जन्यज्ञानस्य प्रमाणत्वे जनकस्य शास्त्रस्य प्रत्यक्षादितः प्राबल्यं प्रतिष्ठितमित्यर्थः । वासनामूलेति । द्वाविमौ चंद्राविति प्रत्यभिज्ञादिष्वित्यर्थः । ननु भेदवासनायाः दोषत्वे वासनातो भेदप्रत्यक्षं भेदप्रत्यक्षाद्वासनेत्यन्योऽन्याश्रयः । वासनांतर जन्यत्वे तथेत्यनवस्थेत्यत्राह भेदवासनाया चेति । अत इति यतो निर्दुष्ट शास्त्रं प्रत्यक्षं तु भेदवासनादुष्टमत इत्यर्थः ।

भेदज्ञानं निर्दोषनिगमान्तजन्मना निर्विशेषाद्वैतज्ञानेन बाध्यत इति।

अत्रोच्यते। यदुक्तम्- शास्त्रबलीयस्त्वाभावे सत्यद्वैतशास्त्रप्रामाण्योच्छेदप्रसङ्ग इति, तदसत्; प्रत्यक्षाविरोधिन्येवाद्वैते द्वैते वा तत्प्रामाण्यस्य निर्वाह्यत्वात्। यच्च प्रत्यक्षप्राबल्ये देहात्मभ्रमादौ दुर्निरसत्वमिति, तदयुक्तम्; देहात्मभेदप्रत्यक्षानुसारिणैव शास्त्रेण तन्निरसनात्। अन्यथा प्रत्यक्षाच्छास्त्रस्य बलीयस्त्वे यूपादित्यैक्यवाक्येन यूपादित्यभेदग्राहिप्रत्यक्षबाधप्रसङ्गात्। यच्चोक्तं निषेधस्य सर्वविषयत्वोपलंभेन संकोचो न युज्यत इति, तदपि मन्दम्; सर्वविषयत्वे सत्येव हि प्रमाणान्तरविषयात् संकोचो युज्यते। अन्यथा न हिंस्यादित्यस्याग्नीषोमीयवाक्येनापि संकोचो न स्यात्। न चात्र प्रत्यक्षविरोधमात्रेण संकोचः, प्रकरणाद्यापन्नविशेषेणापि तत्सिद्धेः। तथा हि यत्र परमात्मानं प्रति अपृथक्सिद्धत्वं विवक्षितम्, तत्र प्रपञ्चस्य स्वातन्त्र्यंनिषेधे तात्पर्यम्, न तु ब्रह्मविशेषणभूतसमस्तनिषेधे।

शास्त्रप्रत्यक्षयोर्भेद एव तावदसिद्धेः। कुतो बलाबलविचारं इत्यभिप्रायेण सिद्धांती अत्रोच्यत इति। शास्त्रं च द्विविधं अद्वैत प्रतिपादकं द्वैत प्रतिपादकं च। तत्राद्यं जगत्कारणाद्वैतप्रतिप्रदकतया प्रत्यक्षविषयाद्भिन्नविषयमपरं तु तदतिरिक्तद्वैतविषयं न विरुद्धमित्याह प्रत्यक्षादिविरोधिन्येवेति। देहात्मभेदेति। मम शरीरमिति प्रत्यक्षं विवक्षितं। अहं शरीरमिति कदाप्यदर्शनात्। मम शरीरमिति प्रतीतिर्नोपचारिकेति वक्तुं शक्ये भावः। ननु भेदग्रहे स्थूलोहमिति प्रतीतिर्नस्यादिति चेन्न। यथा स्फटिक सन्निहिते जपाकुसुमे इदं कुसुमस्फटिकं नेति स्फटिकत्वेन कुसुमत्वेन भेदग्रहेपि रक्तं न भवतीति रक्तत्वेन पुरोवर्ति स्फटिकत्वेन भेदग्रहाभावाद्रस्फटिका इति ग्रहः तथा शरीरत्वाहंत्वाभ्यां भेदग्रहेपि स्थूलत्वाहंत्वाभ्यां भेदग्रहाभावात्तद्भ्रम उपपद्यत इति भावः|अन्यथेति नन्वर्थवादाः न स्वार्थपराणिं। स्वार्थपराणामेव प्रत्यक्षाद्बलवत्तयार्थवादानां यूपादित्यवाक्यानां न प्रत्यक्षबाधकत्वमिति चेन्न। तथा सति ''सोमेन यजेतेति'' ( ) वाक्यस्य सामानाधिकरण्यतया सोमाभेद प्रतिपादनसमर्थस्य प्रत्यक्षादि विरोधात्सोमवतेति मत्वर्थलक्षणा न स्यात्। ''कृष्णलं श्रपयेदि'' त्यादौ रूपपरावृत्तिलक्षणपाकस्य प्रत्यक्षबाधादुष्णीकरणे लक्षणा न स्यात्। तदा ''प्रत्यवेक्षत'' इत्यादौ ज्ञानस्य कर्तव्यत्वं प्रमाण विरुद्धमिति तदबाधायेक्षणानुकूल व्यापारे लक्षणा न स्यात्। तथा च तव जिज्ञासा सूत्रे सन् प्रत्ययार्थेच्छायाःविषय सौंदर्यलभ्यायाः कर्तव्यत्वं प्रत्यक्षबाधितमिति जिज्ञासाशब्देन विचारलक्षणा स्वीकारो न स्यात् तथा च 'तत्वमसी' (छां.६.८.७) त्यत्र विशिष्टचैक्यं प्रत्यक्षबाधितमिति निष्कृष्टचैतन्ये लक्षणा न स्यात्। न च चंद्र प्रादेशिकत्व प्रत्यक्षस्य तत्परिमाणग्रहकागमेन बोधो न स्यादिति वाच्यं। दूरयोयत्परिमाणवत्तयोपभ्यते स ततोधिकपरिमाण इति व्याप्तिग्राहकप्रत्यक्षादि मूलकत्वाद्दोषमूलत्वादि शंकाकळंकितत्वात्प्रत्यक्षस्य न तेन शास्त्रस्य बाध इत्यादि बोध्यमिति भावः। सर्वविषयत्वे सत्येवहीति। सर्वविषयत्वेन प्रतीयमानत्वे सत्येवहीत्यर्थः। अन्यथेति। सर्वविषयत्वेन प्रतिपन्नस्य संकोचाभाव इत्यर्थः। ननु ''नेह नानास्ति'' (बृह.६.४.९) किंचने (बृ-६.४.९)त्यत्राधिकः किंचन शब्दोस्तीति चेन्न। तथा अत्रापि सर्वशब्दोस्ति किं च ''यत्किंचित्प्राचीन मग्निष्टोमीयात्तेनोपांशु पठंती'' त्युपांशुत्वस्य यत्किंचिच्छब्दोनाग्नीषोमीयात्प्राचीत-कृत्स्न विषयत्वोपलंभेपि ''यावत्यावाचा कामयीत तावत्या दीक्षणीया यामनुब्रूयाममंद्रविक्षणीयाममंद्रतरमति-ध्यामि'' (छां-६.८.७) त्यादौ संकोचदर्शनादिति भावः। प्रसंगादाह न चात्रेति। प्रकरणादित्यादिशब्देन

यथैक एव देवदत्तस्तिष्ठति नान्यत् किंचिदित्युक्ते तत्तुल्यपुरुषान्तरनिषेधे तात्पर्यम्, न पुनस्तदवयवगुणजात्यादिनिषेधे। तदुक्तं संवित्तिसिद्धौ-

"यथा चोलनृपः सम्राडद्वितीयोऽस्ति भूतले। इतितत्तुल्यनिवृत्तिनिवारणपरं वचः ॥
न तु तत्पुत्रतद्भृत्य कलत्रादि वारणं" ॥ इति

यत्र पुनर्जीवानां स्वाभाविकस्वरूपप्रतिपादने तापर्यं तत्र देहात्मभ्रमप्रतिक्षेपाय देहादेस्तस्मिन्नध्यस्तत्वमात्रमुच्यते। न पुनस्स्वरूपेण मिथ्यात्वम्। यथा शुक्तौ रजतस्याध्यस्तत्वेन शुक्तिरजतमिथ्यात्वम्, न रजतमात्रमिथ्यात्वं तद्वत्। यत्र तु जीवानां परिशुद्धानां परस्परसाम्ये तात्पर्यं तत्र देवादिरूपस्य तत्प्रयुक्तसुखदुःखादिरूपस्य च वैधर्म्यस्यौपाधिकत्वेन स्वाभाविकत्वनिषेध एव क्रियते। यथैकजातीयानां रक्तानामुपरञ्जकद्रव्यान्तरसंसर्गप्रयुक्तवर्णवैषम्यादेरस्वाभाविकत्वमुच्यते। निर्गुणवादादेश्च हेयगुणनिषेधे तात्पर्यमित्यन्यत्र स्थितम्। सदेवेत्यादि च सद्विद्यानिरूपणसुगमार्थम्। एवं सर्वत्रोह्यम्। यत्पुनः "त्रयस्स्वप्ना" (?) इति जागरसुषुप्तयोरपि स्वप्नसाम्यमुच्यत इति, तत्र जागरसुषुप्तयोस्स्वप्नसाम्ये विवक्षितेऽपि न मिथ्यात्वाकारेण साम्यमिति पश्यामः। यथा पैंगल्यातिशयविवक्षया कश्चिदग्निर्माणवक इत्युपचरति, कश्चिदूष्मलत्वविवक्षया, कश्चिच्च तपश्चर्यादिप्रयुक्तपरिशुद्धिविवक्षया, एवमत्रापि प्रमाणान्तराविरोधाय स्वप्नसाधर्म्यान्तरे तात्पर्यं ग्राह्यम्। तच्च यथा स्वप्नस्य ईश्वरसृष्टत्वेन जीवस्य कर्मानुगुमनियतदेशकालस्वरूपतत्तत्स्वप्नफलभोगादौ न स्वातन्त्र्यं तद्वज्जागरसुषुप्तयोरपि कर्मफलत्वेनेश्वराधीनत्वान्न तत्र जीवस्य स्वातन्त्र्यमित्येवमादिरूपेण प्रमाणाविरोधेन ग्राह्यमिति। ततश्च-

---

स्वातंत्र्यप्रतिपादकांतर्यामिब्राह्मणादिकं विवक्षितं। यत्र परमात्मानं प्रतीति "यस्मिन् पंच पंच जानाः आकाशश्च प्रतिष्ठित" (बृ-६-४-१७) इति वाक्येना पृथक्सिद्धत्वावगमात्। समभिव्याहृत बृहदारण्यक गत "नेह नानास्तीति" (बृ-६-४-२१) वाक्ये स्वातंत्र्य निषेधे तात्पर्यं ग्रहचं। "यस्मिन् सूर्यं उदेति यत्रचास्तंगच्छंति। यत्र देवा अर्पिताः तदु नास्तीति कश्चचने ( ) त्यपृथक्सिद्धत्वावगतेः तत्समभिव्याहृते कठवल्लीस्थे "नेह नाना स्तीति" (बृ-६-४-२९)वाक्येपि स्वातंत्र्यनिषेधऽपि तात्पर्यंमिति भावः।

यथेति (१-२६) यद्रूपं वस्तु प्रतिपन्नं तत्रेतरनिषेधस्तद्रूपविशिष्टेतरनिषेधपरः नत्वितरस्वरूपस्य सर्वात्मनां निषेधपरोऽन्यथा व्यावहारिकस्वरूपस्याप्यभाव प्रसंगादिति भावः।

यत्र पुनरिति। ज्ञानस्वरूपमत्यंतनिर्मलं (वि.पु) इत्यादिषु शुक्तिरजतमिथ्यात्वेपि शुक्तौ रजतत्वस्य तादात्म्य संबंधेन सत्वबाधेऽपीत्यर्थः। यत्रत्विति। "तस्यात्मपरदेहेषु सतोप्येकमयं हि (वि.पु.२-२४-२२) यद्विज्ञानं परमार्थो ही"त्यादिष्वित्यर्थः। निर्गुणावादादेरिति। "साक्षी चेता केवलो निर्गुणश्च" (श्वेता ६-२२) तिवत्यादेः पदाहवनीयन्यायादिभिःहेयगुणविषयत्वं स्थापितमित्यर्थः। "एकमेवाद्वितीय" (छां.६-२-२) मित्यादेरूपादान सहकार्यदैरैक्यमुच्यते इति सद्विद्या भाष्ये व्यक्तमित्याह सदेवेत्यादि चेति। यद्यपि स्वप्नसाम्यं न वाचनिकं तथाप्यन्यशब्दस्यान्यत्र प्रयोगनिमित्ततयोन्नेयं। नन्वेवमपि मिथ्यात्वस्यापि सादृश्यत्वात्तेन रूपेण किं न स्यादित्यत्राह प्रमाणांतराविरोधायेति। आदिशब्देनास्थिरत्वाल्पकालत्वादि गृहयते।

"औपचारिकवाक्येषु योग्यमेवोपचर्यते। तत्तत्प्रकरणादिभ्यस्तद्विशेषोऽपि सिध्यति" ॥

यत्तु भेदनिषेधकश्रुतीनां भेदविधायकश्रुत्यपेक्षया परत्वेन बलीयस्त्वमिति, तत्रापि नापच्छेदन्यायविषयत्वमिति निर्गुणनिरूपणे ग्राह्यम्। यच्चाद्वैतगोचरशास्त्रस्य निषेधकान्तरं न दृश्यत इति; तदपि परमसुहृदं माध्यमिकं विस्मृत्योच्यते। स हि शून्यमेव तत्त्वमिति वदन् संविदद्वैतमपि निषेधति। न च तद्वाक्यं दोषमूलत्वेनाप्रमाणत्वात्परमप्यकिंचित्करमिति वाच्यम्, वेदान्तवाक्यस्यापि अविद्याख्यदोषमूलत्वस्य त्वयैव वर्ण्यत्वात्। दोषाणामवान्तरभेदस्तु न बलाबलहेतुः, भ्रमविप्रलम्भादीनामितरेतरभिन्नत्वेऽपि दोषत्वस्याविशेषात्। तथाऽपि प्रामाण्यभ्रमो वेदेषु बहुलमुपलभ्यत इति चेत्, किमतः? तत्त्वस्थितिनिरूपणेऽनुपकारकत्वात्। अत एव शास्त्रप्रत्यक्षयोः प्राबल्यदौर्बल्यहेतुरपि निर्मूलः, अविद्याख्यदोषमूलत्वाविशेषात्। न च भेदवासना दोषः, शास्त्रतो निर्विशेषाद्वैते सिद्धे हि तद्विपरीतसंस्कारात्मनो भेदवासनाया दोषत्वकल्पनासिद्धिः, तद्दोषत्वे च सति तन्मूलात्प्रत्यक्षात्प्राबल्येन शास्त्रतो निर्विशेषाद्वैतसिद्धिरित्यन्योन्याश्रयात्।

नन्विदं रजतमिति वाक्यं प्रमाणविरुद्धमेव। रजतत्वं गृह्यते इत्यत्राह औपचारिकेति। न तदौपचारिकं। किं तु भ्रांतिमूलमिति भावः। ननु बहूनां योग्यानां संभवाद्योग्योपचारपक्षे विशेषसिद्धिर्न स्यादित्यत्राह तत्तत्प्रकरणादिभ्य इति।

तत्रापीति अपच्छेदन्यायविषयत्वे भेदवाक्यानां बाधितत्वं वाच्यं। नित्यनिर्दोषे कथं बाधः कथं वा तदप्रमाण्यं। अन्यथाऽद्वैतवाक्यानमेव प्रत्यक्षादिबाधादि प्रसंगादिति भावः। ननु तर्हि सर्वस्वदक्षिणादक्षिणदि वाक्येप्येषदोष इत्यत आह निर्गुणेति। तत्र वाक्यस्य सर्वथा न बाधः। किंतु संकोच इति भावः। संविदद्वैतमपीति। एवं चाधिष्ठानस्यापि निषेधान्मिथ्यात्वमिति न स्यादिति भावः। ननु वक्तृणामादि दोषाभावाद्वेदप्राबल्यमित्यत्राह दोषाणामिति। नन्वविद्यारूप दोषः शब्दस्वरूपाध्यास हेतुः। नन्वप्रामाण्यप्रयोजको भ्रमादि विलक्षणत्वादिति चेत्तत्राह भ्रमविप्रलंभेति। वातगत्यादि दोषमूल भ्रमसिद्ध वाक्यस्य वक्तृदोष भूतभ्रमाद्यभावेप्यप्रामाण्यादिति भावः। बहुळं प्रामाण्यभ्रमविषयत्वस्य देहेऽहंबुद्धिविषयत्ववदप्रयोजकत्वमित्याह किमत इति। प्रत्युत भ्रमबाहुळ्यं तद्विषयवैपरीत्यमेव दृढयतीति भावयत एव शास्त्रस्य दोषमूलत्वमतएव प्रत्यक्षसंभवद्दोषमूलत्वाद्दौर्बल्यं शास्त्रस्य निर्दुष्टत्वात्प्राबल्यमित्यपि निरस्तमित्याह अत एवेति। प्रत्यक्षसहकारितयोक्तः भेदवासनायाः दोषत्वं निराचष्टे नच भेदवासनेति। ननु निर्विशेष सिध्या भेदवासनायाः दोषत्व सिद्धिरस्त्वित्यत्राह शास्त्रत इति। अत्र शास्त्रतो निर्विशेषाद्वैतेसिद्धे हि तद्विपरीत संस्कारात्मनो भेदवासनायाः दोषत्वकल्पना। तद्दोषत्वे च सति तन्मूलात्प्रत्यक्षात्प्राबल्येन शास्त्रतो निर्विशेषाद्वैतसिद्धिरित्यन्योन्या श्रयादित्यनंतरं शास्त्रेण निर्विशेषत्वे सिद्धेस्याद्भेदवासनादोषः तद्दोषभावे च सिद्धे स्यान्निर्विशेषसिद्धिरिति पाठक्रमः। दृश्यमानपाठक्रमस्तु लेखकप्रमादकृतः। अन्योन्याश्रय प्रतिपादकत्ववाक्यमध्ये तत्संग्राहक कारिकापाठ वैघट्यादिति संप्रदायः।

"शास्त्रेण निर्विशेषत्वे सिद्धे स्याद्भेदवासना। दोषस्तद्दोषभावे च सिद्धे स्यान्निर्विशेषधीः"।

न च क्वचिद्भेदवासना दोष इति लोके सर्वत्र प्रसङ्गः, अभेदवासनायामपि तथा प्रसङ्गात्। तस्यापि च भेदवासनाख्यदोषस्य शास्त्रेऽपि दुस्त्यजत्वाच्च। अन्यथा प्रकृतिप्रत्ययपदवाक्यतदर्थादि भेदस्याकाङ्क्षासन्निधियोग्यतादिभेदस्य चानुपलम्भे वाक्यार्थविशेष प्रत्ययस्यानुदयप्रसङ्गात्। न च भेदवासना प्रत्यक्षस्यैव दोष इति वाच्यम्, विपरीतसंस्कारात्मना दोषत्वे क्वचिद्दोषता क्वचिन्नेति नियामकाभावात्। आकारान्तरेण तद्दोषत्वस्य दुष्प्रतिपादत्वात्। तद्दोषत्वे सति तन्मूलस्य भ्रान्तत्वम्, तद्भ्रान्तत्वे च सिद्धे तद्दोषत्वमिति च परस्पराश्रयणात्। प्रत्यक्षस्य भ्रान्तत्वम्, तद्भ्रान्तत्वे निर्विशेषत्वप्रतिपादनम्, तत्प्रतिपादने भेदवासनाया दोषत्वमिति चक्रकं चात्रानुसन्धेयम्। न चाद्वैतवाक्यार्थज्ञाने त्वभेदवासना मूलम्, अत एव ध्यानादिविध्युपयोग इति वाच्यम्; अभेदवासनाया अप्यन्ततो भेदवासनामूलत्वात्। न ह्यभेदज्ञानं भेदज्ञानमन्तरेण संभवति। स्वयमेव प्रतियोग्यादिभेदवासनावहत्वात्, न चाभेदवासना निष्प्रतियोगिकस्वरूपधीहेतुरिति वाच्यम्, नित्यस्फुरितस्य चिन्मात्रस्य निष्प्रतियोगिकत्वेऽपि तस्य वासनामूल त्वतन्मूलप्रत्यक्षादि विषयत्वस्या त्वयैव प्रतिक्षेपात्। अतो भेदनिषेधकाद्वैत वाक्यार्थज्ञानस्यापि भेदवासनामूलत्वं तदापादकत्वं च फलितम्,

---

ननु निर्विशेषसिद्ध्या भेदवासनायाः न दोषत्वं कल्प्यते। किं त्वन्यत्र दोषत्वेन दृष्टत्वादित्यत आह न च क्वचिदिति। इदमुपलक्षणं। पूर्वं चैत्र्यादिवैलक्षण्यज्ञाने वासनायाः अयोगादित्यपि द्रष्टव्यं। अभेदवासनायापीति। अभेदभ्रमस्थले दर्शनादिति भावः। ननु प्रत्यक्षस्य दोषजन्यत्वनिश्चयाच्छास्त्रस्य ततः प्राबल्यं न ब्रूमः। किं तु शास्त्रं निर्दोषत्वेन निश्चितं। प्रत्यक्षं तु न तथा विपरीत वासनायाःदोषत्वसंदेहे न दोषमूलत्वेन संदिग्धमिति वैलक्षण्यात्प्राबल्यं ब्रूम इति चेत् तत्राह तस्यापीति। अन्यथेति। भेदवासनामूलत्वाभाव इत्यर्थः। तदर्थेति। अद्वैतवाक्यस्य लक्षणातात्पर्यनिर्णयार्थं तर्कात्मकवाक्यार्थ ज्ञानमेकपेक्षितमिति भावः। आदिशब्देनोपक्रमादिः। योग्यतादित्यादिपदेन शक्यतावच्छेदकादि गृह्यते। न च भेदवासनेति। प्रत्यक्षस्यैव सहकारि दोष इत्यर्थः। विपरीतसंस्कारात्म नेति। अभेदज्ञानस्यापि तद्विपरीत प्रतियोग्यादि भेदविषयत्वात्तत्रापि दोषत्वमिति भावः। ननु प्रत्यक्षस्य भ्रमत्वनिश्चयादेव विपीरतवासनायाः आकारांतरेण प्रत्यक्षमात्र एव दोषत्वं कल्प्यत इत्याह तद्दोषत्व इति। ननु भेद वासनायाः प्रकृत्यादिभेदज्ञानहेतुत्वेपि नाद्वैतज्ञाने हेतुत्वं तद्विरुद्ध अभेदवासनाया एव तद्धेतुत्वादित्याह न चाद्वैतेति। अभेदवासनाया इति। न केवलं प्रकृत्यादिज्ञान एव भेदवासना हेतुः अपित्वभेदज्ञान प्रतियोगिभूत भेदविषयायाम् भेदवासनायामपीत्यर्थः। न केवलं भेदवासनायाःभेदवासनाजन्यत्वमेव। किं तु तद्धेतुत्वमपि। तथा च दोषत्वात्तज्जन्यस्याद्वैतज्ञानस्य भ्रांतित्व मनिवार्यमित्याह स्वयमेवेति। अभेद वासनायांमभेदवासनायाः प्रतियोगि विशिष्टज्ञानजन्या यःतत्समानविषयज्ञानद्वारेण भेदवासनावहत्वमिति भावः। किं निष्प्रतियोगिकस्वरूपधीः स्वप्रकाशस्वरूपमेव किं वा तद्विषयज्ञानांतरमिति विकल्पमभिप्रेत्याह नित्येति। जीवब्रह्माभेदवाक्यार्थज्ञानस्य विशिष्टविषयत्वोक्त्या भेदप्रपंच निषेधवाक्यार्थज्ञानस्यापि प्रतियोग्यादि भेदविषयत्वेन विशिष्टविषयत्वलाभाद्भेदवासनामूलत्वं

ततश्च तुल्यदोषत्वे किं कस्य बाधकं बाध्यं वा? किं चाभेदवासनाया दृष्टरूपेणादृष्टरूपेण वा तत्त्वमस्यादिवाक्याद्वाक्यार्थज्ञानोपकारकत्वम्? नाद्यः, वाक्यार्थवासनामन्तरेणापि वाक्यस्य यथासम्भवं सत्यासत्यस्वरूपस्वार्थबोधकत्वस्य भवद्भिरपि स्वीकर्तव्यत्वात्। उक्तं चाभियुक्तैः।

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हीति। अन्यथा क्वचिदप्यपरिचितविचित्रवाक्यार्थप्रत्ययो न स्यात्।

तथा च सति गतं कवीनां प्रावीण्येन, भवतां च पूर्वपक्षविज्ञानेन, श्रुतीनां चाप्राप्तार्थसमर्पणसामर्थ्येन। नापि द्वितीयः, शक्त्युपबृंहितज्ञाननिवर्त्यत्वाकृष्टप्रपञ्चसत्यत्वभीरुभिर्भवद्भिरनभ्युपगमात्। अभ्युपगच्छतामप्याकाङ्क्षादित्रयपरामर्शादिरूपदृष्टसामग्रीघटनमन्तरेणादृष्टस्योपयोगाभावात्। अत्र चाद्वैतानुध्यानजन्यवासनामन्तरेण तत्प्रत्ययसामग्रीसिद्धेः। अन्यथा तच्छ्रवणस्याप्यनुपपत्त्या वासनाजनकस्य तद्ध्यानस्याप्यसिद्धिप्रसङ्गात्। न चापरोक्षरूपवाक्यार्थज्ञानजननार्थं दृष्टद्वारेणादृष्टद्वारेण वा तदुपयोग इति वाच्यम्, शब्दजन्यप्रत्यक्षादेर्दूषणात्।

"न शब्दजन्यं प्रत्यक्षं प्रत्यक्षत्वाद्यथेतरत्। व्यवस्थाभञ्जने तु स्यात्सर्वमानेषु संकरः॥
अन्त्यप्रत्यक्षवेद्यं तु ब्रह्म चेदधिकान्वितम्। सविशेषत्वमेव स्यान्न चेत्प्राग्वच्च संसृतिः॥"

तदापादकत्वं च फलतयेत्याह अतो भेदेति। अदृष्टरूपेणेति। विहितःनिदिध्यासनजन्याऽदृष्टं भेदवासनैवेत्यर्थः।

भेदवासनानिरसनद्वारोप योगस्त्वित्यत्राह उक्तं चेति। अत्यंतासत्वेन ज्ञाने विपरीतवासना भवति। तस्यां सत्यामपीत्यर्थः। अन्यथेति वाक्यार्थवासनाया हेतुत्व इत्यर्थः। प्रावण्यंमपूर्वार्थप्रतिपादनसामर्थ्यं पूर्वपक्षार्थः। पूर्वं सिद्धांतिना ज्ञातार्थः।

श्रुतीनां चेति। अपूर्वविधिरेवोच्छिद्येतेति भावः। शक्तेति। नह्यभेदवासनारूपमदृष्टमवधारणे अपरोक्षेवोपयुज्यते प्रमाणस्वभावाद्विषयस्वभावाद्वा तदुपपत्तेः। एककोटिकानवधारणस्य निरासात्। किंत्वविद्यानिवर्त्यनुकूलशक्तिविशेषे। तथाच शक्तिविशेषविशिष्ट ज्ञाननिवर्त्यत्वे ज्ञानत्वेन ज्ञाननिवर्त्यत्वाभावात्सत्यत्वापत्तिरित्यर्थः। ननु सर्वैरपि कार्यमात्रस्यादृष्ट जन्यताभ्युपगमात् ध्यान जन्यवासनारूपादृष्टस्य वाक्यार्थ ज्ञान एवोपयोगोस्तु। नाविद्यानुकूलशक्तिविशेष इत्यत्राह अभ्यपगच्छतामिति। आकांक्षादिह परामर्शस्यवासनातः प्रागपि सत्वान्नतद्घटनेनोपयोगस्त्वया सुवच इति भावः। अद्वैतज्ञानस्य अद्वैतवासनासापेक्षत्वे अन्योन्याश्रयादित्याह अत्र चेति। ननु शब्दात्प्राक् परोक्षज्ञानमेव जायते। पश्चाददद्वैतानुध्यानवासनामहिम्ना प्रत्यक्षं जायते। ततश्च सत्यत्यापत्तिरपीत्या शंकयाह न चेति। प्रत्यक्षादित्यादिशब्देन "द्रष्टव्य" इति दर्शनोद्देश्शेन श्रवणादि विधानादि विवक्षितं। ज्ञानस्याविधेयत्वेहि श्रवणादि फलत्वे नोद्देश्यतास्यात्। ज्ञानस्य विधेयता समर्थनात् मोक्षोद्देशेनैव तद्विधिरिति भावः।

न शब्दजन्यमिति। प्रत्यक्षंब्रह्मगोचर प्रत्यक्षं शब्दजन्यं न भवतीति साध्यमितवद्घटादिचाक्षुष प्रत्यक्षवदित्यर्थः। न केवलं प्रत्यक्षस्य शब्दजन्यत्वे चक्षुरादिभिरिपि परोक्षं स्यादित्यादि प्रसंगः। किं तु

अत एव शास्त्रप्रत्यक्षजन्यज्ञानयोः परोक्षत्वापरोक्षत्वलक्षणवैषम्यनिषेधोऽपि प्रत्युक्तः।

यच्चोपजीव्यस्यापि प्रत्यक्षस्य ज्वालाभेदानुमानेन बाधो दृष्ट इति; तदप्यतिस्थवीयः, तत्र उपजीव्यविरोधाभावात्। नहि तत्र ज्वालैक्यप्रत्यभिज्ञादिकं भेदानुमानस्योपजीव्यम्। न च भेदानुमानं स्वोपजीव्यव्याप्तिग्राहकप्रत्यक्षविशेषं बाधते। तथाऽप्युपजीव्यजातीयस्यापि विरोधे तद्वा तादृग्वेति न कश्चिद्विशेष इति चेत्, सामान्यत उपजीव्यजातीयस्यापि ज्वालैक्यज्ञानस्य विशेषतोऽपि दृष्टदोषजातीयत्वात्। अचिरनिर्वापितारोपितप्रदीपेऽपि निर्वाणादर्शिनस्तदेवेदमिति दृढप्रत्यभिज्ञानमुदेत्येव। तत्रापि हि भेदादर्शनसादृश्यादिकं दोषः। सोऽत्रापि संभवन् ज्वालैक्यज्ञानस्य निर्दोषत्वनिर्णयं प्रतिरुणद्धि। तावति चानुमानमबाधितमुदेतीति न दोषगन्धः। इह तु स्वोपजीव्यं तज्जातीयं च कृत्स्नं प्रत्यक्षं बाध्यत्वेन प्रसक्तमिति स्थितः स्वव्याघातः। अत उपजीव्यप्रत्यक्षबाधेन शास्त्रं नोदेतुमलम्। किंच शास्त्रप्रत्यक्षयोर्बलाबलपरीक्षकप्रमाणमपि ब्रह्मव्यतिरिक्तभेदगोचरत्वेन शास्त्रेणैव बाध्यत इति स्वेनैव स्वबलं प्रतिक्षिपत् शास्त्रं कथं प्रत्यक्षात्प्रबलं भविष्यति? असत्यात् सत्यप्रतिपत्त्यादिकं तु दूषयिष्यते। अतः प्रत्यक्षादिसिद्धानुपमर्देनैव भेदनिषेधकश्रुतीनां तात्पर्यमुपपादनीयमिति॥

॥ इति श्री कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यां प्रत्यक्षशास्त्रविरोधपरिहारवादः एकोनत्रिंशः॥ २९॥

तदभ्युपगमे प्रयोजनं च नास्तीत्याह अंत्येति। आद्ये भ्रमत्वादनिवर्तकत्वं अंत्ये स्वरूपप्रकाशवद निवर्तकत्वमिति भावः।

अत एवेति। शब्दजन्य ज्ञानस्यापरोक्षत्व भंगादित्यर्थः। एवंजात्या प्रत्यक्षं बलीय इति भावः।

ननु प्राबल्यमागमस्यैव।जात्या तेषु त्रिषु स्मृतमिति स्मृतिः कथमिति चेन्न। तत्र प्राबल्यं निर्दुष्टत्वं जातिर्वेदत्वं तथा च वेदत्वेन निर्दुष्टत्वमिति द्रष्टव्यं। उपजीव्यत्वं साक्षादुपजीव्यत्वमेव उत तज्जातीयत्वमेव वा नाद्य इत्याह तत्रोपजीव्येति। द्वितीयं शंकते तथाऽपीति। तत्साक्षादुपजीव्यं तादृगुपजीव्यजातीयमित्यर्थः। सामान्यत इति। तैलनाशस्य दीपनाशहेतुत्वं प्रत्यक्षसिद्धं। एवं वर्तिनाशस्यापि तथा। दीपस्याप्याश्रय नाशकत्वं तैलनाशत्वं च। एवं चतुर्भिःकारणताग्राहि प्रत्यक्षैरनन्यथा सिद्धेर्विरोधादृष्टदोषज्वाला प्रत्यभिज्ञानांतरसजातीयत त तयाः प्रत्यभिज्ञांतरदोषत्वेनावधारित सादृश्यस्येहापि दोषत्वसंभवाद्दोष मूलत्वेन शंकिता प्रत्यभिज्ञा भेदानुमानेन बाध्यत इत्यर्थः। प्रत्यभिज्ञांतरे दोषदर्शनमुपपादयति अचिरेति निर्वाणंनाशः। सादृश्यादिकमित्यादिशब्देनैकवर्तिकादिगतत्वं विवक्षितं। संभवन्निति। शंक्यमान इत्यर्थः। ननु वर्णपदवाक्यस्वरूपांशमुपजीव्यं न चेद्बाध्यते। सत्यत्वंशस्त्वनुपजीव्यः स बाध्यत इत्यत्राह अत इति। वर्णपदवाक्यानां स्वरूपमेव सत्यत्वं तस्यैव तदधिकरणे स्वभावविरोधित्वात्तथा च सत्यत्वबाधे निस्वरूपतापत्त्या उपजीव्यविरोध एवेति भावः। स्वेनैवेति। शास्त्र प्राबल्यग्राहकस्य बाधश्शास्त्र प्राबल्यस्य बाध एवेति भावः। नन्वस्तु शास्त्रप्राबल्यस्य बाधः तथाप्यसत्यादेव शास्त्रान्निर्विशाषसिध्युपयोगी भविष्यतीत्यत्राह। असत्यादिति।

इति वत्सकुलजलाधि नृसिंहगुरुसुतेन सिंहदेवेन कृतायां शतदूषणी टीकायां एकोनत्रिंशः वादः समाप्तः॥

॥ अथ असत्यात्सत्यसिद्धिभङ्गवादः त्रिंशः ॥३०॥

सत्यैरेव सदातनोक्तिनिवहैस्सत्यप्रमाहेतुभिस्सत्यं ज्ञानमनन्तमेकममलं यद्ब्रह्म निर्दिश्यते।
तत्सत्यैः परिकर्मितं गुणगणैस्सत्यादिसन्धिक्रियं सत्यानन्दविभूतिकं विचिनुमस्सत्यस्य सत्यं महः॥

योऽयमसत्यप्रलापः-असत्यादपि शास्त्रादेस्सत्यस्य ब्रह्मणः सिद्धिस्संभवति। अस्ति चासत्यात्सत्योत्पत्तेस्सत्यप्रतिपत्तेश्च लोके बहुलमुपलम्भः; आरोपितैरेव शुक्तिरजतरज्जुसर्पशङ्का विषभावितगरुडादिभिः सत्यस्य हर्षभयमरणगरलहरणादेर्दर्शनात्। तथा स्वाप्नार्थेन शुभादिः, प्रतिबिम्बेन बिम्बतत्त्वम्, लिप्यक्षरैरक्षराणि, रेखागवयादिभिस्सत्यगवयादिः, चित्रपुरुषदिभिः पुराणवृत्तान्तादिः, नादविशेषोपाधिकशब्दनानात्वेनार्थभेदश्चेति असत्यैरेव सत्यानि निश्चीयन्ते। तथा बाष्पारोपितधूमादिभिर्यदृच्छासन्निहितधूमध्वजादिसिद्धिः। न चात्र सर्वत्र तत्तत्संवित्स्वरूपमेव सत्यं कारणमिति वाच्यम्; ज्ञप्तिस्वरूपमात्रम्य कारणत्वे ज्ञप्तयन्तरादपि तदुत्पत्तिप्रसङ्गात्। विषय विशेषविशेषितायास्तु कारणत्वोक्तौ नागृहीतविशेषणन्यायेन विषयस्यापि कारणत्वावश्यम्भावात्। नचासत्यात्सत्यसिद्धौ लिङ्गविभ्रमात्साध्यसिद्धिप्रसङ्ग इति वाच्यम्, यादृच्छिकसंवाददशायामिष्ट प्रसङ्गत्वात्। तत्सिद्धिनियमः प्रसज्यत इति चेन्न; तदनियमस्यासत्यत्वप्रयुक्तत्वाभावात्, अपि

पूर्वमसत्यात्सत्यसिद्धिं दूषयिष्याम इत्युक्तं। तद्दूषयिष्यन् वादार्थं संगृह्णाति सत्यैरिति। सत्यभूतैस्सदातनोक्तिनिवहैः तत्वहित पुरुषार्थप्रतिपादकत्वेनानेकविधैरित्यर्थः। यद्वा भेदाभेदघटकश्रुति निवहैरित्यर्थः। सत्य प्रमाहेतुभिरिति। सत्यवस्तुगोचरप्रमायाः हेतुभिर्यद्वा सत्यभूतायाः प्रमाहेतुतद्धेतुभिरित्यर्थः। निर्दिश्यते प्रतिपाद्यते सतैर्गुणगणैः परिकर्मितमलंकृतं सत्याभिसंधिक्रमः- सत्यसंकल्पः प्रकारो यस्येत्यर्थः। सत्यस्येति। निर्धारणे षष्ठी। चेतनेषु सत्यमित्यर्थः। सत्यशब्देन नित्यत्वं विवक्षितं। सर्वचेतनानां नित्यत्वेपि तेषां गुणविग्रहादिविशिष्टतया नित्यत्वाभावादीश्वरस्यतु नित्योनित्यानां चेतनश्चेतनानां (कठ-२-५-१३ श्वे ६-२३) च तत्सत्यादिति भावः। पूर्वार्धेन वादार्थसंग्रहः। उतरार्धेन तत्फलसंग्रहः।

कारणत्वस्य पूर्वं सत्वरूपत्वादंत्यस्तदसंभवादनुवादानर्हः पूर्वपक्ष इत्यभिप्रायेणाह यः प्रलापइति। सिद्धिर्ज्ञानं असत्यादित्युत्पत्तिप्रदर्शनदृष्टांतार्थ उत्पत्तौ निदर्शनमारोपितेत्यादिशंका विषभावितगरुडनिदर्शनमपरोक्षोप्यनिर्वचनीयांगीकारेण। आदिशब्दाभ्यां मनसि ब्रह्मदृष्टिः तत्फलं च विवक्षितं। ज्ञप्तौ निदर्शनमाह। तथेत्यदि। प्रतिबिंबे बिंबभेदाध्यासात्तद्विष्टरूपेण सत्यत्वंलिप्यक्षरैः लिपावध्यस्ताक्षरैः रेखायामध्यस्त गवयवानरादिभिश्चित्रेऽध्यस्तपुरुषहस्त्यादिभिः भारतरामायणादि प्रतिपाद्ययुधिष्ठिराघवादिवृत्तांतादिज्ञानमित्यर्थः। नादेति। नगोनाग इत्यादौ कल्पित ह्रस्वदैर्घ्यादिभेदस्य स्फोट रूपशब्दस्यार्थ भेदहेतुत्वमिति भावः॥ यदृच्छासन्निहितेति। सत्य इत्यर्थः। अत्र किं ज्ञानस्वरूपमात्रं कारणं उतविषयविशेषितमिति विकल्पाभिप्रायेणाह न ज्ञप्तीति। नागृहीतेति "नागृहीतविशेषणा विशिष्टे बुद्धिरूत्पद्यत" इति न्यायेन। लिंगविभ्रमादिति। भ्रमाध्यस्तलिंगादित्यर्थः। साध्यसिद्धिः - सत्यसाध्यसिद्धिः। अत्र किं क्वचिदापाद्यते उत सर्वत्र आद्य आह यादृच्छिकेति। द्वितीयं शंकते

त्वव्याप्तिनिबन्धनत्वात् । व्याप्तं हि साधनम् । नह्यसन्धूमाभासो वह्निव्याप्तः । बहुलत्वोद्धवत्वादिवत्त्वादनारोपितत्वस्यापि व्याप्त्युपयोगितयाऽन्वयव्यतिरेकसिद्धत्वात् । प्रतिबिम्बादेश्चासत्यस्यापि सत्यमुखादिसिद्धौ अन्वयव्यतिरेकाभ्यां व्याप्तिसिद्धेः। प्रतिबिम्बस्यासत्यत्वेऽपि बिम्बप्रतिबिम्बयोर्व्याप्तिस्सत्या, तद्वशात्तत्र बिम्बसिद्धिरिति चेन्न; व्याप्तिर्हि सम्बन्धत्वाद्व्याप्य व्यापकसापेक्षा, कथं तयोरन्यतराभावे सा सत्या भवेत्? अतो व्याप्यं प्रतिबिम्बादिकमसत्यमेवेति तद्गता व्याप्तिरपि तद्गतमालिन्यादिवदसत्यैव । न च विषयमिथ्यात्वे तद्विषयज्ञप्तिसत्यत्वसिद्धिः, न हि नभःप्रसूनमिथ्यात्वे तत्परिमलपारमार्थ्यम् । अतश्शास्त्रादेर्मिथ्यात्वनिश्चयेऽपि ततः परमार्थनिर्विशेषब्रह्मनिश्चय उपपद्यते । नच सहसा शास्त्रस्यासत्यताधियमधिरोहति, स्वजन्यविश्वनिवर्तकाद्वैतबोधजन्मनः प्राक् सत्यतयैवावभासात् । अतो बोधनदशायां स्वयमपि सदित्यवभासात् स्वजन्यबोधसामर्थ्यादेव स्वस्यापि निवृत्तिसिद्धौ पुनः बोधान्तरस्यानपेक्षितत्वेन तदुत्पादकत्वाभावाच्च न कश्चिद्विरोधः । न च वाच्यं सत्यतया प्रत्यक्षादिसिद्धस्यापि प्रपञ्चस्य शास्त्रेणेव

तत्सिद्धिनियम इति । शंकते व्याप्तीति । ननु तत्राप्यसति वह्निव्याप्तिरस्तु असत्यापिव्याप्तया वह्निसिद्धिरस्त्वित्यत्राह बहुळत्वेति। बहुळत्वमविच्छिन्नमूलत्वं ऊर्ध्वत्वं भ्रंकषत्वं। यथान्वयव्यतिरेकाभ्यां धूमे बहुळत्वादे वह्नि व्याप्त्युपयोगिता तथा लिंगेनारोपितत्वस्यापि व्याप्त्युपयोगिता तथा व्याप्त्यावप्यनारोपितत्वस्य साध्यसिद्धिप्रयोजकतेत्यर्थः । नन्व सत्यात्प्रतिबिंबात् बिंबसिद्धिः कथमित्यत्राह प्रतिबिंबादेश्चेति । व्याप्तेस्सत्यत्वादित्यर्थः । नन्वसद्धूमवदसति प्रतिबिंबे कथं सा सती स्यादित्यत्राह प्रतिबिंबस्य असत्यत्वेपीति । व्याप्यव्यापकयोरन्यतरस्य सत्वादिति भावः उभयनिरूप्यत्वाद्व्याप्तेरन्यतराभावे सत्यं न स्यादिति परिहरति व्याप्तिस्तर्हीति । विषयस्याहेतुत्वेप्यसत्यात्सत्यसिद्धिरपरिहार्या । ज्ञानस्याप्यसत्वादित्यत्राह न चेति । नन्व सत्यात्सत्यसिद्धिसंभवेप्यसत्यतया ज्ञातच्छास्त्रा तत्सिद्धिर्नस्यात् यथाहच सत्वेन ज्ञाताद्धूमात् वह्न्यनुमितिर्नस्यादित्यत्राह अत इति । युक्तं धूमादावसत्वेन ज्ञानस्य पक्षधर्मताज्ञानादिविघटकत्वात् प्रकृते त्वसत्वेन ज्ञानस्य न विरोधित्वमाकांक्षादिज्ञान विरोधित्वा भावा भावः । एवमत्यतया ज्ञानमभ्युपगम्योक्तं । वस्तुतस्तु तदेव नेत्याह न चेति । श्रवणदशामारभ्य निवर्तकज्ञानोदयपर्यंतं शास्त्रस्यासत्यतानधियमधिरोहति । अपितु तदतिरिक्तानामेव । ततश्च मनन निदिध्यासनाभ्यामसंभावनाद्विपरीत भावना निरोधे सति अनंतरोत्पन्न ज्ञानमेव शास्त्रस्याप्यसत्यतां विषयीकरोतीत्यर्थः । ननु शास्त्रं प्रपंच निवर्तकज्ञानेनैव निवतति उतान्येन आद्ये निवर्तक ज्ञाननिवृत्यर्थः ज्ञानातंरमपेक्षणीयं । द्वितीये स्वनिवृत्यर्थमपि ज्ञानांतरमित्युभयथा प्यसत्यतया ज्ञानस्य शास्त्रस्य ज्ञानोत्पादकत्वमावश्यकमित्यत्राह अतो बोधनदशायामिति । शास्त्रमेव सर्वासत्यता बोधजनकं अंततश्च तद्ज्ञानात्पूर्वमर्थांतरं इव शास्त्रेप्यसत्यता बोधोऽस्त्येव । ततश्च बाधकज्ञानाभावाच्छास्त्रात्सर्वनिवर्तक सर्वासत्यताबोधसिद्धौवार्थांतरैस्सर्व शास्त्रं निवर्तकज्ञानं च सर्वं तद्ज्ञानेन निवर्तत इत्यर्थः । सदित्यवभासाज्जन्येत्यन्वयः । ननु बाधात्प्रपंच सत्यत्वं साधयता त्वया ब्रह्मणस्सत्यत्वं नांगीकर्तुं शक्यं । तत्रापि बाधसंभवादतः कथमसत्यात् सत्यसिद्धिरिति शंकां परिहरति न च वाच्यमिति । बाधः किं

शास्त्रसिद्धसत्यत्वस्यापि ब्रह्मणः केनचिद्बाधे मिथ्यात्वं संभवतीति, अदर्शनादेव तन्निरासात्। न च कारणदोषनिश्चयात् फलितः प्रतीतिविषयबाधः, यादृच्छिकसंवादिलिङ्गविभ्रमादिभिरेवानैकान्त्यात्। अतो वस्तुतो मिथ्याभूतादपि शास्त्रादेः परमार्थसद्वितीयब्रह्मनिश्चय उपपद्यत इति।

अत्रोच्यते-यदुक्तमसत्यात्सत्योत्पत्तिर्दृश्यत इति, तदसत्, सत्यैर्ज्ञानादिभिरेव तत्र तत्र तत्सिद्धेः। यत्तत्रोक्तम्-ज्ञप्तिस्वरूपमात्रस्य कारणत्वे ज्ञप्त्यन्तरादपि तत्सिद्धिप्रसङ्ग इति, तदपि मन्दम्, ज्ञप्तिस्वरूपाणां परस्परविचित्रशक्तित्वात्। विषयविशेषमन्तरेण वैचित्र्यं कुतस्सिद्धमिति चेत्, किमयमुत्पत्तिप्रश्नः? उत ज्ञप्तिप्रश्नः? आद्ये तत्सामग्रीवैचित्र्यमेवोत्तरम्। तदेव च कुतस्सिद्धमिति चेन्न; सामग्रीवैचित्र्यपारवश्यस्य सार्वत्रिकत्वात्। सामग्री वैचित्र्यादेव हि तत्तद्विषयत्वनियमोऽपि संविदः। न च तत्तद्विषयत्वमेव सामग्र्यधीनो विशेष इति वाच्यम्, एकविषयत्वेऽपि सामग्रीविशेषात्प्रत्यक्षत्वपरोक्षत्व-स्मृतित्वानुभवत्वगरल निवर्तकत्वतदशक्तत्वादिविशेषदर्शनात्। न च विषयोऽपि ज्ञप्तिसामग्र्यनुप्रविष्ट इति वाच्यम्, अतीतानागतानुमानादिषु तदयोगात्। अस्मदादिप्रत्यक्षज्ञानमात्रे त्विन्द्रियसंप्रयोगाधारतया तस्य कारणत्वमिष्यते। न च मिथ्याभूतस्य विषयस्य संप्रयोगाधारता, प्रकाशात्पूर्वं तत्स्वरूपाभावात्। प्रकाशस्य च संप्रयोगसमनन्तरभावित्वेन चक्रकाश्रयप्रसङ्गात्। द्वितीयेऽपि स्वयंप्रकाशादनुव्यवसायादेर्वा यथाभिमानं तत्सिद्धिः। तथाऽप्यवान्तरवैचित्र्योपलम्भे विषयविशेष एव कारणमिति चेन्न;

प्रात्यक्षिकमुतानुमानिकः नाद्य इत्यत्राह अदर्शनादेवेति। बाधस्य प्रत्यक्षतो दर्शनाभावादित्यर्थः। द्वितीये आह न च कारणेति। दुष्टकारणजन्यत्वस्य अप्रामाण्य व्याप्तत्वादप्रमाण्यानुमितौ तदंतर्भाविन विषयबाधं फलिष्यतीति नयुक्तं दोषमूलत्वस्य व्यभिचारेण व्याप्त्यभावादिति भावः। उपसंहरति वस्तुत इति।

अत्रोच्यत इति। ज्ञानादिभिरित्यदिशब्देन लिप्यादिपरिग्रहः। ननु ज्ञानस्य वैचित्र्ये शक्तिवैचित्र्यं। शक्तिवैचित्र्यं च विषयवैचित्र्यादित्याशंकते विषयविशेषमिति। आद्य इति। ज्ञान सामग्रीवैचित्र्यादेव ज्ञानवैचित्र्यं न विषयविशेषादित्यर्थः। ननु सामग्रीवैचित्र्यमपि विषयविशेषादेवेति शंकते तदेवेति। सामग्री वैचित्र्येति। सामग्रीवैचित्र्यं तत्सामग्री वैचित्र्यादेवेत्यर्थः। ननु ज्ञानसामग्रीवैचित्र्यप्रयोजकं तत्सामग्रीवैचित्र्यं विषय एवेत्यत्राह सामग्रीवैचित्र्यादेवहीति तत्प्रयोज्यत्वान्नप्रयोजकमित्यर्थः। ननु सामग्रीवैचित्र्याधीनवैचित्र्यविशिष्टं ज्ञानं हेतुरिति वाच्यं। वैचित्र्यं च विशेषः तत्तद्विषयत्वमेववान्यस्या संभवात्तस्य च तत्तद्विषयस्वरूपत्वमिति विषयस्यापि भयादिहेतुता प्राप्नोतीत्याशंक्य निराकरोति नचेति। एकेति। तथा च ज्ञानवैचित्र्यं विषयादेवेति नियमासिद्धिरिति भावः। विशेषदर्शनाद्वैचित्र्यदर्शनादित्यर्थः। ज्ञप्तिसामग्र्यनुप्रविष्ट इति। ततश्च विषयादेव ज्ञानवैचित्र्यमि शंकार्थः। ज्ञानमात्रे विषयस्य करणत्वमुत प्रत्यक्ष इति विकल्प्य आद्य आह अतीतानागतेति। द्वितीय आह अस्मदादीति। संप्रयोगस्सन्निकर्षः। संप्रयोगाधारत्वमिति प्रकाशात्प्रागिति शेषः चक्रकेति। विषये सति संप्रयोगे सति प्रकाशः। प्रकाशे सति प्रातिभासिकरजतादि विषय इति चक्रकमित्यर्थः। ज्ञप्तिप्रश्न पक्षं दूषयति द्वितीय इति। यथाभिमानं तन्मत भेदेन गुरुमते स्वयंप्रकाशान्नैयायिकमतेऽनुव्यवसायाद्भाट्टमते ज्ञाततालिंगकानु मानाद्वैचित्र्य= ग्रह इत्यर्थः। ननु भयजननशक्तिसाम्येपि भये तारतम्यदर्शनात् सर्पव्याघ्रादि भ्रमेषु शक्ति वैचित्र्यं

विषयविशेषस्यैव तत्र तदवान्तरवैचित्र्यरूपत्वात्; तत्प्रकाशं प्रति सत्यस्य दोषादेरेव प्रयोजकत्वात्। मिथ्याभूतस्य विषयस्यैव च तत्प्रकाशप्रयोजकत्वे सत्यादसत्यप्रतीतिमात्रसिद्धेः। तदुलपक्षितस्य ज्ञानस्य च हर्षभयानुव्यवसायादिहेतुत्वेऽप्युपलक्षणस्य तस्य हेतुत्वाभावात्। न हि कारणोपलक्षणमपि तत्कार्यकारणं भवति, अतिप्रसङ्गात्। अन्वयव्यतिरेकाभ्यां नातिप्रसङ्ग इति चेन्न; विषयस्यैव निरपेक्षहेतुत्व विवक्षायामप्रतीयमानादपि सपदिर्भयादिप्रसङ्गात्। ज्ञप्तिसापेक्षत्वविवक्षायां तदुपलक्षणमात्रेणान्वय व्यतिरेकयोरन्यथासिद्धेः।

तर्हि ज्ञप्तेरपि निरपेक्षाया हेतुत्वे ज्ञप्त्यन्तरादपि तदुत्पत्तिप्रसङ्गः, सविषयाया हेतुत्वे विषयोपलक्षणत्वमिति विपरिवर्तप्रसङ्ग इति चेन्न; ज्ञप्तेरुपलक्षणत्वे तदुपलक्षितस्य विषयस्याज्ञायमानदशायामपि भयादिहेतुत्वप्रसङ्गात्। कार्योत्पत्तिदशायामपि कारणोपलक्षणावस्थाना पेक्षायां नामान्तरेण तस्यापि कारणत्वस्वीकारात्। न चैवं विषयेऽप्यस्त्विति वाच्यम्, विषयोल्लेखमन्तरेण विषयिणो ज्ञानस्यावस्थानाभावादेव केवलज्ञानात्तदुत्पत्ति प्रसङ्गस्यानवतारात्। अप्रसृतनिर्विषयाभ्युप गमपक्षेऽपि प्रसरावस्थाविशेषविशिष्टस्य कारणत्वस्वीकारात्। ज्ञानमन्तरेण विषयस्याप्यवस्थानं कथमिति चेन्न; क्षणभङ्गात्मख्यात्यादिप्रसङ्गात् त्वयाऽपि तत्प्रतिक्षेपात्। तथाऽपि लिङ्गतज्ज्ञानयोरिवात्रापि

विषयविशेषादेवावसेयं। तथा चा सत्यस्य सत्यवैचित्र्य धीहेतुत्वं सिद्धमिति शंकते तथापीति। तत्र उभयतारतम्यादेरेव तच्छक्तितारतम्यमनुमातुं शक्यं। तथापि पराभ्युपगमेनेव परिहरति नेति। तत्प्रकाशं प्रतीति तद्विषयस्या सत्वाद्दोषाधीनप्रकाशत्वादिति भावः। तत्प्रकाशप्रयोजकत्वे सत्यादित्यत्रासत्यादिति भेदः। एवं शक्ति वैचित्र्यादिति प्रसंग परिहारः उक्तः। संप्रति विषयवैचित्र्यादतिप्रसंगनिरासेपि न दोषइत्याह तदुपलक्षितज्ञानस्येति। अतिप्रसंगादिति। चंद्रोपलक्षक शाखाया अपि चंद्रकार्यविषयप्रकाशहेतुता प्रसंगादित्यर्थः। विषयप्रकाशे चंद्रमात्रस्य प्रयोजकत्वेपि दोषाभावादत्रतु ज्ञानमात्रस्य भयादि हेतुत्वा दर्शनाविशेष इति शंकते अन्वयव्यतिरेकाभ्यामिति। अनन्यथासिद्धान्वयव्यतिरेकौ कारणता ग्राहकौ तावत्रनास्तीति परिहरति विषयस्यैवेति।

निरपेक्षाया इति। सर्पादिविषयकत्वनपेक्षया इत्यर्थः। विपरिवर्तप्रसंग इति विषयोपलक्षितज्ञानस्य हेतुत्वे ज्ञानविषयीभूतविषयस्य कारणत्वमिति विपरिवर्तप्रसंगइत्यर्थः। ज्ञप्तेरूपलक्षणत्व इति। उपलक्षणीभूतज्ञानाभावकालेप्युपलक्ष्यस्य विषयस्य सत्वादिति भावः। कार्योत्पत्तीति। तेजोगतोद्भूतरूपवत्स्वतंत्रान्वयव्यतिरेक सत्वादिति भावः। विषयोल्लेखमिति। विषयमात्रं नोपलक्षणं। अपितु विषयोल्लेखो ज्ञानगतो धर्मः तदभावे ज्ञानस्यावस्थानमेव नास्तीति भावः। ननु सिद्धांते विषयानुल्लेखेनापि ज्ञानस्वरूपावस्थानादिति प्रसंगस्तुल्य इत्यथ आह अप्रसृतेति। ज्ञानावस्थाविशिष्टं कारणं तदेव च विषयोपलक्ष्यं। तच्च प्रसरणविशेषदशाया मेव नानुल्लेखावस्थायांमतिप्रसंग इत्यर्थः। क्षणभंगेति। ज्ञानव्याप्तिः ज्ञानकालमात्रसत्वे भवति ज्ञानात्मकत्वे वा आद्ये ज्ञानस्य क्षणमात्र स्थिति कत्वादर्थस्यापि तथापत्तिः। द्वितीयेचात्मख्यातिस्यादित्यर्थः। आदिशब्देन शून्यवादो ग्राह्यः।

तदंगीकारेऽपसिद्धांत इत्याह त्वये वेति। ननु ज्ञाने विषयस्योपलक्षणत्वान्नभयादिहेतुत्वं तदा

विषयविषयिणोर्द्वयोरपि कारणत्वमस्त्विति चेन्न; तत्र द्वयोरप्यनन्यथासिद्धान्वयव्यतिरेकवत्वात्, अत्र तु विषयस्यान्यथासिद्धत्वाद्विषयिणश्च हेतुताया दुस्त्यजत्वात्। लिङ्गज्ञानेऽपि विषयस्योपलक्षणत्वमस्त्विति चेन्न; लिङ्गभ्रमेऽप्युपलक्षणत्वसिद्धेः तदुपलक्षितेन ज्ञानेन लिङ्गिसिद्धिनियमप्रसङ्गात् . अतो न लिङ्गज्ञाने विषयोपलक्षणत्वम्। अत्रापि तर्हि विषयान्तरोपलक्षितज्ञानेऽप्युपलक्षणत्वं सिद्धमिति ततो हर्षादिसिद्धौ घट्टकुट्यां प्रभातमिति चेन्न; तद्विषयोपलक्षणज्ञप्तिस्वरूपविशेषस्यैव तत्कारणत्वस्वीकारात्। यथा गुणविशेषोपलक्षितजात्यादिस्वरूपस्य वाच्यत्वे गुणस्य वाच्यबर्हिभावः, तथाऽत्रापि विषयस्य कारणबहिर्भावः। भवतु वा परमार्थधूमाद्युपलक्षितं ज्ञानं कारणमिति, तथाऽपि भवतो न कश्चिल्लाभः, तत्रापि विषयस्याकारणत्वात्, सर्वत्र ज्ञानस्य सत्यस्य कारणत्वसिद्धेः। किंच

''कार्यकारणभावे हि पौर्वापर्यमुदीर्यते। असत्यत्वे कथं पूर्वभावित्वं कस्यचिद्भवेत्॥''

ननु तत्तद्विषयाणां मिथ्याभूतानामपि कारणत्वं शास्त्रतस्सिध्यति; स्वप्नेष्वगम्यागमनं च धन्यमित्यादिभिस्तद्विषयाणामेव हि शुभाशुभादिसिद्धिहेतुत्वं स्वप्नाध्यायादिषु पठ्यते इति चेन्न; उपचारादपि प्रयोगसंभवात्, तद्भमस्यैव तत्र हेतुत्वात्तस्य च सत्यत्वात्। स्वाप्नार्थनामीश्वरसृष्टत्वपक्षे

लिंगस्याप्यनुमितौ करणता न स्यादित्या शंकते तथापीति। तत्रद्वयोरिति अनुमितौ लिंगात् ज्ञानयोरित्यर्थः। लिंगज्ञानस्यान्यथा सिद्धि शंकते लिंगज्ञानेऽपीति। ननु लिंगविभ्रमादावपि भ्रमरूपानुमितिर्भिर्भवत्येवेत्यत्राह तदुपलक्षितेनेति। प्रमारूपानुमितावेव हेतुत्वमित्यर्थः। अत इति। यतो लिंगविभ्रमादिस्थले भ्रमरूपानुमिति प्रसंगस्ततो न विषयस्योपलक्षणत्वंमित्यर्थः। अत्रापि तर्हीति। ज्ञानमात्रं सर्पाद्युपलक्ष्यमविशेषादिति भावः। हर्षादिसिद्धिप्रसंग इति। कृत्वा विषयस्यापि हेतुत्वमायास्यतीति भावः। सर्पादिना तद्विषयकमेव ज्ञानमुपलक्षणमिति परिहरति तद्विषयोपलक्षणेति सविषयः उपलक्षणं यस्येति बहुव्रीहिः। क्वचित्तद्विषयो पलक्षितेति पाठः। यथेति। पाकजरूपसमानाधिकरण द्रव्यत्वसाक्षाद्व्याप्यजतिः पृथिवीत्वमित्यत्र जातिविशेषः पृथिवीशब्दवाच्य न रूपं तथेहविषय इत्यर्थः। अयं भावः। ज्ञाने धर्मविशेष एव व्यावर्तकोः न विषयः। स जातिरन्योपेत्यन्यदेतत्तादृश धर्मविशेषोपलक्षणाय घट ज्ञानं पट ज्ञानंमिति व्यवहारः। तद्वाचकासाधारणशब्दाभावाद्यधिक्षीर माधुर्यं गुडमाधुर्यमिति। तथा च न सर्वा व्यावर्तकत्वमिति न तस्य हेतुता। गंध इति। वस्तुतो न लिंगं कारणं। परामर्श घूमोपलक्षित ज्ञानस्यैव प्रमानुमिति हेतुत्वादतो न तदृष्टांतानुरोधावपि विषयो हेतुरित्याह भवतु वेति। तथापीति। तथा चेत्यर्थः। तत्रापीति। अनुमितौ परामर्शविषयस्येत्यर्थः।

कारणतायां साधकाभावमुक्त्वा यः बाधकं चाह किंचेति। पौर्वापार्यं हि पूर्वापरकालसत्वं। असतःकदापि सत्वं बाधितमिति भावः।

धन्यमिति धनं प्रयोजनमस्येत्यस्मिन्नर्थे ''स्वर्गादिभ्यो यदिति'' यत् प्रत्ययां तेन धनहेतुत्वावगतिरिति भावः। अपिशब्देन पानं च मद्यस्य पुरीषलेपः। ''यदा कर्मसुकाम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तत्र स्वप्ननिदर्शने''। (छां-५-२-८) ''पुरुषं कृष्णं कृष्णदंतं पश्यते एवं हंन्ति।'' (ऐ-आ ३-२-४) इत्यादिश्रुति स्मृत्यादिसंग्रहः। यूपादित्यवाक्यवदुपचारोत्रेत्याह उपचारेति। अथ रथान्

तन्मिथ्यात्वासिद्धेश्च। यत्तु लिप्यक्षरैरक्षरग्रहणमिति, तत्र लिपिस्वरूपं सङ्केतो वर्णबुद्धिश्च न मिथ्याभूताः। न च वर्णबुद्धिरेव तद्वर्णबुद्धिहेतुः, आत्माश्रयप्रसङ्गात्। न च लिपिषु वर्णभ्रमः सत्यवर्णधीहेतुः, गौरवात्। सङ्केतवशादेव तत्सिद्धौ वर्णभ्रमस्य कारणत्वकल्पने प्रमाणाभावात्। भावेऽपि तत्पारमार्थ्यस्योक्तत्वाच्च। रेखागवयेऽपि सत्यादेव रेखासन्निवेशसादृश्यमात्रात् पूर्वानुभूतगवयस्य पुरुषस्य प्रथमं गवयस्मृतिः। अननुभूतगवयस्य तु न गवयस्मृतिरपि, रेखासादृश्यावोधनात्। कदाचिदाप्तवाक्येन गवयोपलक्षणात्पश्चाद्रेखायामपि कस्यचिद्गवयभ्रमस्संभवेदपि, तस्यापि न ततः परं किमपि ततस्सत्यगवयज्ञानमिति समस्तीति नासत्यात् सत्यधीः। चित्रपुरुषादिभिः पुराणवृत्तान्तादिज्ञानेऽपि उपदेशो वा, प्रत्युत पुरुषलिखितत्वव्यवसाये सति लिङ्गं वा निदानम्; न तु चित्रगोचरः पुरुषभ्रमः।

नादविशेषोपाधिकशब्दनानात्वेऽपि तत्तन्नादाभिव्यक्तरूपेण संबन्धग्रहणसहकृतशब्दस्वरूपमेवार्थधीहेतुः। तच्च विशेषणेन सह सत्यमेव। न चौपाधिकं शब्दनानात्वम्, एकरूपस्य शब्दस्यानुपलम्भात्, कल्पकाभावाच्च। क्रमयौगपद्यादिविकल्पदुःस्थत्वेन वर्णानां बोधकत्वे निरस्ते बोधकान्तरं किंचित्कल्प्यते; तच्च सामर्थ्यादिशालिभिः प्रत्यक्षयितुमपि शक्यते; ''स्फोटस्त्वं वर्णसंश्रय'' इति महाभारतेऽप्युच्यत इति चेन्न; वर्णानां स्फोटव्यञ्जकत्वेऽपि क्रमयौगपद्यादिविकल्पावताप्रसङ्गात्। परिहारस्य च समत्वात्। ''स्फोटस्त्वं वर्णसंश्रय'' इत्यस्य वर्णानामेव स्फुटीकरणशक्तिमात्रविषयत्वात्। समाधिग्रन्थेष्वपि शब्दब्रह्मापरनाम्नो वाचकेतरस्यैव कस्यचिद्वाचकहेतोः

रथयोगान् पथः सृजते स हि कर्तेति (बृ-६-३-१०) श्रुत्यनुसारि सिद्धांतेनाह स्वप्नार्थानामिति। लिपिः-रेखा संकेतः। अस्या लिपेरयं वर्णो बोद्धव्य इति बुद्धिविशेषः। गकारादिर्वर्णः। वर्णबुद्धेर्लिप्यक्षरपदेन विवक्षायां दूषणांतरमाह न चेति। भ्रमप्रमाभेदान्नात्माश्रय इति शंकते। न चेति ।वर्णभ्रमे संकेतभ्रमस्य कारणत्वमिति प्रमायामपि तस्यैव कारणत्वमिति भावः। तत्पारमार्थिकत्वस्य भ्रमसत्यत्वस्य। ननु रेखायां गवयभ्रमात्सत्यगवयस्मृतिरित्यत्राह रेखागवयेपीति। यद्यपि गोसदृशो गवय इत्युपलक्षणेन गवय प्रतिपत्त्यनंतरं रेखा गवयेऽपि गवय भ्रमः। तथापि तेन भ्रमेण ततः परं तस्याप्यर्थस्यासिद्धेर्ना सत्यात्सत्यधीरित्यत्राह यत्रत्विति। चित्रेति। चित्रे क्वचिच्चित्रं प्रदर्श्यतदनुरूपपुराणवृत्तांतस्योप देशाद्यत्रतु विस्रंभणीय पुरुषलिखितत्वनिश्चयः तत्रानुमानात्पुराणवृत्तांतज्ञान मित्यर्थः। नगो नागइत्यादौ कल्पित ह्रस्वदैर्घ्यादि विशिष्टशब्दत्वेन कारणत्वं। किंतु ह्रस्वदैर्घ्यनादाभिव्यक्तित्वेन। तथैवं संकेतग्रहा त्तत्र ह्रस्वदीर्घा नादाभिव्यक्तत्वविशेषणं।

शब्दस्वरूपं च सत्यामेवेत्याह नादेति। इदं चाभ्युपेत्योक्तं। वस्तुतो नानात्वह्रस्वदीर्घत्वदिकं स्वाभाविकमित्याह न चेति। कल्पकं शंकते क्रमेति। शब्देनवर्णाःप्रत्येकं बोधकाः संभूय वा। नाद्यः एक वर्णेन बोधसिद्धौ वर्णांतरवैयर्थ्यात्। न द्वितीयः यौगपद्यासंभवात्। तस्मात्वर्णातिरिक्तोर्थ बोधकः स्फोटो नामकश्चिदभ्युपेय इत्यर्थः। ''शब्दब्रह्मणिनिष्णातः परं ब्रह्माधिगच्छति''। इति प्रमानानुसाराद्योगिनामुपलंभोप्यस्तिहीत्याह तच्चेति। आगममपि प्रमाणयति स्फोट इति। एवं च पदस्फोटे सिद्धे लाघवात्तदैक्यकल्पित दैर्घ्यादिभेदादर्थ भेदधीरिति भावः। स्फुटीकरणशक्तिःअर्थ प्रतिपादनसामर्थ्यं। समाधिगंथेष्वपीति। वाचकशब्दापेक्षया भिन्नस्य वाचकताप्रयोजकस्य तात्पर्यग्रहानुकूलत्याय-

परब्रह्मानुसन्धानोपकारकतयाऽनुसन्धेयत्वविधेः, तावत एव च योगिभिस्साक्षात्कारणात्। स्फोटदूषणविस्तारस्त्वाचार्यादिग्रन्थेष्वनुसन्धेयः। वाष्पारोपितधूमेन यादृच्छिकाग्निसिद्धिस्तु न भ्रमसामर्थ्याधीना, अन्यथा सर्वत्र तद्भ्रमे तत्सिद्धिप्रसङ्गात्। अत एव हि तत्र प्रामाण्यमपि नाङ्गीक्रियते। अत्रापि यादृच्छिकब्रह्मासद्भावे शास्त्रादेस्स्वयमप्रमाणत्वात्प्रमाणान्तरासंभवाच्च, न तत्सत्यत्वव्यवसायः शक्यः। तदेवं लोकदृष्ट्या अस्मद्दृष्ट्या च सत्यादेव सत्यस्य सिद्धिः। भवद्दृष्ट्या त्वसत्यादसत्यस्यैव सिद्धिरिति न कथञ्चिदप्यसत्यात्सत्यसिद्धिरुदाहर्तुं शक्यते। असत्यस्यापि प्रतीतिः सत्यादेव दोषादेर्भवति, किं पुनस्सत्यस्य।

ननूपलक्षणत्वं नाम ज्ञाप्यवहिर्भाविऽप्युपलक्ष्यज्ञानहेतुत्वम्, तथा च मिथ्याभूतस्य विषयस्य उपलक्षणत्वाङ्गीकारे पुनरपि हेतुत्वं सिद्धमिति चेन्न; उपलक्षणं हि न स्वरूपेण ज्ञापयति, अपि तु स्वज्ञानेन; तथा च ज्ञानगतमेव हेतुत्वं न पुनर्विषयगतम्, विषयस्य मिथ्यात्वेन हेतुत्वायोगात्। अन्यथा कुलालविज्ञानविषयभूतस्यागामिघटस्य घटं प्रति हेतुत्वं स्यात्। न च तद्युज्यते, नियतपूर्ववृत्तित्वाभावात्। न च तावता विषयस्य हेतुत्वाभावे कुविन्दज्ञानस्यापि हेतुत्वं स्यादित्यतिप्रसङ्गश्शक्यते वक्तुम्। तद्वदत्रापि। कार्यस्य कारणकालासन्निधानात्तत्राहेतुत्वमिति चेत्तुल्यम्, अविशेषादसान्निध्यस्य। अथाप्यत्र पुनः अतिप्रसङ्गात् तत्परिहारर्थं विषयस्यापि हेतुत्वमकामेनापि स्वीकर्तव्यमिति चेत्, तर्हि कर्तृज्ञानविशेषणे घटादावपि किं न स्वीकार्यम्। कार्यकारणभावनियमस्यावश्याङ्गीकार्यत्वात् कारणायत्तमेव वैषम्यं तेषुतेषु स्वीक्रियत इति चेत्, तुल्यमत्रापि। तर्ह्यसत्त्वेऽपि कारणत्वमस्त्विति चेन्न; व्याघातात्। नियतपूर्वभावित्वं

कलापस्येत्यर्थः। विधेरिति। योगिनां मंत्रजपस्य ''तज्जपस्तदर्थ भावनमिति'' (पा-यो सू-१-२८) योगसूत्रेण तदर्थानु संधानात्मकत्वेन निर्णीतत्वादर्थानुसंधानानुकूलव्यापरश्शब्द ब्रह्मपदार्थ इति तन्निष्ठाः शब्दब्रह्मणीत्यादिना विधीयत इत्यर्थः। आचार्यग्रंथः-श्रुतप्रकाशिकादिः। अग्निसिद्धिरिति। सिद्धिः प्रमाणा भावाधीना सत्वशंकाविच्छित्तिः। सा च संवादिप्रमाणांतराधीनेति भावः। अत एवेति। अग्निसिद्धिसामर्थ्याभावादेव तद्वचक्तेः प्रमाणत्वेपि प्रमाणत्वेन न व्यवह्रियत इत्यर्थः। प्रमाणांतरसंवादाद्ब्रह्मसिद्धिरस्त्वित्यत्राह अत्रापीति। भवदृष्टयेति। पूर्वोक्तरीत्येति भावः। कौमुत्येनाप्यसत्यासत्यसिद्धिर्नास्तीत्याह असत्यस्यापीति।

ननु उपलक्षणत्वोक्तिरेवहेतुत्वोक्तेरिति शंकते ननूपलक्षणत्वं नामेति। उपलक्षणं हीति। तथा च ज्ञाप्यबहिर्भावि सत्युपलक्ष्यज्ञानहेतुज्ञानविषयत्वं। उपलक्षणत्वमित्यर्थः। ननु लाघवादुपलक्ष्यज्ञान हेतुत्वमेवोपलक्षणत्वं। तथाचा सतोपि हेतुरस्त्वित्यत्राह अन्यथेति। आगामि घटज्ञानस्य तच्चिकीर्षाद्वारा घटनिर्माणप्रयोजकत्वादिति भावः। विषयस्य हेतुत्वाभावे कुविंदज्ञानस्यापीत्यत्यत्राह कुविंद ज्ञानस्यापीति। भेदः कार्यस्य वैषम्यं शंकते कार्यस्यतर्हीति। तत्र-कार्ये असान्निध्यस्येति असत्यस्चेति शेषः तर्हीति। पटगोचरज्ञानस्य पटचिकीर्षाद्वारा हेतुत्वं माप्रसांक्षीदिति घटस्यादि हेतुत्वं वाच्यमित्यर्थः। तत्कार्यकारणायत्तमिति। कार्यकारणयोः पौर्वापर्यनियमात्कार्यस्य स्वपूर्व सत्ता भावरूप वैषम्यात्नकारणत्वमित्यर्थः। तुल्यमत्रापीति। पूर्वसत्वाभावस्य तुल्यत्वान्नकारणतेति भावः। आगामि

हि कारणत्वम्। व्यावहारिकमपि कारणत्वं तेनैव रूपेण निर्वहन्ति दुर्वैतण्डिकाः। पूर्वभावित्वं हि पूर्वकालसत्त्वमेव। कारणं हि पूर्वावधिः। अवधित्वं च स्वसद्भावेनैव। कारणानां नियतपूर्वत्वमिति सामान्यनिर्देशेऽपि तत्र सद्भावोऽसद्भावो वा कश्चिदेकः परिशिष्यते, परस्परविरोधात्। तत्रासद्भावपक्षस्त्वकारणलक्षणत्वादवधूयते। सद्भावपक्षस्त्ववशिष्यते। अतो नागामिनःकारणत्वम्। नाप्यत्यन्तासतः।तेन सत्यादेव कारणात्कार्यस्य, ज्ञापकाद्वा ज्ञाप्यस्य सिद्धिः। श्रुतिरपि- "कथमसतस्सज्जायेतेति," (छांदोग्य-६-२-२) "सन्मूला" (छांदोग्य-६-८-६) इति सदेव सोम्येदमग्र (छांदोग्य ६-२-१) इति च। ननु मिथ्यार्थज्ञानस्योपलक्ष्यज्ञानहेतुत्वेऽपि तज्ज्ञानोपलक्षणार्थं मिथ्यार्थस्य हेतुत्वमिति चेन्न; तत्रापि तज्ज्ञानस्यैव हेतुत्वात्। तथा चानवस्थेति चेन्न, अवश्यवेद्यत्वाभावात्। तथा च सत्यस्यैव ज्ञानस्य हेतुत्वमिति नासत्यात्सत्यसिद्धिः। किंच प्रतिविम्बाद्बिम्बसिद्धौ विप्रतिपन्नः प्रतिविम्बो बिम्बपूर्वकः प्रतिविम्बत्वादिति वा, प्रतिबिम्बज्ञानं विम्बज्ञानपूर्वकंप्रतिबिम्बज्ञानत्वादिति वा अनुमानप्रकृतिः। उभयत्रापि सत्यादेव ज्ञाप्यसिद्धिः,प्रतिविम्बत्वस्य ज्ञानस्य च सत्यत्वात्। नहि

घटादेरपि हेतुत्वमस्त्वित्यभिप्रायेण शंकते असत्वेपीति। व्यघातमुपपादयति नियतेति। कारणत्वमिति शेषः। युष्माकमपीष्टमित्याह व्यावहारिकमपीति। तेनैवनियतपूर्वभावत्वेनैव कारणपदार्थविवेचनेन कारणस्य सत्वमुक्तं। प्रकारांतरेणापि तदाह कारणं हीति। ननु भावित्वंशं परित्यज्य नियमेन न यस्मात्पूर्वकाले यत्सत्वं कारणत्वमित्युच्यते। इदं चासत्तोपि समानमित्याह नियतपूर्ववर्तित्वमिति। नियत पूर्वत्वमितीत्यनेन योऽर्थोभिधीयते तन्मात्रस्य निर्देशेपीत्यर्थः। तत्रेति। नियमेन यदीत्यत्र साकांक्षत्वादस्तीति नास्तीति वा वक्तव्यमित्यर्थः। नन्वस्ति नास्तीत्युभयमाकांक्षते। तत्रास्तित्वगर्भलक्षणं कारणत्वं दंडादिषु सत्सु नास्तित्वगर्भमसत्सु भवत्वित्यत्राह परस्परेति। उभयघटितं कारणत्वं न संभवतीति विरोधात्प्रत्येकघटितत्वेनानुगम इति भावः। नन्वन्यतरत्वेनान्वयोस्तु तथा च न विरोधो नाप्यननुगम इत्यत्राह तत्रासद्भावेति। कार्यात्पूर्वं सत्वस्य कारणत्वाभावव्याप्यतया ग्रहादसतः कारणत्वं विरुद्धमेवेत्यर्थः। किं चान्यतरत्वेनानुगमोपि भाविन्यकारणेऽति व्याप्तत्वात्तद्व्यावृत्यर्थं सत्वविशेषणमावश्यकं। तथा च लाघवात्तन्मात्रमेव परिशिष्यत इत्याह सद्भावपक्षस्त्विति। सिद्धिरिति। उत्पत्तिः ज्ञप्तिश्चेत्यर्थः। असतः कारणत्वं श्रुतिरेव प्रतिक्षिपतीत्याह श्रुतिरपीति। ननु प्रपंचस्य प्रकृतिमूलत्वात्प्रकृतेश्चाविद्यात्वात् तस्या मिथ्यासत्कारणत्वसिद्धिरित्यत्राहः। सन्मूला इति। प्रपंचोपादनस्याविद्याशब्दवाच्यत्वेपि न मिथ्यात्वमिति भावः। सदेवेति। इदमग्रे-स्वोत्पत्तेः पूर्वं सदेव सद्रूपकारणकमेवेत्यर्थः अवश्येति। उपलक्षणत्वस्येत्यर्थः। ननु ज्ञानं भयादिहेतुश्चेत् विषयस्योपलक्षणत्वज्ञानावश्यकत्वेप्युपलक्षणत्वमावश्यकं। अन्यथा ज्ञानांतरस्यापि भयादि कार्यजनकत्वापत्तेरिति चेन्न। ज्ञानविशेषस्य कारणत्वं तत्स्वरूपज्ञानमपेक्षितं चेत्तद्विषयज्ञानेन ज्ञायत इति तद्ज्ञानं नावश्यकमिति भावः। बिम्बानुमानेपि ज्ञानस्यैव हेतुत्वं पूर्वोक्तन्यायेन सिद्धं। इदानीं लिंगस्य हेतुत्व पक्षेपि नासत्यात्सत्यसिद्धिरित्याह किंचेति। विप्रतिपन्नइति पक्ष विशेषणमितिवानुमानप्रवृत्तिरिति एतत्प्रयोगानुरूपानुमानमित्यर्थः। ज्ञानस्य च ज्ञनत्वस्य चेत्यर्थः। ननु प्रतिबिंबचद्रं पक्षीकृत्य चंद्रत्वादिति हेतुप्रयोगे प्रतिबिंबचंद्रस्य तत्र चंद्रत्वस्य च पतिभासिकत्वे नासत्यात्सत्यसिद्धिस्यादित्यत्राह नहीति।

चन्द्रत्वादित्यनुमानं प्रयुज्यते, व्यभिचारात्। अपि तु चन्द्रत्वेनारोपितत्वादिति। चन्द्रत्वेनारोपितत्वं सत्यमेव। यथा रजतत्वेनारोपितमिदमिति ज्ञानं परमार्थविषयमेव; बाधकज्ञानत्वात्; तथा प्रतिबिम्बचन्द्रोऽयमिति ज्ञानं परमार्थविषयमेव। ततो वा नासत्यात्सत्यसिद्धिः। किंचासत्यत्वेऽपि प्रतिबिम्बादेर्ज्ञातृत्वज्ञानाद्यनेकसत्योपश्लेषेणैव सत्यबुद्धिहेतुत्वसिद्धिः।

यत्तूपलक्ष्यबहिर्भूतत्वे सत्युपलक्ष्यप्रतीतिजनकत्वमुपलक्षणत्वम्, ततश्च ज्ञानोपलक्षणतया विषयो यद्यभिमतस्स्यात्तर्हि तत्रैवासत्यात्सत्यप्रतिपत्तिरिति, तन्न; वस्तुतो विषयस्योपलक्षणत्वमपि नाभ्युपगच्छामः, स्वेनैव वा स्वविषयज्ञानान्तरेण वा सविषयज्ञानस्वरूपप्रकाशस्य प्रागेवोक्तत्वात्। अभ्युपगम्यापि वदामः. न हि भ्रमविषयस्यापि सर्वथा मिथ्यात्वं ब्रूमः, सामान्यरूपेण देशकालान्तरादिषु सत्त्वाभ्युपगमात्। रजतज्ञानमिति तेन रूपेण उपलक्षणे तु सत्यमेवोपलक्षणम्। शुक्तिरजतज्ञानमिति प्रबुद्धपरामर्शेऽपि शुक्तिरजतत्वतत्संसर्गाणां स्वरूपतः सत्यत्वात्, शुक्तिगतात्यन्ताभावप्रतियोगिनोऽपि रजतत्वस्य शुक्तिनिष्ठतया प्रतीयमानताया अपि सत्यत्वात्। शुक्तिनिष्ठतया प्रतीयमानत्वविशेषितरजतज्ञानमिति विशिष्टरजतेनोपलक्षणेऽपि न विशेषणविशेष्यतत्सम्बन्धादेरसत्यत्वं प्रपश्यामः। अतो न क्वचिदपि असत्यात्सत्यसिद्धिः। यद्यपि चासत्यानां केषांचिदन्वयव्यतिरेक-

---

सत्यचंद्रे व्यभिचारान्नतथानुमानमित्यर्थः। ननु प्रतिबिंबत्वस्य हेतुत्वेपि तदेव प्रातिभासिकं स्यदित्यत्राह अपित्विति। जलादौ चंद्रत्वेनारोपितत्वमेव प्रतिबिंबत्वमिति भावः। कथं परमार्थत्वमित्यत्राह यथेति। इदं रजतमिति ज्ञानस्य रजतत्वेनारोपितमिति ज्ञानं बाधकत्वात्तत्विषयमिति वाच्यं तथाच प्रतिबिंबमिति ज्ञानमपि बाधकत्वात् तत्त्वविषयमिति तद्विषयप्रतिबिंबत्वादेस्सत्यत्वमिति भावः। लिंगस्य कारणत्वेप्यसत्यात्सत्यसिद्ध्भावमुपसंहरति ततो वेति। विषयस्यासतः कारणत्वेपि मिथ्याभूताच्छास्त्रात् ब्रह्मसिद्धिमाह किं चेति। ज्ञातृत्वं-ज्ञानसंबंधः। आदिशब्देन ज्ञात्रादेः परिग्रहः। विषयातिरिक्तस्य सत्यस्य करणस्याभावेपि सिद्धिर्न भवतीति भावः।

असत्वं च मुपलक्षणत्वं विषयस्याभ्युपगम्य परिहृतं। अथानभ्युपगम्य परिहर्तुमनुवदति यत्विति। स्वप्रकाशेन ज्ञानेन ज्ञानविषययोर्युगपदेव ग्रहान्नविषयज्ञानत्वरूपमूललक्ष्यत्वं ज्ञानस्यास्ति। अनुव्यवसायपक्षेपि विशेषणज्ञानस्य। हेतुत्वान्नास्तीत्यर्थः। उपलक्षणत्वांगीकारेपि भ्रमविषयस्य सत्वेनासत्वाभावात्परिहरति अभ्युपगम्यापीति। सर्वथेति। स्वरूपतो न मिथ्यात्वं। किं तु प्रतिपन्नदेश कालयोरित्यर्थः। सामान्येति। देशकालविशेषान्निर्धारण सामान्यमिति भावः। आदिशब्देन क्रियागुणादिः। दूषणांतरमह रजतेत्यादिना। किं रजतज्ञानमिति ज्ञानेन सत्यस्योपलक्षणतया हेतुन्वमुच्यते उत शुक्तिरजतज्ञानमिति ज्ञाने इति विकल्पमभिप्रेत्य प्रथमे; दोषमाह रजतज्ञानमिति। रजतज्ञानमित्यत्र रजतत्वेनोपलक्षणता स्यादिति सत्यमेवोपलक्षणमित्यर्थः। द्वितीय आह-शुक्तिरजतेति। किं शुक्तिरजतज्ञानमित्यत्र शुक्तिपदस्य सप्तम्यततया ज्ञानान्वयेन शुक्तिविशेष्यकं रजतत्वप्रकारं ज्ञानमिति विवक्षितं उत शुक्तिपदस्य षष्ठ्यंततया रजतपदान्वयेन शुक्तिनिष्ठतया प्रतीयमानं यद्रजतत्वं तस्य ज्ञानमिति विवक्षितमिति विकल्पमभिप्रेत्य आद्य आह शुक्तिरजतत्वेति। द्वितीये शुक्तिगतेति विशेषणविशेष्य

नियमात्सत्यसिद्धिहेतुत्वनियमः, तथाऽपि नासत्यादेव सत्यब्रह्मसिद्धिनियमो व्यवहर्तुं शक्यते, अदर्शनादन्वयव्यतिरेकासिद्धेः। सम्भावनामात्रेऽपि यादृच्छिकसंवादिलिङ्गविभ्रमादिवत् प्रमाणत्वाभावात्। असत्यात्सत्यसिद्धिनिर्णायकस्यापि प्रमाणत्वानुपगमेन विवक्षितासिद्धेश्च। बाधाभावस्य च परिहरिष्यमाणत्वात्॥

यत्तूक्तम् विषयमिथ्यात्वे तद्विषयज्ञप्तेरपि सत्यत्वं न सिध्यतीति, तदपि हास्यम्। कारणमिथ्यात्वे कार्यमिथ्यात्वस्य च तुल्यन्यायतया दुस्त्यजत्वेनासत्यात्सत्योत्पत्तिभङ्गात्। एवं ज्ञापकमिथ्यात्वे ज्ञाप्यमिथ्यात्वमपि स्यात्। इदं च स्वसिद्धान्तोच्छेदनमनवेक्षमाणैरुच्यते, मिथ्याभूतप्रपञ्चसिद्धिरूपस्य ब्रह्मणोऽपि मिथ्यात्वप्रसङ्गात्। ब्रह्म स्वप्रकाशात्मकमेव; तथाऽपि साक्षिप्रकाशो वृत्तिप्रकाशो वा प्रपञ्चसिद्धिरूप इति चेन्न; तयोर्ब्रह्मव्यतिरेकेण सत्यत्वे भेदवादावतारात्। अव्यतिरेकेण सत्यत्वे तूक्तदोषानतिक्रमात्। असत्यत्वे तु तयोरपि ब्रह्माधीनसिद्धित्वेन तत्रैवोक्तदोषप्रसङ्गात्। अस्तु ब्रह्मणोऽपि मिथ्याविषयत्वं मिथ्यावेद्यत्वं च, तथाऽपि बाधाभावात् सत्यत्वमिति चेत्, तुल्यम्। सविषयावृत्तिस्तत्र बाध्यत इति चेन्न; स्वप्नादिषु दर्शनमस्त्येव, अर्थास्तु न सन्तीत्येव बाधकप्रत्ययोदयात्। विषयाभावे कथं विषयित्वम्, विषयित्वाभावे च कथं ज्ञानत्वमिति चेन्न; अतीतविषयानुमानादिषु विषयाभावेऽपि

तत्संबधादित्यादि शब्देन विशेषणग्रहः असत्यस्य सत्यसिद्धि हेतुत्वं नास्तीत्युक्तं। इदानीं तदभ्यपगम्यापि शास्त्राद्सत्यब्रह्मसिद्धिर्न संभवतीत्याह यद्यपि चेति। असत्यानामिति। प्रतिबिंबादीनामन्वयव्यतिरेकनियमहेतुसामर्थ्यादेव सर्वत्र प्रमाणाभाव प्रयुक्तासत्वशंका निवर्तकप्रमितिहेतुत्वं। न तु यदृच्छासंवादिलिंगवदनियम इत्यर्थः। तथापीति। प्रमाणांतरसंवादेन विना सत्यमेव ब्रह्म सिद्ध्यतीति निर्धारणं न संभवति। असत्यभूतस्य शास्त्रस्य ब्रह्मसिद्धेःप्रति बिंबवदन्यत्रान्वयव्यतिरेकादर्शनादित्यर्थः। अदर्शनादिति। प्रत्यक्षादि प्रमाणभावादित्यर्थः। नन्वेवमपि बाष्पारोपित धूमाद्वह्निसिद्धिरिव सत्यस्यापि ब्रह्मणस्सिद्धौ न विरोध इत्यत्राह संभावनेति। मानाभावप्रयुक्तासत्वशंकानिवर्तकत्वाभावादित्यर्थः। ननु सत्यब्रह्मसिद्धौ न संभावानामात्रं किं तु "वेदान्तविज्ञानसुनिश्चितार्थाः" (तै-महाना) इत्यादि प्रमाणैस्सत्य ब्रह्मसिद्धिहेतुत्वं निश्चीयते। सोपसर्गेणात्र विपर्ययव्यवच्छेदादित्याह असत्यादिति। तेषामपि प्रमाणानामसत्यतया तैः ब्रह्मसिद्धिजनकत्वस्यासत्यास्यापि शंकिततया सत्यब्रह्मसिद्धिजनकत्वनिर्णयो न सिद्ध्यतीत्यर्थः।

ननु बाधाभावाद्ब्रह्मसिद्धिस्संभवतीत्यत्राह बाधेति। मिथ्याभूत बाध प्रतिबंधस्या विशेषादित्यर्थः। मिथ्याभूतेति। एवं च ब्रह्मणः असत्यत्वं प्रपंच सत्यत्वं स्यादिति भावः। तथापीति। तयोस्सत्यत्वे ऽसत्यत्वे वा न विरोध इति भावः। उक्त दोषेति। ब्रह्मणो मिथ्यात्वप्रसंग इत्यर्थः। ब्रह्माधीनेति। मिथ्याभूतयोर्वृत्ति साक्षिणोः प्रकाशाधीनसिद्धित्वं वाच्यं तत्र ब्रह्मनान्यत्प्रकाशांगीकारे ऽनवस्थाप्रसंगात् ब्रह्माधीनसिद्धित्वं वक्तव्यं। तथा च विषयमिथ्यात्वात् ब्रह्ममिथ्यात्वं स्यादित्यर्थः। मिथ्याविषयत्वं - मिथ्याभूतप्रपंच -विषयत्वं। मिथ्यावेद्यत्वं मिथ्याभूतशास्त्र वेद्यत्वमित्यर्थः। तुल्यमिति। रज्जुसर्पज्ञानादिष्वविशेषः। स्वप्नादिष्विति साधारणस्य सत्वादिति भावः। विषयित्वाभाव इति। तस्य

विषयित्वदर्शनात्। यद्देशकालादिवृत्तितया यस्य प्रतिभासः, तद्देशकालादिवृत्तितया तस्य सद्भावे कथं तत्र विषयाभाव इति चेन्न; अत्रापि यथाकथञ्चिद्विषयस्य विद्यमानत्वात्। तदुक्तम्-

जन्मन्येकत्र भिन्ने वा तथा कालान्तरेऽपि वा। तद्देशे वान्यदेशे वा स्वप्नज्ञानस्य गोचरः'' ॥ इत्यादि। तथाऽपि प्रतिपन्नोपाधिसंभेदेन विषयस्य विद्यमानत्वं नास्तीति चेन्न; तावताऽपि तद्विषयत्वस्यानपायात्। प्रामाण्यमात्रमेव हि ततो निवर्तते। अख्यात्यादिपक्षे च क्वचिदपि विषयमिथ्यात्वानभ्युपगमात्, विषयमिथ्यात्वस्य च दूरतो निरस्तत्वात्; असत्ख्यातित्वस्यैवान्ततस्सत्त्वात्; तदसत्त्वे तत्पक्षाङ्गीकारस्यैवानुपपन्नत्वात्; उपपन्नत्वाङ्गीकारे चानियमात्, न कथञ्चिदप्यसत्यात्सत्यप्रति पत्तिरुदाहर्तुं शक्यते। यत्तु वस्तुतोऽसत्यस्यापि न सहसा पुनश्शास्त्रस्यासत्यता धियमधिरोहतीति। किं ततः? निर्विशेषबोधकत्वव्यवसायोपपत्तिरिति चेन्न; तदुपपत्तावपि तत्प्रमात्वसिद्धेः। आरोपितलिङ्गेन लिङ्गबुद्धिवत्। ततश्च सत्यब्रह्मव्यवसायासिद्धिः। न च शास्त्रस्यासत्यता सहसैव धियं नाधिरोहति, ब्रह्मव्यतिरिक्तसमस्तमिथ्यात्वश्रवणवेलायामेव शास्त्रस्य तत्प्रामाण्यस्याप्येकप्रहारेण बाध्यमानत्वात्। अन्यथा सजातीयविजातीयादिसमस्तभेदशून्यब्रह्मप्रतीत्यनुदयप्रसङ्गात्। एतेन प्रमाणस्वरूपमिथ्यात्वेऽपि प्रामाण्यमस्तीति विप्रलम्भव्यवहारोऽपि दत्तोत्तरः। न च बाधितानुवृत्त्या सदिति प्रतीत्यनुवृत्तेः शास्त्रस्य कारणत्वम्, वाष्पादौ बाधितानुवृत्त्या धूमादिभ्रमे वर्तमानेऽपि धूमध्वजानुमानाद्यदर्शनात्। यत्तु

ज्ञानस्वभावत्वादिति भावः। अत्रापीति। अन्यथाख्यातिपक्षेपि विषयस्य यत्र क्वापि सत्वादिति भावः। यथाकथंचित्सत्वमेव प्रदर्शयति तदुक्तमिति।

भिन्ने जन्मांतरेवेति। वा शब्देन तदानीं वेति गम्यते। स्वप्नज्ञानस्येत्युपलक्षणं भ्रांतिमात्रस्येत्यर्थः।

तावतापीति। प्रतिपन्नोपाधावभावेति। तन्निष्ठतया ज्ञानविषयत्वं सत्यमेवत्यर्थः। अख्यात्यपीत्यादिपदेन यथार्थख्यातिग्रहः। असत् ख्यातित्वस्येति। रजताविषयत्वादे(र) सत्यत्वांगीकारेप्यसद्विषयत्वं सदित्येव त्वयेष्टव्यं। अन्यथा मिथ्यात्वपक्षस्यैवानुपपन्नत्वादिति भावः। न तु रजताभावे रजतविषयत्वमनुपपन्नं। सतोऽविषयत्वे असद्विषयत्वमनुपपन्नत्वादंगीक्रियते इत्यत्राह उपपन्नेति। एवमपि विषयस्य सत्वे तद्विषयत्वमसदिति नियमो भग्न इत्यसद्विषयक लिंग ज्ञानादेवानुमितिरित्यर्थः। किं तत इति। स्वरूपेण सत्यत्वस्यानपायादित्यर्थः। निर्विशेषेति। प्रतिबंधकतासत्यता ज्ञानाभावादिति भावः। ततश्चेति ब्रह्मसदिति निश्चयस्य प्रमात्वनिश्चयाधीनत्वायान्निश्च संभवीदिति भावः। नचेति। धियमधिरोहेत्यर्थः। तदेवोपपादयति एकप्रहारेणेति। प्रपंचेन सहैव सप्रामाण्यस्य शास्त्रस्यापि मिथ्यात्वेन ज्ञायमानत्वादिति भावः। अन्यथेति। शास्त्रतत्प्रामाण्ययोः मिथ्यात्वेन ज्ञानाभावे शास्त्रप्रामाण्य भेदरूपभेदवत्वज्ञानादित्यर्थः। नन्वद्वैत प्रामाण्यस्यासत्यत्वेपि प्रामाण्यस्य सत्यत्वमारोपितलिंगहेतु प्रामाण्यस्यापि (मिथ्यात्व) मिति वैषम्याच्छास्त्रात्सत्यब्रह्मसिद्धिरिति कस्यचिन्मतं निरस्यति। एतेनेति। प्रामाण्यस्याप्येक प्रकारेण बाध्यत्वादित्यर्थः। वाष्पादिति। धूमो न भवति बाध ज्ञानेप्यैपाधिक धूम भ्रमाद्वह्न्यनुमित्य भावादित्यर्थः। यत्विति। अत्रपि बाधो निषेधः। कारण दोषेति। इयं प्रतीतिस्तद भाववति तद्गोचरा

मिथ्याभूतशास्त्रप्रतिपन्नस्यापि ब्रह्मणो बाधो न दृश्यत इति, तदसत्, कारणदोषनिश्चयादेव बाधसिद्धेः। तदुक्तम्-

''दुष्टकारणबोधे तु सिद्धेऽपि विषयान्तरे। अर्थात्तुल्यार्थतां प्राप्य बाधो गोदोहनादिवत्'' इति।

यत्तत्रानैकान्त्यमुक्तम्, तदपि मन्दम्, संवादकान्तराभावसहकृतकारणदोषनिश्चयस्य बाधाव्यभिचारित्वात्। शून्यमेव तत्त्वमिति माध्यमिकवाक्येन च साक्षाच्च बाधो दृश्यते। तद्वाक्यं दोषमूलत्वेनाप्रमाणत्वान्न बाधकमिति चेत्, तर्हि वेदान्तवाक्यान्यपि दोषमूलत्वेन भवतैवाभ्युपगतानि न विश्वबाधकानि स्युः। दोषावान्तरभेदकल्पनं चाप्रयोजकमेव। व्यावहारिकव्यवस्थया वेदान्तानां प्रामाण्यसिद्धिरिति चेत्, किं तद्व्यावहारिकत्वम्? अप्रामाणिकत्वेऽपि प्रामाणिकवत्प्रतिभासमानत्वमिति चेन्न; माध्यमिकैरपि तच्छास्त्रस्य तथैव प्रामाण्याभ्युपगमात्। त्वदनभ्युपगमस्य प्रयोजकत्वे तदनभ्युपगमस्यापि तत्प्रसङ्गाच्च। एवमनुपपन्नत्वेऽप्यनुपपन्नवद्भासमानत्वमित्यादीन्यपि लक्षणानि निरस्तानि। व्यावहारिकव्यवस्थया वेदप्रामाण्यं च त्वया दुरुपपादमिति स्थितमन्यत्र। अतस्स्वपक्षस्थापकप्रमाणपारमार्थ्यानभ्युपगतौ न कथञ्चिदपि स्वसिद्धान्तस्थितिरिति सिद्धं सत्यादेव सत्यस्य ब्रह्मणस्सिद्धिरिति॥

॥इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यामसत्यासत्यसिद्धिभङ्गवादःत्रिंशः॥३०॥

दुष्टकारणजन्यत्वादिनुमानद्वारा विषयाभाव प्रतीतेस्संभवाद्बाधकज्ञानं सिद्धमित्यर्थः। दुष्टकारणेत्यादि पूर्व मेवव्याख्यातं।

अनैकांत्यमुक्तमिति यदृच्छासंभवादि लिंगभ्रमादिभिरुक्तमित्यर्थः। संवादकांतरेति अत्र निश्चयो न हेतु प्रविष्टः तथाच संवादकांतराभावे सति दुष्टकारणजन्यत्वं हेतुरित्यर्थः। संवा तु साक्षादिति। दोषज्ञानादनुमितिद्वारा न बाधः अपि तु वाक्याद्बाधः प्रत्यक्षतो दृश्यत इत्यर्थः। नन्विद्यादोषमूलत्वेपि वक्तृभ्रमादि देषजन्यत्वाभावान्माध्यमिकवाक्यवैषम्यात् वेदस्य न बाधइत्यत्राह दोषेति। अन्यथादुष्टेंद्रियादेरपि वक्तृदोषाभावात्प्रामाण्यप्रसंगादिति भावः। व्यावहारिकं प्रामाण्यं दूषयति किमिति। तथैवेति। अप्रामणिकत्वेपि प्रमाणत्वेन स्वीकारात्तत्प्रमाणस्य प्रमाणिकवत्प्रतिभासमानत्वमस्त्विति भावः। मया तथानभ्युपगतत्वाद्व्यावहारिक प्रामाण्यं तत्र नास्तीत्याह त्वदिति। इत्यादीन्यपीति स्वारसिक बाधाभावाद्यौक्तिकस्य तुल्यत्वान्निरस्तानीत्यर्थः। दुरूपपादमित्यत्र दुरूपपादा च दुरूपपादंचेति विग्रहे अन्यथा ''नपुंसकमनपुंसकैकवचान्यतरस्यां'' (अष्टा-१-२-६-९) नपुंसकस्यैकशेषः एकवचनं च अपौरुषेयत्वं हि वक्तृदोषाभावमुखेन प्रामाण्यं सत्यस्यैव सतः प्रयोजयति। नासत्यस्या अन्यथा घट पदेऽ ध्यस्तजडपदस्य भ्रांतिजनकस्य वक्तृदोषाभावात्प्रामाण्यप्रसंगात्तस्माद्वेदस्यासत्यत्वे सत्यब्रह्मसिद्धिर्नस्यादित्यकामेनापि सत्यत्वमभ्युपेत्यमित्याह सत्यादेवेति।

इति श्रीकुशिककुलसुधाकरस्य वेदान्तचार्यस्य भागिनेयेन वत्सजलधिकौस्तुभनृसिंह नृसिंहराजेनकृतायां शतदूषणीटीकायां त्रिंशो वादस्समाप्तः॥

Due date of Return	Due date of Return	Due date of Return

प्रकाशयिष्यन्ते

१) शतदूषणी - वादाः ३१ आरभ्य ६६ पर्यन्ताः)
श्रीमद्वेदान्तदेशिकविरचिता नृसिंहराज विरचितया
नृसिंहराजीयटीकयासहिता (वादाः ३१ आरभ्य ५८ पर्यन्ताः)

२) शारीरकमीमांसा भाष्यं (श्री भाष्यं)
श्रीभगवद्रामनुज विरचितं

३) वेदान्तदीपः - वेदान्तसारः
(श्री भगवद्रामानुजविरचितः)
अधिकरणसारावली
श्रीमद्वेदान्तदेशिकविरचिता

४) श्री शारीरकशास्त्रार्थदीपिका
श्रीमद्रङ्गरामानुजविरचिता
श्री शारीरकब्रह्मसूत्र व्याख्या।

५) सद्वियविजयः श्री महाचार्य प्रणीता